१६९

॥अथश्रीसेतुबंध सटीक काव्यप्र०॥

Dr. BHAU DAJI

॥श्रीगणेशायनमः॥अथसटीकसेतुबंधकाव्यप्रारंभः॥ ॥ ॥असितमहसिसेतोपदृिकायामुदंचत्तटयुगघनमुक्ता
वर्णपंक्तिद्वयेन॥अलिखदिवकठिन्यायत्प्रशस्तिंसमुद्रःसजयतिरघुवंशग्रामणीरामचंद्रः॥१गंगांबुस्तिमितांघ्रिमौ-
लिदिनकृत्कन्यांबुकंबुप्रभंतत्त्वांपातुसमुद्रजागिरिजयोरानंदबीजंमहः॥ नाभीपंकजनालमूलमिलनात्सव्यांसकूल
स्थितो यत्रस्थूलमृणालवल्लितुलनामालंबतेभोगिराट्॥२॥ अंहे तदत्तकल्पितकरेषुमयवामभागमिभवदनं॥ पितुरर्द्ध
नागरीकंवपुरनुकुर्वत्तमिवकलये॥ ३॥आमेरोरासमुद्रादवतिवसुमतीयःप्रतापेनतावदूरेगांपातिमृत्योरपिकरमुच
त्तीर्थवाणिज्यवृत्त्योः॥ अप्यश्रीपीतुराणंजपतिचदिनकृत्नामयोगंविधत्ते गगांभोभिन्नमंभोनचपिबतिजयत्येषजल्ला
लदींद्रः॥४॥अगंवंगंकलिंगंसिलिहटतिपुराकामताकामरूपानांध्रंकर्नटिलाटद्रविडमरहठद्वारकाचोलपांड्यान्॥ भो-
टांतंमारुवारोकलमलयखुरासानखंधारजंबूकाशीकश्मीरठट्टाबलकबदकसाकाविलानूयःप्रशास्ति॥४॥कलियुगमहि
मापचीयमानश्रुतिसुरभिद्विजधर्म्मरक्षणाय॥ धृतसगुणतनुंतमप्रमेयंपुरुषमकब्बरसाहमानतोस्मि॥५॥ अंशेरघो
रुप्णकरस्यवंशेबभूवराजाकुलदेवएकः श्रीमानसिंहप्रमुखाजयंतियदन्वयेसंप्रतिकच्छवाहाः॥५॥सूनुस्तस्यविरोधि
वारणमदाकूपारकालानलोजंघालोरणरंगभूमिषुवलीयःक्षेमकोभवत्॥ वीरोदीप्तयशाःकदंबतुलितक्षीरोदनीरो
दरस्तस्याजायतपंचसायकरुचिर्माणिक्यरायःसुतः॥६॥एतस्यापिमुकुंददेवंदनपुण्योवदान्योजगन्मान्योमोकलराय
भूपतिरभूदाक्रान्तभूपान्तरः॥ तस्मादप्यजनिष्टबाहुजकुलक्षीराब्धिहीरायितोधीरायमहीमहेंद्रतिलकोवीरावली
भिस्ततः॥७॥नापारायनृपःकृपानिधिरभूदस्यापिसूनुर्महाचुद्दामप्रतिपक्षकुंजरघटासंघट्टकंठीरवः॥एषप्रेंखदनो
पचास्तुविजयव्यापारपारंगमंपुत्रंपातलरायमायतभुजादंडोदुर्लब्धवान्॥८॥रवानारायस्ततोभूदरिदहनघनःप्रौढ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ ॥ १॥ ॥ नाराचधारापातामाराभिवर्षीसमरभुविलसत्कार्मुकोगाढगर्जः॥ सूनुस्तेनारिसेनांबुधिकलशभवोलंभिकंदर्पकायश्च
च्छायस्त्रिलोकीतलविशदयशोवीचिनीचीकृतेंदुः॥९॥ अभवदुदयराजः प्रौढभूभृत्समाजप्रथितगुणगरिष्ठस्तत्सुतोधर्म
निष्ठः समरभुविनकेवानिर्जितायेनदेवाधिपतिपुरपुरंध्रीगीतदोर्विक्रमेण॥ १०॥ दिनेशभक्त्याजगतिप्रकाशस्ततः सुतो
जायतरामदासः॥ आसेवतेविष्णुमिवक्षितींद्रंयस्सर्वभावेनजलालदींद्रः॥ ११ धीराणांकाव्यचर्चाचतुरिमविधयेवि
क्रमादित्यवाचायंचक्रेकालिदासः कविकुमुदविधुः सेतुनामप्रबंधं॥ तद्व्याख्यासौष्ठवार्थंपरिपठितकुशलेरामदास
स्सएवग्रंथंजल्लालदींद्रक्षितिपतिवचसारामसेतुप्रदीपं॥ १२॥ इहसविधेसाधूनांभवितानकदापिदुर्जनप्रसरः गरु
डाद्रारसमीपेनभवतिगरलोद्गमः क्वापि॥ १३॥ व्याख्यानवसनमनघंदोषमसिम्लानमाचरंतिखलाः क्षालयतिसप
दिसाधुः साधुसमाजेनदुग्धेन॥ १४॥ उद्गिरतिरससमुदारंदुर्जनदलितापिमामकीव्याख्या॥ इक्षुलतामाधुर्यंशतशश्छि
न्नाधिकंदत्ते॥ १५॥ सेतौदुर्गेयदिविचरितुंवर्ततेवः समीहादत्तस्नेहंतदिहकवयोरामसेतुप्रदीपं॥ मोहध्वांतेसमदि
शमिते यद्रतामिः शिखाभिः कावाभावानधिगमकथा काच भीकंटकेभ्यः॥ १६ राजाहमायुधविलासवशीकृतो
हमित्यत्रमाकृतधियः कुरुतावहेलांमद्रात्रएवजगतीपतिरस्त्र शिक्षादक्षोमनीषिमुकुटंमनुराविरासीत्॥ १७॥
॥ इहतावन्महाराजप्रवरसेननिमित्तंमहाराजाधिराजविक्रमादित्येनाज्ञप्तोनिखिलकविचक्रचूडामणिः कालिदा
समहाशयः सेतुबंधप्रबंधंचिकीर्षुर्निर्विघ्नसमाप्त्यर्थंरामचंद्रात्मकमधुमथनरूपाभीष्टदेवतानमस्कारोपदेशमुखे
नमंगलमाचरन्नाह॥ ॥छ॥ ॥ णमहअढ्ढिअतुंगं अवसारिअवित्थिअंअणोणअगहिरं अप्पलहुअपरिसण्हंअ १
णाअपरमत्थपाअडंमहुमहणं॥ नमतअढ्ढितुंगंअप्रसारितविस्तृतंअनवनतगभीरं॥ अप्रलघुकंपरिश्लक्ष्णं

अज्ञातपरमार्थप्रकटंमधुमथनं हेजनाः मधुमथनंविष्णुंनमतनमस्कुरुततथाचाहमपितंप्रत्यस्मिप्रणतइत्याक्षेपल
भ्यं मधुंमथ्नातीतिमधुमथनस्तमितिकर्त्तरिल्युट् तेनतथाविधदुष्टदैत्यहंतुनामुनाविष्णुनास्मदमाविध्नवराकाइति
ध्वनितंकीदृशंतं अवर्द्धितश्चासौतुंगश्चेत्यवर्द्धिततुंगस्तंअत्रअवर्द्धितस्योर्द्ध्वदेशावच्छिन्नतारूपतुंगताया असंभवे
नाभासमानोविरोधः परमेश्वरस्याजन्यतयेतरकर्त्तृकवर्द्धितत्वाभावेनपरिह्रियते तथाचविरोधवदाभासतेनतुवि
रोधइतिविरोधाभासनामायमलंकारः किंचैतन्मूलाविभावनापिसंभाव्यते तदुक्तंदंडिनाप्रसिद्धहेतुव्यावृत्त्यायत्किंचित्का
रणांतरं यत्रस्वाभाविकत्वंवाविभाव्यंसाविभावनातथाच तुंगत्वेकार्येवर्द्धितत्वरूपप्रसिद्धव्यावृत्त्यातत्स्वभावत्वंविभा
व्यगम्यतेएवमन्यत्रापिविशेषणेतथाहिपुनः कीदृशंअप्रसारितश्चासौविस्तृतश्चेतितंएवंअनवनतश्चासौगभीरश्चेति
तथाविधंतथाचतुंगत्वविस्तृतत्वगभीरत्वरूपविशेषणत्रयेणोर्ध्वमध्याधः सकलदेशव्यापकत्वमुक्तंनन्वीश्वरस्यव्यापकंके
रूपत्वेब्रह्मैवेदंसर्वमित्यादिप्रतिपन्नजगद्रूपत्वविरोधइत्यतआह॥ अप्रलघुकोमहांश्चासौपरिश्लक्ष्णः कृशश्चेतितथा
तथाचस्थूलघटादिसूक्ष्मपरमाण्वादिसत्तारूपमित्यर्थः तथाचश्रुतेरपिब्रह्मसत्तैवसर्वेषांसत्तेत्यत्रतात्पर्यमिति
भावः एवंसतिब्रह्मणः स्थूलसूक्ष्मसकलसत्तात्मकत्वमेवसर्वात्मकत्वमितिस्थितेव्यक्ताव्यक्तत्वविरोधगंधोपिनेत्या
ह अज्ञातः परमार्थः तत्वंयस्यतथाविधश्चासौप्रकटश्चेतितथातथाचातींद्रियवर्गसत्तारूपत्वेनाप्रत्यक्षपरमार्थमप्यैं
द्रिकघटपटादिसत्तारूपत्वेनप्रकटंप्रत्यक्षमित्यर्थः यद्वातत्वमस्यादिवाक्यजन्यब्रह्माकारवृत्तिरहितानांपूर्णानंदस्वरूपे
णाप्रत्यक्षपरमार्थमपिचैतन्यांशेनप्रकटमित्यर्थः तद्वृत्तिमतांतद्रूपेणप्रकटमितिवा एवंपूर्ववद्धितुत्वादीनामप्रसा
रितत्वादिभिर्विरोधस्यसत्वेथजन्यतयातत्तदर्थविशेषणेचपरिहारश्चिंतनीयः श्लक्ष्णंदभ्रंकृशंतनु तथानिम्नंगभीर

२४ कशिपोर्योगित्वमप्यस्योक्तंतथाचाभगवद्गीतायदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहमितिप्रकृतेकर्त्तव्यग्रंथनायकोमानुषशरीरःश्रीरामावतारएवोक्त
सं.वं.का.स. इतिवस्तुनिर्देशः कृतस्तदुक्तंभरतेन सर्गबंधोमहाकाव्यमुच्यतेतस्यलक्षणं आशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमितिसंक्षेपः वयंतुमधुमथनपदश्लेषेणायेवर्णनीययोःसमु
द्रसेत्वोर्नतिरूपमंगलमुखेन वस्तुनिर्देशमेवकटाक्षयंति तथाहि हेसखे मधुमथनं समुद्रंनम नमस्कुरु मधुमथनं मधुजनकं मथनंयस्यतमिति मध्यपदलोपीसमासः वारुण्याःसमुद्र
मथनादेवोत्पत्तेरितिभावः अथवा मधुना दानवेन चरणविक्षेपादिना मथनंयस्यतंतथाकीदृशंहतवर्द्धिकतुंगंहतंचतदूर्द्धिरद्धिशालिकंजलंकल्लोलरूपंभंगुरत्वेनशश्वन्नाशवृद्धि
शालित्वान्तेनतुंगंमूर्द्धकाशव्यापकंपुनःकीदृशंअवशायविस्तृतंअपोश्नातिभक्षयतीत्यवप्रत्ययेन
|| ||२|| || भित्यमरः गभीरंदुराकलनीयमितिकेचित् उंदवापयोरित्यवशब्दस्य उकारदर्शन अणोाण अइतिएवंचतुंगत्व विस्तृत्वे अवशो वडवानलः सएवारिःशत्रु॰२
गर्भीत्वि श्लक्ष्णा त्वप्रकटत्वैस्तत्तदर्थविशेषणाकाशपृथिवीजलानिलतेजःस्वरूपीयस्थापकैस्तत्तद्रूपतयापंचभूतात्मकस्तेनावि
स्तृतमवृद्धिशीलंवेलानतिक्रामकत्वात् अथवा अवसारितविस्तृतं अकारो विष्णुर्वकारो वरुणस्ताभ्यां सारितंसारीकृतमित
रविलक्षणीकृतंतयोस्तत्राधिष्ठानात् सारितमितिसारशब्दात्तत्करोतीतिणिचिविस्तृतमिति विभिःपक्षिभिस्तृतंव्याप्तंज
लपक्षिबहुलत्वात् अथवाअवसारिकविस्तृतंअकारवकारशब्दानांविष्णुवरुणरत्नादिवाचकत्वातद्विशिष्टत्वेनच
सारीचासौकविस्तृतोजलपक्षिव्याप्तश्चेतितं यद्वाअपसारितविस्तृतं अपसारितआकृष्टोविस्तःसुवर्णोयस्मात्तंतथासमु
द्रस्यसुवर्णाकरत्वेनबहुशास्त्रदाहरणात् अणोणअगहिरं वनोनचगभीरं अकार श्वकार विकारःसमुच्चयेनोनचग
भीरमर्थादुक्तिविशेषणातिगभीरंनिषेधद्वयस्यप्रकृतार्थगमकत्वात् एवंअप्रमघ्नपरिश्लक्ष्णंकर्मधारयेणयतएवाप्रल
घुमतिमहान्तमतएवापरिश्लक्ष्णमकृशंएवंअनाकपरनास्त्रप्रकटंअनाकेनत्यएवपरमास्त्रेण रामस्याग्नेयशरेणप्रक
टमध्यक्षीभूतमितिसमुद्रपक्षःसेतुपक्षेतुहेजनामधुजलंमद्यात्यवपश्यतीतिमधुमथनःसेतुस्तंनमतविशेषणमहिम्ना
रामसेतोस्तुभ्राक्तत्संबंधेनचतस्यनमस्यत्वं मधुक्षौद्रे मद्येपुष्परसेपिचेतिविश्वः कीदृशंअवर्द्धितंतुंगंअखंडितोच्चं
अतिसाग्रमित्यर्थः चौरादिकस्यवर्द्धधातोःखंडनार्थत्वात् एवंअवशायविस्तृतं अवशोऽस्वाधीनः अरिःशत्रुर्दशकं
ठोयस्यतादृगकारोविष्णुरूपोरामस्तेनविस्तृतंघटितं अथवाअसारितापंप्राकृतेपूर्वनिपातानियमात् असारिताअ
वलीकृताआपोयेनतंप्रतिरुद्धजलमथचविस्तृतंपर्वतपक्षिव्याप्तमित्यर्थः अणोणअगहिरं अवाद् स्यनिषेधवाच २
कत्वापक्षेअनोनिषेधद्वयेनोक्तिविशेषणनगगभीरंनगेपर्वतेगभीरंकुब्जादिबाहुल्येनदुराकलनीयमित्यर्थःपर्वतम

पर्वतमयत्वात् निषेधावाचकत्वे अकार श्वकार विकारएवनो इतिशिरश्चालनेनपूर्ववदेवनगगभीरमितिबोध्यं एवंअप्रलघु
निमहतिकेसमुद्रजलेश्लक्ष्णं कृशंसूत्रायमाणत्वात्तथा अज्ञातपरमस्त्रप्रकटं अज्ञातंपरंपरदिग्वर्त्तियस्मादेतादृशंयन्म
स्तकंतेनप्रकटंदूरंतएवदृश्यमितिभ्रमः ॥ स्कंधकंनामछंदः ॥ तदुक्तं ॥ चउमत्ता अ गुणापुढ्ढे उत्तरद्धेहोसमरुआ
संखंधआविआणहु पिंगलपभणेइमुद्धिबहुसंभेआ ॥१॥ मधुमथनस्यहिरण्यकशिपुविदारणवर्णनेनप्रकृतग्रंथवि
घ्नविघातसामर्थ्यमाह ॥ ॥दणुएंदरुहिरलग्गोजस्सफुरंतेणहप्पविच्छड्डुगुथंतो विवलीआघयणं सुएमहासुरलच्छी ॥
दनुजेंद्ररुधिरलग्नेयस्य स्फुरतिनखप्रभाविच्छर्दोव्याकुलाविपलायितागलितइवस्तनांशुकेमहासुरलक्ष्मी यस्यन
रसिंहरूपिणोमधुमथनस्यप्रभायाःस्वाभाविक्याःश्वेतायाविच्छर्दःसमूहोयत्रतथाभूतेनखस्फुरत्पुरोविदारणसमयेप्रका
शमानेसतिमहासुरस्यहिरण्यकशिपोःश्रीव्याकुलासतीविपलायितातस्योपमर्देविपर्यासप्राप्ताअपगतेत्यर्थःवि
कटनखदर्शनजन्यभयादितिभावः यत्पदस्योत्तरवाक्यगतत्वात्पूर्वस्कंधकेतत्पदापेक्षा कथंभूतेप्रभाविच्छर्दनखेलग्नद
नुजेंद्ररुधिरेलग्नयत्रप्राकृतत्वात्पूर्वनिपातानियमः लग्नंदनुजेंद्रस्यरुधिरंयत्रतादृशिकस्मिन्निवस्तिलनांशुकेगलि
तइवस्खलितइवनखानांमहत्वादस्मिन्व्यापनांतदेकदेशलग्नरुधिरतयालक्ष्म्याअर्द्धरक्तश्वेतवस्त्रत्वेनोत्प्रेक्षाकृता
अन्यापिस्त्रीस्तनवसनविपर्यासेसव्रीडापलायतइतिध्वनिः तथाचम्रियमाणोदानवेंद्रोनिश्रीकोवृत्तइतितात्पर्यं व्याकुल
विपलायिताइत्यपिव्याख्यानंतत्रव्याकुलस्यापयानमत्रावाच्यमित्ययेरर्थः । विछर्दस्तुसमूहेस्याद्युतौविस्लेषभेदयोः ॥२॥
जन्मांतरेपिदुष्टदैत्यनिवर्हणक्षमतांविशेषमाह ॥ ॥पीणत्तणदुग्गेज्झंजस्सभुआअत्तणिठ्ठुरपरिग्गहिअं । रिवुस्सविसम
वलिअंकंठंदुक्खेणजीविअंवोलीणं ॥ पीनत्वदुर्ग्राह्यंयस्यभुजांतनिष्ठुरपरिगृहीतं अरिपुस्यविषमवलितंकंठंदुःखेन

॥ ॥ ३॥ ॥ जीवितं व्यतिक्रांतं यस्य कृष्णरूपिणो मधुःमथनस्य भुजौ तौ हस्तौ ताभ्यां निष्ठुरं यथा स्यादेवं परिसर्वतो भावेन गृहीतं धृतं
अरिष्टस्य वृषभरूपिणोऽसुरविशेषस्य कंठं कर्मजीवितं कर्तृ व्यतिक्रांतं अपगतमित्यर्थः भुजायंत्रेति प्रकृतो भियस्संवद्ध
भुजा युगलरूपयंत्रपरिगृहीतमिति वा कंठं किंदृशं पिनद्धत्वेन दुर्ग्राह्यमत एव विषमं विपर्यस्तं यथा स्यादेवं वलितं वक्री
कृतमामोटितमिति यावत् पीनत्वेनस्न्यक्कृधर्तुमशक्यत्वात् अत्र जीवितस्य दुःख व्यतिक्रमणे विषमवलनं हेतुस्तस्य
च निष्ठुर परिग्रहणं तस्य च दुर्ग्राह्यत्वमित्युत्तरोत्तरं प्रतिपूर्व्वपूर्व्वस्य हेतुत्वमिति हेतुपरंपरालंकारः किंच विषमवलना
दनुमार्गोलाभेन जीवितस्य कंठात् दुःखेन निर्गमो वृत्त इति वक्रनानिजमायतनमरिष्टशरीरं त्यक्तुमशक्नुवतोपि जी
वितस्य परमेश्वरहस्तेन बहिर्गमनं पुण्यहेतुरित्याशयेनैव सदुःखं निष्क्रमणमासीदित्युत्प्रेक्षा व्यज्यते॥ ॥३॥ ॥मधु
मथनस्य शमावतारसीतां प्रत्यनुरागातिशयवर्णनोपयोगित्वेन कृष्णावतारेपि सत्यभामा प्रत्यनुरागप्रकर्षमाह॥ ॥
ओगाहिअमहिवेढो जेनपरूढगुणमूललद्धत्थामो॥उम्मूलंतेणदुमं पारोहो व्व खुडिओ महेदस्स जसो॥ अवगाहि
तमहीवेष्टं येन प्ररूढगुणमूललब्धस्थाम॥उन्मूलयता द्रुमं प्ररोह इव खंडि महेंद्रस्य यशः येन कृष्णरूपिणा द्रुमं पारि
जातमुन्मूलयतोत्पाटयता महेंद्रस्य यशः खंडितं कृष्णकृत्या पारिजातस्य मर्त्यागमनेन महेंद्रस्यैवायं इति प्रकर्षेगते
युद्धे च पराजयो वृत्त इति भावः यशः। कीदृशं अवगाहितं व्याप्तं महीवेष्टं येन तत्तथा एवं प्ररूढा उपचिता ये गुणा दान
शौर्यादयस्त एव मूलं कारणं तेन लब्धं स्थाम स्थैर्यं येन तत् यशसो दानादि मूलकत्वात् कीदृशिव प्ररोहः शिफा तया
पारिजातस्य महेंद्रयशा एव प्ररोह इति भावः अन्येनापि द्रुमोत्पाटने प्ररोहः खंड्यते प्ररोहोपि कीदृक अवगाहित मही २
वेष्टो भूमिनिष्टत्वात् एवं प्ररूढाए ये गुणाः प्ररोहतत्तवः तैर्लब्धं स्थाम येन तत्तथा वस्तुं तु यथा द्रुममुत्पाटयता कृ
ष्णेन प्ररोहः खंडितस्तथा महेंद्रयशोपि खंडितमित्यन्यत् समानमिति सहोपमा चतुस्कंधकीयमादिकुलकरूपा तदु
क्तं कुलकं बहुभिः श्लोकैः साकांक्षैरेकवाक्यता द्वाभ्यां तु युग्मकं नाम तुल्यार्थाभ्यां तु चुंबकं ॥४॥ अथ ज्ञानप्रदत्वेन शि
वं स्तौति॥ णमह अजस्सफुडरवं कंठच्छाआ घडंत णअणग्गि सिहं फुरइ फुरिअट्टहासं उद्धपलित्त तिमिरं मिदिसा अक्कं
॥नमत वयस्य स्फुटरवं कंठच्छाया घटमान नयनाग्निशिखं स्फुरति स्फुरिताट्टहासं ऊर्द्धप्रदीप्त तिमिरमिव दिक्
चक्रं तं च शिवं नमत विशेषण महिम्नात ल्लाभः यच्छंद योगात्तच्छंदाध्याहारोपितं कं यस्य कंठच्छायया घटमाना संब
ध्यमाना नयनाग्नेः शिखा यत्र तथाभूतं दिक्चक्रं स्फुरति शोभते विचित्ररूपत्वात् नृत्यकाले भ्रमणेन कंठकांति लोच
नाग्नि शिखायोरभिवृद्धेरिति भावः दिक्चक्रं कीदृशं स्फुरितोऽट्टहासो यत्र तत् कांति प्रसरणात् एवं स्फुटो रवो हास कालीनः
शब्दो यत्र तथाव प्रेक्षंते कीदृशमिव ऊर्द्ध उपरिभागे प्रदीप्तं दग्धं भवत्तिमिरं यत्र तादृशमिव कंठछायायाः श्यामत्वेन तिमिरे
णअट्टहासस्य कंठछायासंबंधेन शबलतया भूतेनरवस्य दाह कालीनशब्देन च साम्यं गम्यते यद्वा ऊर्द्धप्रदीप्ततिमिरमिव
स्फुरति भासते प्रेक्षकाणामर्थादिति समन्वयः अर्थांतरं समानमेव किंचिच्चु दिशां चक्रं चक्राकारता यत्र तादृशां मंडली
नृत्यं यस्य स्फुरति नृत्यस्य विशेषणमन्यत्सर्व्वमिति वदंति॥ ॥५॥ ॥पुनस्तं देवमाह॥ ॥ वेवइ जस्स सविडियं बलीउं
महइ पुलआइ अत्थणअलसं॥पेम्मसहाव विमुहिअं वीओवा सगमपॄ सुअंवा मइं। वेपते यस्य सव्रीडं वलितुं मह
ति पुलकाचित स्तनकलशं प्रेमस्वभाव विमुखितं द्वितीयावकाशगमनोत्सुकं वामार्द्धं यस्यार्द्धं नारीश्वरमूर्त्तेर्वामार्द्धं
गौरीशरीरं वामभागो वेपते वलितुं वक्रीभवितुं महति वांछति नृत्यभ्रमिं कुर्व्वति महेशे स्त्री स्वभावे न भयादिति
भावः किंभूतं वामार्द्धं सव्रीडं सलज्जं एवं पुलकेनाचितः स्तनकलशो यत्र तत् तथा च भयोत्पन्नैः पुलकैः प्रेक्षकाणां सात्वि

कविकारत्वंकास्यादितिलज्जावक्रीभवनप्रतिहेतुमाह द्वितीयावकाशंदक्षिणार्द्धप्रतिगमनेनत्सुकमुत्कंठितंलक्ष्मीणां
भयेनस्वामिपरिरंभणमितिस्वभावः पुनः कीदृशंप्रेमस्वभावेनप्रियंप्रत्यनुरागेण विमुषितंकिंकर्त्तव्यतामूढंतत्रगम
नेलज्जाअगमनेभयमितिदोलायमानमतएवगमनेच्छामात्रंनतुकृतिरितितात्पर्यंवस्तुतस्तुभर्त्तुर्नृत्यकालीनकटाक्ष
भुजक्षेपादिभिरुत्पन्नसात्त्विकविकारमतएवसलज्जंकामोत्पत्त्यादक्षिणार्द्धमालिंगितुमुत्कंठितमपिलज्जयानिवर्त्तमा
नंवेपतेपुरःपश्चात्संचालि रवालिमित्यर्थः त दुक्तंप्रेमस्वभावेतिप्रियानुरागेणगंतुकंलज्जयाकिंकर्त्तव्यमूढतयावि
मुषितमतएवोक्तंवलितुमाकांक्षतिननुवलतइतिसारं॥ ॥६॥ ॥शिवस्याट्टहासंमानंदमूलकत्वेनवर्णयति॥जस्सविल
गंतिणहफुडपडिसद्दादिसाअलपडिकव लिआ जोण्हाकल्लोलाविअससिधवलासुरअणीसुह सिअछेआ यस्य
विलगंतिनभःस्फुटप्रतिशब्दादिक्तटप्रतिस्खलिताः ज्योत्स्नाकल्लोलाइवधवलासुरजनीपुहसितछेदाः यस्यहसितं
यस्यहसितेकदेशाज्योत्स्नीषुरात्रिषुनभोविलगंतिवियद्व्यापकाभवंति अंतराअंतराविछिद्यविछिद्योत्पन्नाखंडाइत्युक्तमिति
वाकथंभूताःस्फुटप्रतिरवोयेषांतेएवंदिक्तलेषुप्रतिस्खलिताध्वनीभूयपरावृत्ताःपुनःकथंभूताइवज्योत्स्नायाःकल्लोला
इवश्वेतत्वात् विरस्थितचंद्रकलायावाअन्येपिकल्लोलाःपर्व्वतादिषुस्खलिताःसंतऊर्द्ध्वदिशश्चव्याप्नुवंतिप्रतिशब्दहेतुत्वा
च्छालिनश्चभवंति एतेनहसितस्यव्यापकत्वमुक्तं ज्योत्स्नाकल्लोलाइवेतिसहोपमावायथानिदिक्तलस्खलिताइवनभोवि
लगंतितथैतेपीत्युत्प्रेक्षामूलकं॥ ॥७॥ ॥नृत्यस्यचांद्रिकमाह॥ पाहारंभसमुहिआजस्सभ उभ्भंतमच्छपहअजलरआ हों
तिसलिलुदुमाइअधूमाअंतवडवामुहामअरहरा नृत्यारंभक्षुभितायस्यभयोद्भ्रांतमत्स्यप्रहतजलरयाःभवंतिसलि
लोध्मापितधूमायमानवडवामुखामकरगृहाः॥ मकरगृहाःसप्तापिसमुद्रायस्यनृत्यारंभएवक्षुभिताःसंतईदृशाभवं
तिकीदृशाःभयेनोद्भ्रातामूर्छिताइतस्ततश्चारिणोवायेमत्स्यास्तैःप्रहतःप्रतिरुद्धोजलस्यरयोवेगोयेषुतेतथामत्स्यानां ४

महत्त्वेनसतिसंचारेसमुद्रसेतुभावादितिभावःपुनःकीदृशाःसलिलेनोध्मापितंनतुध्मापयितुंनिर्व्वाणीकर्त्तुमारब्धमतए
वधूमायमानंधूमसमुद्गमद्वडवानलमुखंवडवानलोएषुतेवरणक्षेपेनधारणिक्षोभेजलधिजलक्षोभादारंद्रेधनसंबंधा
दनलेस्यधूमायमानत्वंध्मापितइत्यादिकर्मणिक्तःनतुशब्दोत्राभाववा चीतिनाग्निदीपनाभावोलभ्यंतेउत्कृतिरुद्धासइ
त्यादौतथादृष्टत्वादित्यपिवतुर्भिरादिकुलकं॥ ॥८॥ ॥अथस्थानवधानपरिजिहीर्षयाकाव्यस्यदुष्करत्वमाह॥ ॥अहि
णवराआरद्धाचुक्कखलिएसुविहडिअपरिट्ठविआ मेत्तिव्वयमुहरसिआणिव्वोढुंहोइदुक्करंकव्वकहा॥अभिनवराज्ञा
रब्धाच्युतस्खलितेषुविघटितपरिस्थापिता मैत्रीवप्रमुखरसिकानिर्वोढुंभवतिदुष्करंकाव्यकथा॥ काव्यकथानिर्वो
दुमाद्यंतंयावत्तुल्यतयानिष्पादयितुंदुष्करंयथास्यादेवंभवतिदुःखनिर्वाह्ये त्यर्थःकेवमैत्रीवसाप्याद्यापात्तंयावत्समत
यानिर्वाहयितुंदुष्करंभवतिकाव्यकथा कीदृशीअभिनवेनराज्ञाप्रवरसेनेनारब्धा कालिदासद्वारातस्यैवकृतिरियमित्या
शयःप्रवरसेनोभोजदेवइतिकेचित्पुनःकीदृशीच्युतोनवहितःकविस्तस्यस्खलितेषुछंदोभंगादिनाअनवधानेषुवि
घटितास तीपरिस्थापितापरिष्कारंप्रापिताएवंप्रमुखेरसिकोयत्रतादृशीमैत्र्यपिअभिनवेनरागेणानुबंधेनारब्धाएवं
च्युतोनवहितोयोजनस्तस्यस्खलितेष्वपराधेषुविघटिताततःपुनरपराधमार्जनादिनापरिस्थापिताप्रथमावस्थांप्रापि
ताएवंप्रमुखरसिकाचतथाचमैत्रीवकाव्यंसहृदयनिर्वाह्यमितिभावाःकाव्यकथापक्षेप्रमुखरसःशृंगारादिरुद्युक्ता
चुक्कशब्दःप्रमादेदेशीतिकेचित्॥ ॥९॥ ॥काव्यनामुपादेयताप्रयोजकंरूपमाह॥ ॥परिवड्ढइविण्णाणंसंभावि
ज्जइजसोविढप्पंतिगुणा सुव्वइसुउरिसचरिअंकिंतंजे णणहरंतिकव्वालावा॥परिवर्द्धतेविज्ञानंसंभाव्यतेयशो
र्जंतेगुणाः॥श्रूयंतेसुपुरुषाचरितंकिंतद्येननहरंति काव्यलापाः॥ काव्यनामालापायेननहरंतिनमनोहारिणोभवंति

॥ ॥५॥ ॥ किंतद्अपितुनकिनपीत्यर्थः तदाह॥ यतः काव्यात्विज्ञानं विशिष्टज्ञानंवर्द्धतेतथा यशः संभाव्यतेगुणाविवेकादयोऽर्ज्यंते
सुपुरुषस्यरामादेश्चरितं श्रूयतेअतएतस्योपादेयत्वं तदुक्तंकाव्यंयशसेर्थकृतेव्यवहारविदे।शिवेतरक्षतयइत्यादि परवि
श्वतइतिवाअर्ज्जविढप्पिरितिविढप्पिरादेशः॥ ॥१०॥ ॥ निर्दोषकाव्यस्यातिदुष्करत्वमाह॥ इछाइवधणरिद्धिजोव्वणलध
वश्राहिआईअसिरी।दुक्खंसंभाविज्जइबंधछाआइअहिणवाअत्थगई॥ इच्छयेवधनऋद्धिःयौवनलब्धेवाभिजात्य
श्रीः॥ दुखंसभाव्यतेबंधछाययाअभिनवाअर्थगतिः। बंधकाव्यशरीरंछंदोवातस्यछायाकांतिस्तयाबंधरन्यतयाअ
भिनवार्थगतिरर्थप्रकारः दुःखंयथास्यादेवंसंभाव्यतेसंबध्यतेगतिविधाप्रकारास्तत्यार्थाःकपाकेवइछया धनऋद्धि
रिवयथाइछया धनऋद्धिदुखंसंबध्यतेइछनुरूपाधनसमृद्धिदुःखसाध्येत्यर्थः अभिजात्यायौवनलब्धाश्रीरिवयथा
कुलीनतयायौवनलब्धाश्रीदुखंसंबध्यते यौवनोद्धतयाश्रियाअकर्त्तव्यमपिक्रियतेतत्रकुलीनतानतिष्ठतीत्यर्थः त
थाचापूर्वार्थघटनंबंधछायावद्द्वयमपि मिथोयोजयितुंदुष्करमितितात्पर्यं॥ ॥११॥ ॥ कर्त्तव्यकाव्यमाह॥ तंतिअस
वंदिमोकंसमत्थतेलोक्कहिअअसल्लुद्धरणं सुणहअणुराअइण्हंसीआदुक्खक्खअंदहमुहस्सवहंतंत्रिदशावंदीमो
क्षंसमस्तसमस्तत्रैलोक्यहृदयशल्योधरणं श्रणुतअनुरागचिह्नंसीतादुःखक्षयंदशमुखस्यवधंतंप्रसिधंदशमुख
वधं श्रणुतएतद्ग्रंथश्रवणेनैवतच्छ्रवणोपपत्तेरत्रप्राधान्यतस्तस्यैववर्णितत्वात्शास्त्रज्ञानविषयत्वेनार्थपिअवणा
र्थकशास्त्रप्रयोगोयुक्तंश्रुतमितिवत्प्रसिद्धार्थकत्वेनतच्छंदस्यनयच्छब्दापेक्षातंकथंभूतंत्रिदशबंदीनांमोक्षःपरित्या
गोयस्मात्समस्तत्रैलोक्यस्यहृदयस्थशल्यानामुद्धारश्चयस्माद्अनुरागस्यप्रेम्णश्चिह्नंज्ञापकंचयत्सीतांप्रतिरामा
नुरागस्यरावणवधावधिकत्वात्सीतायादुखस्यक्षयश्चयेनतथाभूतंरावणवधानंतरंबंदीकृतदेवस्त्रीणापरित्यागो
लोकानांचरावणभयेनाप्रकाशनाहृदयस्थानांचशल्यानामुद्धारस्सीतायाअशोकवनिकानिवासादिकेशनिवृत्ति

रित्यर्थः॥ अथचदशमुखवधनामानंग्रंथंश्रणुततमधिकृत्यप्रवृत्तत्वात्तन्नामकत्वंकिंभूतंत्रिदशावंदीनांमोक्षोव
र्णितोयत्रतथाभूतमनुरागचिह्नमित्यनुरागपदचिह्नितंप्रत्याश्वासाकात्तस्कंधके अनुरागपदसत्वादितिभावः॥
॥१२॥ ॥ अथप्रकृतग्रंथकथांप्रस्तौति॥ ॥अहपडिवणविरोहेराहववम्महसरेणमाणब्भहिए।विद्धाइवालिहिअ
एराअसिरीअअहिसारिएसुग्गीवे अथप्रतिपन्नविरोधेराघवमन्मथशरेणमानाभ्यधिकेविद्धयावालिहृदयेराज
।श्रियाअभिसारितेसुग्रीवे अथवर्षतुप्रभृतसीताविरहदुखानुभवानंतरंकथंकथमपिसीतानुद्धारजन्येसीतायाःस्वस्य
चदुखेसत्येवप्राणत्यागइत्यपौरुषमकीर्त्तिकरंचेतिदुस्सहविरहकष्टेपिप्राणधारणपूर्वंदाशरथेरामस्यगतोवनस
मयोवर्षाइत्युत्तरस्कंधकेनसम्बन्धः अथशब्दस्यग्रंथारंभेमंगलत्वंवातदुक्तंॐकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा॥
कंठंभित्वाविनिर्यातौतेनमांगलिकावुभौ कस्मिन्सतिराजश्रियावालिलक्ष्म्यासुग्रीवेअभिसारितेस्वपदमानितेसति
कथंभूतयाराघवोरामःसएवमन्मथस्तस्यशरेणवालिरूपेहृदयेविद्धयाजातप्रहारयाकिंभूतेवालिहृदयेप्रतिपन्नः
प्राप्तोविरोधोयत्रतथाभूतेएवंमानेनचित्तसमुन्नत्याअभ्यधिकेअयंभावः राजश्रियोनायिकायानायकःसुग्रीवोहृदयं
वालीपरमप्रियत्वात्तत्रराज्यादिनिमित्तविरोधोत्पत्तावहंकाराधिकेवालिनिरामेणहतेसुग्रीवेणराजलक्ष्मीर्लब्धात
थासतीत्यर्थः एवंरागस्यानुरागस्यश्रीर्यत्रसारागश्रीर्नायिकातयाप्रतिपन्नःप्राप्तोविरोधोनायकापराधजन्मायत्रतां
दृशिकलिनिवक्रीभवनंवालः तद्वतिवालिनिहृदयेमानेनाभ्यधिकेमहत्तरेचराघवेशाखंवसंतपातीतिराघपो
वसंतसाहचर्योयोमन्मथस्तस्यशरेणविद्धयासत्यासुग्रीवसुकंठोनायकोभिसार्यते॥ स्वपर्द्दमानीयतइतिध्वनिः

DR BHAU DAJI MEMORIAL

पद्यमानालिनसं

॥ ॥६॥॥ ॥१३॥ववसा अरइपओसोरोसगइन्द दिढसिंखलापडिबंधो॥कहकह विदासरहिणो ज अकेसरिपंजरोगओ॥ ॥ ॥
व्यवसायरविप्रदोषोरोषगजेंद्रदृढशृंखलाप्रतिबं धः॥कथंकथमपिदाशरथेजयकेसरिपंजरोगतो घनसमयः घनस
यःकीदृशः व्यवसायस्सीताप्रत्युधारहेतुव्यापारःसएवरविरसंतापकत्वात्।तस्यप्रदोषःकलिरोधानकालःएवंरोषएवगजेंद्रः
परोप मर्दकत्वात् तस्यदृढशृंखलायाप्रतिबंधोबंधनंतद्रूपःप्रसरणप्रतिबंधकत्वात् तथाजयएवकेस रीप्रतिपक्षशून्य
त्वात्तस्यपंजरोबंधस्थानमवरोधकत्वादित्यर्थःरूपकमत्रालंकारस्तथाचदंडीनपंभेवतिरोभूतभेदा रूपकमि ष्यत
इति॥ युग्मकम्॥१४॥अथरावणस्यावस्थामाह॥ ॥गमिआकलंववाआदिठ्ठंमेहंधआरिअंगअणअलं।सहिओगज्जि
अस्सद्दोतहविहुसेणत्थिजीविएआसंघो॥गमिताःकदंबवाताःदृष्टंमेघांधकारितंगगनतलं।साढोगर्जितशब्दस्तथापिरुख
नास्तिजीवितेध्यवसायः॥सीताविरहविधुरेणरामेणवर्षर्तौसीतारमुद्धृत्यपुनरर्द्रक्ष्यामीतिप्रत्याशायाकथंकथमपिधैर्येम
वलंब्यकदंबवातागमितादुःखहेतवोप्यतिवाहितामेघैनांधकारितंगगनतलंचदृष्टंनतुचक्षुःसुखहेतुत्वेनावसितंगर्जि
तशब्दस्यसोढोनतुश्रुतिसुखमधिगतमितिअद्यपितथाप्यस्यरामस्यशारदिकथंकुमुदवनवातागमतितव्याःकथंचशारदं
द्रचंद्रिकाधवलंनभोद्रष्टव्यंकथंवाकलहंसकलध्वनिःसोढव्यइतिलक्षुःश्रवणव्यापारेणैवकुव्यवांकयापुनर्जीवितव्यं
मयेत्यध्यवसायोनाभूदितिभावइतिसंप्रदायः वस्तुतस्तुकदंबवातादिव्यतिकरेकथंचिन्मयाजीवितमपिनद्वितीयोन्यासी
तयाकथंजीवितव्यंकथंचवातद्विपत्तौमयाजीवितव्यमितिसंदिहानस्यनाध्यवसायोभूदितिमृदु नीतःपंथाः॥ ॥१५॥
अथयात्रानुकूलत्वेनशारदंप्रस्तौति॥ ॥तोहरिवइजसवंथोराहवजीअस्सपवमहत्थालंवो सीआवाहविहाओदहमुहवज्झ

दिअहोउवगओसरओ॥ततोहरिपतियशःपथोराघवजीवस्यप्रथमहस्तलंकासीतावाप्यविघातोदशमुखवध्यदिवसउ
पगताशरत्॥ततोवर्षानंतरंशारदउपगता।कीदृशीहरिपतेःसुग्रीवस्ययशोमार्गःशारदमालंव्यतस्यसेतुबंधनादियशः
प्रादुर्भावादेवंराघवजीप्रथमोहस्तालंबःसेतुबंधरावणवधसीतासमागमानांद्वितीयतृतीयचतुर्थानामपेक्षयाशारदेव
प्रथमोवलंबःशारत्प्राप्तिरेवतस्यदुष्करासीत्तस्यांतुसत्यांसर्वमिदमीषत्करमितिभावःएवंसीतायावाप्यापाशत्रूणांवि
घातोवसनंरामसमागमाध्यवसायात्रवधमर्हतीतियत्प्रत्ययेनवध्यमितिसाधुतथाचदशमुखस्यवधार्होदिवसइति
सर्वत्ररूपकंपूर्वनिपातानियमाद्वध्योदशमुखोयत्रएतादृशोदिवसइतिवारावणवधस्यदिवसएववृत्तत्वादित्यर्थः॥
॥१६॥अथसप्तदशभिःस्कंधकैःशारदमाह॥रइअरकेसरणिवहंसोहइधवलब्भदलसहस्सपरिगअंमहुमहदंसणजोग्गो
पिआमहुप्पत्तिपंकअंवणहअलं॥रविकरकेसरनिवहंशोभतेधवलाभ्रदलसहस्र परिगतंमधुमथनदर्शनयो
ग्यंपितामहोत्पत्तिपंकजमिवनभस्तलं।नभस्तलंशोभतेकीदृशमिवपितामहस्यब्रह्मणउत्पत्तिपंकजमिवनभकीदृक्
केसरनिवहइवरविकरायत्रतथाभूतंएवंदलसहस्राणीवसभंगिधवलाभ्राणितैःपरिगतंव्याप्तंएवंमधुमथनस्यना
रायणस्यदर्शनयोग्यंउत्तानसुप्तस्यतस्यो त्थानेसतितत्रैवदृष्टिपातसंभावानासत्वात्अथवामधुम थनस्यरामस्य
दर्शनयोग्यंजलदविगमेनमादकत्वाभावात्प्रयाणसमयलाभावकमलमपिरविकरसदृशकेसरनिवहं धवलाभ्र
सदृशदलसहस्रपरिगतंमधुमथ्नातीतिमधुमथनस्यभ्रमरस्यदंशनंदंशनक्रियातद्योग्यंभवतियद्वामधुमथनस्य
नारायणस्यदृश्यतेअनेनेतिदर्शनंवक्षस्तद्योग्यंतस्यपुंडरीकाक्षत्वात्यद्वामधुमहेनमधूत्सवेनदर्शनयोग्यंकेचि

THE ASIATIC SOCIETY OF BOMBAY

।।।।३।। ।। त्तुपंकजमिवेति पृथक्कुर्वते प्रियायाः सीतायामहोत्पत्तितुल्सवोत्पत्तियस्मात् मेघापगमेन सुखदत्वादितिनभो
विशेषणं पितामहस्योत्पत्तिर्यत्रेतिपंकजविशेषणमितिव्याचक्षते साधर्म्यमुपमानमिदइत्युपमालंकारः।।१७।।अथइं
द्रधनुराह।। ।।दिणमणिमोहप्फुरिअंगलिअंघणलच्छिरअणरसणादामं।उडुमअणवाणवत्तंणहमंदारणवके
सरंइंदधणुं।दिनमणिमयूखस्फुरितंगलितंघनलक्ष्मीरत्नरसनादाम।ऋतुमदनवाणवल्कं नभोमंदारनवकेसर
मिंद्रधनुः इंद्रधनुर्गलितमपगतं कीदृशंदिनमणिः सूर्यस्तन्मयूखैःस्फुरितंप्रकाशितंमे व्याद्यंतरिततिर्यगतिरविकि
रणाएवशाक्रधनुर्भवंतीतिप्रसिद्धिः तथाचमेघापगमेधनुरप्यपगतमितिभावः दिनमणिकिरणवत्स्फुरितमिति
वानानारूपत्वात् दिनमणिःसूर्यः तस्यमोषेमेवाद्यंतघनिसतिस्फुरितमितिवा दिनमेवमणिस्तन्मयूखैःस्फुरित
मित्यन्ये एवंवनलक्ष्म्यावर्षाश्रियोगलितंपतितंरत्नघटितंरसनादामेतिरूपकंधनुषोहरिल्लोहितत्वेनविचित्ररूप
रसनासाम्यंतथाचवनेगतेतदनुगामिन्यास्तल्लक्ष्म्याअपिहठादपसरंत्यामेखलास्खलनमितिभावः पुनःकीदृशं
ऋतुर्वर्षासमयःसएवमादकत्वान्मदनः तदर्द्धचंद्रावाणस्यवल्कंमुखंतस्यधनुराकारत्वात् ऋतुमदनवाणपा
त्रंवाऋतौमदनस्यवाणपात्रंतूणीरः ऋतुमतनवाज्ञापत्रंवाऋतौवर्षाकलस्यमतेसंमतेनवमाज्ञापत्रंअज्ञालिख
नमित्यर्थः वर्षर्त्तौरविराजायमानत्वात् ऋतुमतनवातपत्रंवावर्षर्त्तौराज्ञइवमतानवमातपत्रंछत्रंवस्तुतस्तुऋ
तुमदनपानमाद्यातीत्यर्थः ल्युट् ऋतुरेवमत्तस्तस्यपानपात्रंचषकस्तथाचमत्तेनतेनजगदेवमदितमितिभावः एवं
नभएवमंदारोवृक्षविशेषः तस्यनवंकेसरं व क्रलोहितत्वात्।।१८।।पुनस्तदेवाह।। ।। धुअमेहमहुअराओ

वणसमआअड्ढिआणअविमुकाओ।।णहपाअवसाहाओणिअठ्ठाणंवपडिगआदिसाओ।।धुतमेवमधुकरावन
समयाकृष्टावनतविमुक्ताः नभःपादपशाखानिजकस्थानमिवप्रतिगतादिशः दिशोनिजकस्थानमिवप्रतिगतावाद्यु
द्यपूर्व्वस्थानंगताइवेत्युत्प्रेक्षा किंभूताः नभएवपादपस्तस्यशाखाइतिरूपकंपुनः किंभूताः धुताइतस्ततोगताएवामेव
मधुकरायाभ्यस्ताः एवंचवनसमयोवर्षर्त्तुस्तेनाकृष्टाअथावनताअथविमुक्तास्तथाचवर्षर्त्तोनुपक्रमेदिशोमेघसंभारे
णाकृष्टानिकटवर्त्तिन्यइवमध्येगगनदिआपिमेघबाहुल्येनावनताअधोवर्त्तुलीकृताइववर्षान्तेमेघापगमेनविमुक्ता
ःप्रसारिण्यइवजाताइतिभावाः शारदितथाभूतमेवसंबंधः त्यक्तइतितात्पर्य्यं।।अन्याअपिपादपशाखाः केनचित्प्रथ
ममाकृष्यंतेपश्चादवनमय्यविमुच्यंतेतदानीमुपमर्दनधुताइतस्ततः संचारितोमेघतुल्यामधुकरायाभ्यस्तथाभू
ताभवंतिस्थितिस्थापकसंस्कारेणचनिजकस्थानमेवप्रतिगच्छंतीतिध्वनिः यद्वादिशअतिसर्जनेधातुमहिम्नादि
श्यंते अतिसर्ज्यंतेउपदि तेवासुरतकार्याण्याभिरितिदिशः प्रौढांगनास्तानिजकस्थानंप्रतिगताः शारदिरात्रौनाय
कमभिसृत्यप्रभातेस्वंस्वंगृहंगताइत्यर्थः कीदृश्यः भुताविपर्यारितामेधाबुद्धिर्येनधुतंमेघंमधुतत्करेयासांताःपिता
वशिष्टंमधुकरेकृत्वाप्रतिनिवर्त्ततइत्यभिसारिकासंप्रदायः ताअपिघनोनिविडः समयः संकेतोयस्यतादृशेनघनं
यथास्यादेवंसमदेनमदसहितेनवानायकेनसंभोगार्थमाकृष्टाकराभ्यामंकमानीतास्तदुत्तरमवनमिताउपमर्दवि
षयीकृताअथोपभोगानंतरंविमुक्तास्त्यक्ताः एवंइवशाब्दस्याकर्षणान्नखपातप्रसाधाइवनखपातोनखक्षतंतदेवप्र
साधाप्रसाधनमिवयासांतास्तथाचनखक्षतालंकृताइवेत्यर्थः।। ।।अथदिवसमाह।।अहिणवणिहालोआवदे
सा सारदीसमाणजललवाणिम्माअमज्जणसुहादरवसुआअत्थविंवहंतिवदिअहा।।अभिनवस्निग्धालोका

उद्देशारदृश्यमानजललवाः निर्मितमज्जनसुखादरशुष्कछविंवहंति।वदिवसाः॥दिवसाइपच्छुक्कछविंवहंतिधारयं
ति वस्थआअद्राब्रः शुष्कवाची॥ कीदृशाः स्निग्धआलोकोरवितेजोयेपुंतेआकस्मिकमेघापायादालोकानामभिनवत्वे
कण्यप्रतिभासनात् एवंचनद्देशाएकदेशास्तत्रासारोवेगवर्षणं तेनदृश्यमानाजलखंडायत्रअत्रोक्षे क्षेतेनिर्मितंमज्ज
नसुखमर्थाज्जलेपुंयेस्तैकृतमज्जनइवतथाचशारदिवासरेकदाचिद्वर्षणं कदाचित्तैत्येकदेशेजलसंबंधः परत्रशुष्क
ताअतएवकृतमज्जनाइवेत्युक्तं अन्येपिकृतमज्जनाः स्निग्धआलोकोदर्शनंयेषांतथाविधादरशुष्कतादशायांक्क
चित्क्कचित् दृश्यमानजलबिंदवश्चभवंतिआसारःस्यात्प्रसरणंवेगाद्वर्षेषु दृढ्डलेइतिकोषः॥ ॥भगवदुत्थानमाह॥॥
सुहसम्माणिअणिद्दो विरहालुंखिअसमुद्ददिण्णकंठ ॥ अस्सुवंतोवि विबुद्धो पढमविबुद्धसिरिसेविओ महुमहणो॥
सुखमानितनिद्रो विरहस्पष्टरसमुद्रदत्तोत्कंठः॥ अस्वपन्नपिविबुद्धः प्रथमविबुद्ध श्रीसेवितोमधुमथनः॥ मधुमथनो
विबुद्धउच्छितनतल्पोन्नेकादशीबभूवेत्यर्थः अस्वपन्नपिनिद्रा—लभमानोपिदेवानामस्वप्नवादतःसुखंयथास्यादेवंस
म्मानिता आदृतानिद्रायेन तादृक्आलस्यादिना।निद्रायाआदरमात्रनतुपारमार्थिकत्वामपितिभावः पुनःकीदृक्वि
रहस्पृष्टायसमुद्रायदत्तोत्कंठायेनतादृक्जागरणोत्तरंपरमेश्वरस्यान्यत्रगमनशंकया विरहिणःसमुद्रस्यकदापुन
रयमत्रायास्यतिलक्ष्म्याचसमंनंदकेशायिष्यतइत्याद्युत्कंठादानंतदानीमेवेति सुभगत्वमुक्तंएवंप्रथमविबुधयाश्रि
याचरणसंवाहनादिनासेवितःपंचम्यामेवलक्ष्म्युत्थानात् अथचनारायणेजाग्रतिमधुमथनोरामरूपोविबुद्धःतदात्म
कत्वात् वर्षामेघापगमेलब्धचेष्टोवभूवेत्यर्थः कीदृक् विरहेवेक्लव्येन अस्वपन्नपिनिद्रामनासादयन्नपिएवंचविरहस्पृ
ष्टश्वासो समुद्रेणमुद्रासहितेनहनुमतादत्ताउत्कंठायस्मैतादृशश्चजानकीवियोगिनोभिज्ञानमुद्रामादायगतेहनुमंते

प्रतिजानकीवार्त्तालाभायोत्कंठोत्पत्ते रित्यर्थः एवंप्रथमोद्बुद्धयाश्रियाकांत्यासेवितआश्रितः शरदागमेनाग्रिम
व्यापारंप्रतिसाध्यवसायत्वेनसुखादिश्रीसमृद्धेरितिभावः॥॥२१॥ तारामाह ॥सोहइविसुद्धकरणो गअणसमु
द्दम्मिरअणिवेलालग्गो॥ तारामुत्तावअरोफुडविहडिअमेवसिप्पिसंपुडमुक्को॥ ॥शोभंतेविशुद्धकिरणोगगनसमु
द्रेरजनिवेलालग्नःतारामुक्तापकरःस्फुटविघटितमेघ शुक्तिसंपुटमुक्तः गगनरूपेसमुद्रे तारारूपमुक्ताप्रकरः शोभते
कीदृक् विशुद्ध शुभ्रकिरणोयस्यतथाएवंजेरेनिरेववेलातीरंतत्रलग्नःशार्वरीसमयलग्नइत्या पिएवंस्फुटंयथास्यातथा
विघटितायेमेघाएवशुक्तिसंपुटा स्ततःप्रकीर्णःशारदिमेघानांनानाखंडत्वेनशुभ्र तयाविघटितशुक्तिसाम्यं अन्यत्रापि
समुद्रेशुक्तिमुक्ताविशुद्धचाकचक्यामुक्तास्तिरलग्नादित्थंतइतिसर्वत्ररूपकं॥२२॥ शरदोऽवधिमाह॥ सत्तच्छआणगंधो
लग्गइहिअए खलइकलंवामोओ॥कलहंसाणकलरओठाइण संठाइपरिणअंसिहिविरुअम्॥ सप्तच्छदानांगंधोल
गतिहृदयेस्खलतिकदंबामोदः॥कलहंसानांकलरवस्तिष्ठतिनसंतिष्ठते परिणतंशिखिविरुतं सप्तच्छदानां गंधोहृद
येलगतिमनोहारीभवतिसामयिकत्वात् कदंबामोदः स्खलितहृदयग्राह्योनभवत्यसामयिकत्वादित्यर्थः लगति
अपूर्व्वत्वादन्यतःसंबध्यतेस्खलति अतिपरिचितत्वादस्वकालारमणीयत्वाच्चसंबद्धोपिनस्पदतइतिभावाः एवं
कलहंसानांकलरवोहृदयेतिष्ठति सामयिकत्वादेवनसंतिष्ठते शिखिनांविरुतध्वनिरसामयिकत्वादेवेत्यर्थः अन
वस्थानेहेतुमाह परिणतंविरसं कदंबामोदेपीदंविभक्तिविपरिणामेनयोज्यंतथाचपरिणामप्राप्तंसर्व्वमेवस्खलति
नसंतिष्ठतेचेति ध्वनिःसमयजंसर्व्वमेवमनोहरमितितात्पर्यं॥ २३॥पुनरपि सिंहावलोकितेनेंद्रधनुराह॥ ॥ ॥
पीणपओहरलग्गं दिसाणं पवसंतजलअसमअविइण्णम् सोहग्गपढमइण्हं पल्हाअइ सरसणहवअं इन्दधणुं॥॥

॥ ॥९॥ ॥ पीनपयोधरलग्नं दिशांप्रवसज्जलदशमय वितीर्णं सौभाग्यप्रथमचिह्नं प्रम्लायतिसरसनखपदं इंद्रनुरेवसरसं तात्कालि
कंनखपदं मितिरूपकंप्रम्लायतिप्रकर्षेण म्लानिमाप्नोति विगलतीतियावत्सरसत्वेनलौहित्यान्नखपदस्थेंद्र धनुस्सा
ल्यंकीदृशंदिक्षु पीनोयःपयोधरोमेवस्तत्रलग्नंपुनःकीदृग प्रवसतागच्छजलदकालेनवितीर्णंदत्तंसौभाग्यस्यसौ
दर्यस्यप्रथमंचिह्नंलक्षणंतथाच प्रावृषिदिशां मांसलमेघलग्नेंद्रधनुषासौंदर्यमासीदथशरदियथायथा मेघापगम
स्तथातथातदविनाभावेनतदप्यपगतमितिभावः नखक्षतमपिदिशां प्रौढांगनानांपीनस्तनलग्नंसत्क्रमेण म्लायति
नखक्षतंकीदृक् प्रवसताप्रवासशीलिनकामिनेवेष्टयाजलजाड्यंददातीतिव्युत्पत्याजलदेननायकेनसमयेप्रस्थानकाले
वितीर्णं दत्तंअतएवसौभाग्यस्यानुरागेस्यप्रथमज्ञापकंवर्षासुगृहेस्थित्वाशरदिप्रवासीभवतानायकेनप्रियास्तनेसत
तस्मरणायनखक्षतंकृतमागम्यतइतिकामशास्त्रं॥ ॥२४॥ चंद्रमंडलमाह॥ ॥पज्जलसलिलधोए दूरालोक्कत
णिमले गअणअले॥ अच्चासण्णं वट्टिअं विमुक्कपरभाअ पाअडं ससिबिंबम्॥ पर्याप्तसलिलधौते दूरालोक्यमाननिर्मले
गगनतले॥ अत्यासन्नमिवस्थितं विमुक्तपरभागप्रकटशशिबिंबं॥ गगनेशशिबिबमतिनिकटवर्तिविस्थितंकिंभूतं
विमुक्तःपरभागोअन्यभागोमेघादिसंबंधस्तेनप्रकटमतिव्यक्तं गगनेकीदृशिपर्याप्तंबहुतरंयत्सलिलंवर्षर्तुसंभवंते
नधौतेप्रक्षालितइवएवंदूरादालोक्यमानंसन्निर्मलंयत्तादृशिअयंभावः यथावस्त्रादौ क्षालितेमालिन्यापगमेन स्थि
तरूपांतरवत्द्रव्यंस्फुटंप्रकाशते तथावृष्टिजलक्षालिते वियतिमेघरूपमलिन्यापगमादत्युज्ज्वलेस्वभावतःस्वच्छ ९
स्यामलेधवलं विधुमंडलमतिप्रकटमालोकितंलोकेस्तदुक्तं [illegible] श्रीहर्षेण॥ सितेहिजायेतशितिः

सुलक्ष्मेति॥ वस्तुतस्तु विशदस्याभाववाचितयाविमुक्तोऽत्यक्तःपरभागोचान्यतःशोभानिलाकाशाकृतकांति
विशेषस्तेनप्रकटंशुभ्रत्वादित्युन्नयामःअयोत्प्रेक्षा॥२५॥ हंसागमनमाह॥ ॥चिरआलपडिणिअत्तं दिसासुव्वो
लत्तकुमुअरअवेल्लिविअम्॥ भमइअलद्धासाअं कमलाअरदंसणूसुअंहंसउलं॥ चिरकालप्रतिनिवृत्तं दिक्षुघु
र्णमानकुमुदरजोविलिप्तं॥ भ्रमतिअलब्धस्वादं कमलाकरदर्शनोत्सुकंहंसकुलं॥ दिक्षुहंसानांकुलसमूहोभ्रम
तिघूर्णतिकिंभूतंचिरकालेनपरावृत्तंप्रावृषिमानसंगताःशरदिपुनरागताः कुत्रकमनीयेजलाशयेस्थातव्यमित्यु
ल्लासेनाभितउड्डयंतइत्यर्थःएवंघूर्णमानेनिशिनंदानिलप्रेरितैः कुमुदरजोभिर्विलिप्तंसरसिसरसिस्थितैरित्यर्था
त्एवंअलब्धआस्वादस्तृप्तिर्येनतथाअभिमानिमवासनयाकचिदपिस्थैर्याभावात्अलब्धाशाकंवाअलब्धाआ
शाआकांक्षायेनतत्तथानानारसःसौभाग्यसौकर्येणकुत्रमनोवृत्त्यभावात्एवंकमलाकरस्याभिप्रेतसरसोद
र्शनेउत्सुकंवस्तुतस्तुनिशिकुमुदाकरेकुमुदसौभाग्यसौकर्येणकुमुदवनवासविनोदमनुभूयतदुपमर्देनतत्प
रागनुलिप्तंसत्प्रभातेकमलाकरस्यकमलाधिष्ठानसरसोदिदिक्षयाभ्रमतितदुक्तमलब्धास्वादंकुमुदकोषभोजनज
न्यतृप्तावपिकमलकोषभोजनजन्यतृप्त्यर्थित्वादित्युन्नयामः। ध्वनिपक्षेहंसःसंन्यासिविशेषःतत्कुलंभ्रमतिकीदृक्
चिरकालेनवर्षर्तौचितप्रोषित्वाशरदिप्रतिनिवृत्तंपूर्व्वस्थानमागतंकीदृक्दिक्षुघूर्णमानंकौपृथिव्यांमोदतेकुमु
द्इजस्तेनविलिप्तंधूलीधूसरमित्यर्थः यद्वादिक्षुघूर्णमानंसतकुत्सितामुत्प्रीतिर्यस्मादेता दृशोयोरजोगुणः
तेनवेल्लितंप्रसरितंरजोगुणमहिम्नाभक्ष्याद्यर्थतयाभ्रमतीतिभावःएवंअलब्धअशाकःशाकभिन्नोयेनतत्अ
तएवकमलायालक्ष्म्याआकरस्यधनिकदर्शनेभोजनार्थितयाउत्कंठितंतथाचस्वप्रयुक्त्याशाकमात्रलाभादतृप्ता

॥।।१०॥ ॥ सन्यासिनः समीहितभिक्षार्थितयाधनिकमन्चिष्यतीतिभावः॥अहंगत्रशोभामाह॥ चन्द्राअवधवलाउँ फुरत्त दिअ
सरअणत्तरिअसोहाउँ॥सो म्मरउअस्सउरं मुत्तावलिविम्भमंवहन्तिणिसाउँ॥ चंद्रातपधवलाः स्फुरद्दिवसरत्नात
रितशोभाः।सा म्यैशारदउरसि मुक्तावलिविभ्रमंवहंति निशाःनिशाः सौम्येरमणीयेशारदउरसि मुक्तावलिविभ्रमं वहं
ति मुक्ताहारायत्तइत्यर्थः हारतौल्यमाह किंभूताः चंद्रातपेनज्योत्स्नया धवलास्फुरन्मेघादिशून्यतयादीप्यमानं दिव
समेवरत्नं पुष्पराजादिकं पिंजरत्वात्तेनत्वरितान्यवहिताः शोभायांसांताः स्फुरता दिवसरत्नेनादित्येन अत्तरिताशो
भाया सा निति ध्वन्यर्थः दिवसरूपरत्नांतरप्राप्तशोभाइतिवाइतच्च अन्यस्या अपिनायिकायाउरसि अंतरांतरारत्नर
विशिष्टाहारः शोभतेशारदस्तु निशा दिवसरूपरत्नघटितोहारोभूदिति निगर्व्वः सरअस्स सरतस्यरतासक्तस्य
पुरुषस्य उरसि यामुक्तावलिः तस्य विशिष्टभ्रमंधारयंति निशाइत्यपि केचिद्व्याचक्षते॥ २६॥ ।कमलमाह॥भम
रुअदिण्णसण्णं घणरोहविमुक्कदिणअरअरालिद्धं॥फरिसमुहाअत्तंमिवपडिवुज्झइजलणिहितंणालंणलिणम्
॥भ्रमरकृतदत्तसंज्ञं घनरोधविमुक्तदिनकरकराश्लिष्टं स्पर्शभुखायमानमिवप्रतिबुध्यते जलनिहितनालनलि
नं।जलेसरोवरादिपयसि निहितंभालंयेन शारादीपज्जलापगमात्तादृशंनलिनं प्रतिबुध्यते विकसतिप्रभात
इत्यार्थात् भ्रमरैरुतेनदत्तासंज्ञासंकेतोयस्मै तादृशमिवकुमुदवनस्यमुद्रितत्वात् कमलमधुतृष्णयाभ्रमरै
ःशाब्द्व्याजाज्जागृहित्युक्तमित्यर्थः घनोमेघस्तदवरोधविमुक्तायेदिनकरस्यकरास्तैराश्लिष्टस्पृष्टअन्योपि
निद्राणः केनविद्रुतेनशब्देनदत्तासंज्ञाअमुकजागृहित्यादिरूपा यस्मैतथाभूतः करतलपरामृश्यमानश्चतस्य १२
सुखलब्धाजाग[illegible]र्तिजले जाड्येनिहितानालानाड्यो यस्य तादृशोभवतिनिद्रया जडीकृतकलेवरत्वादित्याभिप्रायः

अत्रकेचित् अन्योपिदुर्गतोघनरोधविमुक्तोदिनकरःकरस्पृष्टश्चेतिघनरोधविमुक्तदिनकरकराश्लिष्टः सन् करोराज
याह्लादमादिस्त्स्पृष्टः तदुत्तरंजडेनमुखेण निहितोनालोबंधनरज्जुर्यस्मिनित्थंभूतश्चंदेन्यंत्यागार्थंकुन्यंतत्करश्च
मुखे निहितबंधनदार्ढ्येन मूर्छितत्वाद्वनावरोधाद्विमुक्तोभवति प्राणपीडाशंकयात्वन्यतेतदवस्थायांभ्रमरेणनिजात्र
त्यप्रेषितदूतेनजिज्ञासुतयादत्तसंज्ञः संज्ञयाकिंचिद्बोध्यमानप्रतिबुधतेअवगच्छतीति ध्वन्यर्थमाहुः अपरेणभ्र
मणेनेण विदग्धमित्रेण रुतेनदत्तसंज्ञः निशिनिरुद्ध एवप्रभातेत्यक्तनिरोधोदिनेसंचारीतिदिनचरः कराश्लिष्टः
प्रतिरुध्यतइति व्याचक्षते॥ ॥२८॥हंसध्वनिमाह॥ ॥णिघोसो कमलवणक्खलिअलच्छिणेउरस्सद्दो॥सुवइ कल
हंसरओ महुअरिवाहितणलिणिपडिसंल्लाओ॥ मन्मथधनुर्निर्घोषः कमलवनस्खलितलक्ष्मीनूपुरशब्दः श्रूय
तेकलहंसरवो मधुकरिव्याहृतनलिनीप्रतिसंल्लापः॥ कलहंसानांरवः श्रूयतेनक्तमित्यर्थात् कलहंसरव
इतिवाकीदृक् मन्मथधनुषोनिर्घोषष्टांकारोमादकत्वात्ज्योत्स्नाधवलायांरजन्यांविश्वमेवजेतव्यमिति
श्री धनुष्टंकारः एवंकमलवनात्स्खयालक्ष्म्यानूपुरनादस्तथाचरात्रौ संकुचत्कमलवनमुपद्रुतंपरित्यज्यत्याहग
त्संचारः स्खलनेबीजंतथानिमीलनरूपविपद्दशायां बंधुभावेनमधुकरीभिर्व्याहृतानलिनिकासि किंवाकरो
षीत्येवं पृष्टायानलिन्याइहास्मिसंनिहिताभवत्येवंरूपः प्रतिसंल्लापःप्रत्युत्तरं लोकेप्ये कोविपद्ग्रस्तंवादयतिस
पुनःप्रत्युत्तरयतीति दिवातनधनिपक्षेतुव्याख्या।कीदृक्कलहंसरवः मदनधनुर्ध्वनिः तथाभूतलक्ष्मीनूपुरश
ब्दश्चयत्रपक्षे कमलवनमुन्निद्रमुद्दिश्य निजावासग्रहणायोल्लासेनहठाद्गृजनं स्खलनेबीजंमधुकरीनिर्नलिनि
जागर्षिमयामधुपानमागत्यकर्त्तव्यंनवेतिपृष्टायानलिन्यामधुकरीजागर्मिमधुसमागत्यपीयतामित्येवंरूपः

Dr. BHAU DAJI MEMORIAL

प्रतिसंल्लापइतिपक्षहृयेपिरूपकं॥२९॥नलिनिमाह॥ ॥खुडिउप्पइअमुणालंदट्ठूणपिअंवसिठिलवलआण
लिणिमहुरलिम्हरुल्लावंमहुमम्वंमुहंववेयईकमलं। खंडितोत्पाटितमृणालाद्दृष्ट्वाप्रियामिवशिथिलवलया
न्नलिनीव मधुकरीमधुकरीलापं मधुमदाताबंमुखमिवगृह्यतेकमलं कमलंगृह्यतेहस्तेनादीयतेलोकैरि
त्यर्थाव अत्रोत्प्रेक्षतेखंडितमथोत्पाटितमुत्थापितं मृणालंयस्यास्तन्नलिनिशिथिलारतिकालीनकरपरामर्शेन
विपर्यस्तोचलयायस्यास्तांप्रियामिवदृष्ट्वा॥अयंभावः रदिलोकाज्जलन्यूनतायांकमलमृणालाद्यवचिन्वंतितत्रो
त्पाटितमृणाले विलुलितवलयभ्रमेणपद्मिन्यांपद्मिनीबुध्यापद्ममपि मुखंधिषणायाचुंबनाद्यर्थमिवाकृष्टवंतः
कीदृक्कमलंमधुमयमतएवाताम्रंएवमधुकरीनांमधुरस्लापोयत्रतत्तथाकमलोपमर्दनमधुकरादिध्वनिसं
भावात् मुखमपिमधुमंदनाताम्रंनिष्ठुलोहितंमधुकरीवन्मधुरस्लापोपत्रचुंबनादिसमयेमधुकरादिध्वनिक
रणात् तदुक्तंहारीतपारावतकोकिला नादं विदध्यात्सुरतावतारइतिकेचित्तुनलिनींप्रियामिवदृष्ट्वाकमलमुख
गृह्यतेज्ञायतेलोकेरितिसर्व्वमन्यत्तुल्यमित्याहुः॥३०॥पवनमाह॥ ॥पज्जत्तकमलगंधोमहुतणाओसरत्तणव
कुमुअरओ॥भमिरभमरोअइव्वोसंचरइसदाणसीभरोवणवाओ॥ पर्याप्तकमलगंधोमध्यार्द्रोपसरन्नवकु
मुदरजाः॥ भ्रमद्भ्रमरोपजीव्यः संचरतिसदानशीकरोवनवातः॥दानशीकरसहितोवनपवनः संचरतिकारि
णामुत्सर्गतःशरदिमदोद्रेदइतिप्रसिद्धः कीदृकचिरनिरुद्धस्यैकत्रसंचितस्याकस्मिकवहिर्भावेबाहुल्यात्पर्याप्तः
परिपूर्णः कमलगंधोयत्रएवंविकाशप्रकर्षेणमधुप्रकर्षादार्द्रसदपसरत् पवनसंबंधादधः स्खलन्नवंकुमुद ११
रजोयत्रतथाचवायोरूपः कालीनत्वात्कमलकुमुदयोः मुकुलरूपयोर्गंधस्यरजसश्चसंबंधइतिभावःपुनः

कीदकूकमलकुमुदमदगजादिजिघ्रासयाभ्रमणशीलानांभ्रमणामुपजीव्योगंधरजोमदलोभात्सेव्यःकमलकुमुदम
दसंबंधात्सौरभंमधुमदवनसरःसंबंधात्शैत्यंसामयिकत्वाच्च मांद्यमेवंसंध्याकालीनत्वेपितएणापसरत्तीतिपाठआ
र्द्रपसरदित्यर्थः॥३१॥पुनर्न्नलिनीमाह॥ ॥ कटइअणूमिअंगीथोअत्थोओसरत्तमुद्धसहावा॥रइअरचुम्बिज्जत्तंण
णिअत्तेइलणिणीमुहम्मिवकमलम्॥ कटकितगोपितांगीस्तोकस्तोकापसरन्मुग्धस्वभावा॥रविकरचुंब्यमानं
रतिकरचुंब्यमानंवाननिवर्त्तयतिनलिनीमुखमिवकमलं॥नलिनीकमलंननिवर्त्तयतिऊर्ध्वंप्रापयतिप्रकाशय
तीतियावत्कीदृशंरविकरेणचुंब्यमानंसंबध्यमानंप्रभातवशात्नलिनीकीदृशीकंटकितंजातकंटकंगोपितंजलां
तःस्थापितमंगनालोययाजलस्यकिंचिन्न्यूनतयानालंपयस्मिनभसिकमलमितिभावःपुनःकीदृशीस्तोकस्तोकमी
षदीषदपसरन्मुग्धस्वभावःकलिकाभावोयस्याःक्रमेणविकासादितिभावःउत्प्रेक्षतेमुखमिवयथापद्मिनीनायिका
रतिकरोनायकःतेनचुंब्यमानंरविणासंगमकालेकृतशब्दविशेषस्यनायकस्यकरेणचुंब्यमानंवामुखंननिवर्त्तय
तिकिंतुसंमुखमेवस्थापयतितथैयमपीत्यर्थःसापिकीदृशीकंटकितंरोमांचितंभावोदयादथचगोपितंलज्जया
सिचयांचलेनावृत्तमंगंहृदयादियययाएवंस्तोकस्तोकंक्रमेणापसरन्मुग्धस्वभावोबाल्यंलज्जावायस्यास्तथाभूता
यथायथानायकविश्रंभस्तथातथालज्जाविगमइतिभावः॥३१॥पुनर्भ्रमरमाह॥परिघोलत्तकवलिअंसत्तच्छअ
कुसुमधवलरेणुक्खइअं॥उप्पुसइदाणकंमुहुत्तगअकण्णचामरभमरभमरंवलम्॥परिघूर्णमानंस्खलितंस
प्तच्छदकुसुमधवलरेणूत्खचितं॥प्रोंछतिदानपंकंमुहूर्त्तगजकर्णचामरंभ्रमरकुलंमुहूर्त्तंव्याप्यगजस्यकर्णचाम
रंभ्रमरकुलं दानपंकमर्थाद्गजस्यैवप्रोंछतिउड्डयनप्रयत्नेनोर्ध्वंप्रोंछतिदानपंकपातानंतरमुड्डयनासंभवान्मु

हूर्त्तमित्युक्तं कीदृशमुभ्रम रकुलंपरिघूर्णमानंसत्स्खलितंप्रथमंगंडयोरुपपरिभ्रमित्वापतितमित्यर्थः चामरना
पिपरिघूर्णमानंसत्स्खलितंभवतिपुनः कीदृक्सप्तछदकुसुमानांधवलरेणुभिरुत्खचितं अतएवश्वेत्याच्चामरतो
ल्यंतथाचसप्तछदकुसुमेभ्योदानस्यपंक्तीभावान्मा धुर्यमधिगत्यागतमितिभावः॥ अथरामस्यविरहावस्थामाह॥ इअ
पहसिअकुमुअसरंभडि मुहपंकअविरुधचंदालोए। जाएफुरत्ततारेलच्छिसअंगाहणवपओसे सरए॥ इतिप्रहासि
तंकुमुदसरसिभटी मुखपंकजविरुद्धपंकजलोकायां॥जातायांस्फुरत्तारायांलक्ष्मीस्वयंग्राहनवप्रदोषेशारदि॥
रामस्य क्षीणापितनुः क्षीयतेइत्यनरस्कंधकेनान्वयः सीतायाविश्लेषाद्वार्त्तानुपलंभाच्च कस्यांसत्यांइत्युक्तप्रकारे
प्राशारदिजातायांलक्ष्म्यास्वयंग्राहस्तस्यप्रदोषोरज नीमुखइतिरूपकंशारत्पक्षेलक्ष्मीरिपुराजश्रीःतस्यास्वयंग्राहो
अतिक्रम्यग्रहणंप्रदोषपक्षेलक्ष्मीर्नायिकातस्याःस्वयंग्राहो विवाहविशेषस्तस्य प्रदोषकर्त्तव्यत्वादित्यवधेयंशारदि
किंभूतायांप्रहसितंविकसितंकुमुदंयत्रतादृक्सरोयत्रतस्यांएविभटी। शूरवधूस्तन्मुखकमलस्यविरुद्धोमालिन्यहेतु
चंद्रस्यालोकोज्योत्स्नादर्शनंवायस्यांशरदिशूराणांरणयात्रयातद्वधूनांविरहोद्रेकादितिभावः एवंस्फुरंत्यस्ताराय
स्यांतस्यांप्रदोषेपि कीदृशीप्रहसितकुमुदसरसिभटी मुखतुल्यं यत्पंकजंतद्विरुधचंद्रालोकेनफुल्लत्वेतियोज्यं केचि
त्तुशरदिकथंभूतायांप्रहसितस्यकुमुदनाम्नोवानरस्य स्वरःशाखाविशेषोयत्रत थाप्रहसितकुदस्वरायांएवंभटीराक्ष
सवधूस्तन्मुखपंकजाविरुद्धश्चंद्रस्यरामचंद्रस्यालोकोदर्शनंतेजोवायत्रतथातद्विरुद्धचंद्रालोकायांस्फुरंतीतारासु
ग्रीववधूर्यत्रतारोवानरविशेषोवालक्ष्मी सीतातत्स्वयंग्राहस्यप्रदोषइतिव्याचक्षते॥३४॥ ॥ ॥झिज्जइ झिणाविलणू
अदिट्ठि अवाहपरुणंवमुहम्॥रामस अईसं तेआसाबंधव्वचिरगएहणमंत्ते॥क्षीयते।क्षिपापितनुःअस्थितवा ॥१२॥ ॥

ष्यंपुनःप्ररुदितमिवमुखं॥रामस्यादृश्यमानेआशाबंधइवचिरगतेहनूमति॥एवंअस्थितीवाक्योयंत्रेवंसत्पुनःप्ररु
दितमिवमुखंरोदनोन्मुखमित्यर्थः अतिरोदनेनवाष्पशून्यतायामपिदैन्योद्रेकादितिभावःधीरोदात्तत्वाद्वाकस्मिन्स
तिचिरगतेहनूमतिअदृश्यमानेसति॥कस्मिन्निवआशाबंधइवसीतांप्रतिपुनःप्राप्तिप्रत्याशाबंधोप्यदृश्यमानइत्यर्थः
तथाचयथासीताप्राप्त्याशाबंधोनदृश्यतेतथाहनूमानपिनदृश्यतइतिचिंताधिक्यादिपनवस्थाभूदितिभावःसहोपमा
यद्वाहनूमतिकथंभूतेसीताप्रत्याशाबंधइवसीताप्राप्त्याशाबंधस्यहनुमदागमनावधिकत्वादितिभावः यद्वापरुणंवप्र
रुदितंवापुनःप्ररुदितंचेत्यर्थवाशब्दःसमुच्चये॥३५॥ अथहनूमदागमनमाह॥ ॥णवरिअजहासमत्थिणिव्वत्तिअक
ज्जणिवलतच्छाअं।पेच्छइमारुअतणअंमणोरहं चेअचिंतिअसुहोवणअं॥अनंतरंचयथासमर्थितनिर्वर्त्तितकार्य
निर्व्वलच्छायांप्रेक्षतेमारुततनयंमनोरथमेवचिंतितसुखोपनतं॥णवरिणवरिकेवलानंतर्ये एतदनंतरंवसरामोमारु
ततनयंहनुमंत्तंप्रेक्षतेकीदृशंयथासमर्थितं [illegible]
रणात तदुक्तद्वारेतिपाठात [illegible]
तेननिवर्त्ततीइतरवानरापेक्षयापृथक्भवंतीछायामुखादिकांतिर्यस्यतंदूतस्यमुखश्रीरेवसदसन्निवेदयतीति
मुखश्रीस्वाभ्यांकार्यसिद्ध्यसिद्ध्यनुमित्सयातदर्शनंकृतवानितिभावःपुनःकीदृशंचिंतितःस्मृतःसन्सुखायोप
गतोयस्तंचिंतितःसन्यःसमागच्छतिसकार्यसिद्धिवांसीतायासुखदोभवति।तदुक्तमव्यक्षेपोभविष्यंत्याःकार्यसि
द्धेर्हिलक्षणमितिपुनःकीदृशमेव मनोरथमेव मनोरथस्वरूपमेवसोपिचिंतितःसन्सुखायउपनतउपगतोभवतिम
नोरथेनसुखंलभ्यतइत्यर्थः॥ ॥३६॥ ॥अथहनुमच्चेष्टामाह॥ ॥पढमंविअमारुइणाहरिसभरिज्जंतलोअणेण
मुहेण॥जणअतणआपवत्तिपच्छावाआइणिरवसेसंसिट्ठा॥प्रथममेवमारुतिनाहर्षभ्रियमाणलोचनेनमुखेन॥

जनकतनयाप्रवृत्तिः पश्चाद्वाचा निर्विशेषं विज्ञा॥धीरोदात्तस्य जिज्ञासो रामस्यप्रेक्षणमेतत्प्रश्नार्थकमित्युच्चिक्रमिकर्व
णसमुदायरूपवाक्यतदर्थपर्यालोचनापर्यंतं सीतावृत्तविशेषकसंशयेन कुशः स्यादस्येतिवचनापेक्षयाविषयेवहठाद्वा
र्त्ताप्रतिपत्तिर्भवेदित्यभिसंधायपरमचतुरेन मारुतिनासीताद्दष्टाजीवतिचेतिवार्त्ताहर्षसूचकप्रसादविशेषविशिष्टच
क्षुर्मुखचमत्कारेणप्रथममेव प्रेक्षणसमकालएवशिघ्रानिरगादि पश्चात्पुनरस्य सीताकुशलमधिगमस्वस्थस्याकां
क्षाक्रमेणगतागतप्रपंचसंबंधतदवस्थाकथनपर्यंतमुक्ता॥तथाचमुखदर्शनेन सीताकुशलवतिद्दष्टाचानुनेति
रामस्तर्कयांचकारेतिभावः॥३७॥ ॥अथहनूमत्प्रतिरामव्यापारमाह॥ ॥दिट्ठेत्तिणरद्द हिअद्दिण तिसवाहमथरं
णीससिअम्ब ॥ सोच्चइतु मत्तिरुणं पद्दुणाजिअइत्ति मारुइजवजंदो ।।द्दष्टेतिनश्रद्दितं क्षीणेतिसवाष्पमंथरं निश्वासि
तंसोचतित्वामितिरुदितं प्रभुणाजीवतीतिमारुतिरुपगूढः ।।अथरामः प्रश्नकर्त्ताहनूमानुत्तरयितातथाच सीताद्दष्टेति
प्रश्नेद्दष्टेत्युत्तरं तत्रप्रभुणारामेणनश्रद्दितं श्रद्धापत्ययोनंकुतः रावणांतःपुरवर्त्तिन्यांराक्षसीलक्षपरिवृत्तायाः सीता
याः कथमस्यवानरस्य दर्शनंस्यादितिभावः की दृशीत्यवस्थाप्रश्ने क्षीणेत्युत्तरं तत्रसवाष्पंसोच्छासंचं तन्मंथरं यथा
स्यादथवावाष्पोऽश्रुतन्मांथर्यसहितं यथास्यादेवंनिश्वसितंमद्विश्लेषेणक्षैण्यमस्यायुज्यतएवेतिप्रतीतेन मयिकी
दृश्यैव मत्प्रेयसी दर्शनावस्थानयासीदित्यंतः खेदात्रिश्वासइतिभावः। तन्मांथर्येचतथाकृत्वापिरावणो [illegible] ।श्रिय
तइत्यंतर्मन्युत्पीडादश्रुपक्षेतुधीरोदात्तत्वात्सदासितन्निर्गमनिरोधादितिभावः किंकरोतीतिप्रश्नेरामोमांविनावने
वसन्नेकाकीकीद्दक्स्यादितित्वांसोचतित्युत्तरं ।तत्रप्रभुणारुदितं निजदुखमगणयित्वैवमामेवशोचतीत्यहोपाति ३३
व्रत्यमस्याराक्षसकरेसंदिग्धमितिभावः।कुलकलंकशंकयाधैर्यादश्रुनिरोधोनाभूदितितात्पर्यं।शोचतीति

लट्प्रत्ययेन सीतावर्त्तमानत्वमवधृत्यजीवतीतिविहायजीवष्यातीतिप्रश्नेजीवतीत्युत्तरं ।तत्रवर्त्तमानसामीप्यार्थ
कलट्प्रत्ययमहिम्नाभवदागमनप्रत्याशयामदनुसारनिबंधनः कलंकः प्रभोमीप्रसा [illegible] दितिकिंचित्कालंप्राणान्नुधार
यतिनतुचिरंजीविष्यतिप्रायमस्यविदित्वामारुतिरालिंगितः कियत्कालमेवचेज्जीविष्यति तदावार्त्ताज्ञानमेवदुःशंकमा
सीदप्यतत्रत्युद्धारेहठादेवमयाकारिष्यतइत्युत्साहादथवायद्ययमसत्यमावेदयतितदाक्षोभतःसकंपहृदयःस्या
दितिजिज्ञासावशात्। यद्वामहत्कार्यमयमका [illegible] र्षीत्तद्दनमस्येवनपरिरंभणेनापिसत्क्रियतामित्याशयादितिभावः
॥उत्तरनामायमलंकारः॥तथाचवामनः उत्तरवचनश्रवणादुनयनंप्रश्नवचनानांउत्तरमितितंप्राहुः प्रश्नादप्युत्तरं
यत्रप्रश्नंविनिवहन्नूमताद्दष्टेत्यादिसीतावृत्तचतुष्टयमुद्भावितत्रनश्रद्धितमित्यादिरामावस्थाचतुष्टयमुक्तं।पूर्व्वोक्तत्द
भिप्रायेणेत्यपिकेचिदाचक्षते॥परंतूत्तरालंकारमहिम्नैवद्दष्टेत्युपनायकस्यसुग्रीवस्यप्रश्नस्तस्यतावन्मात्रप्रयोजन
कत्वात् किंकरोतीतिनायकस्यरामस्यप्रश्नस्तस्यवल्लभत्वेन वल्लभागतराक्षसोपकल्पितविभीषाहेतुकव्यभिचारशं
कित्वादतएवत्वामेवशोचतितिकुलस्त्रीत्वव्यंजकमुत्तरं।।जीवतीतिनानापरिजनप्रश्नस्तेषांतावन्मात्रोद्देशाकत्वादेषुद्दष्टे
त्याद्युत्तरेषुप्रभुणानश्रद्धितमितिसंबंधेनावस्थाचतुष्टयंप्रभोरेवपूर्व्वोक्ततत्तभिप्रायेणोक्तमित्याहुः।।इतरेतुहेक्षीणतृड्
धमंथक्षिणातृट्तृषायेषांते।क्षीणातृषोदेवास्तान्बाधते पीडयंतितिक्षीणतृड्बाधारा क्षसास्तान्मथ्नातीतिक्षीणतृड्बाधमं
थेतिरामसंबोधनेक्षीणतृड्बाधमंथइतिवा॥व्यधताडनेधात्वनुसारात्सीतामयाद्दष्टेतिनशब्दहितंशब्दमात्रेनिहितमि
तिनकिंत्वर्थेनापिहितंसीतामयद्दष्टैवेत्यर्थः अरण्येशाश्रितंचाअरण्येशाः सुग्रीवः तमाश्रितंत्वांप्रथ्वीपतितथाविधोरामः
संप्रतिमर्कटमाश्रितंइतिशोचतीतिमारुतिनोक्तेप्रभुणारुदितंजीवतीत्युक्तेमारुतिगूढइत्युक्तिद्वयेपिरामस्यरोदना

॥ ॥१४॥ ॥ लिंगनोपवर्णनंपूर्व्वोक्तं तत्तदभिप्रायद्वयेनेतिप्रश्नाप्रश्नसाधारणमर्थमुपवर्णक्षुः॥ अत्रैवत्वा नित्यस्यविशेषणंद्दष्टात्ति
नवाद्धहितंद्दष्टा आचिर्येपांतेद्दष्टार्त्तयस्तेषुनवाद्धहितं किंत्वर्थहितमपीत्यपिवदंति॥॥३८॥॥ अथसीतामणिनाह॥॥
चिताहअच्यहम्मिवतंचं करेखंअणी सहंवणिसण्णंवेणी बंधणमइभंसीअकिलितंवसेपणामेइमणिम्र। चिंताहतप्र
भमिवतंचकरेखंदनिस्सहमिव निपणं॥ वेणीबंधनमलिनंशोकक्लाम्यत्तमिवास्यप्रणयतिमणिम्र मारुतिरस्यरामस्य
तंचनणिप्रणयत्युपर्ना तवानित्यर्थः किंभूतंवेणीबंधनेसतिमलिनंपूर्व्वंप्रत्यहमेव चिकुरपरिस्कारसमयेमार्जनादि
नो—लमासीत्संप्रति तदभावात् विरहण्यांवेणीबंधक्षरइतिभावः मालिन्यमुत्प्रेक्षतेपुनः कीदृशमिवशोकेन सीताबि
श्लेषदुःखेनक्लाम्यत्तमिव अन्योपिविरहक्लांतोवपुरपरिस्कारेण मालिन्यमासादयतीतिभावः। मालिन्यहेतुकंतंज्ञो विर
हमप्युत्प्रेक्षते राक्षसपरिवृत्ता सीता संप्रति किंस्यादित्यादिकयाचिंतयाहतप्रभमिवा पुनः कीदृशंहनुमतः करेनिषण्णं
स्थिरं। स्थैर्यमप्युत्प्रेक्षते खंदेनविदुरागमनश्रमेण निस्सहमिव तथाचकरेकृत्वा दर्शयामासेतिभावः॥३९॥ अथमणि
ग्रहणमाह॥ सीकरअलङ्जलिगओवाहत्थवअपहत्तमझंहो॥ णअणेहिदासरहिणादिट्ठोपीओणुपुछिओणुपज्ज
ग्ग॥ सकरतलाञ्जलिगतोवाप्पस्तवकप्रहतावसिदन्मयूखः नयनाभ्यांदाशरथिनादृष्टःपीतोनुपृष्ठोनुप्रवृत्तिं॥ सम
णिः करतलाद्धनुमतकरात् सञ्जलिगतोरामेणनयनाभ्यांदृष्टः कीदृक् आनंदवाप्पस्तवकेनप्रहतः अतएव अवसी
दत्किरणोविछविरित्यर्थः दर्शनमुत्प्रेक्षतेपीतोनुनयनस्यनिमेषराहित्येनमणेश्चवसीतासंबंधादतिप्रियत्वेनपीत
इवअंजलिगतवाप्पमग्नत्वेनादृश्यत्वात् तदुक्तमंजलिगतइति अन्यदप्यंजलिस्थंजलं पीयतइति। नत्वंत
र्नयनरूपस्यपानस्यद्रवद्रव्यसा त्वा दत्रतदसंभव इत्यतआह। प्रवृत्तिदृष्टेनुसीतोदृशप्राप्तिजनितानंदोत्फुल्लन॥ ॥१५॥ ॥

यनत्वादिकयाचेष्टयानित्यंतत्सन्निहित त्वेनसीताक्वास्तिकीदृशीत्यादिवार्त्तांपृष्टइवतदुक्तमवसीदन्मयूखइ
ति॥ अन्योपिकेनचित्संगोप्यवृत्तंनयनादिचेष्टयापृष्टस्वचेष्टयैवनिवेदयंतिप्रकृते किरणवशादरूपमालिन्येन सी
ताक्लेशमावेदयामासेत्यर्थः अत्रोत्प्रेक्षावितर्के॥४०॥ ॥अथमणिशोचनमाह॥ ॥ सोअइअणंरहुवईविरलं
गुलिगलिअकिरणधारावअरम्॥ वअणेविमलञ्जोअंदररोत्तूणसलिलंजलिवणिमेंत्तो॥ शोचतिचएनंरघुपति
विरलांगुलिगलितकिरणधाराप्रकरं॥ वदनेविमलोद्योतंदररुदिचासलिलांजलिमिवनियोजयन्॥ सीतामप्रा
यकुत्रागतः कीदृग्वावृत्तोसीत्यादिक्रमेणरघुपतिरेनंमणिंशोचति चा कीदृशंविरलांगुलिभ्योगलितकिरणधारा
समूहं विरहदौर्बल्यहेतुकांगुलिसंधिभ्योधाराकारकिरणनिर्गमादितिभावः महापुरुषलक्षणमंगुलिसंधिरित्य
पिकश्चित् किंकुर्व्वन्नदरत्यन्ययमीषदुदित्वा विमलमुद्योतमणितेजःप्रक्षालनसलिलांजलिमिववदनेनिवेशयन्
अन्योपिरुदित्वामुखंप्रक्षालयति बहुश्रीहिणा विमलोद्योतंमणिमेवमुखेनियोजयन् प्रियंवस्तुमुखदावर्ध्यतइत्य
पिकश्चित् तथाचरामस्यवार्त्ताज्ञानानंतरमध्यवसायेनरोदनशेषोवृत्तइति मुखक्षालनमितिभावः॥४१॥ ॥अथ
रामावस्थामाह॥ तंदइआहिण्णाणंजम्मिविअगम्मिराहवेणाणणिमिलम्॥ सीआपरिमट्ठेणववूढोतेणावि
णिरत्तरंरोमंचो॥ ॥तद्दयिताभिज्ञानयस्मिन्नप्यंगेराघवेननियोतितं सीतापरिमृष्टेनेवव्यूढस्तेनापिनिरंतरं
रोमांचः अभिज्ञानंसंदेशोमणिरूपः यदितप्रीतिपात्रंदयितायाइति वाततूराघवेणयस्मिन्न थंगेननिवेशितंतं
नाथंगेनसीतायापरिसर्व्वतोभावेनमृष्टेनेवनतुस्पृष्टमात्रेण निरंतरंमांचोव्यूढः तथाचयथासीतापरिमृष्टेनांगेन
रोमांचोध्रियतेतथा मणिस्पृष्टेनाप्यंगेनविशेषतःऊढः सीतासंबधिमपि संबंधादितिभावः तथाचनित्यसन्निहित

सीतास्पर्शापेक्षया विरह कालीन सीतापरंपरासंबोधोप्यधिक इति तात्पर्यं ॥ ४२ ॥ ॥ ॥ अथ सीतापहार मूलकत्वेनाधिक
वलस्यापि शृंगाररसस्यानुपयुक्तोत्पद्यमानं रामकोपमाह ॥ ॥ वाहनइलं पितोसे दहमुहचिंताविअंभमाण नरिसं ॥ जाअं दुक्खा
लोअं जरढाअन्तरवि-मंडलमिववदनं ॥ ॥ ततोनणिमर्पणानंतरमस्य रामस्य बाष्पेण मलिनमपि वदनं दुःखालोकं दुः
खेन दर्शनीयं जातं ॥ अत्र हेतुमाह ॥ कीदृक् दशमुखविषयिणी या वधादिचिंता तया विजृंभमाणोः मर्षो यत्र तत्तथा यथाय
था चिंतादयस्तथा तथामर्षोदय इति भावः ॥ तादृभि क्तिस्तु ताकत्वादिना अतएव मलिनस्यापि दुःखालोकत्वं तथा च ता
म्रत्वादिना मालिन्यमपहस्तितमेवेति भावः ॥ अतएव जरठायमानं प्रौढं मध्याह्नकालीनं रविमंडलमिवेत्युपमानादपि
दुर्निरीक्ष्यमेवेति भावः ॥ ४३ ॥ ॥ अथ रामस्य धनुर्दर्शनमाह ॥ तोसे चिरमज्झ थेकुविअकअत्तभुमआलआपडिरूपा
दिट्ठी दिट्ठत्थानेकज्जधुरव्वणिअएधणुम्मिणिसण्णा ॥ ततोस्य चिरमध्यस्थे कुपितकृतात्तभ्रूलताप्रतिरूपे दृष्टिर्दृष्ट
स्थाम्नि कार्यधुरेव निजके धनुषि निषण्णा ॥ ततः क्रोधानंतरमस्य दृष्टिर्निजे स्वायत्ते धनुषि निषण्णा कीदृशे वालिवधे
दृष्टं स्थानवलं दार्ढ्यं यस्य तस्मिन् एवं चिरं व्याप्य मध्यस्थे उदासीने कार्यानुद्युक्त इति यावत् तथा च बहुदिनमास्य
लब्धविश्रामनस्मिवालिचत्वार्ये वहतः तत्तदलिभूतो रावणस्ते कियानिती ह निजस्य भवतएव प्रत्याशा मंमेति रा
मेण धनुर्दृष्टमिति भावः तदुक्तं कार्यधुरेव तथा च दृष्टिनर्पिता किंतु रावणवधरूपस्य प्रकृकार्यस्य भार एवार्पित इ
त्युत्प्रेक्षा ॥ भारसमर्प्पणे हेतुमाह । कुपितस्य यमस्य भ्रूलतायाः प्रतिरूपे प्रतिबिंबस्य प्रकृतिसमानशीलत्वात् यथा
कुपितयमभ्रूविषयो न जीवतितथैतद्धनुर्विषयोपीति भावः प्रतिरूपे सदृश इति वा ॥ णिहुअकअं ते तिपाठे निभृतानि
व्यापारमेवेति तात्पर्यं ॥ ४४ ॥ ॥ तदेवाह ॥ खणमूलाबद्धाए णिव्वण्णत्तमसिणं समारूढाए ॥ सज्जीअ मिवजा १९

अंअणोण मत्तंप्पिरामदिट्ठीअधणु ॥ क्षणमूलाबद्धया निर्व्वर्ण्यमानमसृणं समारूढया सजीवमिवजातं अवचनत
मपि रामदृष्ट्या धनुः क्षणं व्याप्य मूलात्संबद्धया निर्व्वर्ण्यमाने सति धनुर्गुणकार्यविचारे सति मसृणं मदं यथास्यादेवं
परामटनिमारूढया रामदृष्ट्या धनुर्जीवज्या तत्सहितमिव कृतं कीदृक् अनवनतमनम्रमपि अन्यत्र ज्यासमर्प्पणे
धनुर्नम्रं भवति प्रकृते धनुर्नवनतमेव स्थितं दृष्टिपतंजिका भूत्तथा च मूलादग्रपर्यंतं दृष्टमिति भावः ज्या जीवा जीव
नं जीवो जीवो कार्णवृहस्पतौ इति त्रावयतः संजीवमिव सत्राणं निधीयमानप्राणमिवेति यावत् ॥ तथा च रामदृष्ट्या
सप्राणीकृतं धनुरिति रामदृष्टिरेव धनुषप्राणाइव लग्ना स्तेनं चेतचतुल्यरिपुहननादिव्यापारयोगित्वमस्य व्यज्यत इति
वयं ॥ ४५ ॥ ॥ अथ सुग्रीवहर्षमाह ॥ सुग्गीअस्स विहिअअं राहवसुकअपडिमोअणासंतण्हं ॥ अगणिअदहमुहदप्पं णि
व्वूढभरं वतक्खणं जससिअं ॥ सुग्रीवस्यापि हृदयं राघवसुकृतप्रतिमोचनासंतृष्णं अगणितदशमुखदर्प्पं निर्व्यूढभरमि
वं तत्क्षणमुल्लसितं ॥ अपिनानामस्य हृदयमुल्लसितमेव सुग्रीवस्यापि हृदयं राघवस्य सुकृतमुपकारो वालिवधरूपः तत्प्र
तिमोचनात् प्रत्युपकारः सितोद्धाररूप स्तत्र सतृष्णं साकांक्षं सत् निर्व्यूढो निष्पादितो रावणवधरूपो भरः कार्य्यगौरवं ये
येन तादृशमिवोल्लसितं राम प्रत्युपकारो दशमुखवधायतः स चैपत्कारणं वेत्यर्थः ॥ अत्र हेतुरगणितो रावदर्प्पो येन तथा राव
णस्य तद्भ्रातृकक्षानिक्षिप्तत्वादिति भावः अन्यस्यापि गुरुद्रव्यभारापगमेत्फुल्लतारूपः श्वासोद्गमरूपो वा उल्लासो भवती
ति ध्वनिः ॥ ४६ ॥ अथ रामस्य लंकागमनेच्छामाह ॥ ॥ चिन्तिअलद्धत्थाम्मिवमूमआविखेवसईश्रामरिसरसं ॥ गमणं
राहव हिअए रक्खसजीविअहरं विसं व्व णिहितं चिंतितलब्धार्थमिव भ्रूविक्षेपसंचितामर्षरसं । गमनं रावणहृदये राक्षसजी
वितहरं विषमिव विहितं ॥ रावणमनसि गमनं निहितं संबद्धं लंकागमनाभिमुखं रावणचित्तमासीदित्यर्थः गमनं कीदृक्

॥ ॥॥१६॥॥ मृविक्षेपेणलंकाभिमुखभूसंचारेण स्मृचितोमर्परमोयत्रतथातथाचरामस्य धीरोदात्तत्वांलंकाभिमुखभूविकारेणे
वामेपीज्ञातइत्यर्थः अत्रेक्षते चिंतितःसच्चलब्धोर्थःप्रकृतोपयुक्तोयेनतादृशमिवगमनेनचिंतेति यदिहनूमानाया
स्यतितदामयाराघवमनसिसंबद्धन्यमितितस्मिन्नागतेतत्रसंबद्धमित्युत्प्रेक्षाशरीरंपुनः कीदृक् राक्षसजीवितहरं
विषमिवयथाविषंप्राणापहारकंतथाराक्षसानांप्राणापहारकंतदेवगमनमासीतेनैवतेमृताइतिभावः ४७ ॥अथ
रामस्यलक्ष्मणाद्यवलोकनमाह॥ सोहलक्खणमुहंवणमालवविअडंहरिवइस्सउरम्‌ कित्तिवपवणतणअंआण
व्वबलाइसेविलगाइदिट्ठी॥ शोभेवलक्ष्मणमुखंवनमालेवविकटंहरिपतेरुरः॥ कीर्तिरिवपवनतनयं आज्ञेवबल
लान्यस्यविलगतिदृष्टिः अयवालोदुर्दमशत्रुसंमुखगमनायसोत्साहोनचेतिप्रथममतिसन्निहितसंबंधिनःप्रियत
मस्यलक्ष्मणस्यमुखं अस्यरामस्यदृष्टिःशोभेवलग्नायथाशोभालग्नातथेत्यर्थः तथाचलक्ष्मणमुखंतदानींमति
सश्रीकमासीदितिभावः एवंअचिरादेवामुष्योपकारः कृतःसतूरसिवर्त्ततेनवेतिनिरूपणात्पश्चादुदासीनप्रि
यतरस्यसुग्रीवस्यविकटंविस्तारशालिहृदयंयथावनमालालग्नातथेयमपीत्यर्थः रक्तेनिलस्यैताकारत्वान्माला
साम्यंसुग्रीवस्यमालास्थाभाविकमलंकर्णमितिप्रसिद्धः अयमिदानींमेवलंकातःसमागतोराक्षसबलाबलबोम
द्रुमनेसाध्यवसायोनवेतिजिज्ञासयाशरीरंखंप्रयाक्षोभाक्षोभनिरूपणायतत्पश्चात्प्रियंपवनसुतंयथासमृद्धलं
घनादिकीर्त्तिर्लग्नातथेयमपियेतएवसप्रतिसहायास्तदमीपाचेष्टाकीदृशीतिततोपिपश्चात्परिवारतापन्नानिवा
नरबलानियथातत्क्षणएवसुग्रीवद्वाराकृतालंकागमनाज्ञालग्नातथेयमपिदृष्टिर्लग्नेतिसर्वत्रसहोपमातथाव
वरामेणसर्वेथालोकिताइत्यर्थः वस्तुतस्तुपूर्वोक्ततत्तदभिप्रायेणैवतत्रतत्रयथाशोभादिकंलगतितथादृष्टिरपिल ॥१६॥

श्री

ग्नेतिसर्वत्रसाधर्म्योपमापरमार्थतस्तुपूर्वोक्ततत्तदभिप्रायेणैवतत्रतत्रलग्नादृष्टिर्यथासंख्यंशोभादित्वेनोत्प्रेक्षि
तातथाहिप्रथमंलक्ष्मणमुखंरामदृष्टिःशोभेवलग्नदृष्टिरेवतत्रशोभाभूदित्यर्थः सुग्रीवहृदयंवनमालेवपवनत
नयंकीर्त्तिरिवाज्ञेववलानीत्युन्नयामः॥४८॥ रामप्रयाणमाह॥ ॥संखोहिअमहिवेढोतोसोकइसेणविलुलि
अवणाहोओ॥खुहिअसमुद्दाहिमुहोमहणारम्भम्मिमन्दरोविअचलिओ॥ संक्षोभितमहीवेष्टस्ततःसकपिसैन्य
विलुलितवनाभोगः॥क्षुभितसमुद्राभिमुखोमथनारंभेमंदरइवचलितः॥ ततःसरामश्चलितः कीदृक्सन्क्षुभि
तोयःसमुद्रस्तदभिमुखःसन्तथाचरामेचलतिकपिसैन्यचंक्रमणपरमार्थतोवृतःसमुद्रक्षोभोभविष्यद्रामशर
शानलदाहसंतूपमर्दादिहेतुकत्वेनोत्प्रेक्षितः क्षुभितपदेनइवार्थस्यगम्यमानत्वात् कइवसमुद्रमथनोपक्र
मेमन्दरपर्वतइवप्रकृतेपिसमुद्रमथनोपक्रमएवायमितिभावः रामःकीदृक् संक्षोभितंचालितंमहीवेष्टंये
नएवंकपिसैन्यद्वाराविलुलितोवनाभोगश्चयेनतथाएतावतावानराणांसंख्याबलात्वणत्वप्रकर्षःमन्दरोप्यु
त्पाटनसमयेक्षोभितभूवलयस्वभावादेवसेनाकारस्थितकपिविलुलितवनाभोगोजलप्रवेशसमयेक्षुभितस
मुद्राभिमुखश्चेतिसाम्यं ४९॥ अथवानरबलसंचारमाह॥ ॥चलियंचवाणरवलंचलिएतम्मिचलकेसरसडु
ज्जोअं गहिअदिसापरिणाहंमऊहजालंवदिणअरस्सफुरन्तम्॥ चलितंचवानरबलंचलितेतस्मिन् चलके
सरसटोद्योतं॥गृहीतदिक्परिणाहमयूखजालमिवदिनकरस्यस्फुरत्॥तस्मिन्रामेचलितेवानरबलंचचलि
तंकीदृक् चलानांचंचलानांकेसरसटानामुद्योतोयत्रस्फूरकिरणसंबंधादितिभावः एवंगृहीताआक्रांतादिशांप
रिणाहो नतत्तथाएवंस्फुरमुत्साहावस्थातदूत् किमिवदिनकरस्यमयूखजालमिवतदपिसकलदिव्यापि

DR BHAU DAJI MEMORIAL

स्फुरत्सच्चलतितथाचयथा दिनकरकिरणनामुदयतामेवंशेषात्सकलदिग्व्यापकत्वंतथाकपीनांप्रस्थितानामेवतदासीदितिभावः अत्रयद्यपिकेशरशब्दस्यैवस्कंधवालवाचकत्वमितिसटेत्यधिकंतथापिकरिबृंहितादिपदवत्सार्थकत्वंवस्तुतस्तु किंचित्प्रत्वप्रतिपादनायकेसरवत्किंजल्कवत्सटे तिव्युत्पत्तिमभिप्रेत्योक्तमितिसारं५० ॥अथकपीनांवृद्धिमाह॥ ॥वेराराणिपज्जलिओतोसोरोसपवाणाहअुद्धअमुहलोवड्डइमग्गाणुगओलंकावणराइवणदओकइलोओ॥ वेरारणिप्रज्वलितस्ततःसरोषपवनाहतोद्धतमुखरः॥वर्द्धतेमार्गानुगतोलंकावनराजिनदवःकपिलोकः ततःसकपिलोकोवर्द्धतेस्वंस्वमाकारंगृह्णीतवानित्यर्थः कीदृक् मार्गोरामपश्चात्तमनुगतःमार्गशब्दःपश्चादर्थेनिपातितः पुनःकीदृक् लंकेववनराजितस्यावनदवःकपित्वात्दाहकत्वादितिरूपकंएवंवैरमेवारणिर्यद्वाकाष्ठंतयाप्रज्वलितोदीप्त इत्यर्थः॥एवंरोषएवपवनस्तेनाहतस्समुद्धतमुखरःशब्दायमानःतथाचवैरेणप्रदीप्तःक्रोधंनकृतकोलाहलाः कपयोरामपश्चाल्लग्नाश्चेलुरितिभावः वह्निरपिकाष्ठसंबंधात्तुद्धतंसरन्वर्द्धतेगगनव्यापिचभवति॥५१॥ ॥अथरामप्रस्थानावस्थामाह॥ ॥वच्चइअचडुलकेसरसडुज्जलालोअवाणरपरिक्खित्तो॥सव्वदिसाआअड्डिअपलअपलित्तगिरिसंकुलोव्वसमुद्दो॥व्रजतिचचटुलकेसरसटोज्ज्वलालोकवानरपरिक्षिप्तः सर्वदिगाकृष्टप्रलयप्रदीप्तगिरिसंकुलइवसमुद्रः व्रजतिचरामइत्यर्थात् किंभूतःचटुलाःसंचारसतिचचलायाः केसरसटास्तासामालोकस्तेजोयत्रतथाभूतायेवानरास्तैःपरिक्षिप्तोवेष्टितः संचारसतिरवितेजःछटासंपर्कोत्सटानामपितेजोविशेषप्रतीतिरितिभावः कइवसमुद्रइवसोपि कीदृक् सर्वदिग्भ्यआकृष्टाःप्रचंडानिलेनवर्त्तुलीकृताःप्रलयेदह्यमानायेगिरयस्तैःसंकुलोव्याप्तःयथा १७

स्वभावतोनिश्चलएवंसमुद्रःप्रलयवशान्मर्यादामतिक्रम्यजगदाक्राम्यतितथाधीरोपिरामोरावणप्रलयनिवकर्त्तुमुत्पथचरोनिखिलमाचक्रामतित्यभावः कपीनांपिंगलत्वात्कोपवशादुष्णत्वाच्चदह्यमानगिरिसाम्यंयद्वासमुद्रश्चलतितियोजनीयंकीदृक् तथाभूतवानरवेष्टितः तेषुचलत्सुभमेरवनमनात्समुद्रस्योत्पथगामित्वेनतज्जलानामत्रैवागमनात्कपिवेष्टितत्वमितिभावः एतदेवोत्प्रेक्षतेतथाभूतगिरिसंकुलइवशेषंसमानं॥५२॥ ॥अथरामस्यदिङ्मोह :॥घोलंतिणिम्मलाओफुरंतदिअसअरपाअडिअरूआओ। दाविअमग्गाम्मिविसेहिअएसोअंधआरिअम्मिदिसाओ॥ घूर्णंतेनिर्मलाःस्फुरद्दिवसकरप्रकटितरूपादर्शितमार्गेयस्यहृदयेशोकांधकारितेदिशःअस्यरामस्यहृदयेसीताविश्लेषजशोकरूपांधकारविशिष्टेदिशोघूर्णंतेइयंप्राचीइयंप्रतीचीतिस्थैर्येनलभंतेभ्रमविषयाभवंतीतियावत् किंभूतादिशःनिर्मलामेघाद्यछन्नाअतएवस्फुरतादिवसकरेणप्रकटिकंव्यक्तिकृतंरूपंप्राचीप्रतीत्वनिर्णयकचिह्नंयासांताःहृदयेकीदृशेदर्शितउपन्यस्तःकपिभिरर्थात्पंथायस्मिंस्तथाभूतेतथाचसूर्यप्रकाशमार्गोपदर्शनादिप्रमासामग्रीसत्वेपिदिग्भ्रमइतिशोकस्याधिक्यंविशेषोक्तिरलंकारस्तदुक्तंविशेषोक्तिरखंडेपुकारणेषुफलावचइतिअन्योपिदर्शितवर्त्मन्यपितिमिरेचलन्भ्राम्यतीतिध्वनिः॥५३॥ ॥अथविंध्यप्राप्तिमाह॥ ॥आलोएइअविंझंधणुसंठाणस्ससाअरस्सभरसहंसंधिअपाइसोत्तसरंअवहोवासघडिअंवजीआवंधं॥आलोकतेचविंध्यंधनुःसंस्थानस्यसागरस्यभरसहंसंहितनदीश्रोतःशरंउभयावकाशघटितमिवजीवाबंधसानोधनुराकारस्यसागरस्यभरसहंकल्लोलतटपाताघनुपमादानीयं।विंध्यनामपर्वतमालोकतेचकमिवसंहितोनदीस्रोतोरूपःशरोयत्रतथाभूतमुभयावका

डाप्रांतभागद्वयमटनी।तत्रघटितमार्गोपितंजीवाबंधमिवर्जीवज्यातथाचचक्राकारसमुद्रोधनुऋजुःपर्व्वतस्तत्प्रांत
द्वयलग्नःपतंजी।विंध्यमध्यान्निर्गन्यसमुद्रेपतन्नदीप्रवाहःशरइतितात्पर्यं॥५४॥अथवानराणामुल्लंघनमाह॥
॥॥ मणिसिअसिहरुच्छंगोविहुअणिअंववणपाअडिअतुंगअडो॥विंझोणभरिअकुहरोहेलावाओविवाण
राणणसहिओ॥मस्तपितशिखरोत्संगोविधुतनितंबवनप्रकटिततुंगतट॥विंध्येनभृतकुहरोहेलापातोपि
वानराणान्नसोढा॥विंध्येनवानराणांहेलयाअनास्थयापिपातोगमनंपर्णगता वितिधात्वनुसारादुत्फालादवपत
नंवानसोढःतदुपमर्दितोभवदित्यर्थःतदेवाहपातःकीदृङ्मस्तुपितोविलुलितशिखरक्रोडोयस्मात्तादृक्एवंविधु
तेरुन्मूलितैर्नितंबवनैःप्रकटितस्तुंगस्तटोयस्मात्तथाचवनवृक्षाणामुन्मूलनेनावरकाभावात्तटतुंगिमापि
रंप्रकटोभूदितिभावःपुनःकीदृक्भृतपूणमर्थात्कपिभिरेवकुहरंकंदरादिप्रदेशोयेनतत्तथातथाचमूलमध्यशिरः
प्रदेशावच्छेदेनकापिभिस्तथोपमर्दःकृतोयथाकियानपयवकाशोनस्थितइतिभावःहेलावातोहेलयावातःपवनोजं
घादिसमुत्थोनसोढस्तद्विशेषणंसर्व्वमित्यपिकश्चित्॥५५॥अथसह्यगमनमाह॥॥पत्ताअसीभराहअधाउ
सिलाअलणिसण्णराइअजलअं।सज्झंओज्झरपहसिअदरिमुहणिक्कन्तवउलमइरामोअं॥प्राप्ताश्चसी
कराहतधातुशिलातलनिषण्णराजितजलदं।सह्यंनिर्झरप्रहसितदरिमुखनिष्क्रांतबकुलमदिरामोदं॥तेस
ह्यंगिरिप्राप्ताश्चकीदृशंशीकरैराहतंयद्गैरिकशिलातलंतत्रनिषण्णाअतएवराजिताशोभितारागप्राप्तत्वाज्जल
दायत्रतथाभूतंनिजशीकरेणधातुनांपंकीभावात्तत्संबंधेनमेघानांलौहित्यमितिभावः॥एतावताज्झत्तमुक्तंएव १८

न्निर्झरेणेवप्रहसितंयत्रतादृशीयादरीसैवमुखंतस्मान्निष्क्रांतोबकुलमेवमदिरातदामोदोयत्रतादृशंतथाचकं
दरारूपमुखान्निर्झररूपहास्योद्गमसमयेबकुलपुष्परूपमदिरामामोदोनिर्यातिनिरंतरमित्यर्थइतिविकटो
दरत्वमुक्तंअन्यस्यापिहास्यसमयेमदिरामोदोनिर्यातीतिध्वनिः॥५६॥अथगिरिनदीलंघनमाह॥॥बोलन्ति
अपेच्छतापडिमासंकन्तधवलघणसंघाए॥फुडफडिहसिलासंकुलखलिओवरिपत्थिएविअणइप्पवहे॥व्य
तिक्रमतिचपश्यतप्रतिमासंक्रांतधवलघनसंघातान्।स्फुटस्फटिकशिलासंकुलस्खलितोपरिप्रस्थितानिव
नदीप्रवाहान्॥तेनदीनांप्रवाहान्पश्यन्तस्संतोव्यतिक्रामंतिउल्लंघतइत्यर्थःकिंभूतान्प्रतिमायाप्रतिबिंबेन
संक्रांताधवलघनानांसंघातायत्रतथाभूतानितिनदीनामच्छत्वमतिमहत्त्वंचोक्तंउत्प्रेक्षतेस्फुटाव्यक्तायास्फ
टिकाशिलातत्संकुलेस्फटिकभूमावित्यर्थःतत्रस्खलितानतएवोपरिप्रस्थितानिचजलानांक्वचित्स्खलनादु
परिप्रस्थानभवतितथाचशुभ्रशारदजलदानांप्रतिबिंबोजलंस्फटिकोपरितिष्ठतीतिप्रतिभातिततएवोक्तंपश्य
तइतिकपीनामपिस्फटिकादिसंदेहादितिभावः॥५७॥अथकपीनामुद्धतसंचारमाह॥॥तडपब्भारभरत्ताप
आगलिअजलपइरिक्का॥आवाएच्चिअजाआपहअमहावहाणिहामहाणइसोत्ता॥तटप्राग्भारभ्रियमा
णानिदलत्पातालगलितजलप्रतिरिक्तानि॥आपातएवजातानिप्रहतमहापथनिभानिमहानदीस्रोतांसिमहा
नदीनामपिस्रोतांसिआपातएवतदानीमेवप्रहतोजनसंचारघृष्टोयोमहापथप्राप्तारिपंथास्तत्संनिभानिजा
तानिकीदृशानितटयोःप्राक्भारैरेकदेशैर्भृतानिपूर्णानिएवंदलत्पातालेषुगलितैर्जलैःप्रतिरिक्तानिरुच्छानि
तथाचजलानांदलत्पातालप्रविष्टत्वात्तटयोश्चपदाहत्यात्रुटित्वाखातएवनिविष्टत्वात्सैन्यसंचारेणसमीकृ

तत्वाच्च नित्यंसंचरत्पथिकः पंथाइवनदिनाप्रवाहोभ्रूदितितात्पर्यंमहापथशब्दस्यतुश्मशानवाचकत्वंनशंकनी यं प्रहतपदसन्निधानान्नहिश्मशानंजनसंचारस्पृष्टंभवती तिभावः॥ अथमलयंप्राप्तिमाह॥ जलहरणिद्दाअत्तं पा अवगणेसु सिसिरणिदाअत्तम्॥ सइदुदिणसमालअंपत्ताभगाधुअचन्दणरसा मलअम्॥ जलधरनिद्दीवांतं पादपगहनेषु शिशिरनिद्रयंतं॥ सदादुर्द्दिनश्यामलतंप्राप्ताभग्नधुतचंदनरसा मलयम्॥ तेमलयंप्राप्ताः किंभूताः भग्नाधुतस्यचंदनस्यरसा भूमिर्यैस्तेकपिभिः स्वभावाच्चंदनांदोलनेकृतेतत्तटभूमिर्भग्नेत्यर्थः मलयं किंभूतं जलधरेण निद्दीवोऽत्तः स्वरूपंयस्यतं नित्यमेघाधिष्ठानात्तज्जलेनद्रावनाशादितिभावः। यद्वाजलगृहनिद्दी वात्तंजलगृहेणसमुद्रेण निर्द्दीवोऽत्तः प्रान्तंयस्यसमुद्रसंन्निहितदेशस्यनित्यंजलसंबंधेन नष्टंदावकत्वाद्यं अथ वापूर्व्वनिपातानियमेननिद्रायमानजलधरंनिद्रायमानाजलधरायत्र महोच्चत्वेनजनसंचाराभावात् अथ वांजलधरनिद्रावंतंजलधराणां निद्राविशिष्टंएवंचतंमलयंप्राप्ताइतिसमन्वयेजलधरणिद्रावंजलविशिष्टा याधरणिस्तांद्रावयतीत्यर्थः जलसंबंधाद्धरण्याद्रवीभावादितिभावः एवंजलगृहनिद्दीयंजलगृहेणदायशून्यं समुद्रकल्लोलेनरवानिस्वरत्वादीनामाकर्षणात् एवंजलधरनिद्राकंजलगृहनिद्राकंवातयोर्निद्रायत्रतंअवष्टं भभूतत्वात् एवंनिद्रातजलधरं निद्रातजलगृहंवाबहुव्रीहिः जलधरनिद्दीवंवात्ततीयातत्पुरुषः एवंपादपगहने षुशिशिरेणशैत्यनेनिद्राकांतंशिशिरेणनिद्रयाकांतंशैत्यहेतुकनिद्राकारकत्वेनकमनीयमित्यर्थः एवंसदादुर्द्दि नमेघच्छन्नतयाश्यामालतायत्रतंआपताभावेनजलसंबंधेनचलतानांशामत्वनित्यर्थः यद्वा सदादुर्द्दिनश्या ३९
मलकं स्वार्थेकन् सदादुर्द्दिनेनमेघच्छन्नश्यामित्यर्थः यद्वा सदादुर्द्दिनेनश्यामलंकंजलंयत्रतत्तथा। यद्वास

दादुर्द्दिनसौमलकंसदादुर्द्दिनंयत्रेतिबहुव्रीहिणा सदादुर्द्दिनंचतत् सौमलकंआमलकवृक्षसहितंचेत्यर्थः एवंसदादुर्द्दिनंचतत् श्यामालयंश्यामानांनारीणां मालयंचश्यामारात्रिस्तस्यालयोलीनतायत्रतमितिवा॥ सदादुर्द्दिननकुंजमयप्रदेशेदिनरात्रिविभागाभावादितिभावः श्यामासोमलतातदालयमिति॥ श्यामः स्यान्मे चकेवृद्धदारकेहरितेघने श्यामास्यादंगनारम्यातथासोमलतौषधिरितिकोषः॥ ॥५९॥ अथचंदनवृक्षालोकन माह॥ ॥णापाअवलग्गे खुडिउव्वेलिअलआपरिमलछाए॥ संदाणि अणिमोएपेच्छन्ति महाभुअंगवेढणम ग्गे॥ चंदनपादपलग्नान् खंडितोद्वेल्लितलतापरिमलछायान्। संदानितनिर्मोकाश्यश्यन्तिमहाभुजंगवेष्टन मार्गान्॥ तेचंदनवृक्षसंबंधान्महाभुजंगानांवेष्टनस्यमार्गान्वलयाकारस्थितिर्येनयथासीत्तान् नित्यंसर्व संबंधान्निन्निभूयस्थिताश्यश्यंति किंभूतान् संदानितोमिश्रितोनिर्मोकोयत्रलग्नकचुकानित्यर्थः कपिसंक्षो भेपासर्प्पाणांपलायितत्वान्निर्मोकोत्रेवस्थितइतिभावः अहोएतादृशाः सार्थइहस्थिताइत्याश्चर्येणपश्यंती तितात्पर्यंपुनः किंभूतान् खंडिताअथोद्वेलिताउद्घाटितास्फोटितेतियावत् एवंभूतायालतातस्याः परिमलोवि मर्दस्तच्छान् तदाकृतीनित्यर्थः वृक्षसंबंधलतोद्घाटनानंतरंयथातच्चिह्नंनिम्नंवलयाकृतिजायतेतथेदमपि त्यर्थः तथाचइहगगभ्यस्थानं कपिभिराक्रांतामितिभावः॥ ६०॥ अथगिरिनदीप्रवेशमाह॥ ॥ सेवन्तितीरव द्विअणिअअभरोव्वत्तचन्दनलआलिद्धे रम्मतणदिष्यवहेवणगअदाणकडुएगिरिइप्पवहे सेवन्तेतीरव द्वितनिजकभरापवृत्तः चंदनलतालीढान् रम्यतृणदीप्रपथान् वनगजदानकटून् गिरिनदीप्रवाहान् ते गिरिनदीप्रवाहा सेवंतेदर्शनस्पर्शनमज्जनादिभिरित्यर्थः शासएइतिएकारादेशेनगिरिमिइपवहेइतिद्वितीबहु

।।।।२०।।।। पचने किंभूतान्तरिवर्हिता अतएवनिजकक्षारेणेव अपवृता विपरीत्यस्थिता याश्चंदनलताः ताभिरास्लिष्टा
नितिचंदनसंबंधात्सुरभितंयापेयजललवमुक्तं एवंजलसंबंधाद्र्द्रन्याणि तटयोर्यानितृणानितैर्दीप्रोदूरदृश्यःपं
पंथानिस्सरणमार्गोयेषांतान्हरिद्वर्णतृणैरेवोमयतटोद्धृतैर्दूरतएवज्ञायतेप्रवाहपथोयमितिभावःतथावन
गजदानजलेनक न एतावतेतत्संबंधेनस्वादस्यहृद्यत्वेमुक्तं॥ अथस्कंधकचतुष्टयेनसमुद्रतीरप्राप्तिमा
ह।।।। तोतरुणसिप्पिसंपुडदरदाविअजलणिहित्तमुत्तावअरम्।। पत्तापत्तलवजलंगअदाणसुअंधिरअण
वेलंबेलं।। ततस्तरुणशुक्तिसंपुटदरदर्शितजलनिहितमुक्ताप्रकरां।।प्राप्तापत्रलवकुलां गजदानसुगंधिर
जोनवेलावेलां।। ततस्तेवेलासमुद्रस्यतीरंप्राप्ताः कीदृशीतरुणेषु भिंदेलिमेषु शुक्तिसंपुटेषुदरदर्शितःकिं
चित्प्रकाशितोजलनिहितोजलस्थितो मुक्ताप्रकरोयत्रतांभिदुर शुक्तिनिर्गबरीणांमुक्तानांतिरजलेपुकिविव
त्तिभूयस्थितत्वादित्यर्थःएवंपत्रताबहुपत्रयुक्ताबकुलवृक्षायत्रतांपुनः कीदृशींगजानांदानंमदस्तद्वत्सुगंधि
रजःपरागोयस्याएतादृशीनवाएलायत्रतदृशीमेतेनसैनिकान्प्रतिहृद्यत्वमुक्तमितिभावः॥॥अथकंधकत्रये
णवेलामेववर्णयति।।।। वियसिअतमालणीलंपुणोपुणोवलतरंगकरपरिमट्ठं।फुल्लेलावणसुरहिअअहि
गइंदस्सदाणलेहवठिअम्।। विकशिततमालनीलांपुनःपुनश्चलतरंगकरपरिमृष्टांफुल्लेलावनसुरभिंगदधिग
जेंद्रस्यदानलेखामिवस्थितां।। पुनःकीदृशीमदधिरेवगजेंद्रइतिरूपकं तस्यदानलेखामिवमदधारामिवस्थि
तामित्युत्प्रेक्षामदलेखातोल्यमाहपुनःकीदृशीविकाशितंयत्तमालंपुष्पंतेननीलांतमालस्यसीमत्वात्एवं २०
वारंवारंचंचलकल्लोलरूपेणकरेणपरिमृष्टाभूयोभूयस्तरंगसंबंधात्एवंफुल्लंयदेलावनंतेनसुरभिंमदले

खापितमालवत्श्याम।।चंचलतरंगवद्यःकरःशुंडातयापरामृष्टाफुल्लेलावनवत्सुरभिश्चभवतीत्यर्थः।।।।६२।।।। फे
णविसमंगराअं विदुमदंतव्वणाणिअमुहच्छाअं।। मलिअवणकेसकुसुमंपरिहुत्तसमुद्दपरिमलंवहति।। फेनविष
मांगरागांविद्रुमदतव्रणानीतमुखच्छायां।मृदितवनकेशकुसुमांपरिभुक्तसमुद्रपरिमलामिववहंति। एवंपरिभुक्त
उपभुक्तोयस्समुद्रस्तस्यपरिमलपरिमलसंभोगरूपसंबंधस्यनिर्हितदिवधारयंती।ताश्चिह्नमेवाहकीदृशीफेनए
वविषमःपरिरंभणा[illegible]दिनाकचित्कचिद्विलुलितोअंगरागोयस्यास्तांएवंविद्रुमएवदंतव्रणोलोहितत्वात्तेनआनी
ताप्रापिताअनीवाप्रौढावामुखेनदीप्रवेशस्थानेछायाकांतिर्यस्यास्तां [illegible]दीसमुद्रयोःसंबंधेनविद्रुमाणांप्रकटत्वा
दिभावःएवंचमृदितानिवनान्येवकेशास्तेषांकुसुमानियत्रतथाचसमासोत्त्यासमुद्रस्यनायकत्वंवेलायाश्चना
यिकात्वंप्रतियतेसापिनायकोचमर्दनकचित्कचिद्विषमितफेनतुल्यचंदनाद्यंगरागाविद्रुमप्रायरक्तदतक्षता
नीतानकांतिःकराकर्षणादिनामृदितकेशाकुसुमाचभवतीतिसाम्यं।।६७।। सिप्पिउडमीलिअच्छिंलआहरभ
न्तरेप[illegible]वरिवड्ढंतं अणुराअपरिट्ठविअंआअण्णंतिवकिणरुग्गीअरवं।। शुक्तिपुटमुकुलिताक्षींलतागृहा
भ्यंतरेषुपरिवर्द्धमानं।अनुरागपरिस्थापितंआकर्णयंतीमिवकिन्नरोद्गीतरवं।। किन्नराणामुद्गीतरूपंरवंआ
कर्णयंतीमिवपुनःकीदृशींशुक्तिपुटएवमुकुलितमक्षियस्यास्तापूर्वोक्तभिदुरशुक्तिपुटानांमुकुलिनयनतुल्य
त्वादित्यर्थःगीतरवंकीदृशंलतागृहाणामभ्यंतरेषुपरिवर्द्धमानंप्रतिशब्दोपचयादितिभावःएवअनुरागंप्रति
नाटकार्णाटादिरागंपरिसर्व्वतोभावेनस्थापितंसम्मूर्छनांप्रापितंअनुरागेणगीतप्रीत्यावापरिस्थापितंयथो
चितस्फतिग्रामादिषुप्रापितंअन्योपिगीतश्रवणेकालेमुखेनमुकुलितचक्षुर्भवतीतिध्वनिःअथचअनुरागपद
चिह्नितत्वादाश्वासकविछिन्तिरप्युक्ता॥ रामप्रस्थानद्वारायारानदासप्रकाशिता।।रामसेतुप्र[illegible]दीपस्यपूर्णा

भूत्त्रयना शिखा॥१॥ अथपड्विंशता स्कंधकेरादिकुलकेनसमुद्रमाह॥ अहपेच्छइरहुतणओ चडुलंदोससअ
दुक्खवोलेअब्धां अमअरससागेरुअंकज्जारंभस्सजाब्धवसमुद्दं॥अथपश्यतिरघुतनयश्चटुलंदोषशदु
खव्यतिक्रमणीयं॥अमृतरससारगुरुकं कार्यारंभस्ययौवनमिव समुद्रं॥अथवेलाप्राप्त्युत्तरं रघुतनयो रामः
समुद्रंपश्यति कीदृशंचटुलंचंचलंएवंदोषोमकरकल्लोलादिस्तद्बाहुल्येनदुःखलंघनीयंशतशब्दस्याधिक्यार्थ
कत्वात् दोषशतदुःखव्यतिक्रमणीयं वादोषशतेनबाहुशतेनापिदुर्लंघ्यमित्यर्थःएवंअमृतरसेनसारेणएवसा
रोधनंतेनगुरुकमितिशायितंउत्प्रेक्षते किमिवकार्यारंभस्य आरभ्यमाणकार्यस्यकृदभिहितइतिन्यायात् यौव
नंमध्यभागमिवकार्ये आद्यंतभागौ सुकरौमध्यभागस्यपरंदुष्करत्वमित्यर्थःतद्वदपिदोषशतेनविघ्नशतेनदुः
खनिस्तारणीयं एवंअमृतरसप्रायंयत्सारं फलभागस्तेन गुरुकमादरणीयमितिसाम्यं। आश्चर्यरूपत्वमचिरम
कार्यं प्रत्युहत्वेनपारावारजिज्ञासावदर्शनेतात्पर्यं॥१॥ अणस्सवपडिबिंबं धरणी अवणि ग्गमं दिशाणवणिओ
लं भुअणस्सवमणितडिमंपलअस्सवसावसेसजलविच्छडु॥ गगनस्येवप्रतिबिंबं धरण्याइवनिर्गमंदिशामिवनि
लयंभुवनस्येवमणितडिमंप्रलयस्येवसावशेषजलविच्छर्दं॥पुनःकीदृशंगगनस्यप्रतिबिंबमिवएतेनप्रतिबिंब
स्यप्रकृतिसमानाकारत्वादाकाशतौल्यं। धरण्यानिर्गममिवनिर्गम्यतेअनेनेति निर्गमोद्वारं येन धरणीनिर्गता
तथाचनिर्गमस्थानत्वेनगांभीर्यमन्यधिकपरिमाणवत्त्वंच॥ दिशांनिलयोगृहमिवतथाचदिगपेक्षयाव्यतिव्या
कत्वंभुवनस्यमणिघटितभित्तिमिवंतडिमंअवच्छेदकभित्तिभागस्तथाचस्वाभावान्मत्स्यापाताल व्यापिनोपिक २३
ल्लोलद्वारागगनव्यापकत्वंचतुर्दिगवस्थितस्य क्रोडीकृतत्रिभुवनंचतडिमंकुट्टिममिवेति त्रिभुवनाश्रयप्रांग

णत्वमिति कश्चित्प्रलयस्यसावशेषजलविच्छर्दं समूहस्तावता विश्वव्यापकत्वंसमुद्रस्यप्रतियतेसर्वत्रोत्प्रेक्षा
तडिमंकुट्टिमे भिन्नाविति कोषः॥२॥भ[illegible] निरुभमडकल्लोलं थोरकराहअदिसामुहंअस्थअसलिलं॥ सासअमएण
वहुसो खोहिज्जंतं दिशागएणवससिणा॥भ्रमणशीलोद्भटकल्लोलं स्थूलकराहतदिग्मुखावस्तृतसलिलं॥स्वा
श्रयमृगेणपक्षेश्वेतमदेनबहुशःक्षोभ्यमाणं दिग्गजेनेवशशिना॥पुनःकीदृशंस्वंआश्रयो यस्य सस्वाश्रयःता
दृशोमृगोयस्यतेनशशिनाबहुशः क्षोभ्यमाणंचद्रोदयेनतरंगोत्थनात् केनेवदिग्गजेनेवयथादिग्गजेनश्वेतत्वादै
रावतेनबहुधाक्षोभ्यते दिग्गजेन कीदृशेनशाश्वतः सार्व्वदिकोमदो यस्यतेनएवंभ्रमणशीलाआवर्तीभूता उद्भटाः
कल्लोलायस्यतंअवंस्थूलोविस्तीर्णः करःकिरणः तेनाहतानिस्पृष्टानिअतएवदिङ्मुखेषुवस्तृतानिसलिलानियस्य
तंचंद्रोदयेनसावर्त्तगर्गेन दिग्व्यापिजलशालित्वादित्यर्थः गजपक्षेकरः शुंडातयाआहतानिताडितानीतिव्याख्ये
यमन्यतुल्यं शुंडाहतजलानांभ्रमणशीलत्वाद्दिग्गामित्वाच्चेतिभावः॥३॥ कल्लोलानाह॥ अप्फुणबिदुमगुथत
पडिस्थिरे सलिलकल्लोले॥मन्दरमूढप्पहरे अज्जविसंखाअलोहिएवववहंतं॥ आक्रांतविद्रुमवनान् व्याकुलपरि
स्थिरान् सलिलकल्लोलान्॥मंदरमूढप्रहारानाद्यापिसंस्त्यानलोहितानिववहंतं॥एवंसलिलकल्लोलान् वहंतं
कीदृशान् आक्रांतानाकृष्टानाछादितंवाविद्रुमवनंयैस्तान् एवंव्याकुलानितस्ततोवर्त्तिनस्सतःपरिस्थितान्
कदाचित्स्थिरतयाभासमानानित्यर्थः उत्प्रेक्षते कानिवअद्यापिसंस्त्यानंविष्टब्धलोहितंरुधिरंयत्रतान् मन्दर
स्यमूढानभ्यंतरवर्त्तिनः प्रहारानिवप्रहारस्तत्स्थानंतथाचलोहित्येनविद्रुमवनस्यरुधिरेणच्छन्नतयाप्रसारि
तयाचप्रहारस्थानस्यकल्लोलेन साम्यंव्याकुलेपुरुषेपरिस्थिरानित्यत्रापिअभ्यंतरप्रहारेशोणितंवर्त्तुलीभूयती

॥ ॥२२॥ ॥ घ्रती।तिस्वभावः ॥ ६॥ अथनदीजलप्रवेशमाह ॥ ॥ मूलं घण विप्पइण्णं जलणिवहं भरिअस अलणहमहि विवरं
मू॥णइमुहपल्हत्थत्तं अप्पाणं विणिग्गअं जसंवपिअत्तम्॥ मुखर घन विप्रकीर्णजलनिवहं भूतसकलनभो
महीविवरं। नदीमुखपर्यस्यत्तं आत्मनोपि निर्गतं यशइव पिबंतं॥ आत्मनोपि निर्गतं बहिर्भूतंजलसमूहं पि
बतंक्रीडीकुर्व्वंतं आत्मनिर्गतंपयः स्वेदप्रायमपेयमपीत्यपेरर्थः यद्वा आत्मनिर्गतमपिपातोलजलं पिबंतमि
त्यपिनासूचितमनुक्तं। तथाचसकलजलविश्रामभूमिमितिभावः तदुक्तंपयसामर्णवइवेतिजलनिवहं किं
भूतं मुखराः शब्दायमानायेघनामेघास्तै र्व्विप्रकीर्णमितस्ततो विक्षिप्त मतएवभूते व्याप्तेमहिनभो विवरेये
नवृष्टिकालेभूम्याकाशव्यापनादित्यर्थः एवंनदीमुखेननदीप्रवेशस्थानेनपर्य्यस्यत्तमितस्ततो गच्छंतं समुद्र
तरंगाभिघातादितिभावः अथचसमासोक्त्यासमुद्रस्यनायकत्वंनदीनांचनायिकात्वंप्रतीयंतेतथाहिअन्योपि
नायकोनायिकामुखेनविक्षिप्यमाणमात्मनएव निर्ग्गतंजलंमधुतन्निर्व्वहं पिबतितदपिबतितदपिमुखेरण
रतिकालीनशब्दं कुर्व्वतानायकेनैवविप्रकीर्णंभवतिएवंपानकालेस्खलनाद्भूम्याकाशव्यापिचतथाचयथाना
यकोनायिकामुखेगंडूषितंमधुदत्वापुनस्तयादीयमानं पिबतितथासमुद्रोपिमेघद्वारानदीमुखेसमर्प्पितं
निजंपयस्तेनैवप्रत्यर्प्पमाणं गृह्णातीत्यर्थः तथाचतव्ययलाभयोरपिह्रासवृद्धिशून्यत्वमस्येतिध्वनि
तं उत्प्रेक्षतेजलनिवहं किमिचयशइवसमुद्रस्यैवेदंजलमितिकीर्त्तिरूपमिवअन्योपियशः पिबतिआस्वा
दयतिकीदृशं मुखरामागधास्तै र्व्विप्रकीर्णमितस्ततः प्रकाशितंएवं व्याप्ताकाशमहीपालंविवरंपाता
लंएवंनतिमुखेनयाचकेनपर्यस्यदिशिदिशि गच्छत् अथवात्मनएव निर्ग्गतंस्वयशः स्वस्मादेवनिर्ग्गच्छ २२

ती।तिभावः ॥ ५॥ अथसदाशोभासंबंधमाह ॥ ॥ जोण्हाएवमिअंकं कित्तीअवसुउरिसंपहाएवरविंम्॥ सेलंमहा
णइअवसिरीअविरिणिग्गआइ विअमुच्चत्तम्॥ जोत्स्नाएवमृगांकं कीर्त्येवसुपुरुषं प्रभयेवरविंशैलंमहान
द्येवश्रियाचिरनिर्ग्गतयाप्यमुच्यमानं चिरंव्याप्यनिर्ग्गतयापिश्रियाअमुच्यमानं अपिर्विरोधाभास सूचनायत
थावलक्ष्म्या चिरनिर्ग्गतत्वादसंबंधेनप्रसज्यमानोविरोधः श्रीशब्दश्लेषेणशोभयाअमुच्यमानःपरिह्रियते यद्वा
चिरं निर्ग्गतयावहिर्भूतयाकांत्याअमुच्यमानमुभयपक्षेपिसश्रीकमित्यर्थः उभयसाधारणीमुपमामाह॥ क
याकमिवज्योत्स्नयामृगांकमिव कीर्त्यासुपुरुषमिवप्रभयारविमिवमहानद्याशैलमिवतथाचयथाज्योत्स्नाकी
र्त्तिप्रभामहानदीभिस्ततस्ततश्चिरंनिर्गताभिरपिमृगांकसुपुरुषरविशैलानपरित्यज्यंतेमूलेश्वविच्छेदात् तथाशोभया
समुद्रोपीतिभावः ॥ अथवडवानलमाह ॥ कालन्तरजीअहरं गओणिअत्तत्तपवणरअघट्टिज्जत्तं॥ सल्लवंदेहलग्गंविअ
डंवडवामुहाणलंवहमाणं॥ कालांतरजीवहरंगतापनिवर्त्तमानरयघट्यमानं। शल्यमिवदेहलग्नं विकटंवडवामु
खानलंवहमाने॥ पुनःकिंभूतं विकटंवडवामुखानलंवहमानंमुखनलं कीदृशंदेहेलग्नंअंतस्थितमित्यर्थःपुनः
कीदृशं कालांतरेप्रलयेजीवोजलंतसंहारकंसमुद्रजलं वाडवेनधस्यतइतिपुराणवार्त्ताएवं गतप्रत्यागतस्यपव
नस्यरयेनघट्यमान संबध्यमानं प्रलयवायुनावडवानलस्योद्दीपनमित्यर्थःउत्प्रेक्षतेवडवानलं किमिवशल्यमि
वयथादेहांतर्लग्नंकालांतरेकतिपयसमयमपेक्ष्यप्राणहरंगतप्रत्यागतश्वासरूपपवनवेगेनघट्यमानंचाल्य
मानं विकटंकर्णिकादिविशिष्टंचशल्यंशरफलादिरूपं ध्रियतेतथावाडवोपिदुःखदत्वादित्यर्थः॥ ॥७॥ भूस्युपमद्द
कत्वमाह ॥ ॥ धुअवणराइकरअलं मलअमहिन्दस्थणिंरसीलणसुहिअंवेलालिंगणमुक्कं छिविओसरिअं
लये ५

Dr. BHAU DAJI MEMORIAL

एहिंवेलवत्तंव महिम्॥ धुतवनराजिकरतलां मलयमहेंद्रस्तनोरआइ किरण स्तुखितां पक्षे स्तुहितां॥ वेलालिं
गनमुक्तां स्पृष्टापसृतकैर्वेपयन्तमिच पक्षे व्याकुलयन्तमिव महिम्॥ स्पृष्टं स्पर्शः अपसृतं स्पर्शानंतरमपसरणम्
स्पर्शः प्रशंसायां कन् तेन प्रौढे स्पृष्टापसृतकव्यापारे वेलासमुद्रतीरं तदवच्छेदे नालिंगने सति मुक्तां त्यक्तां महीं
कंपयंतं तथा च तरंगगतागताभ्यां स्पृष्टे सति वेलावच्छेदेनालिंगनमपसृते सति मुक्तिरभूदित्यर्थः तेन भूस्यांदनक्षम
तरंगमहत्त्वेन सिंधोरधिकपरिमाणत्वमुक्तं एवं समासोक्त्या समुद्रस्य नायकत्वं भूमेर्नायिकापि नायकेन स्पृष्टापसृ
तकैरालिंगनविशेषव्यापारैर्वेलायां सुरतसमये आलिंग्यालिंग्यरभसेन मुच्यमाना व्याकुलतामाप्नोतीति ध्व
निः किंभूतां महीं धुतं स्वकंपेन कंपितं वनराजिरूपं करतलं यया तां एवं मलयमहेंद्रावेव स्तनौ यत्र तादृशां यदुरःस्व
मध्यं देवास्तरंगेण तद्वार्द्रीकरणेन सुखितां शैत्यमासादयंतिनायिकापि नायकालिंगने हावेन विधुतपाणिः स्वेदे
नार्द्रित मलयमहेंद्रप्रायस्तनहृदया सौहित्यमाप्नोतीति साम्यं॥९॥ धैर्यमाह॥ ॥ ठाणे विठिइपहुत्तं पलएम
हिमंडलंमि वि अमाअंतं॥ पणअत्तवामणतणुं कमत्तदेहभरमरिअलाअंवहरिम्॥ स्थाने स्थितिप्रभूतं प्रलये
महीमंडलेयमांतंप्रणयह्वामतनुं क्रममाणदेहभरभृतलोकमिवहरिम्॥ स्तृत्यामर्यादया स्थाने स्वांतेपिप्र
भूतं मांतमप्रमये महीमंडलेपि अमांतमुद्वृत्तजलं त्रिजगत्प्लावकत्वादित्यर्थः कमिव प्रणयं तीवलियाच माना
वामनरूपातनुर्यस्य तंक्रममाणंपादविक्षेपशालि यद्देहं तस्य भरेण प्राचुर्येण भृता व्याप्ता लोका भुवनानि येन त
था विधं च हरिमिव तथा च यथा हरिर्बलिहरणे कार्ये वसाद्यामनींतनुमास्थाय क्रमेण त्रैलोक्यमाचक्राम तथा
अयमपि मर्यादया प्रवाहप्रभृतःकाले स्वीत्रै लोक्यस्ता वि नीमूर्त्तिमादास्यत इतिभावः वामनःपादविक्षेपेणब्र

ह्मांडमस्फोटयदिति पुराणवार्त्ता॥ अथलौकोत्तरत्वमाह॥ दीसंतंअहिरामं सुव्वंतं पि अविद्रप्हसीअव्वगुणं॥ सु
सुकअस्सवपरिणामंउअहुज्जं तं पि सासअसुहप्फलअं॥ दृश्यमानमभिरामं श्रूयमाणमध्यवितृष्ण श्रोतव्यगु
गुणं॥ सुकृतस्येव परिणामं उपभुज्यमानमपि स्वाश्रयसुभफलदं पक्षे शाश्वतसुखफलदं दृग्विषयः सन्नयो तमकर
कं तु कल्लोलादिभिरतिरमणीयः श्रुतिविषयसन्नवितृष्णं श्रोतव्याकृत्स्नसूचकाः पूर्वोक्ता एव गुणा यस्य तादृक्
तथा स्नानपानावगाहनादिभिरुपभुंजमानस्सन् स्तं आश्रयो यस्य तादृक् शुभं श्वेतं फलं मुक्तादितदातायस्तमित्यर्थः
उत्प्रेक्षतेक मिव सुकृतस्य पुण्यस्य परिणाममंत्यभागमिव सोपि करितुरगादिसमृद्धिद्वारा दृश्यमाणो रमणीयः षष्टि
वर्षाद्यवच्छिन्नफलजनकत्वेन श्रूयमाणस्सन् सश्लाव श्रोतव्यं तथाविधस्वर्गादिगुणः एवं उपभोगविषयीक्रियमाणः
सन् शाश्वतं सार्व्वदिकं सुखरूपं यत्फलं तत्प्रदइत्यर्थः सुकृतपरिणामेनैव समुद्रदर्शनं भवतीतिभावः॥१०॥ अथनानागु
पानाह॥ उक्खअदुमंवसेलं हिमहअकमलाअरस्वलच्छिविमुक्कं॥ पीअमइरम्वचसअं वहुलपओसंवमुद्धचन्द
विरहिअं॥ उत्खातद्रुममिव शैलं हिमहतकमलाकरमिव लक्ष्मीविमुक्तं॥ पीतमदिरमिव चषकं बहुलप्रदोषमिव
मुग्धचंद्रविरहितं॥ उत्खात उत्पाटितो द्रुमो यस्य तं शैलमिव शैले द्रुमसामान्यस्योच्छेदादितः पारिजातस्याकर्षणा
त् हिमेन हतानां कमलानामाकरं शरद इव लक्ष्म्या विमुक्तं त्यक्तं लक्ष्मीपदस्य श्लिष्टत्वेन सरसि शोभाया विगमादितस्त
हरिप्रियाया हृतत्वात् पीता मदिरा यस्य तादृशं चषकमिव मदिरा शून्यमित्यर्थः चषके मदिरायाः पीतत्वादितस्सुद्वा
रात्॥ बहुलः कृष्णपक्षस्तत्प्रदोषमिव मुग्धचंद्रेण विरहितं शून्यं तत्संध्याकाले मनोहरचंद्रानुदयादितस्तु बालचंद्र
स्योत्थापनात्तुल्यत्वं तथा च पारिजातादीनामुत्पत्तिस्थानमित्यर्थः केचित्तु हृतसारत्वं दोषमुद्राव्यप्रकारांतरेण

।।।।२९।।।। व्याचक्षतेतथाहि उत्खातद्रुमंवद्योलंहिमहयकमलाकरंवला स्थिद्विमुक्तं पीतमदिरंवचाग्रायं बहुलप्रदोषं
वमुग्धलद्र विरहितं।। उत्खाताद्रुमायस्मात्तवशा आयताइला पृथिवीयस्यतंसमुद्राव्रतत्वात् हिमंचंदनं श्रीखंडं
हयजेश्चे श्रवाः कमलालक्ष्मीस्तेषामाकरंवलंसामर्थ्यं छिनं तीतिवलस्थित विषंतेन विमुक्तंकालकूटस्योद्धारात्
पीतामदिरायस्यतंवचापृथिवी तत्रवीतेअस्तंबहुलाप्रकृष्टादोषाग्राहादयोयत्रतं इदमुत्कर्षरुपमेवेतिभावः व
कारोवरुणस्सएवमुग्धचंद्रस्तेन विरहितंविशिष्टं विशब्दरहितशब्दयोरभाव वाचकत्वेन निषेधद्वयस्यप्रकृता
र्थगमकत्वादित्यर्थः। हिमश्चंद्रेतुषारेवचंदनेपिहिमंमतं एवंपृथिवीस्यादिलावचा ।।अथरत्नान्याह।। निप्फण्ण
सुहालोअंविमलजलब्भन्तरट्ठिअंवहमाणं।। दरकड्ढिअवरइणा करावलंविअकरंरअणसंघाअं।। निष्पन्न
सुखालोकं विमलजलाभ्यंतरस्थितंवहमानंदरकृष्टमिवरविणा करावलंवितकरंरत्नसंघातं एवंविमलानांज
लानामभ्यंतरेस्थितंरत्नसमूहंवहमानंकीदृशं निष्पन्नंनिष्पादितंसुखंयेस्तादृशा आलोकास्तेजांसियस्यतं
जलाभ्यंतरवर्त्तिरत्नादिचाकचक्यंदृष्ट्वालोकानामानंदोजायतइतिहृष्टमेव। सूर्यतेजसंबंधादत्यच्छजलाभ्यंतर
वर्त्तिरत्नादीनांव्यवहितानामपिसान्निध्यमधिगम्यतेतदुत्प्रेक्षतेकिंभूतंरत्नसंघातं विपाकरेणतेजसाअव
लंबितकरस्तेजोयस्यतथाविधमतएवदरकृष्टमीषदाकृष्टमिवतथाचसूर्यतेजसारत्नतेजः संबंधेसान्निध्य
मानादाकृष्टमिवरत्नादिभासतइतिभावः अन्येपिलोकोजलाभ्यंतरेमज्जन्नन्येनसमुत्पादितसुखदर्शनः करेक
रेणाः बलंव्याकृष्यतइतिध्वनि एतेनाच्छजलत्वमुक्तं।।१२।।पुनर्वाडवमाह।।।। महणाआसविमुक्कंणछित्तामअ २४
विसंखलाणलणिवहं।। वासुइमुहणिसंदंवडवामुहकुहरपुंजिअंचहमाणं मथनायासविमुक्तंनस्थितामृत

विश्रृंखलानलनिवहं। वासुकिमुखनिस्यंदंवडवामुखकुहरपुंजितंवहमानं एवंवासुकिमुखस्यनिस्यंदंवि
षक्षरणरुपंवडवायामुखकुहरेपुंजितंवर्त्तुलीभूतंवडवानलतयाव्यवस्थितंधारयंतं कीदृशंमुखनिस्यंदं मथ
नेआयासेनविमुक्तंत्यक्तं एवंनस्थितममृतंयमृतंतेन विश्रृंखलः इतस्ततश्चारी अनलनिवहोयत्रतथाभूतंसु
धानामुत्थितत्वेनतत्सान्निध्याभावाद्विषाग्नीनाविश्रृंखलत्वंसुधासन्निधौगरलप्रादुर्भावाभावात्तथाचसमुद्रम
थनकालीनमंदरपरिघट्टनसमुत्थश्रमसमुद्धतनेत्रीभूतवासुकिमुखविषस्तोनइववाडवाग्निरित्युत्प्रेक्षितमिवा
वार्थस्यव्यंग्यत्वात् अद्यापिविषस्येस्वभावतः श्यामत्वंतथापिज्वलद्रूपस्यवह्निसाम्यमितिभावः ।।१३।।अथगुणां
तरमाह।। ।। धीरंवजलसमूहंतिमिणिवहम्मिवसपक्खपव्वअलोकं ।। णइसोतवतरंगेरअणाइंवगरुअ
गुणसआइवहत्तं।। धैर्यमिवजलसमूहंतिमिनिवहमिवसपक्षपर्व्वतलोकं नदीस्रोतांसीवतरंगान्रत्ना
नीवगुरुकरणसतानिवहंतं यथाधैर्यतिमिनिवहनदीस्रोतोरत्नानिवहंतं तथैवजलसमूहपर्व्वतलोकतरं
गपरोपकारित्वादिगुरुकगुणव्रातान्यपिवहंतमित्यर्थः तिमिवत्संचारित्वालाभायसपक्षपदं पर्व्वतेधैर्या
दीनांगच्छत्वमहत्वप्रौढिदेर्घ्यनिर्मलत्वैर्यथासंख्यंजलसमूहादिभिस्तौल्यमितिसहोपमालंकारः।।१४।।
अथगाम्भीर्यादिगुणानाह।। ।। पाआलोअरगइरेमहिपइरिक्केविअडेणहणिरालम्बे।। तेल्लोक्केव्वमहुमहं
अप्पाणच्चिअगआगआइंकरेत्तम्।। पातालोदरगम्भीरेमहीप्रतिरिक्तेविकटेनभोनिरालंबेत्रैलोक्यइव
मधुमथनं आत्मन्येवगतागतानिकुर्व्वन्तम् ।। पातालोदरपर्यंतगम्भीरेमहीप्रतिरिक्तेभूमिशून्येखातेविक
टेभयानकेनभसिनिरालम्बेतरंगादिनानभः स्पर्शोपिस्थेर्याभावादतएवावलंवशून्येआत्मन्येवस्वखा

ताभ्यंतरएवगतागतानिप्रवाहरूपेणकुर्व्वंतंएतेनधैर्यमुक्तंकुत्रकमिवंत्रैलोक्येमधुमथनमिवयथामधुमथ
नस्त्रैलोक्येगतागतान्यात्मन्येवकरोतितदुदरवर्त्तित्वाज्जगतस्तथासमुद्रोपीत्यर्थः त्रीनपिलोकानूक्रमेणाह
कीदृशिंत्रैलोक्येपातालोदरेगभीरेमहिप्रतिरिक्तेमहीव्यतिरिक्तेकंदरादौविकटेशून्येनभसिनिरालंबेतदव
छेदेनावलंबशून्यइत्यर्थः॥१५॥अथपुनर्न्नदीसंगममाह॥ अहिलीअपरमुहीहिंछिविओसरिएहिअणुसअ
विलोलाहिम्॥ अणुणिज्जमाणमग्गंवेवत्तणिअत्तपत्थिआहिंणइहिम्॥अभिलीयपराङ्मुखीभिःस्पृष्टापस्त
तकरूपव्यापारैरभिलीयमिलनंकृत्वापराङ्मुखीभिर्न्नदीभिरनुगम्यमाणमार्गंकीदृशीभिर्न्नदीभिःवेपमाना
भिरथचनिवृत्तंसमुद्राभिमुखीकृतंप्रास्थितंप्रतीपगमनंयाभिस्ताभिःतथाचायमर्थःसमुद्रंप्रतिप्रस्थानेतरं
गाभिहतानद्यःप्रतीपंगत्वापितरंगग्रांतौसकंपसलिलाःपुनःपरावृत्यसमुद्रमेवनिवृत्तरंगपश्चाल्लग्नाःप्रवि
संतीत्यर्थःतत्रोत्प्रेक्षतेसमासोक्त्यासमुद्रेणसमंनदीनांनायकनायिकावृत्तांतेपरावृत्ययन्मयागम्यतेतद
नुचितंक्रियतइत्येवंरूपानुशयेनचंचलाभिरिवइवार्थस्यगम्यमानत्वात् अन्यत्रापिनायिकाभिःस्पृष्टाप
सृतकेननायकामालिंग्यकेनापिहेतुनापुनःपराङ्मुखीभिरथकिमित्येवंक्रियतइत्यनुशयेनगंतव्यंनवे
तिदोलायमानभिरंनौचित्यप्रतिसंधानेनकंपवतीभिरथचनिवर्त्तितविप्रतीपगमनाभिर्न्नायकोनुगम्य
तइतिध्वनिः॥१६॥अथमदिरादियोगमाह॥॥जीअगरुईहिंअज्जविइच्छापज्जत्तसुहरसाहिमएत्तं॥धण
अरद्धीअसिरीअअसलिलुप्पण्णाइवारुणीअअलोअम्॥ जीवद्गुर्व्विभिरद्यापिइच्छापर्य्याप्तसुखरसाभि २५
र्मदयंतं॥धनऋध्याश्रियाचसलिलोत्पन्नयावारुण्याचलोकंप्रणेभ्योपिगुर्व्वीभिरादृताभिरिच्छापर्य्याप्तो

यावदिच्छंस्त्रक्चंदनवनितादिसुखरसोयाभ्यस्ताभिसलिलादुत्पन्नयारत्नादिधनसमृध्यालक्ष्म्यामदिरया
चलोकंमदयंतंमत्तंकुर्व्वंतमित्यर्थःलोकेरत्नादीनामतिमादकत्वात्तथाचायमाकरोरत्नादीनामितिभा
वः महणुप्पण्णाइइतिपाठेमथनोत्पन्नयेत्यर्थः॥१७॥अथगुणांतरमाह॥॥चंडुलंपिथिरंअथिरंतिअसुक्खि
त्तरअणंपिसारभहिअं॥महिअम्पिअणोलुग्गंअसाअसलिलम्पिअमअरसणीसन्दं॥चटुलमपिस्थित्या
स्थिरंत्रिदशोत्क्षिप्तरत्नमपिसाराभ्यधिकंमथितमप्यनवरुग्णंअस्वादुसलिलमप्यमृतरसनिस्यंदं॥तरंगादि
नाचंचलमपिस्थित्यामर्य्यादयास्थिरंवेलानतिक्रामकंत्रिदशैरुत्क्षिप्तंमथनादुद्धृतंरत्नंयस्मात्तादृशमपिसारे
णधनेनाभिअधिकंपूर्णनानारत्नानांसत्वादेवमंदरेणमथितमप्यक्षीणंलवणाकरत्वादस्वादुसलिलमपिनि
स्यंदमानामृतरसकृदभिहितत्वादत्रचटुलत्वस्थिरत्वयोरेवमुत्क्षिप्तरत्नत्वादिभिस्साराभ्यधिकत्वादीनांप्रती
यमानोविरोधःतत्तदर्थेनापाक्रियतेअतएवापिविरोधाभाससूचनाय॥१८॥निधिवीलमाह॥॥पज्जत्तरअण
गब्भेणहअरुपल्हत्थचंदअरपारोहे॥उअरब्भत्तरसेलेसुरवइडिम्वणिहिएपिहिववहन्तम्॥पर्य्याप्तरत्न
गर्भान्नभस्तरुपर्य्यस्तचंद्रकरप्ररोहान् उदराभ्यंतरशैलान्सुरपतिडिम्बनिहितान्निधीनिववहंतं॥उदराभ्यं
तरशैलान्वहंतंकानिवसुरपतेरिंद्राडिंबोभयंतेननिहितानर्पितान्निधीनिवतथाचतडियाजलाभ्यंतरेवर्त्तमाना
नैनाकादयस्तासनिखातनिधिलेनोत्प्रेक्षिताइत्याशयःअन्योपीश्वरत्रासाद्धनानिगर्त्तेगोपयतीतिध्वनिः निधिलक्ष
णमाहकिंभूतान् पर्य्याप्तानिपूर्णानिरत्नानिगर्भेयेषांतान्रत्नशिखरत्वादेवंनभएवतरुस्तस्मात्पर्यस्ताइतस्ततोवर्त्ति

॥ ॥२६॥ नश्चंद्र क[illegible]राएच प्ररोहा अत्रतान् एवं गर्त्तस्था निधयोपि पर्य्यंतरत्नगर्भा तप रिरो पित चिह्न वृक्ष प्ररोह परिवृत्ता
भवंति प्रकृते समुद्रोभ्र मिस्तदंतरगताः पर्व्वता निधयस्तदुपरि चिह्न वृक्षो गगनं तत्प्ररोहो राश्चंद्र कराइ तिभावः य
द्वा असुरादिभिः सुरपति त्रासनिहिता न्निधींर्यथा वहति तथा शैला नपीति सहोपमा विशेषणद्वयं तुल्यं वस्तुतः
पर्व्वतारत्न गर्भत्वान्निधय एव इंद्रत्रासनिहितत्वं परमुत्प्रेक्षित मन्यत्समानं प्ररोहः शिफा तत्र पद्ममाहापद्मोत
था मकरकच्छपो। मुकुंदकुंदो नीलश्चशंखश्चैवाष्टमो निधिः॥ चंद्रोदयस्वभावमाह॥ परिअंभिअंउवगए वालो
णम्मि अणिअत्त चडुलसहावम्॥ णवजोव्वणेव्व कामं दइअसमागमसुहम्मि चन्दुज्जोए॥ परिजृंभितं उपगते
व्यतिक्रांते निवृत्त चडुलस्वभाव। नवयौवन इव कामं दइत समागम सुखे चंद्रोद्योते॥ चंद्रोद्योते उपगते सति परि
जृंभितं वर्द्धितं व्यतिक्रांते अपगते वसति निवृत्तचांचल्यं तरंग वृद्धवृद्धिभ्यामित्यर्थः चंद्रोद्योते कीदृशि परि
तः प्रीति विषयोयः समागमस्तेन सुखं यस्मात्तादृशि कस्मिन् कमिव नव यौवने कामम् इव यथा कामो नव
यौवने उपगते परिजृंभते व्यतिक्रांते तु निवृत्त चांचल्यस्वभाव तथायमपीत्यर्थः नवयौवनेपि कीदृशि द
यितस्य वल्लभस्य मागमेन सुखं यत्र तादृशि॥२०॥ अथ शंखादि सन्नामाह॥ ॥ दरफुडिअ सिप्पि संपुड पलो
ट्ट संख सुह भरिअ मुत्ता णिअरं॥ मारुअदूरुच्छालिअ जलभरिअद्ध वह पडिणिअत्त जलहरं॥ दरस्फुटित शुक्ति
संपुट प्रलुठित शंखमुखभृत मुक्ताप्रकरं॥ मारुत दूरोच्छालित जलभृतार्द्ध पथ प्रतिनिर्वृत्त जलधरं॥ परिणत
मुक्ताभरा। ईषत्स्फुटिते शुक्ति संपुटे मुक्ता बुभुक्षया प्रलुंठितं यच्छंख मुखं तेन भृतो धृतो मुक्ता प्रकारो यत्र तं शु २६
क्ति पुटा वृशंखेनाक्रम्य मुक्तास्तदभ्यंतरे प्रविशंतीत्यर्थः एवं मारुतेन दूरं व्याप्य उच्छालितैर्जलैर्भृताः पूर्णा

अतएव वक्र कार्यत्वादर्द्ध पथान्नभस्त एव परावृत्ता जलधरा यस्मात्तमिति जलबाहुल्येन खात गगनयोरपि सम
ना कारत्वमुक्तं॥२१॥ मरकतादीनाह॥ ॥ मरगअमणिपहाहअहरिआअत्तजरठप्पवालकिसलअं॥ सुरगअ
गंधुद्धाइअ करिमअरासण्ण दिण्णमेहमुहवडम्॥ मरकतमणिप्रभाहत हरिताय मानजरठप्रवाल किसलयं पव
नगज गंधोद्धावित करिमकरासन्नं दत्तमेव मुखपटम्॥ मरकतमणीनां प्रभाभिराहतास्संबंधा अतएव हरिताय मा
नाजरठाश्चिरंतनाः प्रवालस्य विद्रुमस्य पल्लवा यत्र तं मरकत कांति संबंधात् प्रवाल किशलयानामपि हरित्वमि
त्यर्थः एव जललंघनार्थ मागच्छतां सुरगजानामैरावतादीनां गंधाद्धेतोर्मदस्य उद्धावितेभ्यो गगन मार्गे एवाग
च्छत एतानाकलय्योर्द्ध नभसि गच्छद्भ्यः करिमकरेभ्यो जलहस्तिभ्य आसन्ने निकटे दत्तामेघ एव मुखपटा येन तं त
था च सुरगज युयुत्सतो द्धावित करि मकराणामासन्नत्वेन जलपानार्थ मागच्छंतो नससि वर्त्तमाना मेघा मुख
पटत्वेनोत्प्रेक्षिता मुखपटो मुखावरणपट। अन्यत्रापि गजयोसन्निपाते द्वयोर्छ्रताय मुखपटो दीयत इति स
माचारस्तथा च करिमकराणां युयुत्सया निरालंबे व्योम्नि धावनेन तेजः सालित्वसुरगजान्विहाय मुखपटदा
नेन तदपेक्षया द्वयोर्द्धितत्वं च सूचितं केचित्तु पूर्व्व निपातानियमेन आसन्नमेव दत्तमुखपटं निकटवर्त्तिभि
र्मेघैर्दत्ता मुखपटयेनेति योजयंति॥२२॥ अथ सर्प्पादि संबंधनाह॥ ॥ मणिवालअंतीरलआहरप्पहोहासि
रम्मणिवालअम्॥ घणवालिअंवेला लिंगणेण चडुलं महिलं घणवारिअं॥ मणिपालयंतीरलता गृह प्रभाव
भासितरम्य नृपालयं॥ घनवारिदं वेला लिंगनेन चटुलं महिलं घनवारितं मणीन्यांतीति मणिपाः सर्प्पा यक्षा
वा तेषामालयं गृहं यद्वा मणिपालकं मणीपालकमित्यर्थः मणिपालकं वा मणीन् संवृणोत्या श्रयत्वेन धारयती त्य

र्थः वलवल्लुसंवरणेधातुःएवुल्प्रत्ययःएवंतीरलतागृहाणांप्रभाभिरवभासिताउपद्राविताचन्यानूपालयाःसौ
धादयोयेनतंसौधापेक्षयालतागृहाणामुत्तत्वादित्यर्थःएवंघनाबहवोवारिदायत्रतंघनेभ्योवारिदंजलप्रदंवामे
घानांसमुद्रजलग्राहकत्वात् यद्वाघनवारितंघनैर्व्वारितंवेष्टितंअथवाघनंवारिकंघनंवारियत्रतंप्रावृट्येकन्नए
वंवेलालिंगनेनवेलातिक्रमेणहेतुनायन्महीलंघनंतत्रवारितंनिषिद्धं मर्य्यादाशीलत्वात् महीलंघनेच्छुरितिकुतो
ज्ञायतेतत्राह चटुलंचंचलंकल्लोलशालित्वात्वस्कतस्कवेलालिंगनेनचटुलंचंचलंअतएव महीलंघनेवारितंवे
लयैवनिषिद्ध प्रसरत्वात्तथाच सखीरूपायावेलायाआलिंगनेनतरलत्वान्मुख्यनायिकारूपाया महीलंघनेअति
क्रम्योपमर्देद्वारितमितिसमासोक्त्यालभ्यते अन्यत्रापिसखिसंभोगशीलनायकेनायिकापरिहरतीतिध्वनिः॥
॥अथचंद्रोदयेजलवृद्धिमाह॥ससिमऊहपडिपेल्लणपक्खुभान्तअंसञ्चरन्तधरणीहरपक्खुभंत्तअम्॥धी
रअंसइमुहलघणपञविज्झत्तअंअद्दिअचवलवाणलपअविज्झन्तअम्॥शशिमयूखपरिप्रेरणप्रक्षुभ्य
त्कंसंचरधरणीधरप्रक्षोभ्यमाणाधैर्यकंसदामुखरघणपीयमानंअस्थितंचवडवानलप्रताप्यमानं।चंद्रकि
रणपरिप्रेरणेनप्रक्षुभ्यहईमानंकंजलंयस्यतंएवंसंचरद्भिर्द्धरणिधरैःप्रक्षोभ्यमाणमितस्ततश्चाल्यमानंपर्व्व
तेचलतिजलक्षोभादितिपर्व्वतानांमहत्त्वमुक्तंसंचरद्धरणीधरपक्षोद्धांतमितिवातत्रसंचरताधरणीधरपक्षेपणउ
द्भ्रांत्तंतथाचैकपक्षचलनेसमुद्रःक्षुभ्यतीतिशैलानामतिमहत्त्वमुक्तंएवंधैर्यकंधैर्य्यस्वरूपंवेलानतिक्रमशील ²७
त्वात्॥तथाचधैर्यरूपधर्माभेदानातिधीरत्वमुक्तंप्राशस्त्येकन्‌धीरकमितिवाएवंसदामुखरैःसशब्दैर्घनैःपी
यमानंविहंगादयोपिभक्ष्यादिलाभेशब्दयंतइतिध्वनिःअस्थिनंचकल्लोलादिशालितयाचंचलमित्यर्थःएवं

वडवानलेनप्रताप्यमानंनतुशोष्यमाणमितिजलबाहुल्यमुक्तंअत्रप्रथमेनद्वितीयेनचपदेनशशिरूप
कृतस्नेहःशरणागतपर्वतादिवात्सल्यंचतृतीयेनधैर्यंजलदादिभिक्षुकोपकारित्वंचतुर्येनभीषणत्वंअं
गीकृतवडवानलधारणाजन्यदुःखसहिष्णुत्वंचोक्तंकोब्रह्मपवनार्केषुसमरेसर्व्वनाम्निचपानीयेचमयूरेच
मुसशीर्षसुखेषुकं॥२७॥सर्प्पसंचारमाह॥॥णिअअविसाणलपअविअमुत्ताणिअरपरिघोलमाणविसह
रम्॥मिणगइमग्गपाअडसेआलोमइलमणिशिलासंघाअं॥निजकविषानलप्रतापितमुक्तानिकरपरिघू
र्णमानविषधरं। मीनगतिमार्गप्रकटशैवालावमलिनमणिशिलासंघातं।निजकविषानलप्रतापितेर्मुक्ता
निकरैरर्थात्स्फुटित्वादेहेलग्नैःपरिघूर्णमानाविषधरायत्रतंतथाचनिजनिश्वासविषानलसंबंधस्फुटितव
पुर्निपतितमुक्ताभितापहेतुकपरिभ्रमणेनसर्व्वत्रमुक्तासत्वेनतथैवपुनस्तथाविधमुक्तासंबंधनिबंधनोभि
तापइत्यस्छेर्य्येणभुजंगानांसमुद्रमुक्तानवछिन्नदेशराहित्यमुक्तंवस्कतस्क निजकविषानलप्रतापिताअत
एवशीतलतयामुक्तानिकरेपरिघूर्णमानाविषधरायत्रतमित्यर्थः तेनतथाविधप्रौढविषमहासर्प्पसत्वंत
दभितापनिवर्त्तनक्षममुक्तासत्वंचसूचितंएवंपूर्व्वनिपातानियमनप्रकटोव्यक्तोयोमीनानांगतिमार्गःतत्र
शैवालैरर्थादितस्ततःपतितैरवमलिनःश्यामीकृतःछन्नइतियावत्नमणिरूपशिलानांसंघातोयत्रतंअत्रस
मुद्रशैवालानांप्रांतहृयेपातान्मत्स्यानांसंचारपथस्यप्रकटत्वेनाकारस्येमहत्वमुक्तं।लक्ष्मीसंबंधमाह।सरिसं
कुलंमहुमहवल्लहाइलच्छीअसारसरिसंकुलम्॥महिलाईअंणइमुहपल्हत्थिआणिअत्तिअवेलामहिलाइ
अम्॥सरितसंकुलंमधुमथनवल्लभायालक्ष्म्याःसारसदृशंकुलंमहीलालितंनदीमुखप्रस्थितापनिवृत्तवेला

॥ ॥२६॥ ॥ महिलायितं सरिद्भिः संकुलं व्याप्तं नदीनां तत्रैव प्रवेशादित्यर्थः। एवं हरिप्रियायाः लक्ष्म्याः सारं श्रेष्ठं सदृशं हरि
प्रियायोग्यं अथवा अरोधनं तेन सदृशं योग्यं लक्ष्म्या धनवत्त्वेन तत्पितुरपि तथैव औचित्यादिति भावः। एवंभूतं
कुलं वंशं पितृरूपत्वादित्यर्थः। एवं मर्यादालितं पृष्ठं तदधिष्ठितत्वात् महीलागित मिति वा मर्यादालागितं योगित
मर्यादी स्वैरेण एवं नदीमुखेन नदीप्रवेशस्थानेन प्रस्थितासमुद्राभिमुखी अथाप निवृत्तातत्तरंगाभिघातेन पश्चा
दभिमुखीवेलाजलं महिलायिता महिलावदाचरंती यत्र तं तथा चस्पृष्टापसृतकव्यापारेण नायकमालिंग्यापस
रंती नायिकेव वेलापि समुद्रमभिलीयापसरतीति कल्लोलप्रकर्षः यद्वा तथाभूतवेला महिलाजितं तथाभूतावेलैव म
हिलातया। जितं पुनरतिक्रान्तं तत्रैव तज्जलप्रवेशादित्यर्थः। वेलातत्तीरनीरयोरिति कोषः॥२६॥ पुनर्नदीसंघट्ट
माह॥ ॥ णइसहस्स पडिच्चुंबणणाअरसत्तअं पलअमेहसमद्दसहणाअरसंतअं॥ पलवेणपवणेण महुरसंचारि
अं मअअनअखलंतंव महुरसंचारिअम्॥ नदीसहस्रपरिचुम्बनज्ञातरसांतरं प्रलयमेघसमदुस्सहनादरसं
तं पिलवेनपवनेन मधुर मदिरासंभोजितं रसं वा रितं मृदुमदस्खलंतमिव मधुरसंचारितं नदीसहस्रपरिचुंब
नेनज्ञातं रसांतरं जलांतरं यत्र तं नदीसंगमेन ज्ञायते नद्याजलमिदमित्यर्थः यद्वा नदीसहस्रस्य परिचुंबने संगमे
ज्ञातो रसो जलं यस्यां तं। इदं समुद्रस्य जलमिति बुद्धिविषय इत्यर्थः। एवं ततं विस्तीर्णं एवं एवं प्रलयमेघसदृशेन ना
देन रसंतं शब्दायमानं सुवर्णेन धनीतिवत् प्रलयमेघध्वनितुल्यजलध्वनिमित्यर्थः यद्वा प्रलयमेघसमनादेन
रसत् कं जलं यस्य तं प्रलयमेघसमनादरसत्कं एवं कोमलेन पवनेन मधुरं यथा स्यात्तथा संचारितं कमिव म

Dr. BHAU DAJI MEMORIAL

धुरसंचारितं मदिरारसंभोजितपुरुषमिव पुरुषं किंभूतं मृदुना मंदेन स्खलंतं भूमौ पतंतं चर गतौ भक्षणे चेति धातुः
तथा च यथा निपीतमद्यो मदमार्द्र मंदं स्खलति तथा समुद्रोपि मदानिले मंदं चलतीत्युपमा एवं मत्तोपि न दीसहस्र
प्रायसतरंगकामिनीसहस्रपरिचुंबनेन ज्ञातं शृंगारादिरसांतरं येन तादृशः प्रलयमेघतुल्यशब्दं श्वभवतुच्चैः शब्दा
यमानत्वादिति भावः वस्तुतस्तु मंदसंचारे परमुत्प्रेक्षेयं तथा हि कमिव मधुरसभाजि मिवात्त एव मृदुमंदे
न स्खलंतं इव कालाक्षिगोलकन्यायादिवशात् सौभ यत्रान्वयस्तथा च पवनेन मधुरं चलतीति नार्थः। किंतु मदि
रारसं पीतवानतो मृदु मंदेन मंदं स्खलतीति सर्वमन्यत् समानं मधुक्षौद्रे जले। क्षीरे मद्ये पुष्परसे पिचेति विश्वः
॥२७॥ शेषनागमाह॥ ॥ कसणमणिछाआरसरज्जंतोव्वपरिप्पवत्तफ्फणम्॥ हरिणाहिपंकअक्खलिसेस
णिसासजणिअविअडावत्तम्॥ कृष्णमणिछायारसरज्यमानोपरिप्लवमानफेनम्। हरिनाभिपंकजस्खलि
तशेषनिश्वासजनितविकटावर्त्तं कृष्णमणीनामिंद्रनीलादीनां छाया कांतिस्सैव रसो नीलिकादिद्रवस्तेन रज्य
मानावर्णांतरं प्राप्ताः परिप्लवमानाः संचरंतः फेना यत्र तं तथा च गभीरजलमूलस्थमणिछायानामतिदूरोप
रिस्थफेनसंबंधेन मणीनामुद्दामतेजस्त्वं जलस्य च स्वच्छ्यमिति भावः एवं हरिनाभिपंकजे स्खलितेन शे
षनिश्वासेन जनितो विकटावर्तो यत्र तं तथा च अधोमुखस्य शेषस्य क्रोडेशायीत्तानहरिनाभिकमलेतलव
र्ति निस्खलितो निश्वास ऊर्ध्वधावत्तुपरि जलावर्त्तं जनयतीत्यर्थस्तेन शेषनिश्वासावरोधकत्वेन कमलस्य
मूले स्खलितस्योपरि विकटावर्त्तजनकत्वेन निश्वासस्य तादृशावर्त्ताधिकरणत्वेन समुद्रस्य च महत्त्वमुक्तं॥
॥२८॥ सहरंगअविद्दुमपल्लवप्पहाव्वोलिरसासअरंगअंरविराइअं धरणिअलंबमंन्दराअड्ढणदूरविराढ

ऊनं॥ सतरंगकं विद्रुमपल्लवप्रभाघूर्णमानस्थातरंगकं रविराजितं धरणितलमिव मंदराकर्षणदूरविराविकं॥ सहतरंगेण वर्त्तते यस्तं यद्वा संगरांगकं सगरं विपक्षहितमंगकं यस्य तं सगरांगजं वा सगरस्य अंगजं पुत्रमिव तत्खानितत्वादित्यर्थः एवं विद्रुमस्य पत्राणां प्रभाभिघूर्णमानाश्चा साब्धी दिकं रंगकं लौहित्यं यत्र तं। विद्रुमलौहित्यस्य जले संक्रमात्। यद्वा विद्रुमपल्लवेषु घूर्णमानप्रभाः संचरत्कांतयः शाश्वतारंगकाधातुविशेषा यत्र तं पूर्व्वनिपातानियमात्। एवं रवः शब्दः तद्विशिष्टा रविणो हंसादयस्तैराजितं शोभितं। एवं मंदरस्य पर्व्वस्य मथनसमये आकर्षणेन परिचालनेन दूरं व्याथविराविशब्दयुक्तं कं जलं यस्य तं। मंदरभ्रमणेन ध्वनिगांभीर्य्यादस्य महत्वमुक्तं अथवा दूरविदारितं जिकं मंदरचालनेन दूरं व्याथविराजिसमुच्छलत्कं जलं यस्येत्यर्थः किमिव धरणीतलमिव। कीदृशं भूतलं सकरांगकं सहकरेण राज्यग्राह्येण वर्त्तते अगरागिरं यस्य तत्तथा भूमौ करसत्वात्। विशिष्टद्रुमो विद्रुमस्तत्पल्लवप्रभाभिर्घूर्णमानः संबध्यमानः श्वाश्रयः स्वनिष्ठो रंगो यत्र तत् तल्लौहितसक्रप्रशंसायां कं॥ एवं रविणा सूर्य्येण राजितं दीपितं मंदराकर्षणेन दूरं व्यथविराविततदुत्पादनेभूमेविदिर्णयमानत्वेन शब्दत्वादित्यर्थः॥ ॥२९॥ मुत्ताल अंति असविइण जीविअसुहान अजमुत्तालअं॥ विस्थिण्णअंपलअव्वेल्लुसलिलहेलामलिअविस्थिण्णअम्॥ मुक्तालयं त्रिदशाविती र्णजीवितसुखामृतजन्मोत्तालकं विस्तीर्णकं प्रलयोद्वेलसलिलहेलामृदितोर्वीस्त्यानकं॥ मुक्तानां मौक्तिकानां जीवन्मुक्तानां वा आलयं त्रिदशेभ्यो वितीर्णं जीवितसुखं येन तादृशस्यामृतस्य जन्मना उत्तालकमुद्भटं। तथा च त्रिदशश्लाघ्यामृतस्याकारोयमित्यर्थः एवं विस्तारशीलं प्रशंसायां कन्। विस्तीर्णजलं वा। एवं प्रलये उद्वेलमुच्छलितं यत्सलिलं तस्य २९

हेलायां संचारेण मृदितया उर्व्याः स्त्यानं काठिन्यात् कर्द्दमीभूतं तथा च प्रलयहेतुत्वमस्येति सूचितं॥३०॥ चिरपरूढसेअलसिलाहरिअंतअंपवणभिण्णरवदारुणणीहरिअंतअं॥ महुमहस्स णिद्दासमये वीरामअंपलअडड्ढविज्झाअतलुव्वीसामअं चिरप्ररूढशैवालशिलाहरितान्तं पवनभिन्नरवदारुणनिर्ह्रादकं। मधुमथनस्य निद्रासमये विश्रामदं प्रलयदग्धविध्माततलोर्वीश्यामकं। चिरप्ररूढानि शैवालानि यत्र त दृशीभिः शिलाभिर्हरिद्वर्णशैवालिकां तिसंक्रमात् तथा च तादृशमपि स्थलं वर्त्तते यत्र मकराद्यगम्यत्वेन शैवालादीनामभंगुरत्वमितिभावः यद्वा तथाविधशिलाभिर्हरिद्वर्णतां तं स्त्यानं वडवानलसंबंधाकं जलं यस्य तं शिलाहरितांतकं एवं वनन भिन्नं क्षुभितमतएव क्षोभजेन रवेण दारुणं कठिनं निर्ह्रादश्छंदातरोत्यादिकं जलं यस्य तं एवं मधुमथनस्य निद्राविश्रामदं प्रलये दग्धं पश्चाद्ध्मातं निर्व्वाणं यदुर्व्वीतलं पूर्व्वनिपातानियमात्तल्वत्पृथ्वीसंगतत्वं तद्वच्छ्यामं तथा च पृथ्वीसमानपरिमाणत्वमस्येति भावः॥३१॥ असुरावडणविहट्टिअजलविवरुट्ठिअरसाअलुम्हाणिवहम्॥ महणवसभिण्णभामियदीवत्तरलग्गमन्दरअडक्खण्णम्॥ असुरावपतनविघटितजलविवरोत्थितरसातलोष्मनिवहं। मथनवशभिन्नभ्रामितद्वीपांतरलग्नमंदरतटखंडं। असुराणां हिरण्याक्षप्रभृतीनां भाचपतनेन झंपेन विघटितं द्विधाभूतं यज्जलं तस्य विवरेणोत्थितो रसातलोष्मनिवहो यस्मात्तं तथा च विरसं वितानानामपि पातालोष्मणामुत्थानप्रतिबंधकत्वेन सति गभीरत्वमुक्तं। एवं मथनवशेन भिन्नं त्रुटितमतएव तत्काले भ्रामितं मंदरभ्रमणाकृष्टाचक्रवत् घूर्णितं पश्चाद्वीपांतरेलग्नं मंदरतटस्य खंडं यत्र तं। तथा च तथाविधा अत्र द्वीपाः येषु मंदरखंडस्सर्षपवल्लग्नोस्तीतिभावः यद्वा भ्रामितं सद्वीपांत

|| ||३०|| || तरावलग्नं मंदरतटखंडं यत्रतं तथाचतादृक् समुद्र महत्त्वं येन मंदरखंडो हि प्रवृद्धा सतइ तिभावः ॥३२॥ ए
सअम अरससंभवो त्ति संभाविअंणह णिहत्तमेण वचन्न दिसंभा विअमू ॥ गुण महव सारंवसुहार क्खा णिअंणि
अअजसणिहाणं म्भिव स अरक्खा णिअं ॥ एषो मृतरस संभवइ तिसंभा वितं नभो निभत्त मसेवचतु दिशंभा वितं
गुण महार्व्यसारंवसुधारत्नानितं निजक यशो निधान मिव सगररक्षा नितं । एवंएषसुधार सोत्पत्तिस्थान मितिसंभा
वनायुक्तं महत्वान्नीलत्वाच्चनभस स्तुल्यं नीलिमानभस्योत्प्रेक्षते । किं भूतंचतुर्दशंतमसाति मिरेणभा वित मुत्पा
दित मिवा तएवश्यामा मित्यर्थः एवंस्वस्य गुणैर्महार्घो बहुमूल्यः सारोरत्नादि यत्रतं एवंवसुधायाः पृथिव्यारक्षा
यैआनीत मुत्पादितं समुद्रावष्टब्धा पृथिवी तिष्ठती ति पुराणवार्त्ता तथाच स्वाधिकात्स्वरक्षाभवती ति पृथिव्यधिक
परिमाण वत्वं समुद्रस्योक्तं । एवंसत्युत्प्रेक्षते कीदृश मिव सगरेण राज्ञा रक्षनितं निजक यशो निधान मिव निधानं
निधिधारणस्थानं । तथाच यशोरूपद्रव्यं निधिस्तद्धारणगर्त्तः समुद्र एव सगरस्य प्रतिष्ठाहेतुत्वा दितिभावः । नि
धिस्थान मप्यमृतरसोत्पत्तिस्थान मिवाहतं विस्तीर्णत्वान्नभो निभं आवरणी यत्वाच्चतुर्दश मंधकारेणभावित
मिव गुणमहार्घ हिरण्यादिसारयुक्तंवसुधायां निधिरक्षार्थे आनीत मुत्पादितं भवति निधिगर्त्तस्य क्षितावे
वोत्पत्तेरितिसाम्यं ॥३३॥ पवणुग्गाहिअज ललव णिवह पहम्मत्त मुहल तीरतलवणम् ॥ ससिसेलमज्झहो
ज्झरपरिवड्ढिअसलिल मलिअपुलिणुच्छंगं ॥ पवनोद्ग्राहितजलाव निवह प्रहन्यमानमुखरतीरतलवनं ॥
शशिशैल मयूख निर्झरपरिवर्द्धितसलिलमृदितपुलिनोत्संगं पवनोत्थापितेन जल लव निवहेन प्रहन्यमा ३१
ना नियत एवं मुखराणि शब्दायमानानि तीरतलवनानि यस्यं तं । तीरेतालवनानि यस्येति केचित् एवंशशिशैल

लश्चंद्रकांत मणिपर्वतस्तस्य मयूखप्रवाहेणपरिवर्द्धितैः सलिलैर्मृदिताः पुलिनोत्संगा यस्यतं चंद्रशैलानां चं
द्रकांतमणिमयत्वे नतत्किरणेषुज्योत्स्नाबुध्धा समुद्रजलवृद्धिर्वास्तवी मयूख निर्झसंबंधमुकत्वेनोत्प्रेताशशैव
शैलस्तस्य मयूखाएव निर्झरास्तैः परिवर्द्धितं यत्सलिलं तेन मृदितः पुभिनोत्संगो यस्यत मितिवा अन्यदपिजलं
निर्झरांतरसंबंधेनवर्द्धतइति ध्वनिः ॥३४॥ मंदरमेहक्खोहिअसासिकलहंसपरिमुक्कसलिलुच्छंगं ॥ मरगअ
सेवालोवरिणिसण्णतुण्हिक्कमीणचक्काअजुअम् ॥ मंदरमेघक्षोभितशशिकलहंसपरिमुक्तासलिलोत्सं
गं मरकतशैवालोपरिनिषण्णतूष्णीकमीनचक्रवाकयुगं मंदरएवमेघस्तेनक्षोभितआन्दोलितः शशैव
कलहंसस्तेनपरिमुक्तसलिलोत्संगो यस्यतं ॥ अन्यत्रापि मेघमालोक्यहंसाअपगच्छंतीति ध्वनिः तथाच मंद
रान्दोलनेनामुष्माच्चंद्रउच्छितइत्यर्थः एवंमरकतएवशैवालंतत्र निषणमुपविष्टं मीनएवचक्रवाकस्तद्युगं
यत्रतं म चूरपरिघट्टनभियातूष्णीभूयमिनाः पातालमूलस्थितास्तेन तत्र मंदरसंबंधाभावादस्य गांभी
र्य्यमुक्तं हंसपलायनं दृष्ट्वा भीतं श्चक्रवाकस्तूष्णीं तिष्ठती ति ध्वनिः चंद्राभावेनचक्रयोर्मिलनमुचितमेवेति
कश्चित् ॥ ३५ ॥ पुण्णणईसोत्तसणिहजलमज्झमुणिज्जमाणचलतिमिणिवहम् ॥ वलआमूलसमोसरन्नमसि
रासिकज्जलिअपाआलं ॥ पुण्यनदीस्रोतः संनिभजलमध्यज्ञायमानचलतिमिनिवहं वडवामुखमूलसम
वसरन्मसीराशिकज्जलितपातालं पुण्यनादीनां गंगादीनां प्रवाहस्य तुल्यं यज्जलमध्यं तेनज्ञायमानेश्च
लितस्तिमिनिवहो यत्रतं तिमिषुचलितेषु जलमध्ये प्रवाहाभवंतीति रत्नुमियते तिमयश्चजंतीत्यर्थः स्तेनप्र
वाहाणां गंगादिप्रवाहतौल्यं नति मीनां जलं मध्यएवोत्पत्त्या समुद्रस्यच महत्त्वमुक्तं अथवापुण्यनदीस्रो

तःसंन्निभे निवाएवंवडामुखमूलात्समवसरद्भिरधःपतद्भिर्म्मसीराशिभिकज्जलितंपातालंयेनतं।अयमर्थः
[illegible]
र्णो।निपत्यपातालंश्यामीकृतमितिपातालमालिन्यसमर्थकज्जलोत्पत्तिहेतुवडवानलमहत्त्वेनसमुद्रस्यम
हत्त्वमितिभावः वडवानलोप्यधोग तर इतिकश्चित्कुलकम्॥३६॥अथसमुद्रदर्शनेसमस्याध्यवसायमा
ह॥ ॥तोउघ्घाडियमूलोपवअवलक्कत्तमहीअलुद्दच्छलिओ॥ दिट्ठोअदिट्ठसारोणजइतुलिओत्तिराहवेन
समुद्दो॥ततउघ्घाटितमूलः प्लवगबलाक्रांतमहीतलोर्ध्वच्छलितः॥दृष्याद्दृष्टसारोज्ञापितेतुलितइतिराघ
वेणसमुद्रः ततस्तदनंतरंराघवेनदृष्यानयनसमुद्रस्तुलितःएतावदस्यबलंसुखेनलंघनीयंइत्यध्यव
सितइतिज्ञायतेज्ञातंसर्वैरित्यर्थः कीदृक्प्लवगबलेनवानरसैन्येनाक्रांतान्महीतलादूर्ध्वमाकाशप्रत्युच्छलि
तः अतएवघाटितंपयःशून्यत्वाद्व्यक्तीकृतंमूलंयस्यतथाचप्लवनोत्फालेनगच्छतोभारेणमहीतलावन
मनेससमुद्रस्यजलमाकाशेलग्नंमूलमुद्घाटितमित्यर्थः तदुक्तंदृष्टंप्रत्यक्षीकृतंसारंबलंयस्यतथाचप्लव
गबलानामनास्थयैवबलनेचेदस्यजातेयमवस्थातदाकाकथाव्यवसायेसतीत्यवज्ञाविषयीकृतइति
भावः॥३७॥अथरामस्यलक्ष्मीविस्मरणमाह॥ कालंतरपरिहुत्तंदट्ठूणविअप्पणोमहोअहिसअणम्॥
जणअस्सआवधमणोरामोपजघरिणिणसभरेइसिरिं॥कालंतरपरिभुक्तंदृष्ट्वापिआत्मनोमहोदधि ३३
शयनं।जनकसुताबधमनारामःप्रलयगृहिणींनसंस्मरतिश्रियंकालान्तरेदेहांतरेणपरिभुक्तमुपभुक्तं

आत्मनःस्वस्यमहोदधिरूपंशयनंतल्पंदृष्ट्वापिरामःप्रलयेगृहिणीप्रलयसहचरींश्रियंलक्ष्मींनसंस्मर
ति तत्रहेतुमाह।जनकसुतायांनूतनभार्यायांबद्धमनाःसानुरागइत्यर्थः तथाचयद्येकसंबधिमहोदधि
रूपसततोपभुक्तंनिजशयनदर्शनेरामस्यापरसंबंधिन्याःसहशाहिन्यालक्ष्म्याःस्मरणंस्यात्तदातत्पितु
समुद्रस्यधर्षणंनस्यादितिभावः अन्योपिनूतनभार्यानुरक्तःपुरातनभार्यांनस्मरतीतिध्वनिः॥३८॥॥
अथलक्ष्मणधैर्यमाह॥ इसिजलपेसिअच्छंविहसत्तविइणपवअवइसंलावं॥अदिट्ठेघणमुक्कंदिट्ठेअ
हिम्मिलक्खणेणविधीरम्॥इषज्जलप्रेषिताक्षंविहसत्तृहितीर्णप्लवगपतिसंलापं॥अदृष्टइवनमुक्तंदृष्टे
उदधौलक्ष्मणेनापिधैर्यं॥अदृष्टइवदृष्टेप्युदधौसतिलक्ष्मणेनापिधैर्यनमुक्तंपूर्व्वमदृष्टेउदधौयथाधैर्यनत्य
क्तंतथादृष्टेपित्यर्थः यद्वादृष्टेप्युदधौअदृष्टइवसतिअवज्ञावशाद्धैर्यनत्यक्तमित्यर्थः धैर्यंकीदृक्इषज्जलेप्रेषि
तमक्षियत्रतत्भयाभावेनसंपूर्णदृष्ट्यानर्प्पणादित्यवज्ञासूचिताक्षोभेपिसंवरणंवा।तदेवाह।विहताअर्थात्स्वे
नवितीर्णोदत्तःप्लवगपतयेसंलापःपरस्पराभाषणंयत्रतत्।सस्मितंसुग्रीवेणसहकथांकुर्व्वाणेनहृदिज्ञागरू
कःकदाचित्समुद्रोकटाक्षितइत्यवज्ञासंचरणसाधारणं॥३९॥अथसुग्रीवस्यसमुद्रदर्शनमाह॥हरिसणि
राउण्णामिअपीणअरालोअपाअडोवरिनाअम्॥पवआहिवोविपेक्खइअहुप्पइअम्बरंभिऊणसरीरं॥
हर्षनिरायतोनामितपीनतरालोकप्रकटोपरिभागंप्लवगाधिपोपिप्रेक्षते अंहोत्पतितमिवरुध्वाशरीरं॥हर्ष
षासमुद्रदर्शनोत्साहेननिरायतोदीर्घीकृतस्तथैवोन्नामितउत्थापितःपीनतरोमांतलःअतएवालोकेशरीरद
र्शनेप्रकटोव्यक्तउपरिभागोहृदयाद्यंगंयस्यंएतादृशंशरीरंअंहेनोपरिभागेनोत्पतितंसमुद्रलंघनायकृतो

त्फालमिवरुध्या॥ अहोमंमेवधार्ष्ट्यप्रथमतकथंस्यादित्युत्फालादिवनिवर्त्त्यसुग्रीवोपिप्रेक्षतेसमुद्रमित्यर्था
त्॥ कियदस्यमानंकथंवालंघनं।यइत्याशयादितिसमुद्रदर्शनायो त्थापितस्यपूर्व्वकायस्थैर्य्यमुत्प्रेक्षा॥ अथ
सुग्रीवस्यकपिसैन्यदर्शनमाह॥ गरुडेणवजलणणिहंससुद्दलंघणमणेणवाणरवइणा॥ अवहोवासपसरि
अंपक्खविआणंवपुलइअंकइसेणं॥ गरुडेनेवज्वलननिभंसमुद्रलंघनमनसावानरपतिना॥ उभयावकाश
प्रसृतंपक्षवितानमिवप्रलोकितंकपिसैन्यं॥ गरुडेनेवसुग्रीवेणपक्षवितानमिवकपिसैन्यंप्रलोकितं।कपि
नाकीदृशासुखश्रीः कोवाव्यवसायइतिदर्शनेतात्पर्य्यं॥ समुद्रलंघनचित्तेनेतिगरुडसुग्रीवयोर्विशेषणं।ज्वल
नोवह्निस्तत्सन्निभंकपिसत्वादितिउभयावकाशयोःपार्श्वयोःप्रसृतंविस्तीर्णमितिचपक्षवितानकपिसैन्ययोर्वि
शेषणंउड्डयनकालेपक्षिणःपक्षौप्रसार्य्यपश्यंतीतिस्वभावः॥४१॥ अथकपीनांक्षोभमाह॥ साअरदंसणहित्था
अरिक्कोसरिअवेवमाणशरीरा॥ सहसालिहिअवठिआणिप्फन्दणिराअलोअणाकइणिवहा॥ सागरदर्शन
त्रस्ताआक्षिप्ताप्रसृतवेपमानशरीराः सहसालिखिताइवस्थितानिस्पन्दनिरायतलोचनाःकपिनिवहाःस
मुद्रदर्शनत्रस्ताःकपिनिवहाः सहसासमुद्रंदृष्ट्वैवलिखिताश्चित्रंन्यस्ताइवस्थिताःत्रासाद्भुतयोरुत्पत्त्याजडी
भावादितिभावः।तदेवाहकीदृशाःआक्षिप्तानिहठादेवलंघ्यतामयमित्याशयापारावारदर्शनायोन्मीलिता
निअथाप्रसृतानिअहोकष्टमलंघनीयोसावितिमामेवलंघनाययदिप्रेरयेत्तदानर्थआपतेदित्यप्रतिभया
अपसृतान्यधोगतानिसंतिवेपमानानिलंघनेसमुद्रेपतनमलंघनेसुग्रीवस्ताडयेदित्युभयथापिसंकटमि
तिकंपमानानिशरीराणियेषांते।एवंविरापतेसमुद्रादिदृक्षयाविस्फारितेपश्चादाश्चर्य्येणनिस्पंदेलोचनेये ३२

षांते।तथाचकिंकर्त्तव्यविमूढाआसन्निभावः॥४२॥अथकपीनांहनूमद्दर्शनमाह॥ ॥पेच्छात्ताणसमुद्दंवडु
लोविअ उव्वविह्मअरसत्थिमिओ॥हणुमन्तम्मिणिवडिओसगौरवंवाणराणलोअणणिवहो॥ पश्यतां
समुद्रंचटुलोप्यपूर्व्वस्मयरसस्तिमितः॥हनूमतिनिपतितः सगौरवंवानराणांलोचननिवहः॥समुद्रं
पश्यतांवानराणांतत्कालएवलोचननिवहोहनूमतिगौरवंपतितःसाधुत्वंधन्यजन्मामाताचतेपुत्रंप्रसू
तवतीत्याशयादितिभावः लोचननिवहःकीदृक्चटुलोपितदानीमपूर्व्वःप्राथमिकोयोविस्मयरसोहनुमे
त्कृतसमुद्रलंघनोत्थस्तेनस्तिमितोनिश्चलःसमुद्रदर्शनाश्चर्य्येणवापश्यतामितिसमुद्रदर्शनस्यवर्त्तमानत्वेपि
हनूमतिदृष्टिपातेनसमुद्रदर्शनापेक्षयापितल्लंघनादाश्चर्य्यभूमित्वंहनूमतइतिव्यंजि॥॥४३॥अथवानराणांमोहमा
ह॥ जअहिलंघणिज्जंदट्ठूणगआगअंचमारुअतणअं॥ मोहंधआरिएसुविमूढोभमइहिएसुसिंउच्छाहो॥ जल
धिमलंघनीयंदृष्ट्वागतागतंचमारुततनयं मोहांधकारितेष्वपिमूढोभ्रमतिहृदयेष्वेषामुत्साहः अलंघ्यंसमुद्रलं
घित्वागतमागतंमारुततनयंचदृष्ट्वातत्रस्थितानामेषांवानराणांहृदयेषूत्साहोगूढसंगुप्तोभ्रमतिअस्मज्जातीय
येनहनूमतालंघितोयमितिहनूमद्दर्शनादुत्साहउद्भवत्यस्माभिर्नलंघ्यतइतिलज्जयानबहिर्भवतीतिगूढ
भ्रमणपदयोस्तात्पर्य्यंभ्रमणबीजमुत्प्रेक्षतेकीदृशेषुसमुद्रंदृष्ट्वाअज्ञानंमोहस्तद्रूपांधकारविशिष्टेषुतथा
चमोहच्छन्नत्वादुत्साहोनप्रकाशितइतिभावः।अन्योप्यंधकारेपतन्भ्राम्यतीतिध्वनिः मूढइतिपाठेजडी
भूतइत्यर्थः॥४४॥ अथकपीनांजडीभावमाह॥ तीताणहअच्छाअणिच्चलल्लोअंपासिहिंपत्थपआ
वन्न॥आलेक्खयद्दुवाणवणिअअंपइइचडुलत्तणंघिविअलिअम्म॥ततस्तेषांहतच्छायंनिश्चललोचन

शिखंप्रोषितप्रतापं॥आलेख्यप्रदीपानामिव निजकंप्रकृतिचटुलत्वमपि विगलितंततस्तेषांवानराणांनि
जकंस्वाभाविकंप्रकृतीनामाकृतिनांशरीराणांमितियावत्।चटुलत्वमपि विगलितंअप्रतिभया वसाये
गतएवशरीरचांचल्यमपिनस्थितमित्यर्थएवंहताछायाकांतिर्यत्र निश्चलालोचनरूपाशिखायत्रतत्
कपिलोचनानामग्निशिखाकारत्वात् निश्चलदृष्टय मितिवा।प्रोषितोनष्टःप्रतापस्तेजोयत्रतद्यथास्या
दितिक्रियाविशेषणत्रयं।तथाचतेषांदेहकांतिनयनचांचल्यप्रतापानांचांचल्यरूपस्वभावस्यचाप
गमःसमकालमेववृत्तइतितात्पर्य्यं।केषामिवआलेख्यानांप्रदीपानामिव।यथाचित्रलिखितादीपा
नांदीपस्वभावसिद्धमपिचांचल्यंनतिष्ठतितत्रापिकांतिर्हताभवति लोचनंज्ञानंतथाचचंचलज्ञानशून्या
शिखाभवतिलिखितशिखायानिश्चलत्वात् प्रतापश्चप्रोषितःस्वतएवनिस्तेजस्त्वात्तथाचवानराःप्रकृ
त्याचंचला अपिमोहादप्रतिभयाचसमुद्रंदृष्ट्वानिश्चलाबभूवुरित्यर्थः प्रकृतिशब्दःस्वभावार्थोवातेन
चटुलत्वंस्वभाव इत्यर्थः॥४५॥अथवानराणामाकारसंवरणमाह॥ कहदिठवेत्तिपवंगासमुद्ददंसण
विसाअविमुहिज्जंतंमु॥ गलिअगमणाणुराअंपडिवंथणिअत्तलोअणंअप्पाणं॥कथमपिस्थापयंति
प्लवंगाःसमुद्रदर्शनविषादविमुह्यमानं।गलितगमनानुरागंप्रतिपथनिवृत्तलोचनमात्मानांप्लवंगाः
कथमप्यात्मनंस्थापयंतिपरावृत्यगमनेसुग्रीवःशास्तिमाचरेदपकीर्त्तिश्चभवेदित्यालो च्यपरावर्त्त ३२
च्छुमपिनिर्वृवर्त्तयंति किंभूतंसमुद्रदर्शनंजन्यविषादेनमोहमापन्नमितिपरावृत्तौहेतुःएवंगलितःशा
स्तिदु कीर्त्तिमभियानष्टोग्रहाभिमुखगमनेअनुरागोयस्यतमितिस्थापनेहेतुरतएवप्रतिपथान्निवृत्ते

पश्चादयसणा

॥४६॥

लोचनेयस्यतं।तथाचापशीरणेच्छयाप्रतिपथगतेअपिलोचनेपरामर्षादपवर्त्तितात्मिभावः॥समुद्रोत्क
र्षदर्शयारामदासप्रकाशिना॥रामसंतुप्रदीपस्यहितीयाभृदियंशिखा॥२॥अथकपीप्रतिसुग्रीवस्योत्तेजनवच
नमाह॥ ॥तोतेकइमाअगेरूढविसाअमअभाविओमीलंते॥ आलाणखंभेसुबवाहूसुसिलाअलट्ठि
एसुणिसण्णे॥ ततस्तान् कपिमातंगान्रूढविषादमदभावितावमीलतःआलानस्तंभेनेषि बाहुषुशि
लातलस्थितेषुनिषण्णान्॥ ततस्तेषामप्रतिभादर्शनानंतरंतानस्तंभितात्कपीनेवमातंगान् हस्तिनस्सुग्री
वोवचनमाभाषतइत्यग्रिमस्कंधकेनसमन्वयःकथंभूतान्।रूढःससमुद्रलंघनंकथंस्यादिति विषाद
एवमदस्तेनभावितान्संबंधानातएवावमीलतोमुकुलितलोचनान् एवंशिलातलस्थितेष्वालानस्तंभेष्वि
वबाहुनिषण्णान्विषण्णाःकपयोबाहूपश्चादुद्दंडयित्वातदवष्टंभेन दृष्टीमुकुलयित्वातिष्ठंतीतिस्वभा
वस्तत्रबाह्वोस्तंभत्वमुत्प्रेक्ष्यकपिनामातंगत्वमुक्तमितिरूपकंमातंगोपिमदोत्पत्तिदशायांमीलदृष्टि
रालानस्तंभेनिषण्णःक्रियतइत्यर्थः॥१॥ आहासइसुग्गीओणिअअरवाहिफुडणित्तजसणिग्घोसं॥
धीराहिसारगरुअंदत्तुज्जोआहिणिम्मलत्थंवअणं॥आभाषसुग्रीवोनिजकरवात् स्फुटनिर्यद्यशोनि
र्घोषं।धैर्यात्सारगुरुकंदंतोद्योतान्निर्मलार्थवचनंवचनंकीदृक् वदतःसुग्रीवस्यनिजकोरवएवस्फुटस्ततो
पिस्फुटंनिर्यन्साधुसुग्रीवत्वंसम्यगयमभिधत्तइतिरूपोनिर्घोषोयत्रतत्तथावकापीन्प्रत्युत्तेजनवचने
सुग्रीवस्यैवयशःप्रकाशितइत्यर्थःएवंधैर्य्यमेवतस्यबलेनसारेणगुरुकंपथाबलप्रकर्षस्तथानुद्धत्तो
धैर्य्यस्यैवप्रकर्षस्तथाचततोपिसारेणसत्वनगुरुकमादणीयंएवंचदंतोद्योतएवतस्यनिर्मलस्ततो

पिनिर्मलसु(स्लिष्टो र्थोवाच्यो यत्रतत्तथाचगभीरं संधंर्य्यमतिव्यक्तमूचितानित्यर्थः युग्मकम् ॥२॥॥
प्रथमंकन्तव्यकार्य्यो नुकुलांकपिस्तुतिमाह॥ धरणिधरणेभुआच्चिय मंहणम्मिसमुद्द।।हंतघम्मिदद्दा
मुंहेए।ण्हितम्हे त्थमहुमहसससहाआ॥ धरणिधरणेभुजाएवमथनेसुरासुराः क्षयेसमुद्रःहंतब्धेदवामुखे
इदानींयूयंस्थैमधुमथनस्यवराहमुर्त्याभूनिधारणेबावेहेऐवसहाया वृत्तान्तपरापेक्षाभूतसमुद्रमथने
सुराअसुराश्चसर्व्वएवप्रलयेकार्य्येसमुद्राएवजगल्लावकत्वात् इदानींसीतोद्वटिदसमुखेहंतव्येयूयमेव
वसहकारिणः स्थवर्त्तध्वमित्यर्थः तथाचतत्तत्कार्यं तत्तत्कार्ययोग्यसहकारिभिःसा॥ धितमिदं
तुसमुद्रबंधनुकुलपर्व्वताहरणसमर्थभवदायत्तमेवेतिभावः तथापिभवद्भिरेंदास्यमाचरणीयंचेत्तदा
तत्कठिनकर्मज्ञातसारभुजादिद्वारैवसाधयेद्भवतांलज्जामात्रंस्यात् कार्यमपितत्तत्सकलसाधारण
मासी।दिदंतुरावणवधरूपत्वेन साधारणमासाधारणंतु सीतालाभरूपत्वेनप्रभोरितितात्पर्य्यं ॥३॥ यनं
चराणामस्माकंकिमत्रप्रयोजनमित्यमीपामुत्तरमाराकयशोयाचनंचावश्यरक्षणीयमित्याह ॥ ना
सासअसोंडीरंकहविणिअत्तत्तसमुहसंठविअपअं॥ आअअविस्थक्कत्तंपणअत्तंवसुअणंपरुम्हा
हजसं माशाश्वतशौटीर्य्येकथमपिनिवर्त्तमानसंमुखसंस्थापितपदं आगतविशिष्ठमानंप्रणयंतमिवसुजनं
प्रम्लापयतमामलिनयतयशः कीदृक् शाश्वतं सार्व्वदिकंशौटीर्यमहंकारोयस्मात्तथाचयशश्च्युवहंका
रश्च्यवत्तइतिभावः एवंभवतामोदा स्थेन निवर्त्तमानंसत्कष्टस्स्याभवदीयोद्योगसंशयेनसंमुखे
संस्थापितंपदंस्थानंयेनअतएवआगतंस्थिविष्ठमानंस्थिरंतथाचभवद्भिःस्समीपवर्त्तियशोनोपेक्ष ॥ ॥३४॥

MEMORIAL

णीयमितिभावः कमिवप्रणयंतं किमपियाचमानंसुजनमिवयथा यावमानोस्सुजनोनम्लानीक्रियते
किंतुंतदभ्यर्थितंसंपाद्यतेतथायशोप्युपस्थितकार्य्योपेक्षयानम्लापनीयमितिभावः सुजनमपिकीदृशं
स्वभातःशाश्वताहंकारंएवंप्रार्थनाभंगभियानिवर्त्तमानंपुनर्लाभसंशयेनकथमपिसंमुखसंस्थापितच
रणंअथागतेसतिविविष्ठमानमप्रतिभयाकिमपिनब्रुवाणंतथाचैवंविधःसुजनःप्रकृतेरामएवेतिनम्ला
पयतेतिसहोपमातथाचौदास्येसतिरामोयशश्चम्लायिदित्यनुचित्तमितिभावः॥४॥ कर्म्मेदमस्मदन्येषा
मास्माध्यमेवराघवस्त्वेकार्कानशंकुयादितिकथंयशोम्लायेदित्युत्तरमाशंक्ययुष्मानपिविनारामएवकर्तुंसमर्थः
कुर्यादित्याह॥ रक्खसवहदुव्वोज्जोकज्जारंभोसमुद्दलंघणगरुओ पढमंविअरहुवइणाउवरिंहिअअतु
लिओभरोवविलइओ॥ राक्षसवध दुर्घात्यःपक्षेरक्षसापथदुर्घात्यः कार्य्यारंभस्समुद्रलंघनगुरुःप्रथ
ममेवरघुपतिनाउपरिहृदयतुलितोभरइवविलगितःरघुपतिनाकार्यारंभःप्रस्तुतमारभ्यमाणकार्य्यं
उपरि अर्थात्स्वस्यप्रथममेवविलगितोनियोजितः कीदृक्हृदयेनतुलितःमयेदमित्थंकर्त्तव्यमित्य
ध्यवसितःएवंराक्षसवधंनद्वारेणदुर्घात्योदुःखनिर्घात्योराक्षसवधस्यैवदुःसाधत्वादितिभावःएवंसमु
द्रलंघनेनगुरुरतिशयितःतस्यातिदुष्करत्वात्तथाचयुष्माकमुपेक्षायामपिसमुद्रलंघनराक्षसवधयोः
स्वकर्त्तव्यतयाध्यवसितत्वेनसीतामप्युद्धरेत्ततःसुतरांभवतामपकीर्त्तिरितिभावः कइवभरइवय
थाकेनापिप्रथमंहृदयेनतुलितोमयेदमित्थमुद्वहनीयमित्यध्यवसितोभारःपश्चादुपरिस्कंधादावा
वारोप्यते तथेदमपीत्यर्थः भरोपिकीदृक्रक्ष्येणालंघनीयेनराजादिशापथेनदुर्व्वहनीयःशापथ

भंगस्यदोषावहत्वात् यद्वासरक्षपथदुर्व्याल्यः सरक्षेदानग्राहकादियुक्तेपथिदुर्व्वहनीयः पूर्व्वनिपाता
नियमात्सबाब्दस्यपूर्व्वनिपाताः॥एवंसमुद्र स्यमुद्राराजचिह्नविशेषः तत्सहितस्यलंघनेदेशांदेशांतर
प्रापणेगुरुर्गौरवयुक्तः स्वयंहृदयेनतुलितः कार्य्यारंभोयोग्यत्वाद्भवतामुपरिनियोजितइत्यर्थइतिकिंचि
त्॥५॥स्वयमेवचेदध्यवसितंरामेणतर्हिकिंरोतुभवाननपिसमर्थः किनस्मान्प्रेरयतीत्याशंक्याह॥॥तुम्ह
च्चिअएसभरोआणामेत्तप्फलोपहुत्तणसद्दो॥ अरुणोछाआवहणोविसअंविअसन्ति अप्पणाकमलस
रा॥ युष्माकमेवएषभरआज्ञामात्रफलः प्रभुत्वशब्दः अरुणःछायावहनः विशदंविकसंत्यात्मनाकम
लसरांसि॥हेवानराएषप्रस्कतकार्य्यभरोयुष्माकमेवसाध्यइत्यर्थः परेषामसमर्थत्वात् तर्हिभवतोराम
स्यचकुत्रोपयोगइत्यतआह आज्ञामात्रफलंयस्यंतादृक्प्रभुत्वशब्द तथाचाहरामश्चप्रभुरित्याज्ञामात्रे
पक्षिणो कार्यंतुभवद धीनमेवेत्यर्थः अर्थांतरंन्यस्यति।अरुणःसूर्यः छायाकांतिस्तब्रापकः परंसरः कमलानि
विशदंयथास्यात्तथात्मनैवविकसंतितथाचसूर्यप्रायः प्रभुःछायाप्रायाआज्ञाकमलप्रायाःप्रेष्पविकाशप्राय
प्रेष्यकार्यमितिअनुणः स्यात्स्फुटेरागेसूर्येसूर्यस्यसारथौ॥६॥वयंतुसमुद्रमेवोत्तरीतुंनशक्नुमः किंपुनःकार्यां
तरंकर्त्तुमित्युत्तरमाशंक्याह॥ तरिउंणहुणवरइमंवेलावणवउलकुसुमवासिअसुरहिम्॥इत्थउडेहिसमत्था
तुम्हे पाउंपिफलरसं तुमपिफलरसमिवसमुद्रं॥ यूयमिमंसमुद्रं केवलंतरितुंनखलुसमर्थाअपितुहस्तपु ३९
टाभ्यांमंजलिनाफलानामादिनांरसमिवपातुमापिसमर्थाः कीदृशंवेलावत्तिवनवकुलपुष्पैर्व्वासितम
तःसुरभिं फलरसोपिकुसुमवासितः करपुटाभ्यांपीयतेतयाचसमुद्रपानसमर्थत्वेनतदधिपरिनाशावतो

भवतामनायासलंघनीयोब्धिरितिभावः॥७॥समर्थासमर्थासाधारणमुडमेलकेकृतमपिकार्येनविशेषयेदि
तियदिकश्चिद्ब्रूयात्तत्राह॥ चिरआलकंखिआणंधुआवमाणणिअलुण्णमत्तमुहाणं॥एसोणवरअव
स असरिसमसीसबंधणमिवोररवाणं॥ चिरकालकांक्षितानांधुतापमाननिगलोन्नमन्मुखानां॥एषकेवल
मवसरोअसदृशासमशीर्षबंधनविमोक्षणां॥असदृशेनअयोग्येनकृतंयत्समशीर्षस्पर्द्धा तदेवबंधनमवज्ञा
रूपत्वात्तस्यविमोक्षणांत्यागानामेषकेवलंअवसरः अत्रासमर्थाः पलायिष्यंतेसमर्थाः साधयिष्यंतीति
तत्कृतसादृश्यरूपबंधनत्यागोहठादेवस्यादितिभावः कीदृशानांतादृक्कार्यंकदापिलस्येतयतोयमपकर्षो
गच्छेदितिचिरकालंव्याप्यकांक्षितानांएवंधुतस्त्यक्तोपमानएवनिगुलस्तेनोन्नमन्मुखंयेभ्यः तेषांतथाचयाव
दयोग्यस्पर्द्धारूपबंधनंतावदपमानरूपनिगलसत्वेलज्जयामुखन्नमतितद्बंधनत्यागेत्वपमाननिगलशां
तोमुखमुन्नमतीत्यर्थतथावासमर्थाः कतिकपयोनस्पर्द्धामाचरंतितेभ्यो विशेषंप्रतिपादयितुमयमेवकालइति
भावः अयोग्येनसहसमशीर्षसमानशिरस्कत्वेनसभायामुपवेशनंतद्रूपबंधनत्यागानामन्यत्समानमिति
केचित्॥८॥प्रेष्यावयप्रभोराज्ञामपेक्षामहइत्याशंक्याह।तेविरलसप्पुरिसाजेअभणताव्वडेत्तिकज्जालावे॥
थोअच्चिअतेविदुमाजेअमुणिकुसुमणिग्गमादेत्तिफलं॥तेविरलाःसत्पुरुषायेभण्यमानाघटयंतिकार्यलापान्॥
स्तोकाएवतेपिद्रुमायेःज्ञातकुसुमनिर्गमाददतिफलं॥ कार्यलापानालयितकार्याणिकृदभिहितत्वात्तथाचा
भण्यमानात्वत्किमनपेक्ष्ययेकार्याणिघटयंतितेसत्पुरुषा विरलास्त्रिचतुराएवभवंतस्तूक्तिमपेक्षमाणाः
कापुरुषाइतिभावः॥अर्थांतरंन्यस्यतिअज्ञातः कुसुमनिर्गमोयेषांतथाविधायेद्रुमाः फलंददतितेपि

।।।।३६।।।। वनस्यस्तोकाएवतथाचद्रुमप्रायाः सत्पुरुषाः कुसुमनिर्गमप्राया णिवचनानि फलप्रायं कार्यमितिआ
भणतइतिकेचित्।कज्जअलाविइतिपाठे कार्यकालापान् ।।९।। व्यवसायं विना कंचित्तिरस्माकमित्यत आह।।
खिण्णं चावम्मि करं चिरआलुक्कठिअं अमरिसम्मि मणम्।। मदादेउ रहुवइ वाणाहिमुहिं च वाहगरुइं दिट्ठिं
।खिंनं चापे करं चिरकालोत्कंठितं अमर्षे मनः।। मातावद्ददातु रघुपतिर्बाणाभिमुखं च बाष्पगुर्वीं दृष्टिं रघुपतिः
खिन्नं सीताविश्लेषदुर्बलं करं चापे सीतादर्शनाय चिरकालमुत्कंठितं मनोऽमर्षे विरहजन्यबाष्पछन्नां बाणा
भिमुखीं दृष्टिं च तावन्माददातु मा निधत्तां यावद्व्यवसायो न क्रियत इत्यर्थस्तथाच प्रियानुरागप्रागल्भ्ये
नतत्प्राप्तिप्रतिबंधकसमुद्र जीवा सायारोपोत्कर्षे धनुर्गृहीत्वा शरसंदधानो बाष्पछन्नदृष्टित्वेन र क्षणीय
मपिनक्ष्यं यदतस्त्वलोक्यमपि निर्दहेन्न द्विशेषतः क्रोधर्वाजत्वेन भवंतो न तिष्ठेयुरिति भावः एवं च रामस्या तिखिन्न
करस्य चापार्थ्यपोत्कंठितस्य मनसो अमर्षसंबंधे बाष्पगुर्व्या दृशो बाणाभिमुखीकरणं महद्दुष्कर्व्यं स्यादित्यधि
कमनिष्टमिति तात्पर्यं ।।१०।। अत्र व्यवसाये सति न केवलं भवतामनिष्टनिवृत्तिरपि त्वभीष्टप्राप्तिरपीत्याह।।अवगा
उ तुम्ह जसो दहवअणपआवपत्थिवपरिग्गहिअं।। विलुलिअसमुद्दरसणं णहभवणन्तेउरं दिसाबहुणिवहं।।
अवक्रामतु युष्माकं यशो दशवदनप्रतापपार्थिवपरिगृहीतं विलुलितसमुद्ररसनं नभोभवनांतःपुरं दिग्वधूनिवहं
।।दिशएव वधूनिवहस्तं युष्माकं यश आक्रामतु किंभूतं रावणप्रतापएव पार्थिवो राजा तेन परिगृहीतमाक्रांतं अथ च परिग्र
हः करगृहणं तद्विषयीकृतं एवं विलुलितासमुद्र एव मेखला यस्य तं एवं नभ एव गृहं तदंतः पुनरन्तःस्थिता स्थानं यस्य ।। ।।३६।। ।।
तमिति रूपकरूपकं गुरवपंकजरंगेस्मिन्भ्रूलतानर्त्तकी तवेतिवत्।प्रकृते रावणप्रतापो राजा तस्य वध्वो दिशस्तासा

मंतःपुरं नभोगृहं समुद्रो रसना तथा च भवद्भिर्व्यवसाये कृते समुद्रलंघनादिसमुत्थं यशो रावणप्रतापमाह
त्य पित्वा तदाक्रांता निदिङ्भस्समुद्रा दीनिव्याप्नुयादित्यर्थः अन्योपि राजारिशत्रुपरिग्रहस्त्रीनिवहमंतःपुरम
तिक्रम्य रसनादि विपर्य्यासं कृत्वा रमणं करोतीति ध्वनिः नभोगृहस्यांतःपुरं राजस्त्रीरूपमिति वा।।११।। प्राणिनां प्रा
णाः सर्वतो पि रक्षणीया व्यवसाये क्रियमाणे तत्संशय इत्याशंक्याह।। जं साहसं ण कीरइ तं दइआमाणेण जीविअं किर
दइअं।। जो अपडिमुक्कसुकओ सो विगणिज्जइ जअम्मि जीअन्तमुओ।। यत्साहसं न क्रियते तद्दयमानेन न
जीवितं किल दयितं योऽप्रतिमुक्तसुकृतः सोपि गण्यते जगति जीवन्मृतः।। किल निश्चये साहसं न क्रियते इ
ति यत्तज्जीवितं दयमानेन दयितं प्रीतिविषयीकृतं साहसकरणाभावः साहसकरणे प्राणानां कुक्लेशं स्यादिति
शंकया दयापात्रीकृतजीवितस्य दयित इत्यर्थः एवं यः अप्रतिमुक्तमप्रत्युद्धृतं सुकृतमुपकारो येन तादृक्सो
पि संसारे जीवन्नेव मृतो गण्यते तया च रामेण वालिवधरूपउपकारः कृतः तत्प्रत्युपकारस्य प्राणा विगमसंदे
दकरणेपि मरणमिति वास्तविकमरणापेक्षया जीवतो मरणगणनारूपं मरणं महत्कदर्थनमिति भावः ।।१२।।
कार्यमिदमपि स्वल्पं किं तु सहसा विदधीत न क्रियेति विचारः क्रियतां तथा सति यस्यात्तत्कर्त्तव्यमित्याशं
क्याह।। किं व ण आणइ एए अकज्जं परिपेलवं पि जह परिणामे। दइ परं सम्मोहं कुसुमं विसपाअवस्स व
मलिज्जन्तम्।। किं वा न जानीते तत्कार्य्यं परिपेलवमपि यथा परिणामे।। ददाति परं संमोहं कुसुमं विषपा या
दपस्येव मृद्यमानं।किं वा पक्षांतरे यूयमेतन्न जानीत यथा परिपेलवं सुकरमपि कार्यं क्रियमाणं सत्परि
णामेउत्तरकाले विघ्नसंपाते सति परं क्लेशं ददातीति दृष्टांतयति विषवृक्षस्य मृद्यमानं कुसुममिव यथा विषयु

पुष्पंपेलवत्वात्सुखस्पर्शमपिकरतलघृष्यमाणंसत्यस्मान्मूर्छयतितथासुकरमपिसमुद्रबंधनरूपंका
र्यंनवसानेरावणकृतप्रतिक्रियापराहतंलंकेशायेदिति।चिरंविचारोनघटते।तदुक्तं।।क्षिप्रमक्रियमाणस्य
कालःपिबतितद्रसमितिभावः।।१३।।रावणकृतप्रतिक्रियाविघटमानमिदमतिदुर्घटंस्यादितिशंकयैवना
रभ्यतइत्याशंक्याह।।।।विहडंत्तंपिसमत्थाववसाअंपुरिसदुग्गमपेतिवहं।।भुवणत्तरविक्खंभदिअ
सअरोविहडिएक्कचक्कंवरहं।विघटमानमपिसमर्थाव्यवसायंपुरुषदुर्गमेनयंतिपंथानं।।भुवनां
तरविष्कंभेदिवसकरोपिविघटितैकचक्रमिवरथंनसमर्थोआरभ्यमाणंव्यवसायमत्तराविघटमान
मपिपुरुषैर्दुर्गमंदुस्संचारपंथानंप्रापयंतिसुघटितंकुर्वंतीत्यर्थः।दृष्टांतयतियथाभुवनांतरंनभस्तदे
वविष्कंभंविवरंविघटितमेकंचक्रंयस्यतादृशंरथंदिवसकरःप्रापयतितथाचद्विचक्रस्यापिदुस्संचरेण
नभसियथारविरेकचक्रमपिरथंसामर्थ्येनचारयतितथाभवंतोपिविघाटितमपिकर्मसामर्थ्येनघटयिष्यं
तीतिभावः।विष्कंभोभोगभेदेचविस्तारप्रतिबंधयोःविष्कंभोविवरेदेव्यामित्यादि।।१४।।समुद्रसंघनोत्तरम
पियुद्धापयुक्तखड्गविरहादनर्थकत्वंभवेदितिविलंबितावयमित्याशंक्याह।।।।कअकज्जेतालसमेअइरा
पेछहमुहेअणुत्तालसमेणिहुओराअसहाओपडिरक्खस्सअवंतराअसहाओ।।कृतकार्यान्तालसमानचि
रात्प्रेक्षध्वंभुजाननुत्तालसमान्निभृतोराजस्वभावःप्रतिपक्षस्यचापेतुराजस्वभावः।।कृतंकार्यंयुधा
दियैस्तान्गृहीतसहचारान्तालवृक्षसमान्तदाकारान्भुजान्प्रेक्षध्वंकीदृशान्अनुत्ताओअप्रेरिता ३७
अलसेमीलक्ष्मीर्येषांअथवाअनुत्ताअनुक्षिप्तापरैरित्यर्थात्अतएवालसास्थिरामात्लक्ष्मीर्येषांयद्वानत

त्तालाऊर्द्धाअपिसमास्तल्यायेषांतान्तथासतिभवतांनिभृतःपरैरगम्योराजसोभावोरजोगुणविजृंभितंमरणा
दिभयमपैतुततःप्रतिपक्षस्यरावणस्यचराजत्वमपैतुगच्छतुतथाचभवतांभुजाएवसामग्रीतदवलोकनेसतिब
लस्मृत्यामरणभयनिवृत्तौरावणवधःस्यादेवेतिवृथाविलंबइतिभावः।।१५।।समुद्रलंघनमशक्यमेवेतितदक
रणेनाप्रकर्षइत्याशंक्याह।।।।संखोहिअमअरहरोसंभवत्तुछत्तदिट्ठरक्खसलोओ।।वेलाअडमुज्यन्तेअहणे
हसइहिअएणमारुअ[illegible]तणओ।।संक्षोभितमकरगृहःसंभ्रांतोद्भूतदृष्टराक्षसलोकः।वेलातटमुह्यतोऽथास्मान्
हसतिहृदयेनमारुततनयः।।लंघनसमयेचरणसंक्रमणादिनासंक्षोभितमांदोलितंमकराणांगृहंसमुद्रोयेनलंका
दाहसमयेसंभ्रांताःकृत्यमूढाउद्धूताइतस्ततोगामिनोदृष्टाराक्षसलोकायेनतादृशोमारुतिर्वेलातटएवमुह्यतो
मोहापन्नानस्मानथोमोहोत्तरंहृदयेनोपहसतितथाचमयासमुद्रमुल्लंघ्यराक्षसानाकुलीकृत्यसमागतमेतेवे
लायाएवतटेमुह्यंतिनतुसमुद्रस्यतटमप्यागताइतिगूढाहंकारेणसगोत्रेणकृतउपहासोमरणादप्यतिरिच्य
तइतिभावः।।१६।।भयहेतुसमुद्रप्रतिहतत्वादुत्साहएवनोदेतिकुतस्तत्प्रतियोगिकोविगिरसइत्याशंक्याह।।अव्वो
च्छिण्णपसरिओअहिअंउद्धाइफुरिअसूरच्छाओ।।उच्छाहोसुभडस्सुभटानांविषमखलितोमहानदीनामिव
स्रोतःसुभटानामुत्साहोवीरसस्थायीविषमेसंकटेस्खलितःपरैःप्रतिहतःसन्नधिकमुधावतिवर्द्धतेकीदृक्
अव्यवच्छिन्नःसन्प्रसृतःपरैरनाक्रांतत्वात्एवंस्फुरिताशूरस्यछायाकांतिर्यस्मात्शूराणामेवोत्साहउत्प
द्यतइतिभावःदृष्टांतयतियथामहानदीनांस्रोतःअव्यवछिन्नप्रसृतंप्रस्फुरितासूरस्यसूर्यस्यछायाप्रतिबिं
बोयत्रतथाभूतंसत्पर्वतादिनिम्नोन्नतप्रदेशेस्खलितमधिकमुद्धावत्यूर्द्ध्वमुत्तिष्ठतितथावीराणामप्युत्सा

होयथायथा विषमभू मिलाभस्तथान थाप्रो दिमालबतइ तितात्पर्यंच्छा यास्यादातयाभावेप्र तिबिंबेकर्येयोषिति ॥१७॥ गमनप्रतिबंधकसमुद्राक्रोनाभवतांगोभास मुद्र मुल्लंघ्यहनुमता थाक्रम्यत इतिनो चित मित्याह॥ ॥॥
माणंणपरिठ्ठविआकुलपरिवाडि घडिआअणोण अवव्वा॥ चित्तंतंपणितीरइ ओहुप्पतीपरेण णिअअच्छाआ
॥मानेनपरिस्छापिताकुलपरिपाटिघटिताऽनवनतपूर्वा॥ चित्तयितुमपिनतीर्यते आक्रम्यमाणापरेण निज
कच्छाया॥ निजकच्छाया निजप्रतिष्ठापरेणाक्रम्यमाणो चिंतयितुमपिनतीर्यते नशक्यते किंपुनः सोढु मित्य
त्यर्थः कीदृशी मानेनमनस्वितयापरिस्छापिता एवंकुलपरिपाट्यावंशानुक्रमेण घटिता यथापूर्व्वपूर्व्वपुरुषै
रर्ज्जितातथेत्यर्थस्तदुक्तं निजवंशो चितपौरुषग्रहः एवंअनवनतपूर्व्वापूर्व्वेनअवनताऽक्षुण्णेत्यर्थः तथाच
भवतामीदृशाप्रतिष्ठारक्षणंसमुद्रालंघनादेवेतिभावः अथचनिजकच्छायोआतपाभावःपरेणोल्लंघ्यमाना
चिंतयितुमपिनशक्यतेछायालंघनेदोषोत्पत्तेः सापिकीदृशी मानेनपुरुषपरिमाणेनस्छापितायाऽल्परिमा
णंपुरुषस्यतदनुरूपाछायापीत्यर्थः एवंनुपृथ्वीलानिआदत्तेतत्रलीयतइतिकुलंशरीरंतत्परिपाट्यनवक्र
मेण घटितासंबंधाशरीरोत्थानोपवेशनचलनक्रमेणोत्तिष्ठंतीलक्ष्यतइत्यर्थः एवंनअवनतानम्रपूर्वःपू
र्वभागोयस्याःसातथाछायापूर्व्वभागस्यसंदेवोछिन्नत्वादितिभावः॥१८॥ कुलंविनाकतमेवयशोपिश्लाघ
नीयन्नतुकेवलवहुलमित्याशयाह॥ ॥ परिवड्डुतुच्छाहो विअलिअरणमच्छरेहिअप्पत्तगुणो॥ अअसक्क
तोरिओ कड्डिज्जइदुक्करंभडत्तणसद्दो॥ परिवर्द्धमानोत्साहो विगलितरणमात्सर्य्यैरप्राप्तगुणःअय ३८
शःक्रांताप्रसृतःकृष्यतेदुष्करंभटत्वशब्दः। भटत्वशब्दोभटोयमितिशब्दोदुष्करंकृष्यतेदुःखेनपरतस्समा

नीयतेभटांतरंजित्वास्वनिष्ठंक्रियतइतियावत्तथाचोत्कटसुखहेतुदुःखेद्वेषःकर्त्तुंनयुज्यतइतिभावःकी
दृक्भटत्वशब्दःपरिवर्द्धमानउत्साहोयस्मादाभिमानिकसुखहेतुरित्यर्थः एवंविगलितरणमात्सर्य्यैरेषां
तैरप्राप्तोगुणःपुलकादिर्व्यंग्यआस्वादोघस्यतथाचमात्सर्यंविनातत्तथाविधंसाहसमेवनोदेतीतिभवद्भि
रपिमात्सर्यमवलंब्यतामितिभावः एवंअयशोभिःक्रांतोयःपुरुषःतस्मादपसृतःपृथक्भूतस्तथाच
खड्गादिजनितंयशइतियशोविनाभूतइतितात्पर्यं॥१९॥ अस्माकंवस्तुतोऽनध्यवसायएवसंचेत्संग्रामादिभि
खगतःतदावगतएवेतिकपयश्चेदोदास्यमालंबरन्नतदानर्थःस्यादितिमनसिकृत्यभवंतोविचारेणविलंबिता
नत्वनध्यवसायेनेतिप्रवृत्तोपायिकत्वेनप्रस्तुवन्नाह॥ आहिअसमरागमणावसणम्मिअज्झसवेअसमरागमण
॥अवसाअअविसमत्था धीरच्चिअहोन्तिसंसएविसमत्था॥ अहितसमरागमनाव्यसनेचोत्सवेचसमरागमनाव्य
सनेचोत्सवेचसमरागमनसःअवशामतविषमार्थाधीरा एवभवंतिसंशयेपिसमर्थाः॥ समर्थाःप्राणानांफल
स्यवासंशयेपि धीराएवभवंतिसामर्थ्यदत्तभराविचार्यव्यवहरंतीत्यर्थः कीदृशाःअहितमर्प्पितमर्थात्स्वस्मिन्
समरस्यसंग्रामस्यागमनंयैःसंग्रामोपिकर्त्तव्यइतिकृतनिश्चयाःएवंविपत्तौसंपत्तौचतुल्योरागोयस्यतादृ
शंमनोयेषांतेव्यसनमितिनदुःखीयंतेउत्सवइतिनसुखीयंतीतिभावः एवंअवशोऽस्वायत्तआगतउप
स्थितोविषमस्संकटरूपोर्थोयेषांतेविषमदशायामप्याविमृष्यकारितांनाचरंतितथालेयत्कालंविचार्य्य
मततथ्यरंयथोचितमाचरंतीतिभावः अवसादंघ्रतिखंडयतिविषमोर्थोयेषांते अवसाददविषमार्थाइतिवा
अवसाइअइतिपाठेअवसादितविषमार्थाइतिबहुव्रीहिः॥२०॥ संप्रतिव्यवसायेनापिफलनिर्णयोनेत्याशंक्याह॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

ववसाअसा प्पिवासा कह तेह त्थद्दिअं ण पाहिंति ज्जसम्म ॥ जे जीवि अ संदेहे विसंभुअंगव्व ज व्वमत्ति अम
रिसं ॥ व्यवसायस पिपास्याः कथं नेह स्तस्थितं न पास्यंतियशः । येजीवित संदेहे विषभुजंगा इवो द्वमंत्य मर्षं ॥
व्यवसायेन स पिपासा पिपासा सा स हिता स्ते करवर्त्ति यः कथं न पास्यंति नास्वादयिष्यंति अपित्वास्वादइष्यंत्येव
तथाच यशः स्यादस्तेषा मेवेति भावः अन्योपिव्यवसायजन्यपिपासया करवर्त्ति जलादिकं पिवती तिध्वनिः
ते के ये जीवित संदेहे अमर्षमुद्वमंति कइवभुजंगा इव यथा प्राण संदेहे भुजंगा विषमुत्सृजंति तेन च प्रतिका
रो पिजाय ते तथा ये सदाये ऽमर्षमाचरंति तेन तेषां व्यवसायो त्पन्नो कार्य सिद्धि ध्रुवा पितेतिभवंतो षमर्षमाच
रंत्विति भावः ॥ २१ ॥ व्यवसायं विना यशो मास्क क्षतिरपि नास्तीत्यत आह ॥ सीहा सहन्ति वंधं ज रखअदाढा चिरं
धरेंति विसहराणं ण णजिअन्ति पडिहआ अरखंडिअ चवसिआ खणं पि समत्था ॥ सिंहः सहंते बंधं उत्खातदंष्ट्रा श्चि
रं ध्रियंते विषधराः न पुनर्जीवंति प्रतिहताः अखंडित व्यवसिताः क्षणमपि समर्थाः सिंहा अपि बंधनं सहंते
उत्पाटित दंष्ट्रा अपि सर्पा श्चिरं ध्रियंते जीवंति समर्थाः पुनः परैः प्रतिहताः कृताभिघाता अखंडितं व्यवसि
तं परेषामेवयैः स्वव्यवसितेन परव्यवसितमखंडितवंतः संतो न जीवंति जीवनमपि तेषां मरणमेवेति
भावः । यद्वा व्यवसायखंडनमेकदेशाकरणं तथाच किंचिदपि व्यवसितमकृतवंत इत्यर्थः ॥ तदुक्तं ॥
यत्ने कृते यदि न सिध्यति कोत्र दोष इति प्रकृते समुद्रेण प्रतिहताभवंतः कमपि व्यापारमाचरंतीति निगव्वे
॥ आइदानी मुत्साहाह्यपि कत्वेना निष्पापन्निमुखेन नद्वा ख्यानुस्मारयन्नाह ॥ अकअत्थ पडिणिअत्ता कह समु ३१
हालो अमेत्त पडिसंकन्तं ॥ दप्पण अले सुव ठिअं पिअअंदे च्छिहपि आसुहे सुविसा अं ॥ अकृतार्थ

प्रतिनिवृत्ताः कथं संमुखालोकमात्र प्रतिसंक्रांतं दर्पणतले विवस्थितं निजकं द्रक्ष्यत प्रियामुखेषु विषा
दं ॥ अकृतार्थाः संतः प्रतिनिवृत्ता यूयं स्थितं विद्यमानं समुद्रालंघनं समुत्थं निजकं स्व निष्ठं विषादं निर्मलत्वेन दर्प
तले स्विव वधूमुखेषु संमुखालोकेन मात्रदेव प्रतिसंक्रांतं संबंधं कथं द्रक्ष्यथ अघतिभया द्रष्टुं न पारयिष्य
थेत्यर्थः अन्यत्रा प्यादर्शे मुखादिना लिन्यं संमुखदर्शनादेव प्रतिसंक्रामति प्रतिबिंबात्तथा चाकृतकार्यत्वे
न विषण्णेषु भवत्सु दर्प्येण यदम्लानं वधूमुखं विषादादति ग्लानं भविष्यति ततस्त प्रायो वीररता स्त्रिय इति
अपि विभ्रांगिनस्ते निवर्त्तयंतीति व्यवसायो न क्रियत ॥ रजो युस्त दुक्त अकृतार्था गृहं गच्छं दारोरूपवमन्यत
मन्यत इति भावः ॥ २३ ॥ अत्र वहूनां वहवः क्षतिलाभ भागिनस्ते निवर्त्तयंतीति व्यवसायो न क्रियत इत्यत आह ॥
णिज्जंति विरपअत्ता समुद्दगहिरा व पडिवहं णइसोत्ता ॥ तीरेंति णि अत्तेउं असमाणि अपेसणा ण उण स
प्पुरिसा ॥ नियंते चिरप्रवृत्तानि समुद्रगंभीराण्यपि प्रतिपथं नदीस्रोतांसि तीर्यंते निवर्त्तयितुं असमापि
तप्रेषणा न पुनः सत्पुरुषाः ॥ चिरं व्याप्य प्रवृत्ता निवहद्रूपाणि त्याभाविक वेगवत्त्वं समुद्रवद्गंभीराणि
त्यसाध्यसेतुकत्वं एवं भूतान्यपि नदीस्रोतांसि प्रतिपथं विपरीतमार्गे पश्चान्नीतं उपायेन नेतुं शक्यंते स
त्पुरुषा पुनरनिष्पादितप्रेषणास्संतः परावर्त्तयितुं न शक्यंते प्रेषणमीश्वराज्ञा तथा च जलस्याचेतनस्य
स्वभाविकक्रमतः परावृत्ति रूपाय साध्यानत्व जडानां चेतनानामिराजाज्ञा निष्पत्तिरेव पुरुषार्थ इति
भावः ॥ २४ ॥ समुद्रविमर्दः कदापि केनापि न कृत इति कपिभिः कथं कर्त्तुं शक्यत इत्यत आह ॥ जो लघिज्ज
इ रइणा जो विखविज्जइ खआणलेण विवहुसो ॥ कह सो णई अपरिहओ दुत्तारो त्तिपकआणभणउ

॥ ४०॥ ॥ अर्हो॥। योलंध्यंतेर विणा योपि क्षय्यंते क्षूलोनापि बहुसेः कथंसत्कदितपरिभवोदुस्तारइतिस्तवगानांभण्यतामु
दधिःरविलंघितत्वात् क्षयानलेनापिबहुशः क्षपितत्वाच्चतदितोजातःपराभवोयस्यतादृगप्युदधिःस्तवगानां
दुस्तरणीयइतिकथंभण्यतांभणितुमप्ययोग्यमिदमित्यर्थःलवेनगच्छतीतिप्लवगास्तदकंनिर्धायतेऽत्रेत्यु
दधिरितिचसमुद्रगंजनस्मामर्थीकथनंतथाचवानराअलंघ्यमपिलंघंते।अदाह्यमपिदहंतिकिंपुनस्तरणि
लंघितमनलदग्धंवासमुद्रंयथादृष्टपरकृतकार्यानुकारत्वादितिभावःउचितपरिभवोयोग्यपरिभवइतिवा
॥२५॥तथापिसमुद्रलंघनमतिदुष्करमितिनतथाकर्त्तव्यमितिअतआह॥॥ चिंत्तिज्जउदावइमंकुलववएसरक्खसं
वहत्ताणजसंम॥लज्जाएसमुद्दस्सविदाएहविकिंहोइदुक्करंबोलेउम्॥ चिन्त्यतांतावदिदंकुलव्यपदेशाक्षमंवहतां
यशःलज्जायासमुद्रस्यापिद्वयोरपि किंभवतिदुष्करंव्यतिक्रमितुं।पुष्पाभिरिदंतावच्चिन्त्यतांकितत्कुलस्यवंशस्यव्य
पदेशोअस्मिन्कुलेइदमनुरूपमितिकथनेक्षमंयोग्यंयशोवहतांयुष्माकंलज्जायासमुद्रस्यापिद्वयोरपिमध्येकिंव
स्तुव्यतिक्रमितुंलंघितंदुष्करंभवतिशतयोजनावच्छिन्नस्यसमुद्रस्यलंघनंसुकरमनवच्छिन्नायालज्जायास्तुदुष्क
रमतएवाभ्यर्हितत्वेनप्रथमंतदुपन्यासइतिभावः॥२६॥दुष्करमपिलज्जायाएवलंघनंकर्त्तव्यंनतुसेत्यतआह॥
।किरणासणिरहुसुएसुहसकिरणासणिंविमुंचउमादा॥ सेलससारअमेहोतुम्हेजेजणचन्दसारअमेहो॥।किरणा
सिनिरघुसुतेसुखस्यकिलनाशनींविमुंचतुमातावत्।शैलससारतमान्भोयुष्मान्जित्वाचंद्रसारदमेघः।भोइति
संबोधनंकिलसंभावनायांशुभ्रतयाचंद्रएवसारदोमेघइतिरूपकंशरन्मेघाबहुधावज्रंत्यजंति।त्याशयाचरघुसु ४०
तेकिरणरूपामशनिंवज्रमातावद्विमुंचतुकिंभूतांसुखनाशनिंनाशिकांकिंभूताशैलादपिससारमान्बलवंतमान्

यहाशैलंस्यतिखंडयतीतिशैलसंवज्रंतद्वत्सारःस्थिरांशोयेषांतेषुश्रेष्ठान्वज्रसमस्थिरांशान्युष्मान्जित्वारामर
क्षोयुक्तान्यतिक्रम्येत्यर्थःमेघोवज्रेणशैलादीनतिक्रम्यतालादीन्प्रहरतितथाचभवद्भिस्समुद्रेनुलंघितेजानकी
प्राप्त्यभावेनमयागृहायनगंतव्यमथभवंतोपिनगमिष्यंतीति।चंद्रकिरणवज्रपातेनविरहिणीयुष्मानभिभूयाति
वियोगिनीरामचंद्रमभिभविष्यतीतिसर्वतोनुचितमितिभावःसारोबले।स्थिरांशेचेतिकोषः॥२७॥समुद्रस्य
लंघनेसत्यभीष्टमितिदर्शयन्नलंघनेमहदनिष्टमित्याह॥ बंधवणेहब्भहिओहोइपरोविविणएणसेविज्जन्तो
॥ किंउणकओवआरोणिक्करणाणिद्धबंधवोदासरहीबांधवस्नेहाभ्यधिकोभवतिपरोपिविनयेनसेव्यमानः
॥किंपुनःकृतोपकारोनिष्कारणस्निग्धबांधवोदासरथिः॥परोपिशत्रुरपिविनयेनसेव्यमानःसन्बांधवादपिस्ने
हेनाभ्यधिकोभवतिबांधवादप्यधिकंस्नेहमाचरतीत्यर्थःकृतवालिवधरूपोपकारोतएवनिरुपाधिस्नेहविशि
ष्टोबांधवोमित्रदासरथिःकिंपुनस्तथाचस्वाभावतोमित्रमेवायंसेव्यमानःसेव्यमानशत्रुकृतस्नेहादप्यधिकं
स्नेहमाचरिष्यतीत्यभीष्टमनभीष्टपक्षेतुबाधवाःसन्स्नेहाभ्यधिकोपिपुरुषोविगतनयेनदुर्नित्यासेव्यमान
:परउदासीनोरिपुर्वाभवतिकिंपुनरुक्तविशेषणविशिष्टोदासरथिस्तथाचयत्रभ्रात्रादयोप्यन्यथाभवंतितत्रमित्र
मयमन्यथास्यादितिकिमाश्चर्य्यमतोमहतीक्षतिःस्यादित्यत्रबलिविरुद्धोहमेवनिदर्शनमितिभावःबांधवो
भ्रातृमित्रयोरितिकोपः॥२८॥रामानुरागेवैराग्येयोरस्माकंकोलाभःकाचक्षतिरित्यतआह॥अइरपरूढ
वलआसमरुच्छाहेउदुम्मिवविलम्बंते॥अज्जविदावमहइमामउलेइच्चिअफलंणदावेइसिरि॥अचिर
प्ररूढेवलतासमरोत्साहेऋताविवविलंबमाने॥अद्यपितावन्ममेयंमुकुलायतएवफलंनदर्शयतिश्रीः॥

अचिरप्ररूढालतेव नमेयंराज्यश्रीः ऋता विभवतो समरोत्साहे विलंबमानेसत्यद्यपितावन्मुकुलायतएवसंकु
चत्येव नतु विकाशासाध्यंराज्यभोगरूपंफलदर्शयतिजनयती त्यर्थः यथावसतादावनागच्छ तिलतामुकुलायतए
वमुद्रणमेव धत्तेतत्तत्समयजपुष्पसाध्यंफलंनदर्शयति तथाभवदुत्साहे शिथिलिभवति राज्यलक्ष्मीरपित्यर्थः अ
चिरप्ररूढे तिलता विशेषणमुपमेयश्रियोनूतनत्वेनारूपभुक्तत्वं द्योतयतितथाचमुकुलायतइतिसंकोचविका
शाभयात्मकमुकुलनरूपमध्यमावस्था कथंनेनभवद्व्यवसायाधिनरामानुरागशंशयाद्राज्यश्रीरेपिसंशयाद्रा
ज्यमारोहतितिफलतीनमेवोपकारोपकाराविति भावः लता नामनायिका विशेषस्तेना चिरोढापित्र्ऋतुविलंबे
नस्त्रीत्वव्यंजकशारीरविशेषे मुकुलायमानासती गर्भात्मकंफलंनदर्शयती तिध्वनि॥ २९॥ धीरोदात्तोरामःक
थमस्मासुक्रोधंकरिष्यतीत्यतआह॥ ॥के च्चिरंमेत्तिंव ठिइएअविसंवाइआणमोच्छिहिरानम॥ कमलम्मि
समुप्पण्णातं चिअरअणीसुकिंण्णमुचइलच्छी॥ कियच्चिरमात्रंवास्थितिरेवं विसंवादितानमोक्ष्यतिरामं
कमलेसमुत्पन्नातदेवरजनीषुकिन्नमुंचतिलक्ष्मी॥ स्थितिर्धैर्य्यमेवंभवतानव्यवसायेन विसंवादिता विच
लितासती कियच्चिरमात्रंवा कियदवधिककालं वाग्यमेवाधिकः कालोवृत्तइत्यर्थः रामंनमोक्ष्यति अतःप
रंमोक्ष्यत्येव निदर्शयतिकमलोत्पन्नापिलक्ष्मीः रजनीषुतदेवकमलंकिन्नमुचतिअपितुमुंच्यत्येवततएव
निशिकमलमश्रीकंभवतीत्यर्थः तथाचकमलककोमलत्वेनप्रतीयमानोपिरामोलक्ष्मीचलयास्योत्पन्नाया
पिस्थित्यारजनीवद्रागजनकविसंवाददशायानवश्यंमोक्तव्यस्तथासत्यधीरोभवन्चालिवधदुष्प्रसारः सर्वा
पिनोनिहनिष्पातीतिभावः संवादोविचलत्वं॥ ३०॥ यद्येवंसमर्थोरामः तत्कथनिश्चमप्रतिमोलस्यतइत्यातआह॥ ४१

सअलुज्जोइअवसुदेसमत्थजिअलोअविथ्थरन्तपआवोढाइणचिरंरविम्मिवविहाणपडिआविमलेइदासप्पुरि
से॥ सकलोद्योतितवसुधेसमस्तजीवलोकविस्तीर्यमानप्रतापेतिष्ठतिनचिरंरवाविचानपतितापिमालिनतास
त्पुरुषे॥ सकलावद्योतिताअर्थात्कीर्त्याविसुधायेनसमस्तजीवलोकेविस्तार्यमाणः प्रतापश्चयेनतादृशीकीर्ति
प्रतापशालिनीसत्पुरुषेविधानंप्रकृतकार्यानुकूलःप्रकारस्तच्चिंतापतितामलिनताचिरनतिष्ठतिरवाविव अ
त्रपक्षेउद्योतःकिरणस्तच्छालित्वामुद्योतितत्वंप्रतापओष्ण्यंविहाणशब्दोद्वयोःप्रभातवाचीतथाचयथोक्तविशेष
णद्वयवतिरवौविभावपतितामलिननताप्रकाशविशेषाभावश्चिरंनतिष्ठतितथाच विशेषणद्वयविशिष्टोरामः
प्रकारंचिंतयन्नित्थमास्तितत्स्फुर्तौमालिन्यमपिजह्यात्स्वकार्यंचकुर्यादपर्वमात्र मस्माकंस्यादितिभावः॥
॥३१॥ उपकारिणामुपकारःकर्त्तव्यएवत्याह॥ ॥सप्पुरिपपाअडवहंपढमंजंराहवेणअम्हासुकअम॥ होज्ज
वणहोज्जवसमंअम्हेहिकअंपिकिंणअकिरंतम॥ सत्पुरुषप्रकटपथंप्रथमंयद्राघवेणास्मासुकृतं
भवेद्वानभवेद्वासमंअस्माभिःकृतमपिकिंपुनरक्रियमाणंराघवेणप्रथमंयदुपकारंस्वरूपमस्मास्वकृत्तंतद
स्माभिराघवेकृतमपितत्कृतेनसमंभवेद्वानवाभवेत्किंपुनरक्रियमाणंतथाचराघवेणकृतोवालिवधरूप
उपकारःकतेनापिसीतोद्धारेणास्माभिःसदृशीकर्त्तुनसक्यंतेकिंपुनरकृतेनेत्यर्थः यत्किम्भूतंसत्पुरुषएवप्रक
टःपंथाअवतरणमार्गोयस्यतत्सत्पुरुषादेवोपकारआयातीत्यर्थः यद्वासत्पुरुषप्रकटपथइत्यनुकरणीयंस
त्पुरुषस्यप्रकटःपंथायत्सत्पुरुषाउपकारस्वरूपेणैवपथाचलतीत्यर्थः प्राकृतेलिंगवचनमतंत्रमितिपथमि
तिनपुंसकनिर्देशः साघवेणसत्पुरुषस्यवालिनःप्रकटोवधोयत्रतादृशंयत्कृतमित्यर्थोवा॥ ३२॥ रावणव

॥ ४२॥ ॥ धाय मयमुपाय: सत्वद्‍ुकर इत्यत आह॥ राहवपत्थिज्जन्तो जहोदी सिहइकेच्चिरं वदहमुहो॥ दूरंतपेच्छिअ
व्वो सिहरपडन्तविअडासणि ववणदुमो॥ राघवप्राथ्यमानजद्धो इक्ष्यते कियच्चिरं वा दशमुखः। दूरांतप्रेक्षि
तव्यः शिखरपतद्विकटाशनिरिववनद्रुमः॥ राघवेन प्राथ्यमानो ऽवरुध्यमानो दशमुखः कियच्चिरं वा कद्धो
वृद्धि शीलो इक्ष्यते नातःपरं द्रष्टव्यः॥ कइव दूरात्तमतिदूरं ततः प्रेक्षितव्यः कद्दूत्वात एवं शिखरे शिरसिपतच्चि
कटाशनिर्यस्य तादृशो वनद्रुम इव यथा द्रुमे पुंसस्सुवज्रेण जद्धो वृक्षः पात्पत एवं राक्षसेषु सत्स्वपि रामेण रावणः
पातनीय इतिभावः प्रार्थितः शत्रुसंरुद्धे याचित्तभिहितं पिंचेति विश्वः॥ ४३॥ राक्षसास्तावदतिबलायानरान भि
भवेयुर्हरे रावण इत्यत आह॥ बालअवंवणत्तं धुअअम्लालाअवं सुणिवहच्छाअमू॥ कईसेण्णं रअणिअराव मरअणि
अरवंपेच्छिअ पिअओग्गा॥ वालातपमिवायद्दुताता मालातपांशुनिवहच्छायं कपिसैन्यं रजनिरोचोस्तमोरजो निकरा
इव प्रेक्षितुमप्ययोग्याः॥ तमसो ऽधकारस्य रजो धूलिः सूक्ष्मभाग इति यावत् तत्समूहा इव रजनिचराः श्या
मत्वात् वालातपमिव कपिशं न्यं कपिस्त्वादागच्छत्सेत प्रेक्षितुमयोग्याः किंपुन यद्धुं तथा च यथा वालातपे
नांधकारो नाश्यते तथा कपिसैन्येन राक्षसा नाशनीयाइतिभावः कीदृशं कपिसैन्यं वालातपं वा धुतस्यकंपितस्य
ता मलातस्य ज्वलदंगारस्य ये पांशवः स्फुलिंगास्तच्छायं तत्तुल्यरूपं पिंगलत्वात्कंपनेसत्यंगारात्स्फुलिंगानि
गच्छंति धुतस्फुलिंगसाम्येन कपीनां चांचल्यं बाहुल्यं च सुचितं॥ ४४॥ राक्षसा यथा तथा संतु रावण स्तु गुरुः
प्रतिपक्षस्तत्कथमिदमित्यात आह॥ गरु अम्मि विपडिवरवे हात्तिभडा अहिअवारि अपडिकूला॥ पडिगअ ४२
गंधाइद्धा उद्धंकुसरुद्दमत्थ अव्वगइन्दा॥ गुरावपि प्रतिपक्षे भवंतिभटा अधिकवारित प्रतिकूलाः। प्रतिग

जंधाविद्धाऊद्धंकुशरुद्धमस्तका इव गजेंद्राः महत्यपि शत्रौ सति भटा अधिकं वारिताः प्रतिकूला विपक्षांयेतथा
भवति यथा प्रतिगजानां गंधेनाविद्धास्पृष्टा एवं उद्धेनोत्थापितेनांकुशेन रुद्धं मस्तकं एषां तादृशा गजेंद्रास्तथा च यथा यथा
निवर्त्तनायाधिकं मंकुशप्रभाप्र... हारस्तथा तथाधिकं प्रतिगजाभिभवाय वल्गंतीत्यर्थः। तेन गजेंद्रप्राया भवं
तो वीरा गुरुप्रतिपक्षरावणसत्वे पि प्रतिगजप्राय राक्षसबलोपमर्दका अधिकं भविष्यथेति भावः अधिकं वारिता
अपि प्रतिकुल विपक्षसंमुखा भवंतीत्यर्थो वा॥ ॥४५॥ अस्मदतिरिक्ताः कतिन संतीति एव सहायकमाचरंत्यत
आह॥ विसमम्मि वियविसण्णो धारेइ धुरं धरो विअ णवरो किं दिणअरो वराय दिणस्स होइ अवलंबणं
ससिबिम्बम्॥ विषमेप्यविषण्णो धारयति धुरं धर एव केवलं किं दिनकरोपरागे दिनस्य भवत्यवलंबनं
शशिबिंबं। प्राणसंकटरूपे विषमेप्यविषण्णः साध्यवसायो धुरं धर एव भारसमर्थ एव केवलं धुरं धारयति
तथा च प्रकृतकर्मणि भवंत एव धुरंधरा नान्य इत्याशयः एतदेव द्रढयति॥ दिनकरस्य ग्रासे दिनस्यावलंबनं प्रका
शनयत्वादि सौभाग्यरक्षकं किं विद्यमानमपि विधुं बिंबं भवत्यपि तु न भवतीत्यर्थः तथा च दिनकरप्रायणो भव
वतामन्यध्यवसायच्छन्नत्वरूपे ग्रासे उज्वलत्वेन दिनप्रायस्य प्रकृतकार्यस्यावलंबनं निष्पादिकाः शीतलतेज
स्तेन विधुबिंबप्राया भवदन्येन भवेयुस्तेन यथा ग्रासदशायां रविरेवावलंबनं दिनस्य तथा प्रकृतेप्यनध्यवसा
यमपहाय भवंत एव भवेयुरिति भावः॥ ॥४६॥ यावद्देवकार्यासिद्धितावद्देवगौरवमस्माद्रुजानांता। सिद्धौ तुल
घुत्वं भवस्यादित्यत आह। मुक्कसलिलाजलहरा अहिणवदिणफला अपाअवणिवहा॥ लहुआविहोत्तिगरु
आसमरमुहोहरिअ मंडलग्गा अभुआ॥ मुक्तसलिलजलधरा अभिनवदत्तफलाश्च पादपनिवाहाः लघवो

पिभवंतिगुरवः समरमुखावहतमंडलाग्राश्चभुजाः॥ मुक्तंसलिलं यैस्तादृशामेघाअभिनवानिदत्तानिफ
लानियैरथवातत्कालदत्तानिफलानियैस्तादृशावृक्षसमूहाः समरमुखादवहृताअवप्रातिता मंडलाग्राः खड्गा
यैभ्यस्तादृशाभुजालघवोपिरिवोभवंति अयंभावः मेघवृक्षभुजाजलफलखड्गसत्तादृशायांगौरवयुक्तास्थि
ताअथजलादिनां मुक्तिदानत्यागदशायांलघुभूताअपिसंतः सस्योत्पत्तितृप्तिशत्रुक्षयादिरूपकार्यकारित्वे
नादरणीयतारूपगौरवयुक्ताएवभवंतितथाचभवद्भुजाअपिकृतकार्यागुरुभवेयुरन्यथौरलघवएवस्युरि
तिभावःविरोधाभाससूचनायापिशब्दः॥ ॥५७॥ अस्माकंयुद्धसामग्र्येवनास्तीत्यतआह ॥दप्पेणसहन्तिभु
आपहरणंकज्जसुहाधरेन्तिमहिहरा॥ विच्छिण्णोअगणवहोणिज्जइकीसगरुअत्तणंपडिवक्खो॥ दर्प्पेनसंह
तेभुजाःप्रहरणकार्यसुलभाध्रियंतेमहीधराः विस्तीर्णोगगनपथोनियंते किमिति गुरुत्वंप्रतिपक्षः।युष्मा
कंभुजाःपरेषांदर्प्पेनसहंतेतथाचपरानेतएवनिघ्नंतिनतुयापायोइतिशीघ्रकारिणइत्युक्तंएतच्छापाद्यौना
हप्रहरणमस्त्रंप्रहारक्रियावातत्कार्येसुखलभ्यास्तत्पाटनोद्वहनदुःखनिरपेक्षामहीधराध्रियंते तिष्ठंतितथा
चखंजादिषुछेदस्तेदशाकापीतितच्छून्याइत्यर्थःपर्व्वताहरणेमार्गोनास्तीत्यतआहविस्तीर्णोगगनमेवपथा
गतागतसंकोचशून्यइतिभावः तथापिविपक्षः किमितिगुरुत्वंनीयंतेस्थानध्यवसायेनसर्वेषामादरविष
यीक्रियतइतिभावः।।नह्रिरामलक्ष्मणावप्यपद्यायसमुद्रमुल्लंघ्यगृहितमहीधरालंकामिदानींमेवावगं
तव्यामइत्याशंक्यनिवारयति॥॥ धीरंपरिरक्खन्तागरूअपिभरंधरेन्तिणवरसुउरिसा॥ठाणंचियअमुंअ
ताणीसेसंतिहुअणंखवेंतिरविअरा॥ धैर्यपरिरक्षंतोगुरुमपिभरंधारयंन्तिंकेवलंसुपुरुषाः स्थानमे ४३

वामुंचंतोनिःशेषंत्रिभुवनंक्षपयंतिरविकराः॥ धैर्यरक्षंतंसुपुरुषागुरुमपिभरंधारयंतिनिर्वाहयंति अर्थांतरं
न्यस्यति।स्थानंरविमंडलमनुच्यतएवरविकारास्त्रिभुवनंक्षपयंतिनिर्द्दहंतितथाचयथारविकराररविमंडल
त्यागेनोष्मादिरूपतयानिशिव्यवच्छिद्यवर्त्तमानाअकिंचित्करास्तथाभवंतोपिरविकरप्रायाररविमंडलप्राय
धैर्यत्यागेनरामलक्ष्मणरूपनायकानपेक्ष्याअकिंचित्कराएवस्युरितिधैर्यरक्षयातत्साचिव्येनसर्वसाधयं
त्वितिभावः॥ ॥५९॥अत्रैतत्कार्येकेचिन्मध्यंनेकेचिन्नितिसकलसंमत्यभावानुकूलभावानुकुर्म्मइत्यतआ
ह॥ काअरपडिमुक्कधुरंजिणन्तिपत्थाणलंघिग्गअक्खंधा॥पढमत्ताणिअअचलंपच्छापहरेहिसुउरि
सापडिवक्खं॥ कातरप्रतिमुक्तधुरंजयन्तिप्रस्थानलंघिताग्रस्कंधाःप्रथमंतावन्निजकवलंपश्चात्प्रहरणैः
सुपुरुषाःप्रतिपक्षं॥प्रस्थानेनलंघिताग्रस्कंधाअग्रस्कंधसैन्याग्रंतदप्युलंघ्यगच्छंतःसुपुरुषाःकातरेणप्रति
मुक्ताधुरायत्रतादृशंनिजकंवलंनाबप्रथमंजयंतिएष्वतःपुरोगमनरूपलंघनेनेत्यर्थःपश्चात्प्रहरणैःरस्त्रैः
:प्रतिपक्षंजयंतीत्यनुषंगस्तथाचयथाविपक्षजयेनयशोलाभस्तथासजातीयादप्युत्कर्षणेतिशूराणामितर
नैरपेक्ष्यमेवसम्यगइतिभावः अस्माकंदष्टसानग्रीविकल्पशंकयाशैथिल्यमित्यतआह।अणेतिमंगला
इंअल्लिअइसिरीजसोपवड्ढइपुरओ।पडिवडरफच्छाहेपडिवक्खुद्धरणपत्थिअम्मिसुउरिसे॥ अनुगच्छंतिमं
गलान्यालीयतेश्रीर्यशःप्रवर्द्धतेपुरतःप्रतिपन्नरणोत्साहेप्रतिपक्षोद्धरणप्रस्थितेसुपुरुषेप्रतिपक्षस्योद्धरणं
विनाशःतदर्थंप्रस्थितेसुपुरुषेप्रतिपक्षस्योद्धरणंविनाशःतदर्थंप्रस्थितेसुपुरुषेशत्रुनाशजन्यानिमंगलान्यअ
नुगच्छंतिसंबध्यंतेजयश्रीरालीयंतेमिलतियशश्चखड्गादिजनितंप्रवर्द्धतेतथाचसत्पुरुषाएपरामस्तदढंबं

।।।।६४।। नेवसर्वंसंघटनीयमित्यर्थः कुतोज्ञायत आह कीदृशोपुरतः प्रस्थानपूर्वंप्रतिपन्नः प्रारंभो रणोत्साहो यस्यैतिवाताहृ
थितथाचवाताहृथितथाच मनो विशुद्धिरूपयात्रासा ढुण्यसूचकर्णोत्साहैंनेवसर्वंमिदमुन्नीनमितिभावः अथवा
पुरतोनगरतः प्रस्थानस्थानादितियावत् अनुगच्छतिमंगलानीत्यादि योज्यंतथाचरामेण सीतामुद्दिश्यचलितं
न सीतावार्त्तोलाभ निरंकुशाहनूमत्समागमादिरूपमंगलवालिवधेनजयलक्ष्मीरतएवप्रौढंयशश्चलब्धमि
तएवाग्रिमकार्यसिद्धिरपिज्ञातव्येतितिभावः पुरतोयशोवर्द्धइतिकेचित्।।५१।।रावणेन समं रामस्यवैरम् सी
तासतथाकुर्यादस्माभिस्तु निर्वाजंतत्कुतः कर्तव्यमित्यत आह।। वच्चंतो अइभूमिकड्ढिअसुहडासिवत्तवं
थावडिआ।।णवरणवलंति विअंलु अवरखामाहिहरवंवेराबंधा।। व्रजंतो अति भूमिंकृष्टसुभटासिपत्रय
थापतिताः केवलंनचलंति द्वितीयंछिन्नपक्षा महीधराइवंवैराबंधाः।। केवलं आवध्यमानंवैराणि द्वितीयंपुरुषं
नचलंतितत्रनसंक्रामंतिअत्यदत्रनिमित्तवशात्संक्रामंत्यपिवैरंतुस्वासाधारणसंबंधिपुरुषएवतिष्ठतिति
केवलपदार्थः कीदृशावैराबंधा अतिभूमिप्रकर्षकाष्ठांव्रजंतः यथायथावैरनिमित्तस्मरणंतथातथास्तद्वृद्धि
स्तथाचतथावर्द्धयदुपरिप्रकर्षोनसंभवतीत्यतिगौरवमेकमवलंब्य निमित्तमित्यभिप्रायएवंपूर्वंनिपातानिय
मातुसुभटेनवैरिणामारणायकोशादाकृष्टं यदसिपत्रंतदेवपंथामार्ग्गस्तेनापतिताआगताः खड्गादिकमुद्य
म्यजिवांसुनापुरुषेणसहोत्पन्नस्यवैरस्यखड्गरूपवर्त्मागतत्वसुत्प्रेक्षितमनेनतथाचखड्गेत्युपलक्षणंकिं
तुयदेवयत्रवैरपथइतिप्रकृतेवधूहरणरूपंवैरवर्त्मरामसंबंधमेवेतिद्वितीयमचलन बीजमितिवैरंयुष्मा ४४
सुकथंगच्छेत्तथाप्येकस्यवैरेतदनुपा नः सर्वएवपरंपरासंबंधवैरास्तत्प्रत्युधारमाचरंतीतिभवंतोपितथाकु

र्वंत्वितिप्रघट्टकार्थः अत्रदृष्टांतमाह महीधराइवयथाछिन्नपक्षाः शैलायत्रपतितास्ततो द्वितीयस्थानंनगच्छंति
त्यर्थस्तेप्यतिशयितांवह्नींभूमिमुद्दिश्ययव्रजंतत्कृष्टसुभटासिपत्रेणपक्षच्छेदहेतुनापथस्तद्वयनमार्ग्गादापतिता
भूमावित्यर्थानृकेचित्तुवैराबंधद्वितीयंनचलंतीतिप्रत्येकमेववैरिणः प्रत्येकमेवतदुद्धारमाचरंतीतिरामसंबं
धेनरावणेनसमंजातवैरावयंसर्वएवतथाकरवामेतिभावइत्याह।।५२।।राघवेयदिवैरस्यात्तदाशोचनामपहाय
कार्यमेवघटयेत्तत्कथमस्माभिरेवंतथाकर्त्तव्यमित्यत आह।। तासोअइरहुतणओतावअसीआविहत्थपल्ह
त्थमुही।। तावअधरइदहमुहोजावविसाएणवोतुलिज्जइधीरम।। तावतशोचतेरघुतनयस्तावच्चसीतापि
हस्तपर्य्यस्तमुखी।।तावच्चभ्रियतेदशमुखोयावद्विशादेनवस्तुल्यंतेधैर्यं।। रामस्तावदेवसीतानिमित्तंशोचतेताव
त्सीतापिचिन्तयाहस्तविन्यस्तमुखी।। विरहिणीहस्तंमुखमारोप्यचिंतयतीतिसमाचारस्तावच्चरावणोभ्रियतेजी
वतियावयुष्माकंधैर्य्यंसीतोद्धारयस्थिरतारूपंविषादेनानध्यवसाय मूलकमनस्तापेनतुल्यतसदृशीक्रियंतेत
थासयुष्मद्धैर्यंविषादाविदानीसत्प्रतिपक्षितावितिप्रवृत्तिनिवृत्त्योरेकमपिजनयतीयदेवत्वधिकबलंस्यात्तदेवस्व
कार्यंजनयंत्तथासतियदिविषादंजित्वाधैर्य्यंवत्ततदारामशोचनसीतासंतापरावण जीवितानामभावोपि
भवेदितिभावः।तुल्यतेगत्क्षिप्यंतेवा।।५३।।प्रकृतकार्योन्मुखा अपिवयंयदिविषण्णास्तेनज्ञातास्तदानर्थं
वास्तदृश्यतामितरः कस्तत्कुर्यादित्यत आह।।।। अण्णोअण्णस्समणोतुम्हणआणेअणांहिओमहअ
प्पा।। णिच्छण्णंतस्सइमंदररूढवणप्पसाहणंहमत्तम्।। अन्यदन्यस्यमनोयुष्माकंनजानेनाधिमेमात्मा।।
निर्व्वर्णय तइमंदररूढव्रणप्रासाधनंहनूमत्तं।। अन्यस्यमनोऽन्यतस्वमनसोभिन्नमतोयुष्माकंमनोनजा

नेस्व चित्तसाक्षिकमेव स्वयंज्ञायते न तो युद्धादिकं कर्त्तुं वा युष्माकं चित्ते किमस्ती तिनजानामि किंतु भवंत एव
जानंति मम पुनरात्मा अनाधिर्भवद्धि र्विना कार्य्यं कथ सिध्येदित्यं तव्यं था शून्यः कुत इत्यत आह मम किंभूतस्य
दरस्कंदः किं चित्संधुक्षितोः क्षयुद्धकालो नोव्रणएवतथा धनमलंकरणं यस्य निर्जितं विपक्षत्वादेतादृशं हनुमंतं
निर्वर्णयतः पश्यतस्तथा च भवता मोदास्ये पिज्ञातप्रकृतकार्ये सामर्थ्यो वचनस्थो हनूमान् एव साधये दित्यध्य
वसायवानस्मि ततस्तमेव मानयिष्यामी तिभावः भवतस्त्वत्कृतकार्यत्वदक्षतत्वाच्च निर्भूषणा एव स्थुरितिता
त्पर्य्यं यद्वा खड्गाद्यभिघातेन वपुरिदं वै कुव्यमासादयेदित्यत आह। अण्णो अण्णस्सेति अयमर्थः युष्माकं मनो
न जाने क्षतादिशंकया युद्धप्रत्या धिविशिष्टमाधि शून्यं चेति विशिथ न जानिमी त्यर्थः अन्यदन्यस्य मनो यतः
मम पुनरात्मा युद्धं प्रत्यनाधि रक्तरव्यं थाशून्यः किंभूतस्यत थाभूतं हनूमंतं निर्वर्णयतस्तथा च युद्धे शौर्ये चिह्नं क्ष
तमहदृष्ट्वलभ्यमितितदेवाकांक्षामितिभावः॥ ५४॥ नहि अस्माकमसंमानेन कांक्षति रित्यत आह॥ ॥ पडिवक्खस्स
अलच्छिअं आसाएत्तएणं णि अअकुलस्स अकित्तिअं आसाएत्तएणम्॥ मरणं पिवरं लद्धअ णंयणि म्माण
एणं पुरिसेण चिरंजीवियं णयणि माणएणं॥ प्रतिपक्षस्य चलक्ष्मी मास्वादयता नि निजककुलस्य च कीर्त्तिमा
सादयता। मरणमपिवरं लब्धकनयनिर्म्मायकेन पुरुषेण चिरंजीवितं न च निर्म्मानकेन॥ प्रतिपक्षस्य लक्ष्मी
मास्वादयताहठाद्वा छिद्योपभुंजानेन एतेन बाहुबलमुक्तं एवं निजकुलकमागतां कीर्तिआसादयता लभमानं
न एतेनाभिजनशालित्वं एवं नयस्यनीतिर्निर्म्मायकेन अनेनोत्पथगामित्वविरहः एवंभूतबहुगुणेनापि पुरुषे
णदैवानिर्माणकेन प्रशस्तमानशून्येन सता लब्धं स्वार्थकन्न मरणमपिवरं श्लाघनीयं च स्त्वर्थेन तु चिरं व्याप्य ४५

लब्धं जीवितं वरं न श्लाघनीयमित्यर्थस्तथा च न तथाविधस्य पुरुषस्य मानविरहं जीवितान्मरणमेव गरिष्ठमिति
भवंतोपि तथाविधा मानरक्षणाय यतंतामितिभावः॥ ५५॥ भवदसंमानादनिष्टशंकाशून्यैरस्माभिरुपेक्षयान
र्पितचित्तैरतिगर्भीरं भवदुक्तं न बुध्यत इत्यत आह॥ एअवि सिरी अदिट्ठआ केसरलच्छि आएकरकमलस्स च्छि
विआ अकेसरलच्छिआए॥ मुज्यन्ति सविण्णाणआ समरसमाणअन्मिए अमन्मि भणन्तएस मरसमाणअम्मि
॥ एवमपि श्रिया दृष्टकां केसरलाक्ष्याकरकमलस्य वस्पृष्टया केसरलक्ष्म्या॥ मुह्यति सविज्ञानकाः समरसंमानदे एवं
मपि भणति समरसमापके॥ एवमनेन प्रकारेण मपि भणति सति के सविज्ञानकाः प्रशंसायां कन्न के प्रशस्तविज्ञानवि
शिष्टाः पुरुषाः मुह्यंति मोहं गच्छंति उक्तमर्थं नावगच्छंति अपि तु न के पीत्यर्थः तथा च तथा यमास्फुटीकृत्योक्तं यथास
र्वएवावगतवंत इति भावः सविज्ञानकाः कीदृशाः सरलं संमुखस्थं अक्षिणी यस्यास्तया सरलाक्ष्य श्रिया
लक्ष्म्या दृष्टा अपि कीदृश्या करएव कमलं तस्य केसरवल्लक्ष्मी र्यस्य तेन केसरलक्ष्म्या करतलभागेन स्पृष्टया क
रतलवर्त्तिन्येत्यर्थः एतावता लक्ष्म्यनुरागउक्तस्तथा च मोहकारणलक्ष्मीसत्वेपि ज्ञानवंतः स्तल्लक्ष्मीहरणमस्म
त्वांक मानानोपेक्षां कुर्युः किं तेमदुक्तमाचरेयुरितिभावमपि कीदृशे समरे संमानदस्तस्मिन् तथा च न केवलं पू
र्व्वलक्ष्मी लब्धैरपीत्यावाय पुनः कीदृशी रमरस्य समापके। निर्वाहके तथा त्वा क्षमतया मया नोच्यते किंतु निर्दोष
तासूचनाय यद्वा समरसमानके समरे साहंकारे यद्वा संमो युद्धरसमानो यस्य तस्मिन् समरसमानके मानो हंकारः
यद्वा संमरसमानते समरश्रमेण अनते अनाकुलेतथा चानुजी विषुसत्सु स्वामिना कार्ये क्रियत इत्यंनो चिंत्ये पि मयं
व सर्व्वं निर्व्वाहणीयमथ च भवंतः शासनीया इतिभावः॥ ॥५६॥ रावणरणे पराजय औत्सर्गिक इति मयैव सर्व्वं

निर्व्वाह्य मितिकथमुच्यत इत्यत आह॥ मा सो इज्जउ दुहिआ सी आलोअ णरम णलिणिव समोलुग्ग आसी॥आ
लोअ णणम्॥ दुहिए राहव हिअए कामइलत्त अम्मि जी विअए अहिलो हि आ कामइलत्त अम्मि॥ मा शोच्यतां
दुःखिता सीतालोकेन नलिनीवस मवरुग्णा सीतालोकेन दुःखितराघवहृदये काम क्लाम्यमाने जीवितके भि
लोभिका कामलिनायमाने सीतालोकेन राक्षसवसंतो कथं स्थास्यति किंवा भविष्यतीति मा शोच्यतां रावणो
मया मारणीय एवेति भावः किंभूता राघवहृदये दुःखिते सति दुःखिता महद्विशेषेण रामहृदि दुःखं भवतीति कृत्वा
दुःखवतीत्यर्थः केव शीत आलोकः किरणो यस्य तेन शीतालोकेन चंद्रमसा यद्वा शीतस्य हिमस्यालोको दर्शनं यदा ते
न हि मर्त्तुना समवरुग्णा म्लानीकृता नलिनी वयथैः थंभूतापद्मिनी लोकेन शोच्यते तथा सीतापि मा शोच्यतामिति व्य
तिरेकेद्दृष्टांतः यद्वा नलिनीव दुःखितेत्यन्वयः यथा ग्निमगलितके दुहिए राहव अ अएइति प्रतीकेन सह योजना तथा
हि सीतोद्धारव्यग्रतया राघवहृदये दुःखिते तस्मात्कं जीवितका भिलो भिका भिलोभः भाव एवलुत थाच यदि राघ
वहृदयं दुःखितं तदा स्माभिर्जीवितव्यमेव न रणे तु यदि मरणं तदा परार्थमिति यशो राम दुःखदर्शनाभावश्च यदि तु
जयस्तदा राम दुःखत्यागः प्रत्युपकारः स्वजीवनं च सिद्धमेवेति तदेव कर्त्तुमुचितमिति भावः राघवहृदये किंभूते
सीताविश्लेषात् कामक्लाम्यमानि कामेन क्लांतिं नीयमाने ऽत एव मलिनायमाने प्रकाशाभावादिति भावः॥५७॥ चं
द इव मेहमइलिए रअणी सारअम्मि कमलम्मिव हिमडङ्ढ्ए रअणीसारअम्मि॥ दुहिए राहव हिअअए भमरो अत्तअ
म्मि कुसुमम्मिव पवाअए भमरो अत्तअम्मि॥ चंद्र इव मेघमलिनि तेरजनी साकरे कमल इव हिमदग्धे रजो निस्साकरे
॥ दुःखिते राघवहृदये भ्रमरो दितव्ये कुसुम इव प्रवाणे भ्रमरापवर्त्तितव्ये राघवहृदये पुनः किंभूते भ्रमरो दितव्ये धी

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

रोदात त्वेन रोदनाभाव निश्चये पि मोहदशाया माकस्मिकेन भ्रमेण सीतेक्का सीत्यादि रोदितव्यं रोदनं यत्र ता दृशे संक
टोत्तीर्ण विश्लिष्टबंधु प्राप्ति कालीन रोदन कद्भावना वशोपस्थित सीता प्राप्ति भ्रमेण रोदितव्यं यत्रेति वा हृदये कस्मिन्नि
व मेघमलिने ते मेघच्छन्ने चंद्र इव सीतापहार चिंता कलंकितत्वात् चंद्रेकीदृशि रजनी सारके रजनी सारयति ज्योत्स्न
याश्रेष्ठं करोतीति रजनी साकरस्त स्मिन् रजनीसारं सुरतं ददातीति रजनी सारदस्तस्मिन्वा चंद्रोदये सुरतोद्रेका
त्त थाच तथा विधोज्वलं चंद्रवन्निर्म्मलं राघवहृदयं सत्व प्रधानमपि मेघतुल्य चिंतया तं रोहितमभूदिति भावः एवं
हिमेन दग्धे कमल इव सौरभादि वेद्वेर्यादि गुण विरहाद्विवसं यथा कथं विल्लोकलज्जयाप्रकृत कार्योद्योगेन च मनसः
प्रकाशो पि निशि प्ररूढ जानकी विरहेण निरूढ वृत्तिकतया संकुचितत्वाच्च कमले किंभूते रजो निस्साकरे रजः परागस्त
न्निसरणहेतौ हिमदग्धतया पत्राद्यभावे न परागस्खलनाद थवा रजो धूलिस्तद्वन्निस्सारे प्रयोजनं मकरंदादिशून्य
त्वान्निंदायां कन् एवंच प्रयाणे शुष्क कुसुम इव नीरसत्वादैन्येन म्लानत्वाच्च किंभूते कुसुमे भ्रमरापवर्त्तितव्ये भ्र
मराणामपवर्त्तितव्यमपवर्त्तनं यस्मात्केनभ्रमरत्यक्तव्य इत्यर्थः॥ युग्मकं॥५८॥ यदि व्यवसायान कर्त्तव्यस्त
दा विरता स्त्रियापि विरज्येयुरिति प्रवृत्ति हेतुत्वेन स्मार इतु गृहगमन प्रस्तावेन भार्यावृत्तांत मुपदर्शयन्प्रकृत
मुपसंहरति॥ कइआणु विरह विरइअ दोब्बल्ल पसाहणुज्झि आहरणाइम्॥ णीसासवरपहोलिरलंबालअम
लिअपम्हत्थ कओलाइम्॥ कदानु विरह विरचित दौर्बल्य प्रसाधनो ज्झिताभरणानि निश्वासवश प्रघूर्णन शी
ल लंबालक मृदित पक्ष्मल कपोलानि नु संधने हे वानराः यदि भवद्भिश्चिरमंत्रेव विलंबः क्रियते तदा वयं प्रिय
कलत्राणि कदा द्रक्ष्याम इत्युत्तरस्कंधकं वयः कीदृशानि विरहेण विरचितं यद्दौर्बल्यं मंगकार्श्यं तद्रूपं यत्प्रसा

धन मलंकारस्तेनो जितानि त्यक्तानाभरणानि यैस्तानि दोर्बल्य। निबंधने आभरणत्यागे स्वस्त्रीणां का[illegible]र्थी
ध्रुवस्थांतरप्राप्त्या शोभाविशेषो जायत इति दोर्बल्यरूपालंकरणकृतपुनरुक्ति निबंधनत्वेनोत्प्रेक्षाव्यंजिता
तेनएवं विश्वासस्यास्मदादिहेतु प्राक्कालीन दुःखानुभव निबंधनेन इदानीमप्येते दृष्टा इति मनस्संवेगविशेषेण
जनितस्य वसाआअत्ताअनुवर्त्तिनो नगवप्रघूर्णनशीला दिशिगामिनो संयतत्वेन लंबायेअलकाः कुंतलास्ते
मृदितोस्पृष्टो पक्ष्मलेोवक्षोभागमनेनभावादयाज्जातपुलकौ कपोलौ येषां तानी तिसा[illegible]मासायुक्तं॥५९॥ पिहुल
णिअम्बखलिअप्पसिढिलवलअविवइण्णबाहुलआइम्॥ दच्छामपरिअणत्थु अकअपेसणलज्जिआ पिअकलत्त
इम्॥ पृथुलनितंबस्खलितप्रशिथिलवलयविप्रकीर्णबाहुलतानि। द्रक्ष्यामः परिजनस्तुतकृतप्रेषणलज्जिता
प्रियकलत्राणि॥ पुनः किंभूतानि नितंबेबाहू विष्टभ्यातिष्ठतीति वानरजातिस्वाभाव्यं तथाच पृथुलनितंबस्खलि
तेदौर्बल्यात्प्रशिथिला विरलीभूता वलया यत्रतथाभूते परिरंभपाय विप्रकीर्णे नक्षिप्ते बाहुलतेलताकारौ बाहू
येस्तानि वयं किंभूताः परिजनैस्त्वत्कृतंतासामग्रेप्रकाशितं कृतमस्माभिर्निष्पादितं यत्प्रेषणमाज्ञातेनलज्जिताः
स्वप्रकर्षस्कंतौ स्वस्यलज्जा भवतीतिभावः युग्मकं। ६०॥ अथसुग्रीवप्रतिज्ञा वर्णनायप्रस्तौति॥ इअजाहेप
भणत्तणचलइ चित्ताभरोसिअत्त सरीरम्॥ आअड्ढणणिच्चेट्ठं पंकखुत्तम्वगअउलंकइसेणं॥ इतियदाप्र
भण्यमाणं नचलति चिंताभरावसीदच्छरीरं॥ आकर्षणनिचेष्टं पंकमग्नमिव गजकुलं कपिसैन्यं॥ इत्यनेन
प्रकारेण प्रभण्यमानं कपिसैन्यं यदानचलतिनस्पंदते पितदावानरपतिः सुग्रीवोहसन्नर्थात् क्रोधेनपुनरपि ४७
जल्पतीत्यग्रिमस्कंधकेनसमन्वयः। कपिसैन्यं कीदृक्। किंस्यादितिचिंताभरेणावसीदत्कृशीभवच्छरीरं

यस्यतत्। एवं आकर्षणेसमुद्रलंघनायाह्वानेसति निश्चेष्टं किंकर्त्तव्यंविमूढं किमिव गजकुलमिव यथापंकमग्नं
गजकुलं नचलति तदपि चिंतावसन्नवपुराकर्षणेसति निस्पंदं महाकायत्वादि[illegible]त्यर्थः॥ ६१॥ ॥ तोफुडसद्दुद्दा
इअवणदवभरिअगिरिकन्दराआरमुहो॥ रिउविक्कमअसहंतो जंपइवाणरवइपुणो विहसन्तो॥ ततस्फुटशब्दोद्धावि
तवनदवभृतगिरिकंदराकारमुखः॥ रिपुविक्रममसहमानो जल्पतिवानरपतिः पुनरपिहसन्। वानरपतिः कीदृक्
स्फुटःशब्दो यस्य तादृगुद्धावितः प्रसरणशीलो यो वनदवस्तेनभृतापूर्णाया गिरिकंदरातदाकारमुखो मुखव्यादाना
त्जल्पेन्नपाकजवाद्वयोर्मुखाभ्यंतरलोहित्यवनदवयोर्मुखकंदरयोश्चसाम्यं॥ युग्मकम्॥ ६२॥ यथैकादशभिः
कपिनामुत्तेजकं सुग्रीवप्रतिज्ञावचनमाह॥ इअअत्थिरसामत्थे अण्णस्सविपरिअणम्मिकोआसंघो॥ तत्थविणा
मदहमुहोतस्स ठिओएसपडिहडोमज्झभुओ॥ इत्यस्थिरसामर्थ्येन्यस्यापिपरिजने कोध्यवसायः तत्रापि नामदश
मुखस्तस्य स्थितएषप्रतिभटोममभुजः इत्यनेनप्रकारेणास्थिरसामर्थ्ये यस्यतस्मिन्परिजनेन्यस्यापि शत्रोरपि
कोध्यवसायः अपिनकोपि यथाममपरिजनोगृहंगत्वा सामर्थ्यंप्रकाशयति युद्धभूमौ अनध्यवसायवानृतथारा
वणस्यापीत्यर्थः तेनकिंस्यादित्यतआह। तत्रापिशत्रोः परिजनेघनध्यवसायेपि नामसंभाव्यंतेशक्यतेसरावणो
मदांधोदर्पशीलश्चतथाचपरिजनानस्म दृष्टांतेनानध्यवसायादुपेक्षास्मानुपगतानवेत्यस्यभागच्छेदतस्तस्य
प्रतिभटएषममभुजबाहुसुघम्यदर्शयति। तथाचातःपरंभवंतो मयाप्युपेक्षितास्तेनतुसमंभुजमात्रसहायेनमयै
वयोद्धव्यमितिभावः॥ ६३॥ अथचभवद्ध्यवसायंविनापिमद्ध्यवसायेनैवसमुद्रलंघनंस्यादित्याह॥ अवहोआस्स
म्मि महंहत्थअलाहअदालंतपत्थिअसलिलो॥ जाणाणिअत्तइत्त अहिवोलीणत्तावहोज्जबा[illegible]णरसेण्णम्॥ जभ

।।।।४६।। यावकाशे म महस्तलाहतद लस्थ्रस्थिन सलिलः याव न्न निर्वर्त्ततेउदधिर्व्यतिक्रांतंभवनितावद्वानरसैन्यंगभ
यावकाशोभयपार्श्वेन महस्ततलंनचपटेनाहतंताडितंसद्दल द्विधाभवदत एवप्रस्थितंगतंसलिलंयस्यताद्दशउद
धिर्य्यावन्न निवर्त्तते भिन्न मुभयजलंन मिलतितावद्वानरसैन्य जलशून्यजलधिवर्त्मनाव्यतिक्रांतंपरसुतीर्णभवतुए
तावता विलंबसाध्यस्य द्विधाभूतजल मिलनपूर्वकालीनत्वोक्तिजलयोरति दूर गमनंविनोनोपपद्यतइतिप्रहारप्र
कर्षः किंवाकपीनामेवसंचारयोग्यमितिध्येयं।।६४।।प्रकारांतरमाह।। अहिआणतो सिहरं धरियं मलअगिरिणोहसंतो
सिहरं गुरुभर विसअसंसणंणज्ज मिस्सुण जोअणसअणं म।। अहितानांतोपहरं धृतंमलयगिरेर्हसन् शिखरं।।गुरु
भर विषमारंननया मिभुजेनयोजनशतंसेनां।।अहंसेनाभुजेनयोजनशतंनयामिवाहुनेवोतोल्यसमुद्रपार सुत्ता
रयामीत्यर्थः भुजेनकीदृशेनगुरुणाभरेणसेनांदहनगौरवेण विषमइयन्नतोन्नतोसांमूलंयस्यतेनविषदोनि
र्मलइति विषदांसेनवा।एतेनस्वबलाधिक्यमुक्तं।सेनांकीदृशी अहितानांरक्षसांतोषहरे भयहेतुवानरस्कंधा
स्संतोषहारिणिमलयगिरिशिखरे धृतांस्थापितां। अथवामलयशिखरे धृतांपारनयनायगृहीतामित्यर्थः।।६५
।।स्वकार्य स्वेनैवसाधयितुमर्हमित्याह।।समुहमिलिएक्कमेक्के कोइर आसण संसअम्मिस ओहो।।जावणदिज्जइ
दिट्ठी काअवंदावहो इचिरणिव्वुढम्।।संमुखमिलितेकैकस्मिन् कः किलासन्नसंशयेसहायःपावनादीयतेदृष्टि
ः कर्त्तव्यंतावद्भवति विरनिव्यूढं।भयेनसंमुखंमिलितमेकैकंपरस्परंपत्र ताद्दशीप्राणसंशयेकः किलसहायोद्वि
तीयः अपितुनकोपि तत्रसर्व्वमात्मनैवप्रतिकर्त्तव्यमित्यर्थः अत्रोपपत्तिमाह।। यावत्कार्येआत्मनादृष्टिर्नदी ४८
यतेतावत्कर्त्तव्यंकार्यं चिरंव्याप्य निव्यूढं निर्वृत्तंभवति अपितुनभवतीति काकलभ्यतेतथाचमत्कार्येराव

णवधेमयैवदृष्टिर्देयानभवंतोभियोज्याइतिभावः।।६६।।अथप्रकारांतरेणस्वपौरुषमाह।।अहवमहण्णवहु
त्तंपत्थुत्तस्सगअणं महंणवहुत्तं।।रुहिरवसामिसवत्तंहंतूणव णिव्वुओवसामिसवत्तम्।।अथवामहार्णवाभि
मुखंप्रतिष्ठमानस्यगगनंममनप्रभुतं।।रुधिरवसामिषपात्रेहत्वेव निर्वृत्तोवसामिसपत्तं।।अथवापक्षांतरे महा
र्णवसमुद्रस्तदभिमुखंप्रस्थितस्य ममगगनंनप्रभुतंन महत् मत्संचारेतदपिस्वल्पमित्यर्थः अथाहंसपत्नंरावणं
हत्वा निर्वृतइववसामिकीदृशं तुरुधिरंवसाच आमिषंचतेषांपात्रमाश्रयंकोमलदेहं नतुवज्रदेहमित्यर्थः य
द्वारुधिरवसामिषपाराक्षसास्तान्त्रायतेरक्षतितंरुधिरवसामिषपत्रं केचित्तु अथवा महार्णवाभिमुखंप्रार्थ
यतोगगनंप्रभुत्वमितिसंस्कृत्य महार्णवाभिमुखंगमनंप्रार्थयतोममनप्रभुत्व अपितुप्रभुत्वमेवेत्यर्थमाहुः
।।अथवारिस्थलाघवमुक्त्वागौरवमाह।।णिसुठिज्जंत्तभुअंगंमामुज्यहमहसरोसचलणक्कंतम्।।जत्तोणमइ
महिअलंतत्तोणामसअलोपअट्टउअही।।निपात्यमानभुजंगंमामुह्यममसरोषचरणाक्रांतं।।यतोनमति
महीतलंततोनामसकलःप्रवर्त्तताम्उदधिःहेवानरामामुह्यतसमुद्रः कथंसंतरणीयइति मोहमागच्छतयद्वा
मदुक्तौमोहंसंशयंमाकुरुतमयोच्यमानंसत्यमेवेतिभावः।।ममसरोषंयथास्यात्देवंचरणाभ्यांवलनेनसंचारे
णवाआक्रांतंसत् यतोयत्रमहीतलंनमत्यधोगच्छतिनामसंभावनायां।।ततस्तत्रसकलःसमुद्रःप्रवर्त्ततां।न
मनेहेतुमाह महीतलंकीदृक् निपात्यमानोभुजंगशेषोयस्मात्तत्।अयंभावःमयिसक्रोधंचलतिचरणभराद्
नमत्याभूमौशेषोमहीमपहायाधोगच्छेद थमहीतदुपरिपतेदेवमुत्तरमितिवर्त्तमानार्थकत्वानचप्रत्ययेनद्यो
त्यते।तथाचतथाप्रथिवीनमेद्यथा निम्नतोत्कर्षेण सकलजलप्रवेशात्तत्रैव समुद्रःस्यात् अथान्नम्यतुच्छी

भूतेनसमुद्रखातेनकपयपारमुत्तरंत्विति भावः॥ शरीरबलमुक्ताभुजाबलमाह॥ ओजमलरवंभेहिवधरिएण
भुंहेहिमहमहोअहिवंद्वेउन्मूलिआइएणंसमइच्छअविंज्यसंकमेणकइबलम्॥ उत्तयुगलस्तंभाभ्यामिवधृते
नभुजाभ्यांममहोदधिपृष्ठे मज्येइतिपाठेमध्योउन्मूलितानीतेनसमतिक्रामतुविंध्यसंक्रमेणकपिबलं
॥उतपक्षांतरेउन्मूलितेनोत्पाटितेनाथआनितेनविंध्यरूपसंक्रमेणकपिबलंसमतिक्रमतु समुद्रमित्यर्थोव
संक्रमघटनप्रकारमाह।कथंभूतेनसंक्रमेणयुगलस्तंभाभ्यामिवममभुजाभ्यांमहोदधिमध्येधृतेन।तथाचज
लमध्यनिखातस्तंभद्वयाकारोमहाबाहूभविष्यतस्तदुपरिजलयंत्रविशेषप्रायोविंध्यस्तेनसमुद्राधिकमानवि
ध्योत्पाटनधारणसमर्थत्वेनभुजयोरतिमहत्वमुक्तं॥ महोदधिपृष्ठइतिपाठेमच्चरणद्वयावष्टब्धदक्षिणोत्तर
तीरद्वयोपरितिर्यक्पातितस्तंभद्वयाकारोमहाबाहूतदुपरितिर्यक्पातितोविंध्यःसंक्रमइत्यर्थः॥ संक्रमःक्रमे
सम्यक्वारिसंचारयंत्रके॥ अथफूत्कारप्रकर्षमाह॥ विवलाअन्तभुयंगंउवत्तिअजलअरंविहिसामहिरं॥
मुहमारु अविहुअजलंपेच्छहरअणाअरंकरेमिथलवहं॥ विपलायमानभुजंगंउद्वर्त्तितजलचरंविभि
न्नमहीधरंमुखमारुतविधुतजलंपश्यतरत्नाकरंकरोमिस्थलपथं।हेकयःपश्यत।तथाचशब्दमात्रेणोच्य
तइतिनकिंत्वर्थतोपीतिभावः।मुखमारुतेनफूत्कारेणविधुतंजलंयस्मात्तथाभूतंरत्नाकरंस्थलपथंकरोमि
जलस्यविक्षिप्तत्वेनतुच्छीभावात्ततःपारमुत्तरंतेतिभावःफूत्करकृतामवस्थामाह।किंभूतं।कुतःकिंवृत्तमि
तिसंभ्रमेणविपलायमानाइतस्ततोगामिनःशेषादयोभुजंगायत्रएवंउद्वर्त्तिताविपरीत्यस्थिताउपरिगतो ४९
दरभागाइतियावत्तादृशाजलचरामकरादयोयत्र।एवंविभिन्नाःखंडखंडीभूतामहीधरामैनाकादयोय

त्रतं॥ ६९॥ अथस्वस्यरावणविहारभूमिसुवेलाभिक्रमसामर्थ्यंकटाक्षयन्नाह॥ मन्यरक्कडिउम्मूलिअभुआ
भमाइअविमुक्कसेसबद्धं॥ एत्तोहुत्तसुवेलंतत्तोहुत्तमलअंकरेमिसमुद्दम्॥ मध्यखंडितोन्मूलितभुजाभ्रामि
तविमुक्तशेषाहित्तइतोभिमुखसुवेलंततोभिमुखमलयंकरोमिसमुद्रं।अहंसमुद्र मीदृशंकरोमि कीदृशंएतदभिमु
खःसुवेलोयत्रेत्युत्तराभिमुखसुवेलंतदाभिमुखोमलयोयत्रेतिसुभिमुखमलयमित्यर्थःस्तथाचमलयसुवेलाभ्यां
संक्रमंबध्नामितेनपारंगच्छतेतिभावःसंक्रमप्रकारमाह।मध्येखंडितोउपरिश्वंगादिविषमभागापसारेणनस
मतासिध्यर्थमुत्सेधएवोपरीदलितावथोन्मूलिताच्युत्पाटितोततश्चभुजाभ्यांभ्रामितोपूर्वपश्चिमादक्षिणोत्तराय
तीकृतोतथाविमुक्तोत्यक्तोशेषोसंक्रमोहृत्तमोगोययोस्तोविमुक्तशेषावहितोसक्रमघटं कीभूतोमूलाद्दभागो
यत्रतमितिसमुद्रविशेषणंतद्यथासादितिक्रियाविशेषणंवा॥ तथाचद्वयोरुत्सेधेनोपरिभागंदैर्घ्येणशेषभागंच
स्यसंक्रमोघट नीयइत्यर्थः॥ ७०॥ अथाशयस्थलंकोपमर्दमुद्घाटयन्नाह॥ अहवसुवेलालग्गापेच्छहअंज्ज
अभग्गारक्खसविडवंम्॥ सीआकिसलअसेसंमज्जभुआअड्ढिअंलअम्मिवलंकम्॥ अथवासुवेलालग्नापश्य
तांद्येवभग्नराक्षसविटपां॥ सीताकिशलयशेषांममभुजाकृष्टांलतामिवलंकां॥ अथवासुवेलालग्नांलतामिवलं
कांअद्येवममभुजयाआकृष्टांपश्यतायथासुवेलसंबंधाकाचिल्लताआकृष्यतेतथातत्संबंद्धालंकापिमयाभुजं
नांत्रैवाकर्षणीयाततःपारगमनव्यावृत्तिरपिनस्यादितिभावःआकर्षणेसतिलतायाःशाखापत्रभंगोभवतीय
ह। कीदृशीभग्नाःपतिताराक्षसाएवविटपायस्यास्तांराक्षसाअपिहंतव्याइत्यर्थःएवंसीतारूपकिशलयाविशेषा
फ्लांतरप्रायराक्षसीनामपिनिपातनादितिभावः वस्तुतस्तुसुवेलमयाकृष्यआनयामितदाकर्षणेतल्लग्नांलता

भिवलंकामप्यानयामीति गूढो वाक्यार्थः॥७१॥ अथाश्वासमकवच्छिन्तिमुखेन विशिष्य रावणवधमाह॥ओभग
रखवसमुदुमणिहदअसाण णमइंदसुहसंचारम्॥ रामणुराअमत्तो मले मिलंकं वनथलिववणगओ॥ततभग्न
अवभग्न वाराक्षसद्रुमां निहतदशानन मृगेंद्रसुखसंचारां॥रामानुरागमत्तो मृद्वापि मिलंकावनस्थली मिवचनगजः
॥ततपक्षांतरे रामानुरागेण मत्तस्माहंकारो हं लंकां मृद्वामितत्रैवगत्वा मर्दयामीत्यर्थः कईवचनस्थलींवनभूमिंम
त्तोवनगजइव लंकां कीदृशीं मग्नाहतत्वात्पातिता अवभग्नाइति वाराक्षसा एव द्रुमायत्र।एवं निहतो दशाननएव
मृगेंद्रस्तेन सुखसंचारां।वनभूमावपि गजेंद्रप्रवेशात् द्रुमभंगो मृगेंद्रहननाच्च संचारसौख्यं भवतीत्यर्थः॥अत्र
वनगजेन मृगेंद्रहननेजातिविरोधदोष इति नं दृश्यं कालवशेन कदाचित्तथाभावादिति किंचित्।दशाननवधस्य
रामकर्तृकत्वादन्यकर्तृकोमृगेंद्रवध इत्यपरे वास्तुतस्तु मइंद इत्यत्र मर्दीइति प्रकृतिस्तथाच मंद विशिष्टो म दी
मत्तगजस्तादिंद्र इत्यर्थस्तेन मत्तगजयोः संग्रामे एकेनापरस्यहननं संभवत्येवेति नजातिविरोधो न वा मृगेंद्रापे
क्षया वनगजेंद्रस्यन्यूनजातित्वात्स्य रावणादपकर्षः प्रतीयत इतिदूषणमितिवयं॥७२॥सुग्रीवप्रोढिदर्श
यारामदासप्रकाशिता॥राममेवप्रदीपस्यन्तृतीयाप्रदियाशिखा॥३॥ अथवानरगणामुत्तेजनादवस्था
न्तरमाह॥ ॥ ॥अहपढमवअणणिहुअं पच्छाजम्हइ अलज्जिअं कइसेण्णं॥ससिदंसणपासुत्तं कमलवनव
दिअसाअमेण विबुद्धम्॥ अथप्रथमवचन निभृतं पश्चादृष्माथितलज्जितं कपिसैन्यं॥शशिदर्शनप्रसुप्तं कम
लवन मिव दिवसागमेन विबुद्धम्॥अथसुग्रीवस्याहंकारानंतरं कपिसैन्यं विबुद्धं सचेष्ठमासीत्।कीदृशंप्रथम ५०
वचनेन सुग्रीवस्य प्रबोधवाक्येन निभृतं निश्चेष्टं प्रेरणामधिगत्य संचितत्वात् पश्चाद्दितीयवचनेन उष्माथि

तंपराहंकारसहिष्णुतं।अत्रोपमामाह॥कमलवनमिव यथा कमलवनं दिवसागमेन विबुध्यते विक
सति कीदृक् शशिदर्शने रात्रौ प्रसुप्तं मुद्रितं।यत्र शशिदर्शनप्रायं सुग्रीवस्य प्रथमवचनं प्रभातप्रायं द्वितीयवचनं
कमलवनप्रायं कपिसैन्यं अन्यदपि सुप्तं जागर्त्तीति ध्वनिः॥१॥ अथ कपीनां मेकमत्यमाह॥णावरिअं कइ हिअ
आइं धुअंधआर विअडाइ गमणुच्छाहो॥एको बहुआइ समं गिरि सिहरांइ अरुणाअवोव्व विलग्गो॥अनंतरं चक
पिहृदयानि धुतांधकारविकटानि गमनोत्साहः॥एको बहूनि समं गिरिशिखराण्यरुणातप इव विलग्नः॥प्रबोधानं
तरं च एक एकाकारो लंकाप्रतिगमनोत्साहो बहूनि कपीनां हृदयानि समं एकदैव विलग्नः॥सर्वे पि लंकागमन
साभिलाषा बभूवुरित्यर्थः हृदयानि किंभूतानि धुतेनांधकारेणानध्यवसायसमुत्थेन मोहेन विकटानि व्यक्तानि
उत्साहप्रकाशादिति भावः।दृष्टांतमाह।यथा एको बालातपस्तिमिरविरहेण प्रकटानि बहूनि गिरिशिखरा
ण्येकदैव लगति।यत्रोत्साहस्य तदानिमुत्पन्नमात्रत्वेन कोमलत्वादग्रे दुस्सहो भविष्णुत्वाच्चारुणातपसा
म्यं॥२॥ अथ तेषामुत्साहाधिक्यमाह॥ तोदप्पमुहपसा ओआढत्तो ताण हिअअह सिअज्जोओ॥रणवि
कम गाहत्थो णिअसहाओव पहरिसो वित्थरिउम्॥ ततो दर्पमुखप्रसादआरब्ध तेषां हृदय हसितोद्यो
तः॥रणविक्रमाग्रहस्तो निजकस्वभाव इव प्रहर्षो विस्तरितुं।ततउत्साहानंतरं तेषां प्रहर्ष आनंदो विस्तरि
तु विस्तारं गतुमारब्धो निजकस्वभाव इव प्रकृतिचांचल्यमिवेति सहोपमा॥चांचल्य हर्षावुभावपि विस्तरि
तुमारब्धावित्यर्थः।प्रहर्षः कीदृक् दर्प्पेण मुखस्य प्रसादो यस्मात्स पूर्वमप्रसादः।स्थित इति भावः एवं हृद
याद्य हसितं तेनोद्योतः प्रकाशो यस्य वैलक्षण्येन हर्षस्य पारमार्थिकत्वं ज्ञानमिति भावः एवं रणविक्रमस्य

ग्रहस्तोहस्तालवोहर्षेण वि क्रमोवर्द्धितइतिभावः॥चांचल्यमपिदर्प्पस्यवलस्यमुखप्रसादोमुखप्रसन्न
तातद्रुपकंयथामुखप्रसादेनहृदयंज्ञायतेतथा॥चांचल्येनदर्पइतिभावःएवंहृदयहास्यस्योद्योतोयस्मादि
तिहास्यप्रकाशकारणं।रणविक्रमस्यहस्तालंबोवृद्धिहेतुत्वादित्यर्थःमनःप्रसादोहर्षःस्यादभीष्टादिस्तवा
दिभिःदर्प्पोहिंकारशौर्यशौरितिविश्वः॥३॥ अर्थकादशाभिस्तपांप्रत्येकमुत्साहचेष्टामाह।वहलुद्धुअधाउरअ
रिसहेणधुओज्जराहअकओोलअलम्॥भिण्णंवामभूवसिरेउम्मूलिअवलिअप्पण्णअगिरिसिहरं।।ब
हलोद्धुतधातुरजहृषभेणधुतनिर्झराहतकपोलतलं।भिन्नंवामभुजशिरस्युन्मूलितवलितपन्नगंगिरिशि
खरम्॥।।ऋषभना मावानरेणगिरिशिखरमेकंदक्षिणहस्तेनोत्पाद्यवामभुजाशिरसिअंसेभिन्नंविक्षिप्तंस
घूर्णितमित्यर्थः सुग्रीवोमदग्रेप्यहंकारमाचरतीतिक्रोधःप्रभुत्वादस्यकिमपिकर्त्तुंनशक्यतइतिशिखर
प्रहारेणस्ववपुषिनिपातितइतिभावः।प्रकृतिचांचल्यमेवेदमितिवाकीदृक्शिखरंवहलान्युद्धुतानिघातो
र्गैरिकस्यरजांसियस्माल्लघुत्वाद्धुलिरुत्थिताऽगुरुत्वाच्छिलानिपातिताइतिभावः।एवंधुतेनोच्छालितेननिर्झरे
णाहतंक्षालितंकपोलतलंयेनप्रहारसमयेग्रीवावलनेनवामकपोलस्यवामांसोपरिगतत्वादितिभावः।एवं
उन्मूलितास्थानादुत्थापिताअतएववलितावक्रीभूयस्थिताःपन्नगायत्रतदितिप्रहारप्रहर्षउक्तःभूवादिरस
सक्तादिश्लेष्मादिवसुधादिषु।वर्त्ततेधातुशब्दोयंविशेषादस्मांगेरिके॥४॥निर्वेदचेष्टामाह।पुलउब्भेओअंब ५३
पीलोपरिपुसइविसमकसणच्छाअं॥हिअअणिहितपहरिसंसभिपडिभिण्णस्थणसंणिहबच्छअ

डम्॥पुलकोद्भेदाताम्रंनीलःपरिप्रोंछतिविषमंकृष्णच्छायं।हृदयनिहितप्रहर्षशशिप्रतिभिन्नघनसन्नि
भंवक्षस्तटंपरिप्रोंछतिवावारंवारंपाणिनामृष्टतिपुर्ववदेवसुग्रीवोक्त्याक्रोधादुत्साहाच्चेतिभावःवक्षःकीदृ
संपुलकोद्भेदेनरणोत्साहसमुत्थरोमांचेनकिंचिताम्रं॥वाल्लानामूनीलत्वेप्यग्रेकिंचिल्लौहित्यमेवपुलकोद्गमे
नतल्लक्ष्यतेतदुक्तंविषमंयथास्यात्तथाकृष्णच्छायंश्यामंकिंचिल्लौहित्यसत्वेनकृष्णतायावैसम्यमितिकेचि
द्वल्कतस्कलोम्नांश्यामत्वेप्यंतस्त्वगवच्छिन्नदेशस्यलौहित्यमेवतदुत्फुल्लतयापुलकेनलक्ष्यते।विषमंनिम्नो
न्नतंकृष्णाच्छायंचेत्यर्थः।एवंहृदयेमनसिनिहितःप्रकर्षोयत्रतत्तदधिष्ठानत्वात्तस्यततएववक्षोमर्शनंयथा
मनसिवर्त्ततेतथाकरिष्यामीत्येवंतिभावःदृष्टांतमाह।पुनःकीदृक्शशिनाप्रतिसंभिन्नःसंबद्धोयोघनस्तत्तु
ल्यंहृदयस्थप्रहर्षस्यस्वसमुत्थत्वेनश्वेतत्वाच्चंद्रतौल्यंवक्षसकृष्णत्वान्मेघतौल्यं॥अन्योपिक्रुद्धोहृदयंमृषतीं
तिध्वनिः॥५॥कुमुदस्यचेष्टामाह॥विहडन्तोट्ठउडदलंफुरन्तदन्तअरवहलकेसरवअरंपहरिसचंदालोएहसि
अंकुमुएणसुरहिगंधुगारंम्॥विघटमानौष्ठपुटदलस्फुटेरदन्तकरवहलकेसरप्रकरंप्रहर्षचंद्रालोकेहसितंकु
मुदेनसुरभिगंधोद्गारं॥सुग्रीवोक्त्याक्रोधाच्चांचल्याच्चकुमुदेनहसितंहास्याकृतंविघटमानौवि भिन्ना
वोष्ठपुटौलेंयत्रतद्यथास्यात्स्फुरंतोदंतकराएवकेसरप्रकारोयत्रतद्य थास्यात्सुरभिगंधस्योद्गारोयस्मात्त
द्यथास्यादितिचक्रियाविशेषणंतस्मिन्सतिप्रहर्षएवचंद्रस्तस्यालोकेप्रकाशेसतितथात्वप्रहर्षोद्गमेनकुमु
दस्यापिहास्योद्गमादोष्ठपुटयोर्विभागोदंतकांतिप्रकाशोमुखांतांबुलादिसौरभनिर्गमश्चवभुवेतिवाक्या
र्थोध्वन्यर्थस्तुप्रकृष्टोहर्षोयस्मादेतादृशस्यचंद्रसालोकेतेजसिसतिकुमुदंहसतितेनतस्योष्ठपुटप्राय

॥ ११५.२॥ दलानां विभागो दत्तरुचिप्रायकं सगुणां स्फुरणं सारभस्य चोद्गमो भवती तिसारं ॥६॥ मैंदस्य चेष्टामाह ॥ विहडंत
रधणिबंधो उहअभुअरवेवमुहलवेविरविडवो। विसमपडत्त विसहरो वेलाचंदणदुमो मइंदेण धुओ ॥ विघट
मान धरणिबंधउभयभुजक्षेपमुखरवेपनशील विटपः विषमपतद्विषधरो वेलाचंदनद्रुमो मैंदेन धुतः। मैंदेन वे
लासमुद्रती रंतद्वर्ती चंदनवृक्षो धुतः कंपितः। कीदृक् विघटमानो धरणिबंधो यस्य। आंदोलनेन मूलशैथिल्यात्
एवं उभयभुजाभ्यां क्षेपउत्पाटनोद्यमनं तेन मुखराः परस्परसंघट्टनशब्दायमाना अथच वेपमानाः शाखा यस्या
वं कंपनेन विषमाः स्थाने स्थाने पतंतो विषधरा यस्मात्तादृक् क्रोधेन प्रहारायोत्पाटयितुमारब्धोपि तरुः प्रहर्त्तव्या
भावात्पुनरांदोलित एव न तूत्पाटित इति भावः चांचल्येन वाउत्पाटय इवांदोलित इति कश्चित् ॥ द्विविदस्य चेष्टा
माह ॥ दिप्पत्तदुरालो आदि विअस्स स धूमसिहिसिहावत्तणिहा ॥ सोमत्तणं णपत्ता हरि सभरंत्ती विविसहरस्स
व दिट्ठी ॥ दीप्यमानदुरालोका द्विविदस्य धूमशिखावर्त्तनिभा ॥ सौम्यत्वं न प्राप्ता हर्षे भ्रियमाणापि विषधरस्येव दृ
ष्टिः द्विविदस्य दृष्टिः हर्षेण भ्रियमाणापि सौम्यता सामग्रीसत्वेपि सौम्यत्वं न प्राप्ता सुग्रीवोक्ताशेषेण दुर्निरीक्ष
त्वात्। तदुक्तं दीप्यमाना रोषाद्धुततेजो विशेषमयी अतएव दुर्निरीक्षा पुनः कीदृशी स धूमशिखिनो यः शि
खावर्त्तस्तन्निभा तत्तुल्या। अत्र वह्नी प्रायादीदप्ति धूमप्रायस्त्व सौम्यताहेतु द्वतातारका दिच्छवि विशेषाकं वषि
षधरस्य दृष्टिर्विषयथा सर्पस्य दृष्टिः सौम्यत्वं न प्राप्नोति। अत्रापि दीप्यमानेत्यादि पूर्ववदेव योज्यं श्यामारुणयो
र्विषतज्ज्वलयोर्दृष्टौ संक्रमात्संमधूमवह्नी तुल्यत्वं। यथा सा परा धंद्रष्टुमुद्यतः कालसर्पः प्रतिबंधक सद्भावे ५२
दूरादपि सक्रोधमालोकते तथायमपि प्रभुरिति सुग्रीवं किमप्यजल्पन्नुद्धतं ददर्शेति भावः ॥ उत्साहादेव दृष्टे

रियं चेष्टेति केचित् ॥८॥ शरभस्य चेष्टामाह ॥ सरहो विदरिमुहुग्गाअपडिसद्दफुडिअमलअअडपभारम्
॥ मुंचइ विसअं णाअं मलेइ अंगं च रोसविसअंणाअं ॥ सरभोपि दरीमुखोद्गतप्रतिशब्दस्फुटितमलयतटप्रा
ग्भारं ॥ मुंचति विषदं नादं मृद्गात्यंगं च रोषविषार्द्रं ॥ शरभोपि विषदं नादं मुंचति उच्चैर्नादं त्यर्थः ॥ अंगं च
मृद्गाति पाणिना दृढं मर्दत्यर्थः। नादं कीदृशं दरीमुखादुद्गतदुच्छितो यः प्रतिशब्दस्तेन स्फुटितो भिन्नो मलय
तटस्य प्राग्भार एकदेशो यस्मात् प्रतिशब्दः कुहरगर्भे प्रविश्यावकाशेनोर्द्ध मुच्छलती तिमलयस्फुटनेन शब्दो
त्कर्षउक्तः अंगं च कीदृक् रोष एव विषं व्याकुलिकारसमर्थत्वात्तेनार्द्रं तदानीमेव व्याप्तं। अन्योपि विषस्पृष्टवपु
रंभम्॥ णिअअच्छाआवइअरसामलिअसाअरोअरजलुद्धन्तम्॥ इतिसकलमहीतलोत्खा तम हीधरसंघा
तनिर्मितमहारंभं॥ निजच्छायाव्यतिकरश्यामलितसागरोदरजलाद्दत्तिम्॥ इत्यनेनप्रकारेणवानरानलपथंघ
ट्टयंतीतिपंचमस्कंधकेनसंबंधःनलानुगामित्वेनपरेषामपिकर्तृत्वाद्बहुवचनेनकीदृशंसकलमहीतलादुत्खा
तैर्महीधराणांसंघातैर्निर्मितोमहानारंभोउच्छ्रायोयस्यतंएवंनिजकच्छायायाःस्वीयप्रतिबिंबस्यव्यतिकरे
णसंबंधेनश्यामलितःसागरोदरजलस्याध्दांतोयेनतमितिसेतोरुच्छ्रायोदैर्घ्यंसूचितंस्वाभाविकीसिंधुजल
श्यामतासेतुच्छायात्वेनोत्प्रेक्षितेतिकश्चित्॥ ६८॥ विसमोसरिअसिलाअलदृढघाउक्खित्तमच्छपच्छिमभाअं
मज्झच्छिणभुअंगमवेढुप्पीडणविआरिअसिलावेढं॥ विषमायस्तृतशिलातलदृढघातोत्कृत्तमत्स्यपश्चिमभा
गं॥ मध्यच्छिन्नभुजंगमवेष्टोत्पीडनविदारितशिलावेष्टम्॥ पुनःकिंभूतंविषमंसमीभूयनलग्नमतोप्रस्तृतं
स्खलितंयच्छिलातलंतत्दृढघातेनोत्कृत्तःछिन्नोमत्स्यस्यतलवर्तिनइत्यर्थात्पश्चिमभागःपुच्छप्रदेशोयत्रतं
एवंतेनैवमध्यच्छिन्नंयद्भुजंगमवेष्टंसर्प्पभोगःतस्योत्पीडनेनगाढीकृतवेष्टनेनविदारितंद्विधाकृतंशिलावेष्टं
यस्यतंभोगेनाभिघातजनकमावेष्टयतीतिसमर्थ्यस्वभावस्तथाचपर्य्यैवशिलयामध्ये छिन्नःसैवावेष्टविं
दारितेतिद्वयोरपिमहत्त्वमुक्तं॥ मध्यच्छिन्नभुजंगमस्ययद्वेष्टमावेष्टनंतस्योत्पीडनेनयंत्रणेनेत्यर्थइतिक
श्चित्॥ ६९॥ सेलुम्मूलणसंभमगहिअभुअंगअमगाधाइअसीहम्॥ गिरिसिहरणिसण्णणिअगिरिपेल्लि

अणिन्तमुहलजलहरसलिलम् ॥ शैलोन्मूलनसंभ्रमगृहीतभ्रष्टगजमार्गधावितसिंहं ॥ गिरिशिखरनिषण्णानीत
गिरिप्रेरिततिर्यन्मुखरजलधरसलिलं ॥ एवंकपिभिः कृतंयच्छैलोन्मूलनंतत्संभ्रमाद्गृहीतभ्रष्टस्यसंभ्रमपूर्वंगृही
तस्यधृतस्यतस्मिन्सतिभ्रष्टस्यसंभ्रमपूर्वंगृहीतस्यधृतस्यतस्मिन्सतिभ्रष्टस्यतदन्यमनस्कत्वेनपलायितस्यमा
र्गेणपृष्ठेनधावितःसिंहोयत्रतंउत्पाटनसमयेभ्रष्टस्यगजस्यसेतावप्यनुसंधानेनवानराणामानयनेशैघ्र्यपर्वत
स्यदैर्घ्यंवासूचितंयेनचिरकालेनापिनविश्रामइतिभावः एवंगिरिशिखरनिषण्णस्यतथैवानीतस्यसेताविृत्यर्थात्
गिरिणासेतुलग्नपर्वतान्तरेणप्रेरितस्ययन्त्रितस्यअतएवपीडयामुखरस्यशब्दायमानस्यजलधरस्यनिर्यत्क्षरत्स
लिलंयत्रतंपूर्वनिपातानियमात् मेघानांकोमलत्वेजलक्षरणंधूमरूपत्वेनजललक्षणंधूमरूपत्वेपिबहिर्गमना
भावात्गिरीणांसन्निवेशस्यातिनिबिडत्वंसूचितंयद्वागिरिप्रेरितेननिर्यतोबहिर्गच्छतोमुखरजलधरस्यसलिलं
यत्रतथाचधूमरूपतयामेघागच्छंतिछिद्रगलितानिजलानिगुरुत्वात्तत्रैवपतंतीत्याशयः वस्तुतस्तुगिरिशिख
रनिषण्णस्यआनीतेनानेतुमारब्धेनगिरिणाप्रेरितस्यउक्षेपणादिप्रसंगेनशिखरेणविद्धस्यमुखरजलदस्यनि
र्यत्सलिलंयत्रेत्यनेनाप्युत्पाटनसमयोपजातजलगलनस्यसेतावप्यनुवर्तमानत्वेनकपीनामानयनशैघ्र्यंजल
बाहुल्येनमेघमहत्वात्पर्वतमहत्वंचेत्यहमुन्नयामि ॥ ७० ॥ पासल्लपडिअवणगअरुद्धमहोज्झरदुहापहाविअ
सलिलं ॥ धरणिहरन्तरिअट्ठिअवन्दणवणमुणिअमलअसिहरक्खण्डम् ॥ पार्श्वपतितवनगजरुद्धमहानि
र्झरद्विधाप्रभावितसलिलं ॥ धरणिधरान्तरितस्थितचंदनवनज्ञातमलयशिखरखंडं ॥ एवंउत्पाटनक्षोभात्पार्श्वे
पार्श्वायमानेनवापतितेनवनगजेनरुद्धस्यमहानिर्झरस्यद्विधास्यद्विप्रकारेणप्रधावितसलिलंयत्रतंमहानि
र्झरस्याप्यवरोधकत्वेनगजस्यमहत्वमुक्तंचिररुद्धंजलमवरोधकप्रान्तद्वयेनवेगेनगच्छतीतिप्रतिधावितपदा
र्थः एवंधरणीधराणमन्तरितमतर्गतंसत्स्थितंयच्चंदनवनंतेनज्ञायमानमनुमीयमानमलयशिखरखंडंयत्रतसै
वचंदनाधिष्ठानत्वात्कस्यापिविविच्यग्रहणंनेतिघटनायानिःसंधित्वमुक्तं ॥ ७१ ॥ वीइपडिऊलाहअथोउव्वे १३९

ल्लिअदुमावलम्बन्तलअं ॥ विसमसिहरन्तरागअसंवेल्लिअसाअरंबंडेत्तिणलवहम् ॥ वीचीप्रतिकूलाहतस्तोको
द्वेल्लितहस्तोकोद्वेल्लितद्रुमावलंबमानलतं ॥ विषमशिखरान्तरागतसंवेल्लितसागरंघटपत्तिनलपथं ॥ एवंसमुद्र
स्यवीचिभिः प्रतिकूलंयथास्यात्तथाआहतास्ताडिताअतएवस्तोकमीषदुद्वेष्टितामूलादारभ्यशिखापर्यन्तंद्रुमेषु
लंबमानालतायत्रतं ॥ यद्वाताद्दशद्रुमएवलंबमानाविपर्यस्यावस्थितालतायत्रतं एवंविषमाणामन्तोन्नतस्थिता
नांशिखराणामंतरेणमध्यावकाशेनसंवेल्लितस्तोकजलनिर्गमाच्चंचलीभूतःसागरोयत्रतं ॥ ७२ ॥ अथसुवेल
दर्शनमाह ॥ वित्थरइसेउबंधोविहुव्वइधराहराहओसलिलणिही ॥ दिट्ठसुवेलुच्छंगरसइदिसाइण्णपडिर
वंकइसेण ॥ विस्तीर्यतेसेतुबंधोविधूयतेधराधराभिहतःसलिलनिधिः दृष्टसुवेलोत्संगरसतिदिक्कीर्णप्र
तिरवंकपिसैन्यं ॥ सेतुबंधस्वयमेवविस्तीर्यतेविस्तारंगच्छतिधराधरैरभिहतस्ताडितःसलिलनिधिःस्वयमेव
विधूयतेद्वयमपिक्रियाशैघ्र्यसूचनाकर्मकर्तरिएवंकपिसैन्यंदिक्कीर्णोव्याप्तःप्रतिरवोयस्यतथायथास्यादेवंर
सतिशब्दायतेअत्रहेतुमाह ॥ कीदृक् दृष्टःसुवेलस्यदक्षिणतीरस्थपर्वतस्योत्संगःक्रोडोयेनसन्निहितत्वात्तथा
चसेतोःसिद्धकल्पत्वात्साधनंदृमितिभावः ॥ ७३ ॥ अथाष्टभिःस्कंधकैःसमुद्रावस्थामाह ॥ दीसन्तिभिण्णसलिले
समुद्दमज्झम्मिसेउबंधक्कन्ता ॥ संभमकड्ढणलुग्गाभअचुण्णपलाअसेलपक्खद्धन्ता ॥ दृश्यन्तेभिन्नसलिलेसमुद्र
मध्येसेतुबंधाक्रान्ताःसंभ्रमकर्षणावरुग्णभयचूर्णपलायितशैलपक्षार्धान्ताः ॥ भिन्नसलिलेकपिनिक्षिप्त
शैलद्विधाभूतजलेसमुद्रस्यमध्येभयचूर्णस्यभयोद्विग्नस्यअतएवपलायितस्यपलायितुमारब्धस्यशैलस्यआ
दिकर्मणिक्तःपक्षैकदेशादृश्यन्तेकीदृशासेतुबंधेनाक्रांताःअतःसंभ्रमेणचूर्णाभावत्रासेनयदाकर्षणंतेनावरु
ग्णाःखंडितास्तथाचसेतुयंत्रणपरीहारायाकृष्यमाणःपक्षःखंडितइतिसेतोर्दृढत्वंव्यनक्तिभयपुणइत्तिपाठेभ
यपूर्णस्यर्थः ॥ ७४ ॥ अथसेतोर्विघटितस्थानसंघट्टनमाह ॥ महिहरपहरक्खोहिअसलिलपरिक्खअचिराअ
मूलमहिहरं ॥ थोअत्थोओसरिअबंधेत्तिपवंगमापुणोविणलवहं ॥ महीधरप्रहारक्षोभितसलिलपरिक्षतवि

शीर्णमूलम॰ हीधरं॥ स्तोकस्तोकमपस्तृतंबध्नन्तिप्लवंगमाःपुनरपिनलपथंप्लवंगमाःपुनरपिनलयथंबध्नंति
कीदृशंक्षेपणहेतुकेनमर्घेहीराणांप्रहारेणक्षोभितमान्दोलितयत्सलिलंतेनपक्षतंखंडितंअतएवविशीर्णंवि
घटितंमूलंयेषांतथाविधामहीधरायत्रतंनिक्षिप्तपर्वताभिहितजलाघातखंडितत्वेनमूलविघट्टनमित्यर्थः
सलिलपरिक्षतःस्तंतोविशीर्णामूलमहीधरायत्रेतिवाअतएवस्तोकस्तोकमपसृतंक्वचित्क्वचिद्विपर्यस्तंतथा
चयत्रविघटतेसेतुस्तत्रपर्वतान्तरंप्रक्षिप्यसंघटयंतीतिसेतोर्निर्झरत्वंकपीनामुद्योगशीलत्वंचदर्शितं॥७४॥
अथसेतोःसमासकल्पतामाह॥ जहजहअघासणोउअहिंजेऊणहोइसेउवहवरो॥ उछलइधराहिहअंदूरं
थोअन्तणेणतहतहसलिलंम्॥ यथायथाऽत्यासन्नउदधिंजित्वाभवतिसेतुपथवरः॥ उच्छलतिधराभिहतंदूरंस्तो
कत्वेनतथातथासलिलं॥उदधिजित्वाऽतिक्रम्यसेतुपथश्रेष्ठोयथायथाअत्यासन्नोऽपरतटसन्निहितोभवतित
थापूरयितव्यभागवर्त्तिसलिलंधरैःप्रक्षिप्यमाणैरभिहतंसत्स्तोकत्वेनदूरमुच्छलतिअत्यर्थंनतिर्यगूर्ध्वमुत्तिष्ट
तीत्यर्थःयथायथाल्पत्वंभवतितथातथाऽतिदूरमुत्थानमित्याशयः॥७५॥अथसेतोसमुद्रजलेननदीप्रवृत्ति
माह॥ महिहरपहरुछित्ताउअरिसेउस्सजेपडंन्तिखलन्ता॥ तेच्चिअसलिलुप्पीडाहोन्तिबलन्तविसमामहाणइ
सोत्ता॥ महीधरप्रहारोक्षिप्ताउपरिसे तोर्ये पततिस्खलंतः॥ तएवसलिलोत्पीडाभवन्तिबलद्विषमामहानदीस्रो
तांसि॥ महीधरप्रहारेणोक्षिप्ताऊर्ध्वंगमितायएवसलिलोत्पीडाःसेतोरुपरिपततितएवस्खलंतोवृक्षादिनाप्रति
हन्यमानाःसन्तोवलन्तोवक्रगतयोविषमान्नतोन्नताअतएवमहानदीनांस्रोतांसिभवंतितेषामपितदाकार
त्वादेतेनसेतोर्जलस्यचमहत्वमुक्तं॥७६॥अथसेतोरवशिष्टेभागेतिमिनासंधानमाह॥ दइसमन्तछाअंदर
मिलिअसुवेलमहिहरतडद्धन्तो॥ वीउंआसपहाविअतिमिपूरिअसाअरन्तरोसेउवहो॥ ददातिसमास्तछा १४०
यांदरमिलितसुवेलमहीधरतटार्द्धान्तः॥ द्वितीयावकाशप्रधावितततिमिपूरितसागरान्तरस्सेतुपथः॥ सेतुप
थःसमाप्तस्यसंपूर्णस्यछायांशोभांददातिसमाप्तइवजातइत्यर्थःकुतइत्यतआह॥ कीदृक्द्वितीयावकाशान्प्र

धावितेनततिमिनापूरितंसागरस्यपमन्तरंसुवेलेनसहान्तरालदेशोयस्यसागरस्यान्तरमवशिष्टभागोयत्रेतिवाअ
तएवइषन्मीलितसुवेलमहीधरस्यतटैकदेशोयत्रतथाअयंभावःएकपार्श्वादःपरपार्श्वेप्रतिसेतुकृतगमनप्र
तिबंधश्शंकयासत्वरंगच्छतातिमिनापूरितेसतिसेतुसुवेलान्तरालजलभागेसेतुःसमाप्तइतिसर्वेपिज्ञातवन्तइति
तिमीनांमहत्वमुक्तं॥७७॥अथशैलानांदृढीकरणमाह॥ जाहेसेउणिबद्धंधुणइणलोविसमसंठिअमहासेल
म्॥ ताहेचिरेणसअलोसअलक्कन्तवसुहोणिअन्तइउअही॥ यदासेतुंनिबद्धंधुनोतिनलोविषमसंस्थितमहा
शैलम्॥ तदचिरेणसकलःसकलाक्रांतवसुधानिवर्त्ततेउदधिः॥ सेतोनिबद्धंसहितमथचविषमसंस्थितंसमी
भूयलग्नमहाशैलंसुसज्जीकरणायनलोयदाधुनोतिइतस्ततश्चालयतितदासकलोप्युदधिःआक्रान्तासलि
लेनपूरितासकलावसुधायेनइत्थंभूतःसन्नचिरेणनिवर्त्ततेस्वस्थानमागच्छतिअयमर्थःदृढीकरणायविशक ४
लितपर्वतान्दोलनेसेतोरान्दोलनंतेनचसमुद्रस्यापीतिसेतुकृतायथातज्जलवृद्धिरासीद्यथातदुच्छलंतेन
सकलापिमहीप्लाव्यतइतिसमुद्रांदोलनक्षमान्दोलनशालितयाचिरेणतज्जलस्यनिवृत्तिरितिसेतोर्महत्वंतेन
चनलस्यमहाबलत्वमुक्तं॥७८॥अथसिंधोःस्वल्पावशिष्टत्वमाह॥ लहुइअपेसणहरिसिअकइणिवह
णिसुद्धसेलपहरबलन्तो॥ एइसोत्तोव्वसमुद्दोसेउसुवेलन्तरेमुहुत्तंव्यूढो॥ लघुकृतप्रेषणहर्षितकपिनिव
हनिपातितशैलप्रहारवल्गमानः॥ नदीस्रोतइवसमुद्रःसेतुसुवेलान्तरमुहूर्तंव्यूढः॥ लघूकृतमल्पावसिष्टंसमा
प्तकल्पत्वात्यत्प्रेषणमीश्वराज्ञातेनहर्षितेकपिनिवहेनिपातितस्यशैलस्यप्रहारेणवल्गमानोदोलायमानः
समुद्रःसेतोःसुवेलस्यचअंतरेमध्येनदीप्रवाहइवमुहूर्त्तंव्यूढउपचितःस्वल्पतयाशैलप्रहारोत्तंभितजल
त्वात्सेतोःसुवेलस्यचअंतरेमध्येनदीप्रवाहोयमितिसंदेहविषयीभूतइत्यर्थःमुहूर्तमितितदैवपूरितइति
भावा॥७९॥अथरावणक्षोभमाह॥ जहजहणिम्माविज्जइवाणरवसहे हिंसेउपंकमसिहरम्॥ तहतहद
हमुहहिअअंफाडिज्जइसाअरस्ससलिलेनसमं॥ यथायथानिर्मीयतेवाणरश्रेष्ठैःसेतुसंक्रमशिखरं॥ तथा

DR. BHAU DAJI MEMORIAL
डॉक्टर भाऊ दाजी इत्यस्य स्मारकम्

तथादशमुखहृदयंनिष्पाद्यतेसागरस्यसलिलेनसमं॥वानरश्रेष्ठैःसेतुरूपसंक्रमस्याशिखरम्॥मभागो
यथायथानिर्म्मीयतेनिष्पाद्यतेतथातथादशमुखस्यहृदयंसागरस्यजलेनसमपाद्यतेद्विधाक्रियतेतेरेवेत्यर्था
त्समुद्रेसेतुःकेनापिकर्तुंनपारितइतिक्षोभदितिभावःसागरजलमपिपाद्यतेरावणहृदयमपीतिसहोक्तिर
लंकारःहृदयस्यसमुद्रजलेनोपमानाद्धीरत्वंगभीरत्वंचसूचितं॥८०॥अथसेतोःसमाप्तिमाह॥पाआलमि
लिअमूलोअवोच्छिणपसरन्तसरिआसोत्तो॥ठाणठिउविपडिउमुहम्मिधरणिहरसंकमस्सस्कवेलो॥पाताल
मीलितमूलोऽव्यवच्छिन्नप्रसरत्सरित्स्रोताः॥स्थानस्थितोपिपतितोमुखेधरणीधरसंक्रमस्यस्कवेलः॥स्थानस्थि
तोपिवानरैरनानीतोपिस्कवेलोधरणीधरघटितसंक्रमस्यमुखेपतितःमुखमग्नतत्पूरकोगिरिःस्कवेलएवव
त्तइत्यर्थः॥कीदृक्पातालेमिलितंमूलंयस्येतिदृढत्वमुक्तंतथाचोत्पाटनेसतितादृक्दार्ढ्यंनस्यादित्यावश्यक
मुखदार्ढ्यायैवस्थापितइतिपूर्वमनुत्पाटनेबीजमितिभावःपुनःकीदृक्अव्यवच्छिन्नमखंडितंसत्प्रसरत्स
रित्स्रोतोयत्रतत्तथेतिसरसतयासेतुसंघट्टनसामग्नीदर्शिता॥८१॥अथसुग्रीवादीनांसेतुनिष्पत्तिज्ञा
नमाह॥मलउछंगगराणविरहुवइपासट्ठिएणवाणरवइणा॥कइकलअलेणणाउणिय्यछिमसेलपूरिउ
सेउवहो॥मलयोत्संगगतेनापिरघुपतिपार्श्वस्थितेनवानरपतिना॥कपिकलकलेनज्ञातोनिःपश्चिमशैलपू
रितःसेतुपथः॥मलयस्योत्संगःक्रोडःतद्गतेनतत्रस्थितेनापिरामनिकटवर्त्तिनावानरपतिनापश्चिमश्चरमस्त
द्विनिर्मुक्तेनचरमेणयद्वापश्चिमःशेषस्तद्रहितेसर्वशेषेणशैलेनपूरितोनिष्पादितःसेतुपथःकपीनांक
लकलेनसेतुसिद्धिजन्मानन्दकोलाहलेनज्ञातःकथमन्यथाएवंविधंशब्दाडंबरमाचरेयुरितिभावःअतएव
कपीनांचेष्टाकपिरेवजानातीतिप्राधान्येनसुग्रीवस्यज्ञानमुक्तंनतुरामस्यमलयस्थितेनेतिपरोक्षेप्याज्ञानिर्वा
हइतिप्रभुशक्तिःकोलाहलस्यसचतावद्दूरव्यापकत्वेकपीनामतिबलत्वमुक्तंयद्वातावत्दूरमपितत्सन्निहित
मेवपरंतुकपिभिर्व्यवधानाच्चक्षुरगम्यत्वेनशब्दानुमेयत्वमितिसुग्रीवस्यैवाकारमहत्वादितिभावः॥८२॥ ॥ ३४१

अथसमुद्रस्यद्विधाभावमाह॥आरंभन्तसअलोतिहाअविसमोदरुट्ठिअम्मिणलवहे॥हाइदुहाअसमत्तेसोच्चि
अअणोपुणोपुणोविसमुद्दो॥आरभ्यमाणेसकलःत्रिभागविषमोदरोत्थितेनलपथेभवतिद्विधाचसमाप्तेसए
वान्यःपुनःपुनरपिसमुद्रः॥सएवसमुद्रःपुनःपुनरप्यन्यएवसमुद्रोभवतीत्यध्याहारःतदेवाह॥आरभ्यमाणेनल
पथेसकलएवाखंडितएवेत्यर्थः॥इषदुत्थितेसतिसेतौत्रिभागेनविषमोऽवसिष्टभागत्रयेणविसदृशःप्रथ
मभागस्यसेतुछन्नत्वात्॥यद्वात्रिधाचविषमःसमाप्तेसतिद्विधापार्श्वयोःखंडाद्वयरूपस्तथाचसेतोर्महत्वमु
क्तं॥८३॥अथसेतोःसुवेलावष्टब्धत्वमाह॥मलउच्छंगपउत्तोचलन्तबाणरभरोणउसेउवहो॥गरुउति
ऊडगिरिणापल्हत्थन्तोदुमोदुमेणवधरिउ॥मलयोत्संगप्रवृत्तश्चलद्वानरभरावनतःसेतुपथः॥गुरुक
स्त्रिकूटगिरिणापर्यस्यमाणोद्रुमोद्रुमेणेवधृतः॥मलयोत्संगात्प्रवृत्तउपक्रान्तोअतएवगुरुकोमहान्सेतु
पथःपर्यस्यमानःसमुद्रवीचिभिरतस्ततःप्रेर्यमाणस्त्रिकूटगिरिणासुवेलेनधृतोवलंबितःनकेवलंवीचीभि
राकुलितःकिंतुचलतांवानराणांभरेणवनतोपितथाचमलयावष्टब्धोपिसुवेलावष्टंभेनस्थिरोभूदितिभावः
कइवयथापर्यस्यमानःपातिष्णुःद्रुमःद्रुमेणपार्श्ववर्त्तिनाध्रियतेमलयादारभ्यसुवेलपर्यंतंसेतुरभूदितिम
हावाक्यार्थःपर्यस्तंपतितेहतेइतिविश्वः॥८४॥अथसेतोरुत्तुंगतामाह॥दीसइसेउमहावहदोहाइअपुव्व
पच्छमदिसाभाअं॥अवणन्तोहअपासमज्झुक्खित्तविसमंणमंतंवणहं॥दृश्यतेसेतुमहापथद्विधायितपूर्व
पश्चिमदिग्भागं॥अपवृत्तोभयपार्श्वमध्योत्क्षिप्तविषमंनमदिवनभः॥सेतुरूपेणमहापथेनद्विधायितौद्वि
खंडीकृतौपूर्वपश्चिमरूपौदिग्भागौयत्रतथाभूतंनमोनमइवदृश्यतेअत्रोत्प्रेक्षाबीजरूपमाह॥किंभूतंमध्ये
उक्षिप्तमुत्थापितंअतएवविषमंविसदृश्यंसतअपवृत्तमवनतंउभयपार्श्वयस्यतादृशंतथाचयथाग्रहादि
कंमध्येस्तंभदत्वोत्थाप्यतेतदातदापार्श्वद्वयेननमतितथासेतोरपिदूरसमुन्नतत्वेनगगनमप्युन्तोन्नमाननमि
वावनतपूर्वपश्चिमपार्श्वेलक्षितमितिभावःरावणमरणकारणत्वेनमहापथपदोपन्यासःसेतुपदसमभि

व्याहारेणाविरुद्धार्थत्वाद्वा ॥ ८५ ॥ अथसेतोर्दैर्घ्यमाह ॥ मलअस्फवेलालग्गोपडिट्ठिओण्णहणिहम्मिसाअ
रसलिले ॥ उअअत्थमणणिराअोरविरहमग्गोव्वपाअडोसेउवहो ॥ मलयस्फवेलालग्नःपरिस्थितोनभोनि
भेसागरसलिले ॥ उदयास्तमननिरायतोरविरथमार्गइवप्रकटःसेतुपथः ॥ सेतुपथःप्रकटःप्रव्यक्तोदृश्य
तेकइवउदयाचलःअस्तमनमस्ताचलस्तावत्दूरंनिरायतोदीर्घोरविरथस्यमार्गइवकिंभूतःसेतुपथो
नलोनिभेसागरसलिलेमलयस्फवेलयोरालग्नःसन्परिस्थितःरविरथमार्गेनभसितिष्टतीतिश्यामत्वाद्वि
स्तीर्णत्वाच्चनभस्तुल्यत्वंसागरजलस्यमहत्वेनचमलयस्फवेलयोरुदयास्ताचलतुल्यत्वमुतएवदीर्घत्वेनसे
तोरविरथमार्गेणोपमा ॥ ८६ ॥ सेतोरवस्थितिप्रकारमाह ॥ दीसइपवणविहुव्वन्तसाअरोअरपरिट्ठिअम
हासिहरो ॥ विअडपसारिअवक्खोउप्पअमाणोव्वमहिहरोसेउवहो ॥ दृश्यतेपवनविधूयमानसागरोदर
परिस्थितमहाशिखरः ॥ विकटप्रसारितपक्षउत्प्लवमानइवमहीधरःसेतुपथः ॥ सेतुपथोदृश्यतेकिंभूतःपवने
नविधूयमानानिकल्लोलाभिघातेनचाल्यमानानिसागरोदरेपरिस्थितानिमहानिशिखराणियस्यतथाकइव
उत्प्लवमानउड्डयमानोमहीधरइवमहीधरः ॥ कीदृक्विकटौविकटयथास्यात्तथेतिवाप्रसारितोपक्षौयेनप
क्षिणःपक्षौप्रसार्योड्डयन्तइतिस्वभावस्तथाचतुरंगतयाक्षुभितपार्श्वद्वयसलिलदोलायमानपक्षसमानाकार
शिखरशालितयाचसेतोरुत्प्लवमानगिरिसाम्यंगिरेरपिसपक्षत्वादितिकेचित्वस्तुतस्तुउत्प्लवनंजलोप
रिसंचारविशेषस्तमाचरन्महीधरइवेतिव्याख्यातंअएवशिखराणांप्रतिबिंबद्वारासागरोदरपरिस्थितत्वप
र्यन्तधावनंपक्षिणःपयसिपक्षिणौप्रसार्यसंचार्यंचप्लवनंकुर्वतइतिविकटप्रसारितेत्युक्तंपयसिपार्श्वयो
।वीचिद्वारापवनचालितानांशिखरप्रतिबिंबानांपक्षेरूपमा ॥ ८७ ॥ अथसेतोसिद्धेरामरावणयोरवस्थामाह १४२
॥ अरइथोरूसासाणिद्दाणासोविवण्णदीदोव्वेल्लम् ॥ सेउम्मिरइज्जन्तेरामादोरावणम्मिसंकन्ताइं ॥ अरतिस्थू
लोच्छ्वासानिद्रानाशोविवर्णतादौर्बल्यम्सेतौरच्यमानेरामाद्रावणेसंक्रान्तानि ॥ अरतिःसीतालाभप्रतिबंधक

समुद्रसेतोरनुत्पत्त्याविषयान्तरेष्वप्रीतिःममापिप्रियारक्षोगृहेतिष्टतीतिमनःखेदात्स्थूलाउद्धतास्वाश्वासाःसीता
कथंवातिष्टतीकिंवाचेष्टतइत्यादितद्गतमनस्कत्वान्निद्रानाशःपरापहृतवधूकत्वेनलज्जयाविवर्णताकिंस्यात्कोवा
उपायःकर्तव्यइत्यादिचिंतावशाद्दौर्बल्यंएवंप्रकारेणैतानिसर्वाणिसेतावनध्यवसायेनप्रथमंरामेस्थितानिप
श्चात्सेतौरच्यमानेसतिसमुद्रेकृतप्रत्यूहेनरामागमनंनस्यादित्यध्यवसितत्वेनप्रागस्पृष्टेरावणेसंक्रांतानिसेतु
सिध्यानध्यवसितत्वात्तथाहिसमुद्रेसेतुःकेनापिनदत्तपूर्वइतिमनक्षोभादरतिःसमुद्रसेतुविदितसामर्थ्योरामः
कदाचिन्मामपिहन्यादितिशंकयास्थूलोच्छ्वासाःकिंस्यात्कोवाउपायःकर्तव्यइतिविचारेणनिद्रानाशः ॥ लंकापरि
खायमानसमुद्राकस्कंदोमयावारयितुंनपारितइतिजलयाविवर्णतात्रैलोक्यविजित्वरस्यममापिमानभंगःप्रस
क्तइतिचिंतावशाद्दौर्बल्यमित्यर्थः अत्रपूर्वरामादागंतुमुत्सुकान्ययेतानिसमुद्रकृतप्रतिबंधादनागतानिस
तिसेतौतद्रूपवर्त्मलाभात्तदानीपुनरागतानीत्युत्प्रेक्षाव्यंग्यारचितइतिवक्तव्येरच्यमानइतिवर्त्तमानार्थकशा
नच्प्रत्ययसंक्रान्तानीतिभूतार्थकक्तप्रत्ययाभ्यामागमनहेतुसेतुरचनस्यशीघ्रकारित्ताव्यज्यतेतदुक्तं कार्य
कारणयोर्यश्चपौर्वापर्यविपर्ययइतिकेचित्तुसेतोरसिद्धौसंदिग्धासीतालाभेरामेविप्रलंभरूपकामावस्थानु
भावत्वेनस्थितान्येतानिसतिसेतौसीतालाभेसाध्यवसायतमुपहायप्रागध्यवसितसीतालाभत्वेनास्पृष्टेपिरावणे
तदानींसीतालाभानध्यवसायाद्विप्रलंभरूपकामावस्थात्वेनैवसंक्रान्तानीत्यर्थमाहुस्तदुक्तंकंठाभरणेचक्षुःप्री
तिर्मनस्संगःसंकल्पोत्पत्तिसंततिः ॥ प्रलापोजागरःकार्श्यमतिर्विषयांतरेलज्जाविसर्जनंव्याधिरुन्मादोमूर्छनंत
थामरणंचेतिविज्ञेयाःक्रमेणप्रेमपुष्टयइतिसंक्रांतानीतिनपुंसकमनपुंसकेनैकवच्चान्यतरस्यामित्येकशेषान्नपुं
सकंबहुवचनंच ॥ ८८ ॥ सेतुंवर्णयति ॥ अहथोरतुंगविअडोणेउणिहणंसबंधवदहवअणम् ॥ दोहाइअस
लिलणिहीकअन्तहत्थोव्वपसरिओसेउवहो ॥ अथस्थूलतुंगविकटोनेतुंनिधनंसबंधवंदशवदनंद्विधायितस
लिलनिधिःकृतान्तहस्तइवप्रसृतःसेतुपथः ॥ अथतथाविधरावणावस्थानन्तरंद्विधायितोद्विशडीभूतःसलिल

निधि [illegible] र्यस्मादेवंभूतः सेतुपथः कृता
न्तोयमस्तस्यहसइवबाहुरिवप्रसृतः किमर्थंसबाधवद्दशवदनंनिधनंनाशंनेतुंमारयितुमित्यर्थः॥ अन्योपिह
स्तेनाकृष्यमार्य्यतइतिभावः किंभूतः स्थूलः पुष्टस्तुगश्चअतएवविकटोभयानकोयमहस्तोप्येवमेवेत्याशयः॥
८९॥ उत्प्रेक्षान्तरमाह॥ विसमेणपअइविसमंमहिहरगरुएणसमरसाहसगरुअम्॥ दूरत्थेणविभिण्णंसूले
णवसेउणादसाणणहिअअम्॥ विषमेणप्रकृतिविषमंमहीधरगुरुकेणसमरसाहसगुरुकं॥ दूरस्थेनापिभि
न्नंशूलेनेवसेतुनादशाननहृदयं॥ दूरस्थेनाप्यलग्नेनापिसेतुनाशूलेनेवदशाननस्यहृदयंभिन्नंयथाशूलेनभि
द्यतेतथैवेत्यर्थः कीदृशेनसेतुनाशूलेनवाविषमेनकाठिन्यप्रयुक्तेनएवंमहीधरैर्गुरुकेनतद्घटितत्वात् पक्षेमही
धरवद्गुरुकेनस्थूलत्वात् हृदयंकीदृक्प्रकृत्यास्वभावेनविषमंदुर्भेद्यत्वादेवसमरसाहसैर्गुरुकंअवालत्वात्तथा न
चविषमस्यविषमेनगुरुकस्यगुरुकेणभेदनंयुज्यतइतिभावः असंबद्धस्यापितापजनकत्वेनभेदकत्वमित्य
पिविरोधाभाससूचकः॥ ९०॥ सेतौकटकद्रुमानाह॥ दीसन्तिखुहिअसाअरसलिलोल्लिअकुसुमणिवहल
ग्गमहुअरा॥ सेउस्सपासमहिहरपअडन्तोघन्तकिसलआकडअदुमा॥ दृश्यन्तेक्षुभितसागरसलिलार्द्रितकु
सुमनिवहलग्नमधुकराः॥ सेतोःपार्श्वमहीधरप्रकट्यमानोद्वृत्तकिसलयाःकटकद्रुमाः॥ सेतोःकटकद्रुमादृश्यं
तेकीदृशाः क्षुभितःसेतुप्रतिरुद्धजलत्वेनकल्लोलरूपतयादोधूयमानोयस्सागरस्तस्यसलिलेनार्द्रीकृतेकुसु
मनिवहेरजःपंकसंगित्वात्सजलपक्षत्वाच्चलग्नामधुकरायेषुतेअतएवपार्श्वमहीधरेषुप्रकटीक्रियमाणानिस
न्तिउद्वृत्तानिभ्रमरभराद्विपरीत्यस्थितानिकिसलयानियेषामितिसेतोरुज्ज्वलत्वमुक्तं॥ ९१॥ सेतौस्फटिकप्रदेशाना
ह॥ थिमिओअहिसच्छाआकत्थविदीसन्तिमहीहरन्तरवडिआ॥ फलिहसिलाअलघडिआमज्झच्छिण्णव्वसेउबंधो
आसा॥ स्तिमितोदधिसच्छायाःकुत्रापिदृश्यन्तेमहीधरान्तरपतिताः॥ स्फटिकशिलातलघटिकामध्यच्छिन्नाइवसे १४३
तुबंधावकाशाः॥ कुत्रापिस्फटिकशिलातलेनघटिताःसेतुबंधावकाशास्तत्प्रदेशामध्यच्छिन्नाःसेतुमध्येस्फुटिता

इवदृश्यन्तेअत्रहेतुमाहकीदृशास्तिमितस्यनिश्चलस्योदधेःसच्छायाःसमानभासःस्वच्छत्वादतएवजलधिजलमिदं
स्फुटितसेतुमध्येनप्रसरतीतिबुद्धिरितिभावः नचजलधिजलस्यश्यामत्वेनकथंस्फटिकतौल्यमितिवाच्यंव्यव
च्छिन्नस्यतस्यापिश्वैत्यादित्याशयः॥ तदुक्तंविपत्तिविक्षिप्तानांकालिंदीजलानामित्यादिपुनःकिंभूतामहीधराणा
मन्तरेमध्येपतितास्तथाचश्यामानांमहीधराणांमतस्थितकतिपयस्फटिकभूभागस्यस्फुटितभ्रमजनकत्वमिति
तात्पर्यंवस्तुतस्तुपूर्वनिपातानियमात् अन्तपतितमहीधरायतोऽतएवश्यामतयास्तिमितोदधिसच्छायाःसामा
न्यतएवसेतुबंधप्रदेशाःकुत्राप्येकदेशेस्फटिकशिलातलघटिताःसन्तोमध्यस्फुटिताइवदृश्यन्तइत्यन्वयःस्वभाव
तःश्यामलेसेतौस्फटिकभुविजलनिर्गमभ्रमात्स्फुटितत्वमुत्प्रेक्षितमितिमदुन्नीतःपंथाः॥ ९२॥ सेतुगिरीणांचि
ह्नमाह॥ हिमपडणोत्थइआइंघडिआइंविणलवहम्मिणज्जन्तिफुडं॥ सिहराइंसिहरिवइणोमलअस्सअमलि
अचंदणसुअंधाइं॥ हिमपतनावस्थगितानिघटितान्यपिनलपथेज्ञायन्तेस्फुटं॥ शिखराणिशिखरिपतेर्मलयस्यच
मृदितचंदनसुगंधानि॥ शिखरिपतेर्हिमालयस्यचशिखराणिनलपथेघटितान्यपिसन्तिस्फुटंज्ञायन्तेअत्रहेतुमा
हकीदृशानिहिमपतनेनअवस्थगितानिछन्नानिएवंमृदितेनचंदनेनसुगंधानितथाचपूर्वेणहिमालयायत्वस्या
परेणमलयीयत्वस्यचानुमितिरितिनानापर्वतसंकीर्णत्वमुक्तं॥ ९३॥ सेतोरुपरिलहरीसंभारमाह॥ जाआफुडवि
त्थारागऊणिअत्तन्तजलरअविहुव्वन्ता॥ पवहग्गाहसमग्गासेउम्मिविसाअरस्सवेलामग्गा॥ जातास्फुटविस्तारा
गतापनिवर्त्तमानजलरयविधूयमानाः॥ प्रवाहसमग्नासेसेतावपिसागरस्यवेलामार्गाः॥ सागरस्यवेलाकल्लो
लरूपंजलंतन्मार्गाःसेतावपिस्फुटोविस्तारोयेषांतथाजाताः॥ सेतुप्लावकाइत्यर्थः॥ कीदृशाःगतस्यापिनिवर्तमान
स्यपरावर्तमानस्यजलस्यरयेणधूयमानाःतदभिघातेनदोलायमानाःजलअरइतिपाठेतथाभूतजलचरेण
करिमकरादिनाधूयमानाइत्यर्थः एवंप्रवाहोजलसिंहस्तेनसमग्नाःसंपूर्णाःकल्लोलेनसहतेषामपितत्रगमना
दितिभावः॥ यद्वावेलातटतद्रूपामार्गाइतिसेतुमपिसमुद्रस्यैकंतटमभूदित्यर्थः॥ ९४॥ सेतौसिंहावस्थामाह

सेलाइंछणपडिआसलिलोल्लिअगरुअकेसरभरक्कन्ता ॥ दीसन्ति दरुत्तिणासंकमपासल्लसंटिआ केसरिणो ॥ शै
लातिक्रमपतिताः सलिलार्द्रितगुरुककेसरभराक्रान्ताः ॥ दृश्यन्ते दरोत्तीर्णाः संक्रमपार्श्वसंस्थिताः केसरिणः ॥ केस
रिणो गिरिसिंहा दृश्यन्ते किंभूताः सेतुनियोजनकाले शैलस्यातिक्रमेणाकर्षणेन पतिताः जलाद् इत्यर्थात् अथ सलि
लेन आर्द्रितानाम् अत एव गुरुकाणां केसराणां भरेण गौरवेणाक्रान्ताः सन्तो दरोत्तीर्णाः किंचिदुत्थिताः अत एव संक्र
मपार्श्वे संस्थिताः आर्द्रकेसरगौरवेणोर्द्ध्वमारोढुमशक्यत्वादित्यतोऽपि सेतोरुच्चत्वमुक्तं ॥ ९५ ॥ अथ जलचरसंचा
रप्रतिरोधमाह ॥ पुव्वावरोअहिगआ दट्ठुं पुव्वावरोअहिसमुप्पण्णा ॥ सेउपडिसिद्धपसरा पुणो ण पेच्छन्ति कुलहरा
ईं जलअरा ॥ पूर्वापरोदधिगता द्रष्टुं पूर्वापरोदधिसमुत्पन्नाः ॥ सेतुप्रतिषिद्धप्रसराः पुनर्न पश्यन्ति कुलगृहा
णि जलचराः ॥ पूर्वश्चापरश्च उदधिः उदधेर्भागद्वयमित्यर्थः तदुत्पन्ना जलचरा जलसिंहादयः पुनरपि कुलगृहा
णि स्वोत्पत्तिगृहाणि न पश्यन्ति किंभूताः पूर्वापरोदधिगताः द्रष्टुं तद्भागाविल्यर्थात् ये पूर्वभागोत्पन्नास्ते पश्चिमभागंग
तास्तदुत्पन्ना अपि पूर्वभागम् अथ मध्यवर्त्तिना सेतुना प्रतिषिद्धप्रसरो गतागतं येषां तथाभूताः सन्तः स्वस्वस्थानं परा
वृत्य नागच्छन्तीत्यर्थः एतेन सेतोस्तलस्पर्शिताऽभंगुरता अच्छिद्रता तुंगता चावसूचिता ॥ ९६ ॥ सेतोर्मलयसुवे
लोभंगलध्वजाविस्याह ॥ दीसन्ति धाउअम्बा मारुअविहुअधवलोज्झरपडाआ ॥ सेउस्स तुंगसिहरा उह
अतलपरिट्ठिआ धअव्व महिहरा ॥ दृश्येते धात्वाताम्रौ मारुतविधुतधवलनिर्झरपटाकौ ॥ सेतोस्तुंगशिखरावु
भयतटपरिस्थितौ ध्वजाविव महीधरौ ॥ सेतोरुभयतटे उत्तरदक्षिणरूपे तत्र स्थितौ महीधरौ मलयसुवेलौ ध्वजा
विव ध्वजस्तंभाविव दृश्येते अन्यत्रापि सेतोरुभयप्रान्तयोर्ध्वजद्वयं दीयत इति समाचारः ध्वजतौल्यमाह कीदृशौ
तुंगशिखरयोस्तौ एवं धातुभिर्गैरिकैः ताम्रौ एवं मारुतेन विधुतान्यालिताधवलानि निर्झरा एव पटाकौ तौ यत्र
तौ ध्वजौ युच्यः कुंकुमालक्तकादिना ताम्रः पताकावांश्च भवतिइत्याशयः द्विवचनबहुवचननित्यत्वान्नानापर्व
ता एव नानाध्वजरूपाइति सर्वत्रैव बहुत्वमिति वा ॥ ९७ ॥ अथ सैन्यप्रयाणमाह ॥ अह णिम्मिअसेउवहं सेउवहब्भ

हिअथलपइण्णमहिहरं ॥ वलिअं चलन्तराहवहिअअअप्पिअरणूसहं कइसेण्णम् ॥ अथ निर्मितसेतुपथं से
तुपथाभ्यधिकस्थलप्रकीर्णमहीधरं ॥ चलितं चलद्राघवहृदयनिधीयमानरणसुखं कपिसैन्यं ॥ अथ सेतुसिद्धेरनन्त
रं कपिसैन्यं चलितं लंकामवरोद्धुमित्यर्थात् कीदृशं निर्मितः सेतुपथो येन तत् ॥ एवं सेतुपथादभ्यधिका उद्धृतास्त्रत
एव स्थले समुद्राद्बहिः प्रकीर्णास्त्यक्ता महीधरा येन तथा च ये ये यत्र यत्र शैला नाहरन्तः स्थितास्तेऽपि तत्र तत्रातानुक्षि
प्त्वा चलिता इत्यर्थ एवं चलतो राघवस्य हृदये निहितमर्पितं रणसुखं येनेति सेतुसिद्धिसमकालमेवाज्ञानपेक्ष संचा
रादुत्साहाधिक्यज्ञापनादिति वलतो रामस्य भाविन्यपि रणे तदानीं सुखोदयेन यात्रायां मनोविशुद्धिरुक्ता चलता
राघवेण निहितं रणसुखं येषामित्यपि केचित् ॥ ९८ ॥ अथ कपीनां समुद्रदर्शनमाह ॥ वेच्छन्ति अ वोलंता संकमदो
हाइअक्खविअविच्छारं ॥ वलआमुहणिट्ठविअकूलपासवोच्छिणपाणिअं मअरहरम् ॥ पश्यन्ति च व्यतिक्रामन्तः सं
क्रमद्विधायितक्षयितविस्तारं ॥ वडवामुखस्थापितैकपार्श्वव्यवच्छिन्नपानीयं मकरगृहं ॥ वानरा व्यतिक्रामन्तः सन्तो
मकरगृहं प्रेक्षन्ते च किंभूतं संक्रमेण सेतुना द्विधाकृतस्तत एव क्षपितोऽल्पीकृतो विस्तारो यस्य तं यद्दिशि दृश्यते तत्रै
वृक्षाद्रत्वप्रतिसंधानमपरभागादर्शनादिति सेतुविस्तार उक्तः एवं वडवामुखेन निष्ठापिते नाशित मत एवैकपा
र्श्वे व्यवच्छिन्नमल्पीकृतं पानीयं यत्र यद्दिशि वडवानलः पतितस्तत्र शोषणादिति सेतोरामूलत्वमुक्तं ॥ ९९ ॥ यात्रा
यां सिंधोराकूलमयुग्मकेनाह ॥ संखउलधवलकमले फुडमरगअहरिअवल्लभंगणिहाए ॥ विदुममिअकिसल
एउहअतडाबद्धसंकमम्मि णलवहे ॥ शंखकुलधवलकमले स्फुटमरकतहरितपत्रभंगनिघाते ॥ विद्रुममिलि
तकिसलये उभयतटाबद्धसंक्रमे नलपथे ॥ उभयं तटं व्याप्य आबद्धसंक्रमस्वरूपेण पथे वानरबलं संचरतीत्यु
त्तरस्कंधकेन संबधः कीदृशे शंखकुलबद्धलकमलानि यत्र द्वयोरपि सत्वात् एवं स्फुटमरकतवत् हरितपत्रभंगा
नां वृक्षसंबंधिनामित्यर्थात् निघातो यत्र एवं विद्रुमेषु मिलितानि किसलयानि यत्र तादृशी समानरूपत्वात्तथा समुद्री
यवस्तुभिः समं सेतुवस्तूनामतिमिश्रणे न समुद्रेण सह सेतोरैकात्म्यमुक्तं ॥ १०० ॥ संचरइ वाणरबलं णमइ

विसदन्तमहीहरोसेउवहो॥ओआहिअपाआलंसव्वथामगरुअंधरेइसमुद्दो॥ संचलतिवानरबलेनमहिशीर्यमा
णम हीधरःसेतुपथः॥अवगाहितपातालंसर्वस्थामगुरुकंधारयतिसमुद्रः॥एवंसतिविशीर्यमाणाःकपिचर
णसंक्रमेणक्वचित्त्रुट्यन्तोमहीधरायत्रतादृक्सेतुपथोनमतिउपरिभारबाहुल्यात्॥ अथावगाहितमाक्रांतपा
तालंयेनआमूलत्वात्कपियत्रणाद्वातथाविधमर्थात्सेतुपथंसमुद्रोधारयतिरक्षतिसर्वस्थाम्नासर्वबलेनगुरुक
मतिशयितमितिक्रियायाविशेषणंगौरवयुक्तमितिसेतुपथस्यवा॥ युग्मकं॥१०३॥सेतुसमुद्रयोरवस्थामाह॥सं
चालेइणिअम्बंधरेइउअरितरंगकरपभारं॥रवम्भम्मिवणगउव्वविअआबद्धोसेउसंकमम्मिसमुद्दो॥संचा
लयतिनितंबंधारयत्युपरितरंगकरप्राग्भारंस्तंभेवनगजइवआबद्धःसेतुत्रसंक्रमेसमुद्रः॥ सेतुसंक्रमेआ
बद्धःसमुद्रोनितंबंसेतोरेवमूलभागंसंचालयतिकल्लोलाद्यभिघातेनांदोलयतीत्यर्थः॥एवंउपरिसेतोरेवत
रंगरूपस्यकरस्यशुंडायाःप्राग्भारमेकदेशंधारयतितत्रापिकल्लोलसंचारात्॥कइववनगजइवयथास्तंभेआ
बद्धोवनगजोनितंभंस्तंभस्यैवचालयतिउत्पाटनायेत्यर्थात् एवंतदुपरिभंजनायकरंधारयतियद्वासमुद्र.
स्वस्यैवनितंबंमूलंचालयतितरंगकरमुपरिधारयतिसेतुनाजलावरोधेनमूलक्षोभान्तरंगोत्थानाच्चबद्धोव
नगजोपिनिर्गन्तुमस्थिरतयानितंबंचालयति॥तिशुंडामुत्थापयतीतिगजसमुद्रयोःकरतरंगयोःस्तंभसंक्रम
योस्तौल्यमितिसेतोरतिदार्ढ्यमुक्तं॥२॥अथपारगमनमाह॥उत्तिणाअपवंगासेलभसेवहणजणिअसेअतुसा
राधाउमयिलेकरअलेपासट्ठिअमहिहरोज्झरेसुधुवन्ता॥उत्तीर्णाश्चप्लवंगाःशैलभराद्वहनजनितस्वेदतुषाराः
धातुमलिनानिकरतलानिपार्श्वस्थितमहीधरनिर्झरेषुधावयन्तः॥प्लवंगाउत्तीर्णाश्चसागरमित्यर्थात् किंभू
ताःशैलानांभरस्समूहस्तउद्वहनेनजनिताःस्वेदानांतुषाराःशीकरायेषांतेनयावत्स्वेदानशान्तस्तावदेवपारं
गताइतिगमनेसत्वरताउत्साहश्चसूचितःएवंपर्वतोत्तोलनलग्नैर्धातुभिर्मलिनानिकरतलानिसेतोःपार्श्वस्थि
तमहीधराणांनिर्झरेषुधावयन्तःक्षालयन्तइतिवर्तमानशत्राक्षालनस्यपूर्वकालत्वमपिनापेक्षितवन्तइतिक्षि ३४५

प्रकारित्वमुक्तंशीकरेशीतलेचूर्णेतुषारोनिर्झरेहिमइतिविश्वः॥४॥अथस्कंधेलप्राप्तिमाह॥पत्ताअदहमुहाणि
अणंदनवणयाअवोइअवणुद्देसम्॥जलभरणिसणजलहरभरमोडिअवणलअंस्कंधेलुछंगं॥प्राप्ताश्चद
शमुखानीतनंदनवनपादपाचितवनोद्देशं॥जलभरनिषणजलधरमोटितवनलतंस्कंधेलोत्संगं॥नकेवलं
सागरमुत्तीर्णाअपितुस्कंधेलस्योत्संगंप्राप्ताश्चकीदृशंदशमुखेनानीतानांनंदनवनपादपानांपारिजातादीनामु
चितोयोग्योवनोद्देशस्तत्प्रदेशोयत्ररावणेनपारिजातादीनामत्रैवानीयरोपितत्वादित्यर्थः एवंजलस्यभरेणा
धिक्येननिषणानांसंचाराक्षमतयोपविष्टानांजलधराणांभरेणगौरवं॥नमोटिताःवनलतायत्रतंजलनिपीय
जलधरायत्रस्कंधेनोपविशंतीतिनिर्जनत्वंतेनचपरप्रवेशाभावस्तेनचरावणैश्वर्यन्तथापितत्प्राप्त्याकपीनाम
भयत्वमुक्तं॥५॥अथरावणराक्षसानामनादरमाह॥सोजणसमुत्तिणंअहिमविद्दविअविक्कमंकइसेणम्
जाउव्वरक्खसलोउव्वरक्खसणाहस्सपेलवाणत्तिअरो॥श्रुत्वासमुत्तीर्णमुदधिमविद्रावितविक्रमंकपिसैन्यं
जातोराक्षसलोकोराक्षसनाथस्यपेलवाज्ञप्तिकरः॥उदधिंसमुत्तीर्णंकपिसैन्यंअविद्रावितःप्रत्यूहाभावेनराव
णेनाप्यखंडितोविक्रमास्कंधेलातिक्रमरूपोयस्यतथाभूतंश्रुत्वाराक्षसलोकोराक्षसनाथस्यरावणस्यपेलवाकोम
लत्वेनभंगुरायाआज्ञप्तिराज्ञातत्करोजातइतियोजनारावणस्याज्ञापूर्वमभंगुरासीत्तदानींकपीनांसमुद्रलंघन
स्कंधेलातिक्रमाभ्यांभंगुराभूदितिप्रतापभंगउक्तः॥६॥अथरावणस्यकृतान्तवशतामाह॥जावअमहोअहिव
अडेआवासग्गाहणवावडंकइसेणम्॥तावकअन्तेनकओ रावणसीसम्मिवामहत्थप्फंसो॥ यावच्चमहोदधि
तटेआवासग्रहणव्यापृतंकपिसैन्यंतावत्कृतांतेनकृतोरावणशीर्षेवामहस्तस्पर्शः॥कपिसैन्यंयावन्महोदधेस्तटे
कूलेआवासग्रहणेउत्तारस्थानात्मीकरणेव्यापृतंतावदेवकृतान्तेनयमेनरावणशीर्षेवामहस्तेनस्पर्शःकृतस्तथा
चयत्रदक्षिणेनापिकरणेस्पर्शोनसंभावितस्तत्रवामेनकृतइतिरावणस्यहठादेवमृत्युर्व्यंजितः॥७॥अथराम
रावणयोःप्रतापमाह॥रामस्सरावणस्सअलोआलोअन्तरालणीसामणेवइत्तणिअत्तन्तेपाआरन्तरदुहाइअ

से॰बं॰का॰ म्भिपञ्चावे॥ रामस्यरावणस्यचलोकालोकान्तरालनिस्सामान्येवर्द्धमाननिवर्त्तमाने प्राकारान्तरद्विधायितेप्रता
३४६ पेरामेउत्तीर्णेसतिसमुद्रमित्यर्थात् रामस्यरावणस्यचप्रतापेद्वयंभूतेचसतिमथितस्यपर्वतक्षेपादिनाक्षोभित
स्यसागरस्यलक्ष्म्यासंपत्यासमंप्रसन्नाउज्ज्वलाशोभाकान्तिर्जातेतिद्वितीयस्कंधेकेनसहसंदानितकंवानराणामु
त्तीर्णत्वादवस्कंदाभावाद्वलादिसौष्ठवमपिजातंप्रसन्नतापिजातेत्यर्थः सहोक्तिरलंकारः प्रतापेकथंभूतेलोकालो
कस्यगिरिरन्तरालेमध्येनिस्सामान्येऽसाधारणेतुल्यइतियावत्॥ एवंसत्यपिप्राकारोलंकारणरूपस्तद्रूपेणान्त
रेणव्यवधानेनद्विधाकृतेप्रतापयोर्जगतितुल्यरूपत्वेपितदानींरामस्यप्रतापःप्राकाराद्बहिःसर्वव्यापीबभूवरा
वणस्यतुप्राकाराभ्यंतरएवस्थितइत्यर्थः नकेवलमेतावदेवअपितुवर्द्धमाननिवर्तमानेरामस्यवर्द्धमानेरावण
स्यतुनिवर्तमानइतियथासंख्यमन्वयः लोक्यतेऽनेनेतिलोकस्तेजः अलोकस्तिमिरन्तयोरन्तरालमध्यंतन्निर्विशे
षेतेजोन्तरालतुल्योरामस्यप्रतापःप्रकाशकत्वात्तिमिरान्तरालतुल्यस्तुरावणस्यम्लानत्वादित्यर्थः आत्यंतिकता
द्युत्यलाभार्थमन्तरालपर्यन्तधावनमत एवोत्तरविशेषणद्वयमपिसंम्यक्तेजसिवर्द्धमानेतिमिरंक्षीयतइति
प्राकाराद्बहिर्विषयेभूयसिविद्यमानोरामप्रतापोयथायथावर्द्धतेतथातथाल्पीयसिप्राकाराभ्यन्तरेवर्तमानोराव
णप्रतापःक्षीयतइतिवयं॥१०॥ जाआरुच्छीअसमसोहामहिअस्ससाअस्सपसणा॥ तिअसजणिआणुराआ
उत्तिणम्मिमअलंछणंमिवरामे॥ जातालक्ष्म्यासमंशोभामथितस्यसागरस्यप्रसन्ना॥ त्रिदशजनितानुरागउत्तीर्णे
मृगलाञ्छनइवरामेरामेकुस्मिन्निवमृगलांछनेचंद्रइवआल्हादकत्वात्॥ एवंत्रिदशानांजनितोनुरागःप्रेमयेन
तथाभूतइतिरामभागांकयोर्विशेषणंअथचमंदरेणमथितस्यसागरस्यचंद्रेउत्तीर्णेउक्षितेसतिलक्ष्म्याविष्णुप
त्न्यासमंशोभयतीतिशोभारूपाप्रसन्नामदिराअथवाशोभानाम्नीकाचिदप्सराःश्रेष्ठावारुणीचजातेतिध्वनिः॥ १ ३४६
८॥ १०८॥ सेतुनिष्पन्तिदशयारामदासप्रकाशितारामसेतुप्रदीपस्यपूर्णाभूदष्टमीशिखा॥ ८॥ अथास्वासे
केनैवस्कंवेलंवर्णयति॥ ॥अहपेछंतिपवंगासअलजअक्कमणवड्ढिअमहासिहरं॥ णिट्ठविअदाहिणदिसं

सेसदिसामुहप्पहाविअंवस्कवेलं॥ अथपश्यंतिप्लवंगासकलजगदाक्रमणवर्द्धितमहाशिखरं॥ निष्ठापितद
क्षिणदिशंशेषदिङ्मुखप्रधावितमिवस्कवेलं॥ अथस्कवेलप्राप्त्यनन्तरंप्लवंगाःस्कवेलंप्रेक्षंतेकोटिकोटिशःपर्वता
उत्पाटिताइदृशःकोपिनदृष्टःइतिविस्मयादितिभावः॥ किंभूतंसकलजगतामाक्रमणंयेभ्यस्तथाभूतानिवर्द्धितानि
महान्तिशिखराणियस्यत्रिकूटत्वादितिकेचित्सकलजगदाक्रमणायवर्द्धितानिमहान्तिशिखराणियस्येत्यपरेव
स्तुतस्तुआक्रमणइतिकर्तरिल्युट्तथाचसकलजगदाक्रमणकर्तामूलेनपातालस्यमध्येनमर्त्यस्यमस्तकेनस्वर्ग
स्याक्रमणात्तथाभूतश्चासौवर्द्धितमहाशिखरश्चेतिकर्मधारयःकश्चित्तुसअलजयक्कमणेत्यादिप्रकृतौसकल
स्यजयायक्रमणमतिक्रमस्तेनवर्द्धितानीत्यादिपूर्ववदित्याह एवंनिष्ठापितानाशितादक्षिणादिग्येनतिरोधायक
त्वात्एवंशेषायाःपूर्वाद्यादिशस्तन्मुखंनतत्संमुखीभूयप्रधावितंतत्तद्दिग्व्यापकनानाशिखरद्वाराकृतवेगमिवि
त्युत्प्रेक्षाव्यंजनयारोहपरिणाहाभ्यांविस्तारउक्तः॥१॥ पुनःस्कवेलस्यमहत्वमाह॥ भुवनस्सवमहुमहणंभुवन
भरजीणमहुमहस्सवसेसं॥ सेसस्सवसलिलणिहिंसरिआवइणोविसम्मिअव्वभरसहं॥ भुवनस्येवमधुमथनं
भुवनभरक्षीणमधुमथनस्येवशेषं॥ शेषस्येवसलिलनिधिंसरित्पतेर्विश्रमितव्यभरसहं॥ किंभूतंस्कवेलंस
रित्पतेःसमुद्रस्यविश्रमितव्यंविश्रामोभावेनतव्यस्तत्रभरसहंभारक्षमंसमुद्रस्याप्यऽबलंवनमित्यर्थः कस्यक
मिवभुवनस्यमधुमथनमिवविश्रमितव्यभरसहमितिसर्वत्रयोज्यतथाचयथात्रैलोक्यस्यविश्रामभरसहोवि
श्वंभरस्तस्यतदुदरवृत्तित्वात्एवंभुवनस्यभरेणधारणगौरवेनक्षीणस्यविष्णोरस्यमधुमथनस्यशेषमिवयथा
तथाभूतविश्वंभरस्यशेषनागस्तस्यतदंकशायित्वात् एवंशेषस्यसलिलनिधिमिवयथाशेषस्यसमुद्रस्तस्य
तदभ्यंतरवर्त्तित्वात्तथासरित्पर्वतेरयमपीतिविश्रामयोग्यतापरिमाणप्रकर्षेणभवतितथाचोत्तरोत्तरमुत्क
र्षालंकारेणभुवनापेक्षयविष्णोस्तदपेक्षयाशेषस्यतदपेक्षयासिंधोस्तदपेक्षयास्कवेलस्यपरिमाणप्रकर्ष
इतिभुवनविष्णुशेषव्यापकसमुद्राश्रयत्वेनसर्वाश्रयत्वमुक्तंस्कवेलस्यएवंचसर्वत्रस्कवेलक्रोडवर्तित्वमे

Dr. Bhau Daji Memorial

वसमुर्स्येतिकटाक्षितंभरसहत्वेनचकल्लोलाद्यभिघातानुपप्लुतत्वेनरूवेलस्यदार्ढ्यमर्पीतिमालोपमालंकारः
सहशक्तेक्षमायुक्तेतुल्यार्थेचसहाव्ययमितिकोषः॥ २॥ मूलस्याकाशवायूनामाधारतामाह॥ धरणिहरेअव्वस
हंउअहिभरेअद्यपव्वरुणइप्पवहं॥ णहमाअव्वसमत्थंरवआमारुअरुंभिअव्वजोग्गणिअवं॥ धरणीधर्तव्य
सहंउदधिभर्तव्यप्रवलनदीप्रवाहं॥ नमोमातव्यसमर्थंक्षयमारुतरोद्धव्ययोग्यनितंबं॥ एवंधरण्याधर्त्तव्येधार
णेसहंसक्तंअवष्टंभभूतत्वादेतेनभूम्युत्सेधव्यापकमूलकमुक्तंसर्वत्रभावितव्यः एवंउदधेर्भर्त्तव्येपूरणेप्रब
लाःसमर्थानदीप्रवाहायस्येतिसमुद्रसमानैकेकबहुनदीप्रवाहाधारत्वेनसमुद्रादप्यधिकपरिमाणत्वेनवि
स्तीर्णत्वंदीर्घत्वंचएवंनभसोमातव्येमानेसमर्थमितिनभोपेक्षयाप्यतिमहत्वेनमूलोत्सेधस्यपूर्वापरायतिरूप
दैर्घ्यस्यतिर्यक्दक्षिणोत्तरदिग्व्यापिनानाशिखरत्वेनविस्तारस्यचप्रकर्षःएवंक्षयमारुतानांरोद्धव्यमवरोधनं
संचारप्रतिरोधइतियावत्तत्रयोग्यःसमर्थोनितंबोयस्यतंएतेनमूलमूर्ध्नोरप्यतिमहत्वंदार्ढ्यंविस्तारोदैर्घ्यं
चसूचितंप्रलयेमिलितानामूनपंचाशतोथनिलानांनितंबएवपर्याप्तिरित्यपियद्वाकर्मणितव्यस्तेनधरणीरूपे
धर्तव्येसहं एवंउदधिरूपेभर्त्तव्यइत्यन्यत्राप्यूह्यं॥ ३॥ ऊर्द्धाधस्तिर्यग्व्याप्तिमाह॥ दूरपरिपेल्लिअदिसंदूरोणामि
असमत्थपाअलअलं॥ दूरअनुक्खित्तणहंणवरकरासत्थापाअवप्फलकुसुमं॥ दूरंपरिप्रेरितदिशंदूरावेनामित
समस्तपातालतलं दूरतोरोक्षिप्तनभःकेवलंकरासन्नपादपफलकुसुमं॥ एवंदूरंपरिप्रेरितादिशोयेनतिर्य
क्सानुभिर्व्यापनात् एवंदूरमवनामितमधःपातितंपातालतलंयेनतद्व्यापकमूलत्वात् एवंअतिदूरमुत्क्षि
प्तमुत्तोलितंनभोयेनगगनातिक्रामकमस्तकत्वात्केवलंयेनतद्व्यापकमूलत्वात् एवंअतिदूरमुत्क्षिप्तमुत्तोलितंन
भोयेनगगनातिक्रामकमस्तकत्वात्केवलंकरासन्नानिहस्तप्राप्यानिपादपानांफलकुसुमानियत्रतमितिसमृद्ध
वृक्षव्याप्तत्वंअत्रैवदूरत्वव्यभिचारइतिपरोपकृतिरूपगुणशालित्वं॥ ४॥ पुनर्मूलमौलिप्रकर्षमाह॥ पास १४७
ल्लग्गअसरिअंअमुक्कपाआलसाअरजलुच्छंगं॥ आइवराहुव्वत्तणरवणपडिउद्धट्ठिअंवमइणिवेढं॥ पार्श्वा

गतसरित्तंअमुक्तपातालसागरजलोत्संगं॥ आदिवराहोद्वर्त्तनक्षणपतितोर्ध्वस्थितमिवमेदिनीवेष्टं॥ ए
वंपार्श्वेनागताःसरितोयस्यतंउपरिमेघादीनामपिसंचाराभावात्सरितामप्यऽभावइतिएवअमुक्तोऽत्यक्तः
पातालसागरजलस्यउत्संगोयेनतदन्तर्वर्तिमूलकत्वात् एवंकमिवपूर्वपातवैपरीत्येनपतितस्यादिवराह
स्योद्वर्त्तनक्षणेऊर्ध्वीभूयस्थितंमेदिनीवेष्टंभूम्येकदेशमिवयदाआदिवराहःपातालपंकेपतितःसन्पा
र्श्वपरिवर्त्तनंकृतवान्तदातत्पार्श्वप्रेरितःपंकोत्करोगगनमभिव्याप्यस्थितःसएवेदानीमपिसरिदुच्छिस
मर्पुक्तप्रसरज्जलःपातालस्थसमुद्रजलस्पर्शात्पिंडीभूयरूवेलत्वेनप्रतिभासतइतितद्देहमहत्वानुसारे
णपंकोत्करमहत्वंरूवेलस्यैवमहत्वंगमयतिसर्वमिदंसोत्प्रेक्षिकमितिभावः यद्वाआदिवराहस्योद्वर्त्तन
मितस्ततःपरिभ्रमणंतत्क्षणेपतितंसत्ऊर्ध्वव्याप्यस्थितंदन्तस्थमेदिन्यावेष्टंमंडलमिवेत्यर्थः॥ उद्वर्तनक्ष
णवलित्वाऊर्ध्वेस्थितंमेदिनीवेष्टमिवेत्यपिकश्चित्॥ ५॥ मूलदार्ढ्यमाह॥ पाआलभरिअमूलंवज्जमुहाओड
णद्धविअणिक्कंपं॥ आलाणक्खंभमिवरूरहत्थिकंधणिहसहंमसिणिअपासं॥ पातालभृतमूलवज्रमुखा
कोलनस्थापितनिःकंपं॥ आलानस्तंभमिवरूरहस्तिस्कंधनिघर्षमसृणितपार्श्वं॥ भृतंव्याप्तंपातालतलंयेनए
तादृशंपातालेभृतंपूर्णंवामूलंयस्येतिस्थौल्यदैर्घ्यंचमूलस्योक्तं एवंवज्रमुखेनयदाकोलनंमृत्तिकामभिहत्य
दृढीकरणंतेनस्थापितमतएवनिष्कंपएवंरूरहस्तिनामैरावतादीनांस्कंधस्यनिघर्षणेनकंडूयमानादिव्यापारे
णमसृणितंस्निग्धंनतुनग्नेपार्श्वेयस्यतमितितेषांस्कंधस्यपार्श्वएवपर्याप्तिस्तेभ्योप्युच्चत्वंदृढत्वंचोक्तंअत्रोत्प्रेक्ष
तेतेषामालानस्तंभमिवबंधनस्तुबद्धव्यापेक्षयाप्रायःतुगएवभवतीतिभावस्तंभमितिकिंभूतमुक्तविशेषण
त्रयविशिष्टं॥ ६॥ पुनर्मूलमौलिप्रकर्षमाह॥ विमलिअरसाअलेणविसिसहरवइणाअदिट्ठमूलछेअम् अ
प्पत्ततुंगसिहरंतिहुअणहरणपरिवड्ढिएणविहरिणा॥ विमर्दितरसातलेनापिविषधरपतिनाऽदृष्टमूलछेदं
अप्राप्ततुंगशिखरंत्रिभुवनभरणपरिवर्द्धितेनापिहरिणा॥ विमर्दितमितस्ततस्संचारेणघृष्टंरसातलंयेन

तादशेनापिविषधराणांपत्याशेषेणादृष्टोमूलच्छेदोमूलभागोयस्यतमितिपातालादप्यधोवर्त्तिमूलप्रदेशमित्य
र्थः द्विसहस्रदृष्टिनादूरादपिद्रष्टुंनशक्यतेकिंपुनःस्पृष्टुमितिभावः एवंत्रिभुवनस्यभरणंस्वदेहेनपूरणंहरण
माक्रमणंवातदर्थंपरिवर्द्धितेनापिहरिणात्रिविक्रमेणाप्राप्तानिहस्तेनाप्यस्पृष्टानितुंगानिशिखराणियस्यस्येन
छिन्नमस्तकमित्यर्थः मूलच्छंगमितिपाठेमूलोत्संगमित्यर्थः ॥ ७ ॥पुनर्दार्ढ्यमेवाह॥ विच्छूढोअहिसलिलंक
डुअभमन्तभुवअइन्दविणावेढं॥पासट्ठिएणरइणाकरेहिंहरिणव्वमंदरंउवऊढं॥विक्षिप्तादधिसलिलंकटक
भ्रमद्भुजगेंद्रदत्तावेष्टं॥ पार्श्वस्थितेनरविणाकरैर्हरिणेवमंदरमुपगूढं॥एवंविक्षिप्ततटेनप्रतिहत्यपरावर्त्ति
तउदधिसलिलंयेनतुंएतेनतीरवृत्तित्वेपिसमुद्रेणाप्यनुन्मूलनीयएवंकटकेप्रभ्रमताभुजगेंद्रेणवासुकिनाद
त्तमावेष्टमालिंगनयस्मिंतथाचतस्यापिकटकएवसंचारोनतुशिरःपर्यन्तप्राप्तिरितिभावः एवंपार्श्वस्थितेन
नतूपरिगतुंशक्तेनरविणाकरैस्तेजोभिरुपगूढमालिंगितंअन्यत्रापिकरैरुपगूढंसमुद्रमथनसमयेस
माश्लिष्टंमंदरमिवतमपिक्षिप्तंविक्षिप्तस्वभ्रमणेनपरितश्चालितंउदधिसलिलंयेन एवंकटकेभ्रमतानेत्रीभूतेनशेषेनदत्तमावेष्टवलयीभावोयत्रेत्युपमा॥ ८ ॥पुनर्मूलमौलिमहत्वमाह॥सेससिररत्नघडि
अमणिमूलुज्जोअहअरसाअलतिमिरं॥विसमुद्धसिहरसंकडपणट्ठरविमंडलंधआरिअगअणं॥शेषशि
रोरत्नघट्टितमणिमूलोद्योतहतरसातलतिमिरं॥विषमोर्ध्वशिखरसंकटप्रनष्टरविमंडलांधकारितगगनं
॥एवंशेषस्यशिरोरत्नैर्घटितानांघृष्टानांमणीनामर्थात्स्वमूलस्थानांमूलोद्योतैर्घृष्टाधोभागतेजोभिर्हतंरसा
तलस्यतिमिरंयेनतंयदायदाशेषस्यशिरसिस्कवेलमूलस्थित्याभारोभवतितदातदाशिरस्संचारेणतद्घर्षःस
हैतन्मनीनांसघट्टोजायतइतिमूलमहत्वंमणीनामाकरत्वंचोक्तंएवंविषमाणांवक्रकोटरादिमतामूर्द्धानामु
च्चानांशिखराणांसंकटेषुमिथोन्तरालेषुप्रनष्टेनाकस्मान्तिरोभूतेनरविमंडलेनांधकारितंगगनंयेनतथाचपा १४८
र्श्वएवसूर्यस्यसंचारोनतुमौलावितिकदाचित्कोटरप्रविष्टत्वेनांधकारइत्युच्चत्वमितिभावः॥ ९ ॥पुनरुच्चतामे

वाह॥ससिबिंबपासणिहसणकसणिशिलाभित्तिपसरिअमअलेहं॥ जोण्हाजलपव्वालिअविसमुम्हाअन्तमुनि
अरविरहमग्गं॥शशिबिंबपार्श्वनिघर्षणकृष्णशिलाभित्तिप्रसृतामृतलेखं॥ज्योत्स्नाजलप्रप्लावितविषमोष्मायमाणज्ञातरविरथमार्गं॥एवंशशिबिंबस्यपार्श्वेनिघर्षणेनकृष्णकृष्णशिलाभित्तिषुप्रसृताअमृतलेखायत्रतं
शशिबिंबस्यमृदुत्वेनपार्श्वशिलाभित्तेःकठिनतयामिथस्संबंधादमृतक्षरणमितिभावः॥एवंज्योत्स्नाचंद्रकांतिः
सैवजलंहिमरूपत्वात्तेनप्रप्लावितःपूरितोऽतएवविषमंयथास्यात्तथाऊष्मायमाणोबाष्पायमाणस्ततएवज्ञा
तोरविरथस्यमार्गोयत्ररविरथस्यवह्निमयत्वेनदंधीयमानस्तन्मार्गोविधुकरस्वरूपजलसंबंधोगतबाष्परूप
धूमेनानुमीयतइत्यर्थः नकेवलंरविरवाधस्तादस्यसंचरतिकिंतुतद्द्विगुणोपरिवर्तीचंद्रोपीतिभावः लतादिव्यव
हितत्वेनतन्मार्गस्यक्वचित्क्वचित्ज्योत्स्नासंबंधेनोष्मायमानत्वमितिसूचयितुंविषमपदोपादानं॥ १० ॥पुनस्त
देवाह॥सिहरालीणमिअंकविरलट्ठिअगहिअसलिलजलअक्खंडम्॥ खुडिउव्वूढमुणालंणिसाकविस
माहिअकद्दमंवसुरगअम्॥ शिखरालीनमृगांकविरलस्थितगृहीतसलिलजलदखंडं॥खंडितोव्यूढमृणालं
निशाकविषमहितकर्द्दममिवसुरगजं॥एवंनिशासुज्योत्स्नोत्कर्षकालेपिशिखरेआलीनसंबद्धोमृगांकोयत्र
तं॥एवंविरलस्थिताक्वचित्क्वचिदवस्थितागृहीतसलिलाजलदखंडायत्रजलपूर्णाअपिजलदाव्याप्तुनक्षमंतइ
तिमहत्वमस्यविरलस्थितपदेनसूचितं॥कमिवसुरगजमिवकिंभूतखंडित्तंसेतुउद्व्यूढमुपरिधृतंमृणालंयेन
तं॥एवंविषमंयथास्यात्तथाहितःक्वचित्क्वचिन्नतनावारोपितःकर्द्दमोयेनगजस्वाभाव्यात्तथाचभूधारणक्षम
तासूचनायवुंगत्वादिनासुरगजसुवेलयोःश्वैत्येनपिसंचंद्रयोःश्यामतयाचकर्द्दमजलदयोःसाम्यमित्युप
मा॥ ११ ॥नदीसंबंधमाह॥हरिअवणराइपिसुणिअदूरअरालोअसिहरसरिआमग्गम्॥पवणुक्खुडिअकि
लामिअमिअंकपुट्ठिपडिऊससत्तकिसलअं॥हरितवनराजिपिशुनितदूरतरालोकशिखरसरिन्मार्गं॥पव
नोत्खंडितक्लाम्यन्मृगांकपृष्टपर्युषसक्तकिसलयं॥एवंहरितपावनराज्यापिशुनितज्ञापितोदूरतरादालोको

^ लभ्यमानयाज्ञायतेनदीनांसंचारपथोयमितिभावः। एतेनरमणीयत्वमुक्तं एवंपवनेनोत्खंडितानि अतःक्लाम्यंतिशुष्यंतिसंतिमृगांकस्यपृष्ठेसंबंध्द इत्यर्थात्। प्रत्यक्षसंतिप्रत्यज्जीवंतिकिशलय १

दर्शनंयस्यतथाभूतःशिखरसरितांमार्गोयत्रतंनित्यंजलसंपर्केणहरिद्वर्णतृणवृक्षादिलेखयातटयोर्दूरादेवैवं
तियत्रचंद्रपृष्ठेत्रुटित्वापतितानांकिशलयानांसुधासंबंधेनपुनर्नवंकांत्युदायादितिभावः एवंनचंद्रपृष्ठस्यापरमा
गरूपस्यपतितंयत्रसबंधादुच्चैस्त्वमुक्तं॥ त्रुटितपत्राणांशोषणंचिरेणभवतीतिविदूरपतनसूचनेनाप्युच्चतरत्वं
॥१२॥ सिंधौतत्प्रतिबिंबमाह॥ दूरुद्धाइअसिमैहरंजणिहिजलदिट्ठविअडपाअडपडिमम्॥ उप्पाआसणिपह
अंउद्धप्फुडिअपडिएक्कपासंवठिअम्॥ दूरोद्धावितशिखरंजलनिधिजलदृष्टविकटप्रकटप्रतिमं॥ उत्पाताश
निप्रहतंउर्ध्वस्फुटितपतितैकपार्श्वमिवस्थितं॥ एवंदूरंव्याप्यउद्धावितानिदिशिदिशिगंतुंकृतवेगानीवशिख
राणियस्यतंएवंजलनिधेर्जलेदृष्टाविकटामहतीप्रकटाव्यक्ताप्रतिमाप्रतिबिंबोयस्यअत्रोत्प्रेक्षतेउत्पाताशन्याव
ज्रेणप्रहतंताडितंअतएवउर्ध्वंउपरिस्फुटितंसत्पतितंएकंपार्श्वंयस्यतमिवस्थितंसमुद्रव्यापीतत्प्रतिबिंबःस्फुटि
ततदेकदेशत्वेनोत्प्रेक्षितइतिबिंबस्यतदेकदेशभ्रमविषयतयामहत्वंसुबलस्यैवमहत्वंज्ञापयतिसुवेलैकदेश
त्रुटिरुत्पाताद्देवभवतीतितथोक्तंवज्रमुपर्येवपततीत्यूर्ध्वपद॥१३॥ गुरुत्वमाह॥ गुरुभरसेसाहिप्फणवारंवार
पडिरुद्धमूलुच्छंगं॥ खअमारुउक्खआणिअतुंगअडावडिअभिणसेसमहिहरं॥ गुरुभरशेषाहिफणवारंवारप्र
तिरुद्धमूलोत्संगं॥ क्षयमारुतोत्खातानीततुंगतटापतितभिन्नशेषमहीधरं॥ गुरुणाभरेणगौरवेणगुरुभरे
णवाशेषाहिनाफणैर्वारंवारंप्रतिरुद्धोभूतोमूलोत्संगोयस्यतंतथाचफणसहस्रेपियदीयैःकियद्भिर्धारणंतदा
तदितरैषांविश्रामोयदानुविश्रांतैरमीभिर्धारणंतदातेषांविश्रामइतियत्नेनभियासंभूयसर्वैःकदापिनधार्य
तीतिवारंवारपदद्योत्यंगौरवाधिक्यं॥ एवंक्षयमारुतेनुत्खाताउत्पाटिताअथानीताउद्धूयप्रापितास्तदनुतुंगतटआ
पतिताःसंतोभिन्नाश्चूर्णाःशेषामहीधरायत्रेत्यपरिप्रांतयोरप्यवकाशाभावादत्रैवतेषांपातइतिविस्तीर्णता
तुंगतादृढतादृढमूलताप्रलयेप्यनुच्छेद्यताचसूचिता॥१४॥ स्वापदसंकीर्णतामाह॥ गहिअजलमेहपेल्लिअणि
व्वाअन्तणिहुअट्ठिअमहामहिसं॥ णिहअगअकुंभलोहिअसिलाअलोसत्तबद्धमुत्तावडलं॥ गृहीतज

लमेघप्रेरितनिर्वाप्यमाणनिभृतस्थितमहामहिषं॥ निहतगजकुंभलोहितशिलातलावशक्तबद्धमुक्तापटलम्
गृहीतजलैर्मेघैःप्रेरिताःसंतोनिर्वाप्यमाणाःसुखीक्रियमाणाअतएवनिभृतंस्थिताःसुखवशान्निस्पंदस्थिता
महांतोमहिषायत्रतंउपरिसूरकरतप्तेषुमहिषेषुसजातीयबुध्यामेघैर्यथायथायत्नेनलक्षणंप्रेरणंक्रियतेत
थातथामहिषाणांशैत्यलाभादधिकनिश्चलत्वमितिनिभृतपदद्योत्यंवस्तुएवंनिहतानांगजानांकुंभयोर्लोहि
तेनहेतुनाशिलातलेषुअवशक्तानिसंनिबद्धानिदृढलग्नानिमुक्तापटलानियत्रतथाचसिंहविदारितगजकुं
भस्थलमुक्ताःशिलासुपतित्वासन्निहितसूरकरशोषणादतिस्त्यानीभूतरुधिरतयादृढीभूयस्थिताइत्यर्थइति
राक्षसैरप्यगम्यकतिपयदेशत्वंसूचितं॥१५॥ पुनस्तदेवाह॥ लवणजलसीहराहअदरुग्गमत्तदुममुद्ध
पल्लवराअं॥ सीहरवतीअपत्थिअणिउंचिएक्कचलणट्ठिउक्कण्णमअम्॥ लवणजलशीकराहतदरोद्गमद्रुम
मुग्धपल्लवरागं॥ सिंहरवभीतप्रस्थितनिकुंचितैकचरणस्थितोत्कर्णमृगं॥ एवंलवणरूपंजलमर्थात्समुद्रस्य
तच्छीकरैराहतःस्पृष्टोऽतएवदरोद्गमःईषदन्यरूपतांगच्छन्किंचिदेवप्रादुर्भवन्नितिवाद्रुमस्यमुग्धानांनूतनानांपल्ल
वानांरागोलौहित्यंयत्रतंएवंसिंहरवेणभीताःसंतःप्रस्थिताःपलायिताअथनिकुंचितमीषद्भुग्नितमेकंचरणंयेषांत
थाभूताःसंतःस्थिताउच्छ्रितामौलित्वादुत्कर्णाउच्छ्रितकर्णामृगायत्रतं॥ पुरतोपितत्प्रतिरवशंकावशात्पश्चादवलो
कनायवेतिभावः॥ जातिरलंकारः॥१६॥ पुनर्विस्तारमाह॥ कडअपरिपेल्लिआणरइअरपाअडिअकंदराभरि
आणं॥ अब्भन्तरट्ठिआणंपरिहुपासपरिसंठिअबदिसाणं॥ कटकप्रतिप्रेरितानांरविकरप्रकटितकंदराभृता
नांआभ्यंतरस्थितानामपरपार्श्वपरिस्थितमिवदिशां॥ एवंदिशांअपरपार्श्वेपरिसंस्थितमिवदक्षिणादिगनुपलं
भादितिभावः किंभूतानांकटकेनप्रतिप्रेरितानांउत्तरदिगभिमुखीकृत्यायसारितानांएवंरविकरैःप्रकटितासुकं
दरासुभृतानांव्याप्तानामतएवाभ्यंतरेस्थितानांतथाचयथायथादक्षिणाशाताकटकव्यद्भिस्तथातथोत्तराशाप्रतिप्रे
रितादिशोदैवादुत्तराशावर्ज्यंकैककंदरासुपर्यवसन्नास्तथैवरवेरपितत्रप्रतिष्ठस्यतेजोभिरतिप्रकटंलक्ष्यन्त

से॰बं॰का इतिव्यंजनांगम्यंसर्वमिदमौत्प्रेक्षिकंविस्तीर्णतांगमयतिवयंतुदिशामपरपार्श्वेपरितोबहिःस्थितमिव॥ किंभूतानांपूर्व
१९० निपातानियमात्प्रतिप्रेरितंकटकंयाभिस्तासांप्रतिप्रेरितकटकानामित्यर्थः तथाचदशभिरपिदिग्भिःकंदरायांप्रवि
श्यकटकंप्रतिप्रेरितमतोदशदिक्प्रांतेषुब्रह्मांडगोलवन्तस्थितंदिशस्तुकंदरायामेवपर्याप्तास्तदुक्तमभ्यन्तरस्थि
तानामितिब्रूमः॥१७॥उदात्ततामाह॥रत्नअणीरुक्दूरुगात्रअसिहरअनत्तअंरूकदुणिसणमअखंडिअसिहरअन
त्तअं॥ कुविअरामभिणोअहिहदसरणोल्लिअसिहरलग्गससिमंडलणीसरणोल्लिअं॥रजनीषुदूरोद्गतशिखर
रत्नैस्ततंरुक्खनिषणमृगखंडितशिखरतृणान्तं कुपितरामभिन्नोदधिहृदशरणोदितंशिखरलग्नशशिमंडल
निःशरणार्द्रितं॥ कीदृशंरजनीषुदूरादुद्गतैःशिखराणांरत्नैस्ततंव्याप्तउद्गतमितिशिखरविशेषणंवा॥यद्वादू
दूरोद्गतशिखररत्नांतंदूरोद्गताशिखातेजोधारायेषांतथाभूतानिरत्नानिअन्तेस्वरूपेप्रान्तेवायस्यतेतैरत्नैरतंमनो
हरमितिवायद्वादूरोद्गतशिखरानन्तकंदूरमुद्गतैरुत्थितैःशिखरैरनन्तमपर्य्यवसानंकमस्तकंयस्यअस्कन्ध
त्वात्॥ अथवादूरोद्गतशिखराण्येवअनन्तानिबहुसंख्यानिकानिमस्तकानियस्यशिखराणामेवमस्तकरूपत्वादि
त्यर्थः॥अतःपरंरजनीष्विति चरमपदान्वितत्वमेवतथासतिव्याख्यादूरोद्गतशिखरगणान्तददूरोद्गतशिखर
गणस्यान्तमवसानंद्यतिखंडयतिअनवसानशिखरगणमित्यर्थः शिखरगणेअन्तमनोहरंकंजलंयस्ये
तिवायद्वादूरोद्गतशिखरगणान्तकंचनेणपप्रत्ययेनदूरोद्गतशिखरख्यातोऽन्तःस्वरूपंयस्यस्वार्थेकन्‌यद्वाशि
खरजनान्तगेशिखरैःजनस्यलोकस्यान्तगंपर्यंतगामिनंयद्वादूरोद्गतशिखरचरणान्तगंदूरोद्गतशिखाशिरो
यत्रतादृशीयारचनासृष्टिस्तस्याअंतगंपारगामिनंतयाअंतकंमनोहरमितिवाप्रशंसायांकन्॥ एवंमुखनिष
ण्णैःमृगैःखंडितःखर्वितःशिखरतृणानामान्तोऽन्तयत्रतंअथवामृगैःखंडितानिशिखराण्यग्राणियस्यतथाभू
तानितृणान्यन्तेप्रान्तेयस्येत्यर्थः यद्वामृगखंडितशिखरतृणततंविस्तीर्णमित्यर्थः॥यद्वारुक्खनिषण्णमृगङ्गशि १९०
धरजनान्तकंमुखनिषण्णमृगखंडिनोऽसिधराःखड्गपाणयोजनाएवअन्तकोयमोयत्रमृगयायामृगनाशक

त्वादित्यर्थः॥एवंकुपितरामस्यभिन्नोदधिस्ताडितसमुद्रोहृदीयःशरस्तेननोदितंप्रेरितंरामशरःसमुद्रंभित्वातत्र
लग्नइत्यर्थस्तथाचतादृशशराभेद्यत्वेनसारवत्वंसूचितं॥यद्वाकुपितरामेणभिन्नोयउदधिःसएवहृदःशरस्तेननो
दितंशराभिघातोद्वृत्तसमुद्रेणाक्रान्तत्वात्॥एवंशिखरेलग्नस्यशशिमंडलस्यनिस्सरणेनशिखरवेधतःसुधा
क्षरणेनआर्द्रीकृतंसजलमित्यर्थः॥ यद्वाशिखरेलग्नानांशशिमंडलानांचंद्रकान्तचक्रवालानांनिःसरणेन
जलनिस्पंदेनार्द्रीकृतंरजनीष्वित्यनुवृत्तेर्निशिचंद्रकान्ताजलंस्रवंतीतिभावः अन्तःप्रान्तेन्तिकेनशेस्वरूपेपिम
नोहरइतिविग्रहः॥ उपगलितकं॥१८॥अस्कन्धतामाह॥दूरोवाहिअमूलरविअरवोलीणसिहरणट्ठालोअं॥अद्ध
त्थमिआआमजहेअउअहिसलिलेतहेअणहअले॥ दूरापवाहितमूलंरविकरव्यतिक्रांतशिखरनष्टालोकं॥
अर्द्धास्तमितायामयथैवोदधिसलिलेतथैवनभस्तले॥एवंदूरंव्याप्यापवाहितमधःप्रापितंमूलंयेनतपातालातिक्रा
न्तमूलमित्यर्थः॥ एवंरविकरव्यतिक्रान्तेषुतदगम्येषुशिखरेषुनष्टआलोकस्तेजोयत्रतेनतेषुतमोमयं॥आलोको
दर्शनंवायत्रतेनतावदवच्छेदेनादृश्यं॥आलोकोदर्शनोद्योताविस्मरः॥अतएवयथैवोदधिसलिलेमूलावच्छेदनार्द्धा
स्तमितायाममर्द्धे॥ स्तमितानष्टइवायामोदैर्घ्यंयस्यतथातथैवनभस्तलेपिशिखरावच्छेदेनेत्यर्थः॥एकत्रसलिल
छन्नतयापरत्रतेजोविरहेणादृश्यत्वात्तथाचमध्यावच्छेदेनैवदृश्यमितिभावः॥१९॥चंदनवत्तामाह॥पवणंदोलि
अअचन्दणसंघट्टुट्ठिअसुअंधिधूमुप्पीडम्॥ दरपीओअहिगुरुइअसेसद्धन्तजलआवलंबिअसिहरं॥पव
नान्दोलितचंदनसंघट्टोत्थितसुगंधिधूमोत्पीडं॥दरपीतोदधिगुरुकितशेषार्द्धान्तजलदावलंबितशिखरं॥एवं
पवनेनान्दोलितानांचन्दनानांमिथःसंघट्टेनोत्थितःसुगंधिधूमस्योत्पीडोयत्रतं॥ धूपमयमित्यर्थः॥ एवंदरपीताद
धिरीषत्पीतसमुद्रजलोतएवगुरुकितःशेषार्द्धान्तःपश्चाद्भागोयस्यतथाविधेनजलदेनावलंबितशिखरंयस्यज
लपानहेतुकगुरुत्वनिबंधनपतनभयादितिभावः॥२०॥नानावस्तुसंबंधमाह॥तलपडिहअसाअरहेउद्धोज्झर
विकुअसीहरोसाअरअं॥गहमालामेलिअअंसिहरट्ठिअचन्दमंडलामेलिअअं॥तलप्रतिहतसागरकऊर्ध्व

निर्ज्झरविधुतसिंहरोषाकरं॥ ग्गहमालामेलितकंशिखरंस्थितचंद्रमंडलापीडं॥ एवंतलेनमूलेनप्रतिहतमवष्टब्धंसा
गरस्यकंजलंयेनतंएवंऊर्ध्ववर्तिनानिर्जरेणविधुतस्यनिपत्याहिभिहतस्यसिंहस्यरोषाणामाकरमुत्पत्तिस्थानंउ
परितःकेनताडितोस्मीत्याशयादेवंग्गहाणांनक्षत्राणांमालयामेलितंश्रोत्रकंशिरोयस्यतावदुच्चत्वादेवंशिखरस्थि
तंचंद्रमंडलमापीडःपुष्पमालायस्यतं॥२१॥ पुनस्तदेवाह॥ससिपुरओपसरिअअंकुहरेसुणिवाअणिप्पअपस
रिअअम्॥ मणिमअपासुत्तमअंकअणसिलासीणसुहिअपासुत्तमअम्॥ शशिपुरतःप्रसृतकंकुहरेषुनिप्रकं
पसरित्कं मणिमयपार्श्वोत्तमंकंकनकशिलासीनसुखितप्रसुप्तमृगं॥ एवंशशिनःपुरतःप्रसृतंगतंकंमस्तकंयस्य
तंचंद्रमंडलातिक्रांतमौलिमित्यर्थः॥ एवंकुहरेषुनिम्नप्रदेशेषुनिर्वातेनपवनाभावेननिःप्रकंपाःसरितोयत्रस्वर्थे
कन्निष्प्रकंपसरितोकंजलंयत्रेतिवा एवंमणिमयेनपार्श्वेनोत्तमंरमणीयंयद्वामणिमयपार्श्वोत्तमतंमणिमयेन
पार्श्वेनोत्तमतायस्ययद्वामणिमयपार्श्वोत्तमस्कंमणिमयपार्श्वेनतेजोमयतयाउत्सारितंतमोयस्मात्यद्वामणिम
यपार्श्वोत्तमदंमणिमयपार्श्वेनउत्तोदत्तोमदोऽहंकारोयस्येआत्तइतिवदुत्पूर्वादुत्तइत्यपियद्वामणिमयपार्श्वोत्तम
कंमणिमयपार्श्वेणोत्तमस्तद्धतिसंपर्कान्तेजस्वीकःसूर्योयत्रपार्श्वएवतस्यभ्रमणमित्यर्थः अथवंमणिमयपार्श्वेनोत्त
मंकंशिरोयस्यजलंसुखंवायत्रेत्यर्थः॥ एवंकनकशिलासुआसीनाअतएवसुखिताःसुहितावासंतःप्रसुप्तामृगाय
त्रतं॥ २२॥श्वापदपदतामाह॥तिणुकिवन्तपरम्मुहवलन्तसद्दूलगहिअगअकुंभअडं॥ विपलासुत्तभुअगमजल
धाराआरणिगअमणिच्छअम्॥ भिन्नोक्षिप्तपराङ्मुखवलमानशार्दूलगृहीतगजकुंभतटं॥ बिलप्रसुप्तभुजंगम
जलधाराकारनिर्गतमणिच्छायम्॥ एवंभित्रैर्दंताभ्यांविद्धैरर्थात्पृष्ठेऽथोत्क्षिप्तैरूर्ध्वमुत्तोलितैस्ततस्तत्रैवपराङ्मुख
पश्चादभिमुखंवलमानैर्वक्रीभवद्भिःशार्दूलैर्गृहीतानिगजानांकुंभतटानियत्रतंदंतविद्धपृष्ठान्तलितशार्दूलकव
लितकरिकुंभस्थलमित्यर्थः॥एवंविलेषुविवरेषुप्रसुप्तानांभुजंगमानांजलधरानिर्गताविलेभ्योबहिर्भूताफणावर्तिनां १५३
मणीनांछायारुचयोयत्रपर्वतविवरादकस्माद्दंडाकारंजलमुत्तिष्ठतीतिफणामणितेजोवीचिरपितथैवप्रतिभास

तइतिभावः॥२३॥पुनस्तदेवाह॥अद्धिअसमुद्दसीहरदुप्परिमसणिहकंठअंतमणिअडम्॥ णहलग्गमोत्तिअ
फलगअसीसारूढणीहरन्तमइंदम्॥ अस्थितसमुद्रशीकरदुःपरिमर्षनिभकंटकायमानमणितटं॥ नखलग्न
मौक्तिकफलगजशीर्षारूढनिर्ह्रदन्मृगेंद्रं॥अस्थितैरनवरतैश्चंचलैर्वासमुद्रशीकरैर्दुःष्परिमर्षनिभंदुस्पर्श
नीयतुल्यंकंटकायमानंदंतुरत्वात्॥कंटकप्रायंमणिमयंतटंयत्रततथाचमणिमयप्रदेशस्यतुंगतयाशीकरैरप्य
गम्यत्वमितिप्रतिपादयितुंकंटकसमानीकारत्वेनशीकरकर्तृकमस्पृश्यत्वमुत्प्रेक्षितंयद्वातेषांशीकराणांदुःपरि
मर्षःकंटकप्रधानोवृक्षविशेषस्तन्निभंकंटकायमानमित्याद्यर्थस्तेनाप्यस्पृश्यत्वमेवोक्तंएवंनखेषुलग्नानिमौ
क्तिकफलानियेषांतथाभूतानांगजानांशीर्षेष्वारूढानिर्ह्लादशालिनोमृगेंद्रायत्रतत्॥२४॥स्वर्गसाम्यमाह॥ओवट्ट
कोमलाइंवहमाणंमेहविमलिअविमुक्काइं॥कप्पलआवरुआइअपवणुद्धुअधवलअंसुआइवणाइं॥अववर्षको
मलानिवहमानंमेघविमर्दितविमुक्तानिकल्पलताशोषितपवनोद्धुतध्वजपटांशुकानिवनानि॥एवंवनानिवहमा
नंकिंभूतानिमेघेनविमर्दितानिअथत्यक्तान्यतएवअववर्षेणत्वकोष्ट्याकोमलानिजलसंपर्कात्॥एवंकल्पलतायां
शोषितानिपवनोद्धूतानिधवलान्यंशुकानियेषुवृक्षाद्रीकृतत्वात्कल्पलतासुवस्त्राणामपिसत्वात्धअवडंसुआणी
तिपाठेध्वजपटरूपाण्यंशुकानियेष्वित्यर्थःवस्त्रलतादोशोष्यतइतिसमाचारः॥२५॥नदीप्रचारमाह॥आरूढोअ
हिसलिलेअद्धुक्खअसरस्सविसमपासद्दुमे॥कुसुमभरिणवहन्तंफलिहअडुत्ताणपत्थिएणइसोत्ते॥आरूढो
दधिसलिलानिअर्द्धोत्खातसरसविषमपार्श्वद्रुमाणि॥कुसुमभृतानिवहन्तंस्फटिकतटोत्तानप्रस्थितानिनदीश्रो
तांसिएवंनदीश्रोतांसि॥वहन्तंकीदृशानिआरूढानिप्रविष्टान्यतिक्रान्तानिवाउदधिसलिलानियेषुयैर्वाउभयेषा
मुभयत्रप्राचुर्व्यादुभयथापिनदीनांप्रकर्षःप्रथमेमहत्वात्द्वितीयेऽभिभावकत्वात्एवंअर्द्धउत्खाताजलवेगापनी
तभूमितयाउत्पाटितास्सरसाजलसंपर्कात्विषमामृत्तिकापगमाद्दीर्घद्रुग्नाःपार्श्वद्रुमायेषुतानिअतएवतद्रु
माणामेवकुसुमैर्भृतानिपूर्णानिएवंस्फटिकतटउत्तानान्यगभीराणिसतिप्रस्थितानिप्रसृतानित्तत्रखातकर्तुम

शक्तत्वादितिभावः॥ अगाधमतलस्पर्शमुत्तानंतद्विपर्ययैः॥२६॥पुनरत्तुंगतामाह॥ रविरहतुरंगमाणंवाउद्धुअ
सिहरणिज्झरेहिंधवन्तम्॥ थोओहुप्पगहाईलालाफेणलवगब्भिआइंमुहाइं॥ रविरथतुंगमाणांवातोद्धूतशिख
रनिर्झरैर्धावयंतं॥ स्तोकार्द्रप्रग्रहाणिलालाफेनलवगर्भितानिमुखानि॥ एवंरविरथतुरंगमाणामुखानिवातेनोद्धू
तैशिखरनिर्झरैर्धावयंतंकीदृशानिस्तोकमल्पंआर्द्रप्रग्रहाणिप्रग्रहोवल्गा एवंलालामुखनिष्ठ्यूतःक्लेदःतद्रूपस्य
फेनस्यलवाःखंडागर्भितांअंतस्थितायेषुतानिअन्यत्राप्यश्वानांसंचारश्रमेसतिफेनिलानिमुखानिक्षालितंतइतिध्व
निः॥२७॥तदेवाह॥ दीहरसिहरालग्गंपज्जलिओसहिसिहाहअंवहमाणं॥ पाअडिअमअकलंकणिसाकक
ज्जलइओअरंवमिअंकं॥ दीर्घशिखरालग्नप्रज्वलितौषधिशिखाहतंवहमानं॥ प्रकटितमृगकलंकंनिशाकज्ज
लितोदरमिवमृगांकं॥ एवंदीर्घेषुशिखरेषुआलग्नंमृगांकंनिशासुप्रज्वलितानामोषधीनांशिखाभिराहतंस्पृष्टं
वहमानं॥ किंभूतंप्रकटितोमृगरूपःकलंकोयत्रतं उत्प्रेक्षतेकज्जलितंसकज्जलमुदरंयस्यतथाभूतमिवअन्यद
पिशरावादिकंनिशिलोष्टत्रयेदीपोपरिनिधीयमानंसकज्जलंभवतीतिध्वनिःप्रकृतेमहत्वादेकदेवत्रिकूटस्यत
स्यत्रिधापिलोष्टप्रायेषुशृंगेषुलग्नोविधुःशरावस्तदधोवृत्तिरोषधीदीपःकलंकःकज्जलमितिभावः॥२८॥नदीना
माधिक्यमाह॥ ऊद्धरिअधरणिविअडंआइवराहहिअवंकदूरोआढम्॥ णइसोत्तेहिंभरन्तंखअरइसन्ताव
सोसिअंमअरहरं॥ उद्धृतधरणीविकटंआदिवराहहृतपंकदूरावगाढं॥ नदीस्रोतोभिर्भरमाणंक्षयरविसंतापशो
षितंमकरगृहम्॥ मकरगृहंनदीनांस्रोतोभिर्भरमाणंपूरयंतंतत्रबीजमाहकिंभूतंउद्धृतयाधरण्याविकटंतुच्छंतथा
चभूमिप्रमाणाधिकगर्भमित्यर्थःअथादिवराहेणहृतैःपंकैर्दूरंव्याप्यअवगाढंगभीरंएवंक्षयकालीनरविभिःसं
तापाच्छोषितंअयंभावः॥ प्रथमंवराहेणभूमिराकृष्टातदनुशृंगलेपात्पंकमाहितंपश्चात्प्रलयरविकरैःस्थितमपिज
लंशोषितमिथ~~वराहेणभूमिराकृष्टातदनुशृंगलेपात्पंक~~मतिरूक्षसमुद्रपूरणक्षमनदीप्रवाहशालितयाविस्ता
रायामतुंगत्वान्युक्तानि॥२९॥कंदरागांभीर्यमाह॥ अणाआगमनदिसंपुरओपडिसद्दभेसिअणिअन्तमए॥ विव

रभरिएवहन्तंउक्कणिअवणगएमइन्दणिणाए॥ अज्ञातागमनदिशःपुरतप्रतिशब्दभीषितनिवृत्तमृगान्॥ वि
वरभृतान्वहंतंउत्कर्णितवनगजान्मृगेन्द्रनिनादान्॥ एवंमृगेंद्रस्यनिनादान्वहंतंकिंभूतान्अज्ञाताआगमनदि
ग्येषांतान्एतेनशब्दादीनांसर्वत्रगांभीर्यमतोल्पमुक्तं॥ एवंपुरतःप्रतिशब्देनभीषिताअतएवनिवृत्तामृगायैस्तान्
तथाचविशिष्यशब्दानामुत्पत्तिदिग्भानाभावात्यत्रैवयेवस्थितास्ततःसंमुखमेवतेपलायितुमारब्धाअथप्रतिख
स्यापिसर्वत्रतोल्येनपुनस्ततोपिपरावृत्ताइतिभावःएवंविवरेकंदरादौभृतान्व्याप्तानथवाविवरैर्भृतान्धृतानत्यक्ता
नितियावत्तेनचिरकालव्यापकत्वमुक्तंएवंउत्कर्णितावनगजायैस्त्रासादितिभावः॥ ३०॥पुनस्तदेवाह॥ तामरसर
आअम्बसरसस्सूयन्तमहुरसरआअम्बं॥ गहिआमिसहरिअइअवेलाणिलसीहरोल्लवणहरिअइअम्॥ तामरस
रजआताम्रंसरसःश्रूयमाणमधुरस्वरकादंबं॥ गृहीतामिषहरिदयितंवेलानिलशीकरार्द्रवनहरितायितं
एवंसरस्सुतामरसरजोभिराताम्रं एवंतत्रैवश्रूयमाणाःसंतोमधुराहृद्यास्वरायेषांतथाभूताःकादंबाहंसायत्र
तं॥ एवंगृहीतंआमिषंमांसंयथातथाभूताहरेर्दयितासिंहीयत्रयद्वागृहीतारीणांरुक्मीवादीनांदयितंप्रीतिविषयो
दयापात्रंवायद्वागृहीताआमिषवल्लोभनीयाआमिषरूपादरीवाहरेरामस्यदयितासीतायत्रेत्यर्थः॥ एवंवेलानिल
शीकरेणार्द्रैर्वनैर्हरितायितंआर्द्रेषुवनेषुहरिताभिर्दूर्वाभिर्व्याप्तंवितंव्याप्तमितिविश्रामयोग्यतोक्ताआमिषंरूद
राकाररूपादिविषयेपिवेतिविश्वः॥ ३१॥ पुनःकंदरागांभीर्यमाह॥ मिलिअसमुद्दद्धन्तेपीअडणहमंडलेपद्धु
त्तदसदिसे॥ उइअत्थमिअदिणअरेभुवणविहाएधकन्दरेवहमाणम्॥ मिलितसमुद्रार्धान्प्रगटनभोमं
डलान्प्रभूतदशादिशः॥ उदितास्तमितदिनकरान्भुवनविभागानिवकंदरान्वहमानं॥ एवंकंदरान्वहमानं
कीदृशान्मिलिताःप्रविष्टाःसमुद्रस्यैकदेशायेषुतान्एतेनविकटत्वेनपातालरूपत्वमुक्तंवस्तुतस्तुमिलितःसमु
द्रोयत्रतादृशोर्द्धान्तएकदेशोयेषामितिसमुद्राद्दर्ध्याधिक्यमुक्तं॥ एवंप्रकटंनभोमंडलंयेषुएतेनोर्द्धलोकरूपत्वंए
वंप्रभूताःपर्याप्तादशादिशोयेषुअनेनमर्त्यरूपत्वंएवंउदितःसन्नस्तमितोदिनकरोयेषुअनेनविस्तीर्णत्वंइद

Dr. BHAU DAJI MEMORIAL

मेवोत्प्रेक्षते॥ भुवनानांविभागोयेषुतानिवभुवनविभागस्वरूपानिचेतिवात्रिभुवनस्यतत्रैवपर्याप्तिरितिभावः यद्वा
भुवनविभागानिवेतिसहोयमायथास्वशरीरेणावष्टभ्यत्रिभुवनंबहमानंतथाकंदरानपीत्यर्थः भुवनविघाता
निवेत्यपिकश्चितविघातोविस्तारस्समूहोवाभुवनविभागेपिविशेषणानांयोजनापूर्ववत्॥ ३२॥ निर्झरस्वादमा
ह॥ उच्छलिउअहिभरिएथोत्र्प्रथोत्र्प्रोसरन्तणिबूढजले॥ आइमहुरेवहन्तंपुरत्र्प्रोकुन्तलवणेसिहरणीसन्दे॥ उच्छलि
तोदधिभृतान्स्तोकस्तोकापसरन्निव्यूढजलान्॥ आदिमधुरान्वहंतंपुरतोभिमुखलवणान्शिखरनिस्यंदान्॥
एवंशिखराणांनिस्यंदान्निर्झरान्वहन्तंकीदृशान् उच्छलितेनोदधिनाभृतान्तज्जलेनपूर्णान् एवंस्तोकं २ अपसरं
तिशिखरेभ्योबहिर्भवंतिपश्चान्निर्व्यूढानिसंभूयोपचितानि जलानियेषुतान्अल्पमल्पानिसृत्यप्रविशत्वादित्यर्थः
अतएवादोमूलभागेनिर्झररूपत्वेनमधुरान् पुरतोभिविमुखेग्रेलवणसमुद्रत्वोक्षरयोगादथवानदशायामादौमधु
रान्निर्झरबाहुल्यात्पश्चात्लवणानब्धिजलसंपर्कादेवेत्यर्थः॥ ३३॥ रत्नछविमाह॥ रत्र्प्रणछविकुव्वंतंवलन्तसेस
पिहुलप्फणविहुव्वन्तं॥ सरपरिपड्ढिअकमलंकडअलआलग्गसूररहत्र्प्रक्कमलम्॥ रत्नछविघातव्यमानंबलछे
षपृथुलफणविधूयमानं॥ सरःपरिवर्द्धितकमलंकटकलतालग्नसूररथचक्रमलम्॥ एवंरत्नछविभिर्धातव्यमानंप्र
क्षाल्यमानं॥ एवंएतद्गौरवादेववलद्भिर्वक्रीभवद्भिःशेषस्यपृथुलैःफणैर्विधूयमानपदाफणसंचारःतदाकेवलंकंप
मानमित्यर्थः॥ सरसिपरिवर्द्धितानिकमलानियत्रतं॥ कटकवर्तिलतासक्तलग्नःसूररथचक्रस्यमलोमालिन्यंयत्रच
क्रात्मलःश्यामिकायत्रनिघर्षणादितिवाकटकएवरविसंचरतीतिभावः॥ ३४॥ मणितटमाह॥ णहणीलेवह
माणंउम्हाहअमहिसमग्गिओवरणवहे॥ पासपसरन्तकिरणेमअतण्हावेढिएसरेयमणिअडे॥ नभोनीलान्व
हमानंऊष्माहतमहिषमार्गितावतरणपथान्॥ पार्श्वप्रसरत्किरणान्मृगतृष्णावेष्टितात्सरांसीवमणितटान् ३६३
एवंमणितटान्वहन्तंकिंभूतान्नभोवन्नीलान्नभसिनीलानितिवानीलसमयत्वादेवऊष्मणा॥ अजपेनाहतैर्म
हिषैर्मार्गिताअधिष्टाअवतरणायाधःप्रदेशगमनायपंथानोयत्रएवंपार्श्वेषुप्रसरन्तःकिरणाःकांतयोयेषांएवं

मृगतृष्णयावेष्टितान्व्याप्तान्मृगातृष्णामारीचिकारिरांसिवेतिसाधर्म्योपमासहोपमावातान्यपिवहमानमित्य
र्थस्तानिकीदृशानिनभोवत्रीलोकर्षात्॥ द्वितीयपदेजलपानमज्जनार्थंमहिषावतरणंतृतीयपदेकिरणासूर्यस्यच
तुर्थपदेमृगैस्तृष्णयाजलपानस्पृहयावेष्टितानीतिसर्वेल्कीबंसरोविशेषणमितिविशेषः॥ ३६॥ अनुरूपसंगति
माह॥ गअमलिअतमालवणंसीहमुहोरुद्धरअअसिहरक्खंडं॥ महिसाहैकसणसिलंअणुरूअट्ठाणमुक्कवण
अरसरोसं॥ गजमृदिततमालवणंसिंहमुखावरुद्धरजतशिखरखंडं॥ महिषाहतकृष्णशिलंअनुरूपस्थानमुक्तव
नचररोषं॥ गजैर्मृदितानितमालवनानियत्रसिंहमुखेनावरुद्धानिकवलीकृतानिरजतशिखराणांखंडानियत्रम
हिषैराहताःशृंगाभ्यामित्यर्थात्कृष्णशिलायत्रअतएवानुरूपस्थानेमुक्तःप्रसृतोवनचराणांरोषोयत्रत्वंसमान
वर्णत्वेनगजसिंहमहिषरूपजातीयभ्रमात्प्रातिपक्ष्येणतेषांतत्तदुपमर्दकव्यापारोदयादितिसत्वबहुलत्वमुक्तं॥
गजमुक्तावत्तामाह॥ केसरिचलणतलाहअभिण्णपइण्णगअकुंभमुत्ताररअणम्॥ वणदवभीअपहाविअगाअ
उलमलिअणइसंगमोत्तारअणम्॥ केसरिचरणतलाहतभिन्नप्रकीर्णगजकुंभमुक्तारत्नं॥ वनदवभीतप्रधावित
गजकुलमृद्दितनदीसंगमोत्तारतृणं॥ केसरिणांचरणतलैराहतास्ताडिताअतएवभिन्नाविदीर्णायेगजकुंभास्ततः
प्रकीर्णानिव्याप्तानिमुक्तारूपरत्नानियत्रतं॥ पूर्वनिपातानियमात्यद्वाकेसरिचरणतलैराहतान्यतएवभिन्नानि
स्वस्थानाद्बहिर्भूतानिसंतिप्रकीर्णानिव्याप्तानिगजकुंभानांमुक्तारत्नानियत्रयद्वाजेगकुंभमुक्तारत्नंताडिताःसंतो
भिन्नाःशतखंडीभूताअतएवविप्रकीर्णाविच्छिन्नाविधकपतिताये[illegible]
[illegible]॥ मकरग्रहनदानास्नाताभिभरमाणपर्यन्ततत्रबीजमाह्निकभूतरत्नंतयाधरण्यावृकटलछतथा
एववदनवादिवान्हतनातःप्रधावितेनगजकुलेनमृदितानिनदीनासंगमप्रवेशेउत्ताराणिउन्तालानिउद्धटानि
तृणानियत्रसंतापशांत्येनदीषुप्रवेशादितिभावः यद्वापूर्वनिपातानियमात्गजकुलेननदीसंगमस्योत्तारेणोल्लंघने
नमृदितानितृणानियत्रेत्यर्थः॥ ३७॥ पुनरुचैस्त्वमाह॥ कडअवलन्तरविरहंतलवणराइपडिघोलिरुज्झडतारं॥ पा
सल्लणिसण्णसविउअरिवीअभुअणस्सवणिसम्भत्तम्॥ कटकवलद्रविरथंतालवनराजिप्रतिघूर्णनशीलोद्भट

पार्श्वनिषणस्याप्युपरिद्वितीयभुवनस्येवनिषीदंतं॥एवंकटकवलहक्कीभवतूरविरथोऋजुमार्गालाभात्तालवनस्य
राज्यांप्रतिघूर्णमानाउद्धट्टात्तारायत्रतालप्रतिरुद्धमार्गत्वात्तडवणेतिपाठेतटवनराज्यामित्यर्थः यत्रोत्प्रेक्षत्तेपा
र्श्वेनिषणस्यद्वितीयभुवनस्यभुवर्लोकस्याप्युपरिनिषीदंतमिवसूर्यताराद्यधिष्टाननक्षत्रलोकरूपस्यतस्यपा
र्श्ववृत्तित्वादितिभावः॥३८॥तदेवाह॥अद्धछिणरविअरेअसमत्तपाहुत्तसअलचंदमऊहे॥छिणकडए
वहत्तंउव्वाअणिअत्तगरुडमग्गिअसिहरे॥अर्द्धछिन्नरविकरानअसमाप्तप्रभूतसकलचंद्रमयूखान्॥छिन्न
कटकान्वहंतंउद्धावितनिवृत्तगरुडमार्गितशिखरान्॥एवंछिन्नकटकान्शृंगविशेषान्वहंतंकिंभूतान्अर्द्ध
छिन्नअवछिन्नारविकरायत्रतानअर्द्धएवपर्याप्तत्वादेवंअसमासेएकदेशएवप्रभूतामान्तःसकलाःसक
लस्यपूर्णस्यवाचंद्रस्यमयूखायत्रएवंउद्धावितेनऊर्द्धंप्रस्थितेनअथनिवृत्तेनगरुडेनमार्गितमन्विष्टशिखर
मग्नंयस्यतथाचस्कवेलस्योर्द्धंप्रस्थायगंतुमशक्यत्वान्निवृत्तेनगरुडेनाप्यन्तरावर्त्तिछिन्नकटस्यैवशिखरंविश्रा
मायनरूप्यतइतिमार्गितस्यमत्कञ्चलं॥उप्पइअणिअत्तेतिपाठेउत्पतितनिवृत्तेत्यर्थः॥दुरालोकंदुरारोहंकटकांतर
संगतं॥भृगुप्रायंगिरिःशृंगंतछिन्नकटकंविदुः॥३९॥रत्नाधिकमाह॥रूरवहूणहिअअट्ठिअरअणवसार
अंसाअरस्सरइअंमिवरअणवसारअम्॥णलिणिवत्तउघडजाअमहुरसामोअअंवउलवणाणिम्मिहत्तम
हुरसामोअअम्॥स्करवधूनाहृदयस्थितरत्नप्रसाधकंसागरस्यरचितमिवरत्नप्रसारकं॥नलिनीपत्रपुटजातम
धुरश्यामोदकंबकुलवननिर्यन्मधुरसामोदकं॥एवंस्करवधूनाहृदयस्थितैरत्नैःप्रसाधकंप्रसाधनकर्तारंअभी
ष्टरत्नानांतत्रैवलाभात्॥वस्तुतस्तुहृदयस्थितरतनवसारकंहृदयस्थितस्यरतस्यनवसारकंसाधकंअभिनवसं
पादकमित्यर्थः॥सातोमयिकेलिस्थानत्वात्॥यद्वारतनवसारदंहृदयस्थितंरतरूपंनवसारंधनंददातियस्तंयद्वारत
नवसारतंतादृशरतस्यनवास्तव्यासारतायत्रतं॥एवंसागरस्यरत्नाकरस्यरचितंरत्नानांप्रसारकंहृद्यमित्यर्थःत
त्सन्निहितत्वेसतिरत्नबहुलत्वात्एवंनलिनीपत्रपुटेजातंमधुरमास्वाद्यमनोज्ञवाश्यमउदकंयत्रश्यामत्वमुत्कृष्टत्व
स्वायनार्थंएवंबकुलवनान्निर्यन्मधुरूपस्यरसस्यामोदोयत्रतादृशंकंशिरोयस्ययद्वाबकुलवनेनिर्यातपुष्पेभ्यःपतता
मधुरसेनामोदकंसौरभजनकमानंदकंवातादृशमधुरसस्यामोदंददातियस्तंबकुलवननिर्यन्मधुरसामोदंदवा॥४०
॥यातुगन्धामाह॥तिव्वजरढाअवाहअहरिआलामोअविम्हराइअहरिणं॥संखावमीसोअहिसीभरलवणरसा
साअमहिसलिभन्तसिलम्॥तीव्रजरठातपाहतहरितालामोदविमूर्छितहरिणं॥संस्त्यानोदधिशीकरलवणरसा
स्वादमहिषलिह्यमानशिलं॥एवंतीव्रेणदुस्सहेनजठरठेनमध्यंदिनीयेनआतपेनाहतानांस्पष्टानांहरितालानामामो
देनसौरभेणविमूर्छितामूर्छाहेतुतयाविस्मापितावाहरिणायत्रतं॥आतपेसतिहरितालस्यद्रवीभावादामोदस्तेन
चमृगामूर्छंतीतिप्रसिद्धिः एवंसंस्त्यानस्यातपयोगादेवघनीभूतस्योदधिशीकरस्ययोलवणरसस्तदास्वादान्म
हिषैर्लिह्यमानाजिव्हयास्पृश्यमानाशिलायत्रआतपशुष्कक्षारोदशीकरलवणरसस्तदास्वादान्महिषायत्रशि
लांलिहंतीत्यर्थः॥४१॥गौर्यशिखरमाह॥तुंगरअअसिहरुग्गमेहित्तारंगाअसीहणिहअगअलोहिअमोत्तार
गअं॥गरुअधीरणिघाहिअवहुजुअसंखअउअहिसलिलसंकत्तसरुज्जुअसंखअम्॥तुंगरजतशिखरोद्गमे
स्तारागतंसिंहनिहतगजलोहितमुक्तारंगदं॥गुरुकधैर्यनिर्वाहितबहुयुगसंक्षयंउदधिसलिलसंक्रान्तशरऋजु
कशंखगं॥तुंगानांरजतशिखराणामुद्गमैरुछ्रायैस्तारानक्षत्रंगतंमिलितंसमानवर्णत्वात्संगंवाभिश्रतमित्यर्थः
एवंसिंहनिहतस्यगजस्यलोहितेनरुधिरेणमुक्तानांरंगदरागप्रदंएवंगुरुकेनधैर्येणस्थिरतयानिर्वाहिताअति
वाहिताबहूनांयुगानांसंक्षयोनाशोयेनतंबहुतरप्रलयेप्यनष्टमित्यर्थः॥एवंउदधिसलिलात्संक्रान्ताःसरसिऋजु
काःसंमुखाःशंखकायत्रसरःप्रविष्टैकमुखसमुद्रशंखमित्यर्थइतिसंप्रदायःवयंतुरागतागकंतुंगरजतशिखरो
द्गमैस्तारमुद्भटमगकंचपूर्यस्यतंयद्वातारांगदंतुंगरजतशिखरोद्गमैस्ताराणामंगधतिखंडयतियथांस्तंशिखरै
स्तारादेहभेदकंदोवअवखंडनेधातुःयद्वातारंगदंतकारस्तरणिःप्रोक्तइतिकोषस्तस्यसूर्यस्यअरंगदंतादृश
शिखरैर्वत्मावरोधकत्वादरंगप्रदमित्यर्थःरंगउल्लासःयद्वातारांगतंतादृशशिखरोद्गमैस्ताराणामगतागुणी

भावोयस्मान्तंरजतशिखरकान्तिभिस्ताराणांतिरोहितत्वादित्यर्थः अथवातुंगेनउच्चप्रदेशेरजतंरूप्यंशिखरंमा
णिक्यंतदुग्दंमेस्तारंनिर्मलंगतंज्ञातमित्यर्थः॥अथवातुंगेउच्चप्रदेशेरजतंरूप्यंशिखरंमाणिक्यंतदुग्रंमेस्तारंनि
र्मलंगतंज्ञातमित्यर्थः॥तथाचनिर्मलेतारमाद्रुरितिकोषः यद्वातुंगरजतशिखरांग्रमेधितारांगतंतुंगंयद्रजत
शिखरंतदेवउग्नोमेधिश्रेमिकर्मावलंबनस्तंभस्तेनताराणामगताऽप्राधान्यंयस्मात्सिखरस्यैवमहत्वेनप्राधा
न्यंताराणांनुसिखरलग्नत्वेनज्ञद्रत्वादितिभावः यद्वातुंगरजतशिखातुंगामेस्तारांगदंतुंगारजतस्यशिखाशिख
रंतस्यानुक्रांतिस्तद्रूमेस्तसंचारिस्तारंमुद्धद्द अंगदंयस्यतंवलयीभूतरजतकान्तेरंगदत्वेनशिखरबाहुत्वमि
त्यर्थः यद्वातुंगरयासिधराद्रूमेस्तारंगकतुंगारयोवेगोयेषांतथाभूताअसिधरामृगलयाशालिनोराक्षसास्तेषामु
द्रूमेरूर्ध्वसंचारिस्तातावदित्यर्थेरंगकंरंगजनकंमस्तकंअवाथैतौरंगसमूहस्तद्विशिष्टमस्तकमित्यर्थः॥समूहेअन्न
यद्वातुंगरतिकशिखरलग्नमेधित्तारंतुंगेउच्चप्रदेशेरतंस्थितंयत्कंशिखरंतस्यशिखयारुग्नाविद्धामेघिनीमेघविशि
ष्टातारायेनतंगतंज्ञातमित्यर्थः॥एवंद्वितीयपदेसिंहनिधागतलोहितमुक्तारंगदंसिंहान्निःशेषतोदहतियेअगाद्य
क्षाःप्रत्यंतपर्वतावासिंहाधिष्टानभूतास्तेषांसिंहनिधामगानांतलेउहितांभिलक्षिताभिरर्थात्सिंहनिहतकरिकुंभस्ख
लिताभिर्मुक्ताभीरंगदंकौतूहलप्रदंतृतीयपदेगुरुकधीरनिर्बाधितबहुयुगस्वंखगंगुरुणाधैर्येणानिर्बाधितमपीपी
डितंअखंडितमितियावत्तनिर्व्याधितंवाव्याधिशून्यं॥अथचबहुनियुगानिस्यतिखंडयतिअतिवाहयतियस्तंप्राधातुः
कर्मधारयः॥निजविपत्तिविनेवातिक्रांतनानायुगामित्यर्थः॥खमाकाशंगच्छतीतिखऽगोत्स्फन्नमित्यर्थः चतुर्थपदेउदधि
सलिलशंकमानसरऋजुकशंखकंउदधिसलिलंशंकमानाअतएवसरसिऋन्नकानिमुखानियेषांतथाभूताःशं
खाकेशिरसियस्यतंसमुद्रजलबुध्यानदीवर्त्मनाशिरःसरःप्रविविज्ञशंखकुलमित्यर्थः यद्वाउदधिसलिलशंकान्तः १९९
सरऋजुकशंखकंउदधिसलिलशंकयाअंतःसरामध्यप्रविष्टाःऋजुकाःसंमुखीकृतमुखाःशंखायत्रएतादृशंकं
पानीयंयस्यनद्यादीनामित्यपीत्तंसमुद्रशंकास्पदत्वेनद्यादिजलानामहत्वात्स्कंवलस्यमहत्वमितिभूमःविस्तरभयाद

न्यदुपेक्षितं॥४३॥गुणांतरमाह॥ ॥मणिपहंमसामोअअंमणिपहम्मसामोअअं॥सरसरणणिद्दावअंसरस
रणणिद्दवअं॥एवंप्रथमपदेमणिप्रहर्मश्यामोदकंमनीनांप्रहर्मोमणिमयंविवरंतत्रश्याममुदकंयत्रतदिंद्रनीला
दिसंबंधात्निम्नतयाकुंभबहुलत्वेनातपाद्यभावाच्चयद्वामनीनांप्रथमःखातइतिदेशीतत्रश्यामोदकंश्यामत्वा
दुत्कर्षोजलस्यद्वितीयपादेमणिपहर्मसामोदकंमणीन्पातीतिमणिपाःयक्षाःसर्पावातेषांहर्म्यंक्रीडागृहंयत्रसम
णिपहर्म्यःएवंसहआऽमोदेनवर्त्तत्तेसामोदःमणिपहर्म्यश्चासौसामोदश्चेतितंतथाप्रशंसायांकन्अवाथमणिपा
नांहर्म्यसौधरूपंसामोदकंआमोदसहितमस्तकंकर्मधारयः आमोदःसौरभंहर्षोवाअथवामणिपानांहर्म्येससौ
रभंकंजलंयत्रतथाभूतंतृतीयपदेसरःशरण्यनिर्द्दावकं॥सरःशरण्यानांस्वंसरोवरमाश्रितानांनिर्द्दावृकमनुप
तापकंशैत्यप्रदत्वात्तदुद्ङ उपतायेधातोर्नुबुलियद्वासरसारण्यनिर्द्दावकंसरसारण्येसजलवनेनिर्द्दावकंनि
र्गतोदावोयस्मात्तदावानलशून्यमित्यर्थः॥अथवासरसारण्यनिर्गतोदावस्यकोवन्हिर्दावानलरूपोयत्रतंअथ
वासरसीरण्येनिःशेषतोदावोवनंयत्रतादृशंकंशिरोयस्येत्यर्थः यद्वासरसारण्यनिद्राप्रदंसरसमरण्यंयस्मात्स
रसरसारण्यःसमुद्रस्तस्यनिद्राप्रदंनिद्रयास्वायकंअवष्टंभहेतुत्वात्चतुर्थपदेस्मरशरज्ञनिद्राप्रदंस्मरशरंजान
तीतिस्मरशरज्ञागंधर्वास्तेषांनिद्रापदंनिद्रापकंवानिद्रापदंस्थानंवायद्वासरसारण्यनिद्रातकंसरसारण्येनिद्रातो
जातनिद्रःकोमयूरोपत्रतंयद्वासरसारण्यनिर्द्दावकंसरसारण्येनिर्गताःकमेरोरागतादातादेवायत्रतादृशंकं
मस्तकंयस्यतंकोब्रम्हाग्न्यनिलार्केषुशिखरेसर्वनाम्निच॥पानीयेवमयूरेचमुखशीर्षस्रुखेषुकं॥दावोदेवइति
ख्यातोवनाग्निवनयोरपीतिविश्वः॥ आमोदोहर्षगंधयोरितिधरणिः॥४४॥गुणान्तरमाह॥दरिअरक्खसामो
अअन्दरिअरक्खसामोअअं॥विसअरुय्यहाअंतअंविसअरुय्यहाअंतअं॥प्रथमपदेदृप्तराक्षसामोदकंदृ
प्तस्यबलवतोराक्षसस्यरावणस्यामोदकमानंदजनकं॥यद्वादृप्तराक्षसामोददरावणस्यैवआमोदस्सौरभंतस्य
दंनानास्रुगंधिद्रव्यसत्वात्यद्वादृप्तराक्षसामोदयदृप्तराक्षसाद्रावणादेरामःपीडातस्योदयोयस्यनित्यमुपम

र्हीतअमरागेधातुःद्वितीयपदेद्दरीवराख्यश्यामोदकंदर्य्याकंदरायांवराआख्यानामयस्यास्तयात्रिफलयाशाममुद
कंयस्यतंयद्वादरीवराख्यसामोदकंदर्यावराख्येनशिल्हकनाम्नासुरभिद्रव्येणसामोदकंससौरभकमस्तकजलंवा
यस्यतंयद्वादरीवराक्षसामोदकंदर्यांवरमक्षमिंद्रियंयेषांतेवराक्षाश्रेष्ठेंद्रियायोगिनोयक्षावातेषांआमोदेनसहवर्त्त
न्तेयस्तं॥ यद्वादरीवराक्षश्यामोदकंदरीवरेणअक्षेणबिभीतकनाम्नावृक्षेणश्याममुदकंयस्यतंयद्वादरीवराणां
किन्नराणामक्षस्येंद्रियस्यामोदेनसहवर्ततेयस्तं अथवादरीचराणामक्षेणघृतेनयआमोदस्तेनसहितमाधारभू
तत्वात् यद्वादरीवराक्षसामोदयंदरीवराक्षसाणांयोगिनांसाम्नांवेदानांमुदयोयत्रतंततृतीयपदेविषदरूप्यप्रभातो
तविषदेनस्पष्टेनरूप्येणरजतेनप्रभातोदीप्यमानोऽन्तःस्वरूपयस्यतंविषदरूप्यप्रभाभिःकांतकमनयमित्यर्थः॥
चतुर्थपदेविषतरुप्रभान्तकंविषतरूणांप्रभाभिरनुभावैरंतकंनाशकंयद्वाविषतरुप्रभातान्तंविषमैतरुप्रभांतम्ला
नं अथवाविषतरुभिःप्रभातोऽंतोअवसानंयस्मात्तयद्वाविषतरुप्रभारतंप्राकृतत्वात्प्रभातोदीप्तोविषतरुर्यत्रततंतत्
विस्तीर्णरूप्यंप्रशस्तरूपेस्याद्रूप्यंरजतमिष्यते॥वरोऽभीष्टेदेवतादेर्वरोजामातृसिल्हयोःत्रिफलायांवराप्रोक्ताशतावर्यां
वरीवरा॥ श्रेष्ठत्रवस्परीवृत्तौकेवरंकश्मीरजेमतं॥४९॥ चंदनवंतामाह॥ जरठविसोसहिवेढिअभुअंगपरिहरिअ
चंदणदुमक्खंधं॥ वोलंतविसहरप्फणमणिप्पहाहअविराइअदुमच्छाअं॥ जरठविषौषधिवेष्टितभुजगपरिहृतचं
दनद्रुमस्कंधं॥व्यतिक्रामद्विषधरफणमणिप्रभाहतविराजितद्रुमछायं॥जरठाभिर्विषौषधिभिर्वेष्टिताःपरिवृताअ
तएवभुजंगैःपरिहृताविषनाशकगंधज्ञानादुस्थतयात्यक्ताश्चंदनद्रुमाणांस्कंधाःप्रकांडानियत्रतं॥ अतएवव्य
तिक्रामतामन्यत्रगच्छतांविषधराणांफणमणिप्रभाभिराहतास्पष्टाःअतएवविराजिताद्रुमाणांछायायत्रसर्पसं
चारेणफणामणिकांतिप्रसरणात्द्रुमछायापिकांतिमतीभवतीत्यर्थः॥४६॥ स्फटिकवन्तामाह॥ फडिहकिरण
णिवहेहिधरणधवलाअंसुव्वमाणसुरसुंदरिमुद्धवलाअम्म॥ पलअसमअसलिलेणविअसअरुधोअ
अंविवराणिन्तणवचन्दसरिसअरुधोअअं॥ स्फटिककिरणनिवहैर्धरणीधवलायकंश्रूयमाणसुरसुंदरीमु

ग्धप्रलापकं॥ प्रलयसमयसलिलेनाप्यसकलधौतंविवरनिर्यन्नवचंद्रसदृशतटधौतं॥ एवंस्फटिकानांकिरणनिवहै
धरण्याधवलायकंधवलत्वकारकंसकलपृथिवीधावल्यक्षमकांतिमत्तयास्फटिकभूमेर्महत्वमुक्तंएवंश्रूयमाणा
सुरसुंदरीणांमुग्धामनोहरामोहमयावाप्रलापायत्रतंवंदीकृतानांकारागृहीतत्वात्एवंप्रलयसमयसलिलेना
पिअसकलेएकदेशएवधौतंतदानींमुद्वेलसमुद्रेनापिसकलावच्छेदेनक्षालयितुमपारित्तमित्यर्थः॥एवंविवरात्कंद
रातोनिर्यन्नुद्गच्छन्नवश्चंद्रस्तत्सदृशंकलधौतंसुवर्णयत्रनवइत्युदयकालीनतयापिंजरत्वात्कलधौतंरजतं
यत्रेतिवात्तत्रनवस्तव्यइत्यर्थेनातिधवलत्वलाभात्॥ कलधौतंरूप्यहेम्नोःकलधौतंकलध्वनावितिविश्वः॥४७॥ पद्म
रागादिमन्तमाह॥ रम्मअन्दराअछअरम्मअन्दराअछअं॥ सग्गगामणीसामगाअसग्गगाहणीसामगाअम्
प्रथमेरम्यचंद्ररागक्षदंपद्मरागादिमणित्तेजस्तेनछदआवरणंयस्यतंयद्वारम्याश्चंद्ररागछदाश्चंद्रःकर्पूरोरागः
पद्मरागादिर्लौहित्यंछदोवृक्षादिपत्रंयत्रतादृशं॥यद्वारम्येणचंद्ररागेणचंद्रकान्तेनछदआवरणंयस्यतं॥यद्वार
म्यचंद्ररागाछकंरम्यचंद्रस्यरागेणोद्योतेनअछंनिर्मलंकशिरोयस्यतं॥ अथवारम्यचंद्ररागवत्अछंकंजलंपत्रयद्वारम्ये
णचंद्ररागेणोदयकालीनचंद्रकांत्याछदोयस्यतमितिचंद्रोदयाधारत्वेनोच्चत्वमुक्तं द्वितीयेरम्यकंदरावृक्षकंरम्याःकंदरावृक्षाः
यत्रेत्यर्थः यदावृक्षशब्दस्यलत्वंनभवतितदावछइतिभवतितत्रचवलोपेअकारस्तिष्ठतितेनअछइतिवृक्षवाचीअथवा
रम्योकंदरावृक्षोकंदराकच्छोवायत्रजलप्रायमरूपेस्यात् पुंसिकच्छस्तथाविधइत्यमरः कच्छस्तृणंलतकच्छेत्यन्यत्रयद्वार
म्यकंदराछकंरम्यकंदरासुअछंनिर्मलंकंजलंयत्रयद्वारम्यकंरम्याःकंदरासुअक्षकाबिभीतकायत्रयद्वारम्यचंद्र
रागछंदकंरम्यकर्पूरस्यरागेणतद्विषयकानुरागेणछन्दकंअन्यत्रगमनाूवारकंयद्वारम्यकंदरासकंरम्येणचंपकेनकं
दरयाचकक्षाअभिमानोयस्यकैतं॥ तृतीयेसाग्नग्नहनिश्यामाग्नकं साग्नेःश्रेष्टग्नहैर्नक्षत्रैर्निश्यामंतेजःशालित्तयाश्या
मताशून्यमग्नकंशिरःप्रदेशोयस्यतंअथवासहअग्नग्नहेणमुख्यग्नहेणवर्त्ततेयत्तत्साग्नग्नहंअतएवनिश्याममग्नकं
यस्यधवलश्रृंगमित्यर्थः॥यद्वास्वर्गग्नहनिशामार्गस्वर्गास्यग्नहःशुक्रादिस्तत्रतादृशोनिशाकालीनोमार्गःसंचारदेशोय

त्रतंशुकादिसंचारपथविशिष्टमित्यर्थः॥ यद्वासहअग्नग्नहेणपुरतःशुकादिसंचारेणवर्त्ततेनिशामार्गोयत्रवनचराणा
मर्थात्तेनैवपथाग्निशुकादयःपश्चाद्गनेचरागछंतीत्यर्थः॥ चतुर्थेस्वर्गग्नहणीसामर्थ्यंस्वर्गग्नहणीनांस्वर्गबंदीनांसाम
र्थ्यंसाकल्यंयत्ररावणेनतासांतत्रैवधारणात्‌चंद्रःस्फथांशुकर्पूरध्मिह्लस्वर्णवारिषुरम्यंमनोहरेरम्यारात्रौरम्यश्चचंप
कः॥ स्कंदराछंदः॥४८॥ पंकबाहुल्यमाह॥ पन्कुत्तरंतहुब्बिअपरिवत्तवराहवंचिआहअसिंहं॥ सरसलिलोअरनि२
डिअणिअभरत्थमिअकणअपह्लवगुछं॥ पंकोत्तरंह्लबितपरिवृत्तवराहवंचिताहतसिंहं॥ सरस्सलिलोदरनिपति
तनिजकराभस्तमितकनकपह्लवगुछं॥ पंकादुत्तरत्सन्‌लंबितोर्थात्सिंहेनअथपरिवृत्तःपुनःपंकएवप्रविष्टोयो
वराहस्तेनवंचितोनिःफलीकृतयत्नःअतएवाहतस्ताडितइवसिंहोयत्रतंपंकादुत्तीर्णोविराहःसिंहेनाक्रान्तोपितदग
ग्येपंकएवपरावृत्यप्रविष्टइत्यर्थः एवंसरःसलिलोदरेनिपतितोथनिजकभरेणेवास्तमितोमग्नःकनकस्यहिरण्मय
वृक्षस्यपह्लवगुछोयत्रतं॥ ४९॥ शिखरोत्कर्षमाह॥ णहशिरिसअलमेहलावणिअम॥ बद्धजोइसाउद्धमेहलावणि
अं॥ सिहरेहिंवाहूहिवपछाअंतअमणुअंदिसाणम्भिवपछाअंतअं॥ नभःश्रियंसजलमेघलवण्यलावण्यांतवाबद्धज्यो
तिषाअपूर्वमेखलावर्णितं॥ शिखरैर्बाहुभिरिवप्रछादयन्तंमन्युंदिशामिवपश्चादायंतं॥ किंभूतंबाहुभिरिववाहुप्रायैः
शिखरैर्नभःश्रियंप्रछादयंतंतिरोदधतंएतावताशिखराणंगगनाधिकदेशत्वमुक्तंनभःश्रियंकीदृशींसजलमेघलं
वण्यसौंदर्यंत्तद्विशिष्टांयद्वासजलमेघस्येवलावण्यंयस्याःश्यामत्वात्‌ अत्रसमासोक्त्यासवेलस्यनायकत्वंनभःश्रि
योनापिकात्वंप्रतीयतेतत्रनापिकामपिकिंभूतांसकलमेघलावण्यांसकलःकलयासहवर्ततेयोमेघःकालागुरुस्ते
नलावण्यंयस्यास्तांमेघःकालागुरुर्मतइतिकोषः॥ एवंबद्धज्योतिर्येनतेनबद्धज्योतिषानक्षत्रेणापूर्वमेखलायाव
र्णःशोभांप्रापितामितिनक्षत्रलोकस्यमेखलावर्तित्वमुक्तंनायिकामपिबद्धज्योतिरपूर्वमेखलयावर्णितास्तुताभवति
उत्प्रेक्षतेपश्चादायंतमागछंतंआगमिष्यंतंवावर्तमानसामीप्येलट्‌ दिशांमन्युमिवप्रछादयंतमित्यत्यन्वयः नभःश्री १५७
रूपनायिकांमत्समीपवर्तिनींदृष्ट्वाप्रतिनायिकागोपनंतन्मन्युगोपनपर्यवसन्नमेवेत्यर्थः कामुकोपिप्रतिनायिकां

दृष्ट्वानिकटस्थांनायिकांभुजादिनागोपयतीतिध्वनिः॥ ५०॥ गुणांतरमाह॥ अस्करवन्दिसाहारणंअस्करवन्दिसाहारणं॥
सूरअन्तमणिवालुअंसूरअंतमणिवालुअं॥ एवंअस्करवंदीसाधारणं॥ नस्करवंदीनांदेवस्त्रीणां२ साधारणंतुल्योपभोग्यं
यथाराक्षसीनामुपभोगविषयस्तथानदेवस्त्रीणामित्यर्थः यद्वाअस्करवंदिसाधारणंअस्करंरावणंवंदितुंशीलंयेषांतेऽस्क
रवंदिनोराक्षसास्तेषांसाधारणंसर्वेषामपितुल्योपभोग्यंद्वितीयपदेअस्करवंनशोभनोरवःशब्दोयत्रतंसिंहादिराक्षसर
वावारत्वात्‌॥ अथवाअस्करंरावणंवातियातिवाधातोःकप्रत्ययःरावणगामिनंतदाक्रमविषयत्वादित्यर्थः॥ एवंदिग्गधा
रकंदिशामाधारभूतंदिग्गहारकंवादिशामाहारकंआकर्षमित्यर्थः तत्रैवसमासेदिशाधारणधारकंवायद्वादिश्याधारकं
दिश्यंदिग्भवंतस्याधारकंदिश्यंतुत्रिषुदिग्भवेतृतीयपदेसूरगंसूरंसूर्यंगछति॥ यस्तउच्चत्वादथवाशोभनाऽरगाःस
र्प्पायत्रतंएवंतमोन्नृपालयंतंएवंन्नृपःपरैरपरिभूतत्वात्तस्यालयंगृहंकुंजकंदराबहुलत्वात्‌यद्वातमोनिर्व्वायकंअंध
कारशामकंरत्नादिमध्यत्वात्‌॥ चतुर्थपदेसूर्यकांतमणिपालकंसूर्यकांतमणीनांरक्षकंयद्वासूर्यवत्कान्तानांकमनी
यानांमनीनांपालकंयद्वामणीन्यातीतिमणिपायक्षाःसर्पावातथाचसूर्यकान्तमनीनांमणिपानांचालयंयद्वासूर्यतां
न्तमणिपालयंसूर्यतान्तोग्लानोयत्रअत्फच्यत्वात्‌मणीयोरत्नाकरस्तदालयश्चपश्चादेतयोःकर्म्मधारयस्तं॥ ५१॥
देहमहत्वमाह॥ हरिणाबलिमहिहरणेसमएजलएहिंजलनिहाहिंजुअअन्तो॥ जणचइअंभरेउंत्तदेहणभुअ
णंभरेजणठिअं॥ हरिणाबलिमहीहरणेसमयेजलदेर्जलनिधिभिर्युगान्तेयत्रशकितंभर्तुंतद्देहेनभुवनंभृत्वास्थि
तंकिंभूतंतद्भुवनंदेहेनशरीरेणभृत्वाव्याप्यस्थितंयद्बलेमहीहरणेविष्णुनासमयेवर्षाकजलदैर्युगांतेप्रलयेजलनि
धिभिःसप्तभिरपिभर्तुव्याप्तुंनशकितंनपारितंतथाचविष्णुप्रभृतिभ्योपिव्यापकशरीरमित्यर्थइत्यतिशयोक्तिः॥ ५२
॥ तदेवाह॥ अत्थाअंबवहंतंजालंतरणिग्गउद्धअंयमङ्गहं॥ आसणसिहरवणदवचोलीणपणठमंडलंदिअसअरम्
॥ अस्तायमानमिववहन्तंजालान्तरनिर्गतोर्ध्वताम्रमयूखंआसन्नशिखरवनदवव्यतिक्रांतप्रनष्टमण्डलंदिवसक
रं॥ एवंदिवसकरंवहंतंकीदृशंआसन्नस्यनिकटवर्तिनःशिखरस्यवनदवेनव्यतिक्रांतमाक्रांन्तमतएवप्रनष्टमह

श्यं मंडलं यस्य तत् एवं ज्वालाना मन्तरेण निर्गता बहिर्भूता ऊर्ध्ववर्त्तिनः संत आताम्रा मयूखा यस्य तथा चाताम्रोर्ध्वग
तिदावानलज्वालाभिः प्रेरितानां दावाग्निप्रविष्टस्य रवेरपि किरणानामूर्ध्वगतित्वमाताम्रत्वं चात एवोत्प्रेक्षते ऽस्ताय
मानमिवास्तं प्रयातमिव अस्तमनेपि मंडलस्यादृश्यता किरणानामूर्ध्वता लौहित्यं चेति भावः ॥ ९३ ॥ सिंधुतरंगाभिघा
तमाह ॥ वडवामुहसंतावेभिण्णअडेअ गरुए तरंगप्पहरे ॥ अविरहिअकुलहराण व सरिआण कएण साअरस्ससह
न्तम् ॥ वडवामुखसंतापात् भिन्नटाँतश्च गुरुकान् तरंगप्रहारान् अविरहितकुलगृहाणामिव सरितां कृतेन सागर
स्य सहमानम् ॥ एकं वंकुलगृहं जनकगृहं अत्यक्तकुलगृहाणां सरितां पुत्रीणामिव कृतेन सागरस्य जामातुरिव
वडवामुखसंतापात् तटभेदजनकान् गुरुकांश्च तरंगप्रहारान् सहमानमिव अन्योपि श्वशुरः जनकगृहमत्यजन्त्या
ः पुत्र्याः कृते जामातुः परुषाभिधानरूपं मुखसंतापं प्रहारं च सहत इति ध्वनिः तथा च समुद्रतरंगप्रहारातं टभेदेप्यभं
गुरत्वं वडवानलसन्निधावप्यनुपतप्तत्वं च सकुवेलस्येति भावः ॥ ९४ ॥ पुनरुच्चत्वमाह ॥ अरणीसु उव्वहन्तं एक्कक्कअं
बमणिसिलासंकन्तम् ॥ मुद्धमिअंकछाअं खुरमुहमग्गं व रइतुरंगाण ठिअम् ॥ रजनीषूद्वहंतं एकैकाताम्रमणिशि
लासंक्रान्तं ॥ मुग्धमृगांकच्छायां खुरमुखमार्गमिव रवितुरंगाणां स्थितम् ॥ एवं रजनीषु मुग्धस्य बालस्य मृगांकस्य छा
यां प्रतिबिंबं उद्वहन्तं ॥ किंभूतां एकैकस्यामाताम्रायां मणिशिलायां संक्रान्तां संगतां उत्प्रेक्षते रवितुरंगाणां स्थितं खुरमु
खस्य खुराग्रस्य मार्गमिव तथा च शिरसि स्थितस्य बालचंद्रस्य स्फटिकादौ प्रतिबिंबाः तत्रैव संचरतां रविहयानां खु
रचिन्हं श्लिष्टमार्गत्वेनोत्प्रेक्षिताः वस्तुतस्तु खुरमुखमिव खुराग्रपातमिवेत्यर्थः साधीयान् यद्वा मुग्धमृगांकच्छाया
खुरमुखमार्गमिवेति सहोपमाद्वयमपि वहन्तमित्यर्थः एकैकेत्यपि द्वितीयविशेषणं ॥ ९५ ॥ कांचनभूमिमाह ॥ विस
मपरिसंठिएहिं विसमुद्धादअलआहरोत्थइएहिं ॥ कञ्चणसिलाअलेहिं छिण्णातवमंडलेहि व परिक्खित्तम् ॥ विष ५८
मपरिसंस्थितैर्विषमोद्धावितलतागृहावस्थगितैः कांचनशिलातलैश्छिन्नातपमण्डलैरिव परिक्षिप्तं व्याप्तं एवं कांच
नशिलातलैः परिक्षिप्तं व्याप्तं किंभूतैः विषमं यथा स्यादेवं परिसंस्थितैर्नतोन्नतैरेवं विषमं यथा स्यादेवं उद्धावितै रूर्ध्वमु

द्गतैर्लतागृहैरवस्थगितैराच्छादितैः कैरिव छिन्नातपस्य खंडातपस्य मंडलैरिव तथा च विषमलतागृहादिसंधिप्रवेशा
त्क्वचित्क्वचित् त्रुटित्वा स्थिता एव रविकराः काञ्चनशिलाबुद्धिं जनयंति कपिशत्वादित्युत्प्रेक्षा ॥ ९६ ॥ तुंगत्वमेवाह ॥
अप्पत्तदिणअराइं आअवभअसिहरसंठिअभुअंगाइम् ॥ कडएहिं उव्वहन्तं वणाइं उद्धपरिवड्ढिअच्छाआइम् ॥
अप्राप्तदिनकराण्यतपभयशिखरसंस्थितभुजंगानि ॥ कटकैरुद्वहन्तं वनान्यूर्ध्वपरिवर्धितछायानि ॥ एवं कटकैर्वना
न्युद्वहंतं किंभूतानि अप्राप्तो दिनकरो यैस्तानि अधःस्थितसूर्यकत्वात् ॥ एवं आतपभयेन शिखरे उपरि संस्थिता भुजंगा ये
षु खरैरधःस्थितत्वेन तत्रातपसंबंधाभावादेवं ऊर्ध्वपरिवृद्धिता छाया येषां अत एव भुजंगानामुपरिस्थितिः छायाहि तरणि
पराङ्मुखीभवतीति रवेरुपस्थितावधोगच्छेदिह त्वधएव तस्थितावुपरिगच्छतीति भावस्तत्रापि यथा यथा रविर्व्यवधा
नं तथा तथा तस्या वृद्धिरिति परिवर्धितपदाद्स्यंतमधोवर्त्तित्वं रवेरवगम्यते ॥ ९७ ॥ तदेवाह ॥ तुंगत्तणपज्जत्तेविस्थ
अविक्खम्भसिट्ठमुहवित्थारे ॥ तिअसगआण वहन्तं दन्तप्फलिहजुअलंकिए कडअअडे ॥ तुंगत्वपर्याप्तान् विस्तृत
विष्कंभशिष्टमुखविस्तरात् ॥ त्रिदशगजानां वहंतं दंतपरिघयुगलांकितान् कटकतटान् ॥ एवं त्रिदशगजानामैरा
वतादीनां परिघाकारदंतयुगलेनांकितान् चिन्हितान् कटकतटान् वहन्तं कीदृशान् तुंगत्वे पर्याप्तानवधीभूतान् ए
वं विस्तृतेन विष्कंभेन शून्येन दंतयोर्मध्यभागेन शिष्टः कथितो मुखस्य विस्तारो यैस्तथा च कृतदंताघातानां दिग्गजाना
मतिव्यवहितं तद्द्वयप्रान्तचिन्हेनानुमीयते मुखस्यैतावान् विस्तार इति तदभिघातेनाप्यभंगुरत्वं सूचितं ॥ ९८ ॥ पारि
जातसंबंधमाह ॥ तिअसगआण वहन्तं हत्थाहअकिलन्तपल्लवराए ॥ कडपरिघोलणकविले चिरवूढविमुक्क
पारिआअअविडवे ॥ त्रिदशगजानां वहन्तं हस्ताहतक्लान्तपल्लवरागान् ॥ कटकपरिघूर्णनकपिलान् चिरव्यूढ
विमुक्तपारिजातकविटपान् ॥ एवं चिरं व्याप्य व्यूढानुपचितान् अथ विमुक्तान् मिथः प्रविभक्तान् पारिजातविटपान् वहन्तं
कीदृशान् त्रिदशगजानां कटपरिघूर्णनेन गंडयोः कंडूयनेन कपिलान् त्वचापगमात् एवं हस्तस्य शुंडाया ऊष्मणा निःश्वा
सनिर्गमोष्णेनाहतोऽत एव क्लाम्येन प्राप्तरूपान्तरपल्लवानां रागो लौहित्यं येषु तान् विटपः पल्लवैरविड्कैर्विस्तारैस्तवशा

Dr. BHAU DAJI MEMORIAL

शारवयोरितिविश्वः॥ ५९॥ पुनरुच्चत्वमाह॥ पासाअअंवहन्तंमणिकडअमऊहधवलिअमअछाअं॥ पुट्ठोवइअम
हो ज्झरजलग्घाउद्धन्त मंडलंव्वमिअंकं॥ पार्श्वगतंपार्श्वापितंवावहन्तंमणिकटकमयूखधवलितमृगच्छायं॥ पृष्ठावपति
तमहानिर्झरजलघातोद्वृत्तमंडलमिवमृगांकं॥ एवंपार्श्वेनमेखलया आगतंमृगांकंवहन्तंकीदृशंमणिमयस्यकटक
स्य मयूखेन धवलितामृगस्यकलंकरूपस्यछायाकान्तिर्यत्रतंहीरकादिकान्तिसंपर्कात् उत्प्रेक्षतेपृष्ठेऽवपतिस्योर्ध्वा
दागतस्यमहानिर्झरस्यजलाघातेनोद्वृत्तंविपरीत्यस्थितंमंडलंयस्यतादृशमिव॥ चंद्रस्यपृष्ठेनिर्झरपातादधोवर्त्तित्वं
उद्वृत्तत्वेनचमृगस्योपरिगतत्वादलक्ष्यत्वेनधवलत्वमितिभावः॥ ६०॥ वनसमृद्धिमाह॥ सलिलदरधोअकुसुमं
दीसन्तोवरिपरिट्ठिअरजढालोअम्॥ मअरहरस्सवहन्तंअब्भासब्भहिअसामलंवनराइम्॥ सलिलदरधौतकुसुमा
दृश्यमानोपर्युपरिजरठालोकां॥ मकरगृहस्यवहन्तंअभ्यासाभ्यधिकश्यामलांवनराजीं॥ एवंवनराजींवहन्तंकीदृ
शींमकरगृहस्यसमुद्रस्याभ्यासात्सामीप्यादधिकंश्यामलांनित्यंजलसंपर्कादुपचितत्वादेवंसलिलेनसमुद्रस्यैवकिं
चिद्धौतानिक्षालितानिकुसुमानियस्यास्तां एवंदृश्यमानउपर्युपरिजरठःप्रकटआलोकोदर्शनंयस्याउपर्युपरिवृ
क्षांतरव्यवधानाभावात्॥ अथवाजरठआलोकःसूर्यतेजोयत्रउपर्युपरिबाहुल्येनतत्संबंधादितिभावः॥ ६१॥ देव
गजानांगतागतमाह॥ तिअसगआणवहन्तदूरुणिअमग्गाणहणिअत्तमहुअरे॥ ओवअणपअत्तन्तेउप्पअण
पणट्ठणिग्गमेगइमग्गे॥ त्रिदशगजानांवहन्तंदूरोंणिअमग्गणहणिअत्तमहुअरान्नीतमार्गनभोनिवृत्तमधुकरा
न्॥ अवपतनप्रवर्त्तमानाउत्पतनप्रनष्टनिर्गमान्गतिमार्गान्॥ एवंत्रिदशगजानांगतिमार्गान्संचारमार्गान्व
हन्तं॥ कीदृशान्दूरोन्नीतमार्गान्दूरंव्याप्यतर्कितपथाःसंतोनभसोनिवृत्तामधुकरायेभ्यस्तानतएवावपतने
वतरणेप्रवर्त्तमानात्तत्रमंरूपचिन्हसत्वाद्व्यक्तान्पुनरुत्पतनेनप्रनष्टोनिर्गमोयेषामलीनांपूर्वमेवगतत्वात्तथा
चकुंभलग्नाभ्रमराअपिदूरबुध्याकेवलतलंनागताकिंतुतदर्थएवनिवृत्ताइतिमहोच्चत्वंसूचितं॥ ६२॥ रत्नांकु
शोद्गतमाह॥ थोआहअतिमिराइंवहमानंथोअणिग्गअमऊहाइं॥ णिन्तग्गिगब्भिणाइंवथोउत्तिणरअणंकुन १५९

ट्ठाणाइं॥ स्तोकाहततिमिराणिवहमानंस्तोकनिर्गतमयूखानि॥ निर्यदग्निगर्भितानीवस्तोकोत्तीर्णरत्नांकुरस्थानिनो
एवंस्तोकमीषदुत्तीर्णानामुद्गतानांरत्नांकुराणांस्थानानिवहमानंकिंभूतानिस्तोकंनिर्गतोमयूखोयेभ्यस्तानिअतएव
स्तोकंआहतंनाशितंतिमिरंयत्ररत्नांकुराणांस्तोकोद्गमेनमयूखस्यापिस्तोकोद्गमस्तेनचतिमिरस्यापिस्तोकएवनाश
इत्यर्थः उत्प्रेक्षतेनिर्यन्अग्निर्यस्मात्तादृशागर्भविशिष्टानीवगर्भोन्निर्यत्पावकानीवेत्यर्थः रत्नांकुरस्याग्नितुल्यत्वादुर्गर्भि
तवन्हिस्थानस्यापिस्तोकशिखोद्गमेनस्तोकस्तिमिरनाशएवभवतीत्याशयः॥ ६३॥ वनगजयुद्धचिन्हमाह॥ मोडिअप
वाअदुमेउव्वेढ्णावेढभग्गपुंजइअलए॥ वणगअजुज्झपरिमलेवहमाणंपहरपडिअदन्तप्फडिहे॥ मोटितप्रवान
द्रुमानुद्वेलावेष्टभग्नपुंजितलतान्॥ वनगजयुद्धेपरिमलान्वहमानंप्रहारपतितदन्तपरिघान्॥ किंभूतंकिंभूतंवन
गजानांयुद्धपरिमलान्युद्धविमर्दान्वहमानंकिंभूतान्मोटिताःसंतःप्रवानाःशुष्काद्रुमायेभ्यस्तानेवंउद्वेलावेष्टे
नगजशरीरस्येत्यर्थात्भग्नासत्यःपुंजितावर्त्तुलीभूतालतायेभ्यःउद्वृत्तालताहस्तिशरीरमावेष्ट्यस्थिताअथतदाकृ
ष्योत्पाटनेनपुंजीकृताइत्यर्थः॥ एवंप्रहारेणपतिताःपरिघाकारादंतायेभ्यस्तान्॥ ६४॥ समुद्रजलमाह॥ मन्दरप
हरुच्छलिएअज्जविविथिणमणिपहम्माणिहिन्ते॥ जलणिहिजलवोच्छेपअणिगाआमअरसेसमुव्वहमाणं॥ मंदर
प्रहारोच्छलितान्ऽद्यापिविस्तीर्णमणिप्रहर्म्यनिहितान्॥ जलनिधिजलव्यवच्छेदानःनिर्गतामृतरसान्समुद्वह
मानं॥ मथनसमयेमन्दरप्रहारेणोच्छलितान्जलनिधिजलस्यव्यवच्छेदानेकदेशानद्यापिसमुद्वहमानं॥ किंभू
तान्विस्तीर्णेमणिप्रहर्म्येमणिविशिष्टविवरेनिम्नप्रदेशेनिहितानेवंअनिर्गतोऽमृतरसोयेभ्यस्तानद्यापिसन्तानु
मितमहत्वस्यमंदरोच्छालितजलस्यधारतयाविवरस्यमहत्वेनकवेलस्यमहत्वंकथामयतज्जलपानंचतत्रस्यानामु
क्तं॥ ६५॥ रामशरसत्तामाह॥ जलसंक्खोहालग्गंवहमाणंविसमभग्गपत्तणाणिवहं॥ राहवसरसंघाअंवज्ज
मुहक्खुडिअपक्खसेसंवठिअजम्॥ जलसंक्षोभालग्नंवहमानंविषमभग्नपत्रणानिवहं॥ राघवशरसंघातं
वज्रमुखोत्खंडितपक्षशेषमिवस्थितं॥ एवंजलसंक्षोभात्समुद्रजलप्रेरणादालग्नंतटेसंबद्धंराघवशरस्यसंघातंव

ज्रमुखेोखंडितपक्षशेषमिवस्थितं॥एवंजलसंक्षोभींत्सुमुद्रजलप्रेरणादालग्नंतटेसंबद्धंराघवशरस्यसंघातं
वहमानंकिंभूतंविषमंयथास्यात्तथाभग्नःपत्रणायाःपक्षरचनायानिवहोयत्रतंजलतटयोरभिघात्पत्रणाभंगइति
भावःउत्प्रेक्षतेइंद्रस्यवज्रमुखेनोखंडितंपक्षशेषमिवस्थितंतथाचभग्नयत्रणाविशिष्टोराघवशरोनभतिकिंतुव
ज्रखंडितःसकलपक्षशेषएवेत्यर्थः॥पत्रणायाःपक्षसाम्येनतदुक्तयाशरेपितदुपचारोः तएवतटएवतास्थिति
रितिभावः॥ ६६॥कारिकेसरियुद्धमाह॥कुंभोवग्गणणिवडिअकरिहत्थुक्खुडिअसीहकेसरभारम्॥सहअरिवि
रुआअणणवलन्तभमरपरिवत्तिअलआकुसुमम्॥कुंभावक्रमणनिपतितकरिहस्तखंडितसिंहकेसरभारम्
सहचरीवितुनाकर्णनवलद्भ्रमरपरिवर्त्तितलताकुसुमं॥एवंकुंभयोरवक्रमणादतिक्रमान्नियतितेनकरिणा
हस्तेनखंडितःसिंहस्यकेसरभारोयत्रतंकुंभारूढस्यकेसरिणःकेसरकर्त्तनंतलपतितेनापिकरिणाकरेणाक्रियत
इत्यर्थः॥एवंसहचरीविरुतेनवलतावक्रीभवताभ्रमरेणपरिवर्त्तितंलताकुसुमंयत्रतंविदूरस्थापिभ्रमरीसकामा
यद्दिशिसंज्ञाशब्दंकरोतिशब्दंपरिचित्यतद्दिशावलमानस्यमधुपस्याश्रयीभूतकुसुमपरिवर्त्तनमुत्कंठातिशयंव्य
जयतीतिकामोद्दीपकत्वमुक्तं॥ ६७॥चंद्रकांतसत्तामाह॥हिमसीअलेवहंतपवणामासविसमोससिअसेआ
ले॥दिअसासारक्खुडिएदरवसुआअसलिलेससिमणिप्पवहे॥हिमशीतलान्वहन्तंपवनावमर्षविषमोल्लसित
शैवालान्॥दिवसासारखंडितान्शशिमणिप्रवाहान्।एवंशशिमणीनांप्रवाहान्जलनिस्पन्दान्वहन्तंकिंभूतान्
हिमवच्छीतलान्एवंपवनस्यावमर्षणसंबंधेनविषमंउल्लसितानिकिंचिच्चंबलानिशैवालानियत्रनित्यंतज्जलसं
बंधादुत्पन्नानांशैवालानांपवनेनदरकंपनमित्यर्थःएवंदिवसस्यासारेणागमनेनाखंडितान्विच्छिन्नान्अतएव
दरशुष्कानिसलिलानियत्रतान्चंद्रकांतस्यनिशिजलोद्गमोदिवाशुष्कताभवतीतिभावःआसारःस्यात्प्रसरणेवेगा १६०
द्वर्षस्यहृद्दलइतिविश्वः॥ ६८॥पारदसत्तामाह॥विसमुल्लुलिअपरिमलकमलिणिवत्तपरिघोलिजलच्छाणम ले२
रगअसिलाअलोवरिपवित्तपारअरसेसमुव्वहमाणं॥विषमोल्लुलितपरिमलान्कमलिनीपत्रपरिघूर्णनशीलजल
च्छायान्॥ मरकतशिलातलोपरिप्रवृत्तपारदरसान्समुद्वहमानं॥एवंमरकतशिलातलस्योपरिप्रवृत्तान्संगतान्
पारदरूपरसान्समुद्वहमानंकिंभूतान्विषमंउल्लुलितउद्गतःपरिमलोविमर्द्दोयेषांतान्परिमलःसौरभंवाएवंकम
लिनीपत्रेपरिघूर्णमानस्यजलस्येवछायाकान्तिर्येषांहरिद्वर्णत्वेनकमलिनीदलमरकतयोःश्वैत्यादस्थिरत्वाच्चजल
पारदयोस्साम्यमित्युपमा॥ ६९॥सूर्यसंचारक्रममाह॥आरूहइवदिवसमुहेउद्धाअंतुद्धमंडलाउरतुरओ॥सम
मंडलवोलीणोओअरइवजंदिणावसाणम्मिरई॥आरोहतीवदिवसमुखेउद्धावमानोर्द्ध्वमंडलतुरगैस्तुरगः॥सम
मंडलव्यतिक्रांतोःवतरतीवयद्दिनावसानेरविः॥रविर्द्दिवसमुखेयंपर्वतमारोहतीवप्रातःस्वाभाविकंरवेरूर्द्धग
मनंदैवादाधारीभूतस्यवेलोद्देश्यकतयोत्प्रेक्षितःतथाचसुवेलमारोहतीतिप्रतिभासतइत्यर्थः॥ तदुक्तंउद्धावमा
नंवेगशालियद्रूर्ध्वमूर्ध्वगामिमंडलंतेनातुराःक्लिष्टास्तुरगायस्यभारवतामूर्ध्वरोहणेश्रमएवेत्याशयः॥एवंसमेसुवे
लमूर्द्धनिसमेनेमंडलेनव्यतिक्रान्तःसन्दिनावसानेसायमवतरतीवयस्मादित्यर्थात्॥पूर्ववद्दैवस्वभावसिद्धा
वतरणेतदवतरणत्वमुत्प्रेक्षितं॥ तेनतस्मात्सुवेलमितिप्रतीयतइत्यर्थः॥एतेनचरमाचरशैलापेक्षयाप्युच्चत्वंता
वत्दूरदीर्घत्वंचसूचितं॥ पाठांतरेऊर्ध्वायमानंयदर्थमंडलंमंडस्योपरिभागस्तेनातुरतुरगइत्यर्थः॥ ७०॥तारका
संचारमाह॥क्षुन्दन्तिजत्थवंथेणिसासुविसमपरिहारपरिअत्तत्ता॥कडएसुकउज्जोआपुरओवोलन्ततारआ
हिवणअरा॥जन्दन्तियत्रपथोनिशासुविषमपरिहारपरिवर्त्तमानाः॥कटकेषुकृतोद्योताःपुरतोव्यतिक्रान्ततारका
भिर्वनचराः॥यत्रपर्वतवनचराःनिशासुपथःक्षुदन्तिव्यतिक्रामन्तिकिंभूताःकटकेषुविषमस्यप्रदेशस्यपरिहारा
यत्यागायपरिवर्त्तमानाघूर्णमानाःएवंपुरतोव्यतिक्रान्ताभिर्गच्छंतीभिस्तारकाभिःकृतोद्योताःअन्योपिनिशिपरि
भ्राम्यपुरोगामिदीपिकोयोतेनगच्छतीतिध्वनितंतारकावनचरयोःतुल्यवत्संचारइत्युक्तं॥ ७१॥चंद्रसंचारमाह॥
पिअअमविओइआणंजत्थअसिहरमिलिअंकिलाअवहूणं॥वोलेइचाहमइलिअकुसुमञ्जलिसमुहताडिअं
ससिबिम्बम्॥प्रियतमवियोजितानांयत्रचशिखरमिलितंकिरातवधूनां॥व्यतिक्रामतिबाष्पमलिनितकुसुमाञ्जलि

संमुखताडितंशशिबिंबं॥यत्रचपर्वतेशिखरेमिलितंशशिबिंबंप्रियतमेनवियोजितानांविश्लेषितानांकिरातवधूनांबा
ष्पेनश्वासेनाश्रुणावामलिनितोयःकुसुमांजलिस्तेनसंमुखेग्मतःताडितंशतव्यतिक्रामतिगच्छतीत्यर्थः अंजलिस
मूहेनताडितमितिवाविरहिणीनांव्यवहितोपिचंद्रस्तापकःकिंपुनरतिसन्निहितइतिहृदयावेगोद्गतश्वासमलिने
नतापशांत्यर्थमानीतेनापिपुष्पेणानुषंगिकंचंद्रताडनमित्यर्थः॥७२॥गगनतोल्लमाह॥णहअलवगहसोहि
अंसविमानंअंसिहररुद्धरवअमारुअरभसविमानअम्॥रअणसिहरकिरणुग्गमेहिंवणराअअंदरिमुहेस्फुगुप्प
न्तसीहघणराअअं॥नभस्तलमिवग्रहशोभितंसविमानकंवाशिररुद्धक्षयमारुतरभसविमानदंविमानकंवा
रत्नशिखरकिरणोद्गमैर्वनरागदंघनरागकंचादरीमुखेषुव्याकुलायमानसिंहध्वनरावकं॥किंभूतंनभस्तलमि
वग्नहैर्नक्षत्रैःशोभितंउच्चत्वादेवंविमानंव्योमयानंतत्सहितंवितानंविस्तारंतत्सहितंवायद्वासविमानंतंविगतं
मानंयस्यतत्तद्भावोविमानतातत्सहितमपरिमेयमित्यर्थःसविमानगंवाविमानगादेवास्तत्सहितंसर्वमिदंद्व
योरप्यन्वेतिएवंशिखरैःरुद्धोयःप्रलयमारुतस्तद्भसस्यतद्वेगस्यविमानदमपमानदंप्रसरभंजकत्वाद्यमानना
कर्तारंवावितानदंवामारुतरभसवितानस्यतत्समूहस्यखंडकमित्यर्थः॥एवंरत्नशिखराणांकिरणोद्गमैर्वनेष्यामिवेष्थोरा
गदंलौहित्यंपद्मरागादिकांतिसंक्रमात्वनोरागोनुरागोयत्ररत्नादितएवतादृशंवावस्तुतस्तुरत्नशिखरकिरणोगंर
त्नशिखरकिरणेनदिशिदिशिप्रसारणेनउग्नमुद्गटएवंएधिवनराजकंएधःसमृद्धिस्तद्विशिष्टएधीनोसमृद्धोवनोमेघो
राजाचंद्रमास्तौयत्रतादृशंकंमस्तकंयस्यतं॥तयोःसत्वात्एवकंदरामुखेषुव्याकुलायमानोविमूर्छनशीलःसिंहस्यध्वनो
रावःशब्दोयत्रतंप्राशस्त्येकन्॥७३॥व्यापकत्वमाह॥जम्भिसमत्तवदिसाज्झीणवमहीकआवसाणंवणहम्॥अथमि
ओव्वसमुद्दोणट्ठंवरसाअरलंणिसणंवजअं॥यस्मिन्समाप्ताइवदिशःक्षीणेवमहीगतावसानमिवनभः॥अस्तमितइ १६३
वसमुद्रोनष्टमिवरसातलंनिषणमिवजगत्॥यस्मिन्पर्वतेदिशःसमाप्तापर्याप्ताइवतद्व्यतिरेकेणान्यत्रानवलोकनात्
महीक्षीणेवजन्दवनितंबपर्याप्तत्वात्नभःकृतावसानमिवकृतमवसानमंतोयस्येत्यर्थःयावदाकाशस्यतेनैवव्याप्तत्वेन

व्यवछिद्यवृत्यभावात्अस्तमितइवसमुद्रःवृहत्वक्रांतत्वेनकंदरान्तर्गतत्वेनवादृश्यत्वात्रसातलंनष्टमिववृहन्मूलाव
ष्टब्धत्वाजगन्निषण्णमिवमूलमौलिपार्श्वेषुपर्यवसितत्वात्॥७४॥विकटकूटतामाह॥जस्ससिहरेसुबहुसोवलन्तिबल
माणजुगवलन्तरखंधा॥भीआरुणपरिवत्तिअघोणाघोलन्तचामरारइतुरआ॥यस्यशिखरेषुबहुशोवलन्तिवलमानयु
गबलत्स्कंधाभीतातुणपरिवर्त्तिघोणाघूर्णमानचामरारवितुरगाः॥रवितुरगायस्यशिखरेबहुशोवलन्तिवक्रीभव
न्तिकिंभूताःवलमानेनविकटप्रदेशेलगित्वावक्रीभवतायुगकाष्टेनवलन्तोवक्रीभवन्तःस्कंधायेषांतेवक्रयुगाक्रान्तत्वा
त्स्कंधस्यवक्रत्वमितिभावःअतएवस्कंधयुगभंगाद्द्रावणाद्वाभीतेनारुणेनसारथिनापरिवर्त्तिताऋजुमार्गलाभायभ्रा
मयित्वापश्चात्कृताअतएवघोणायोघूर्णमानंचामरंयेषांतियद्धुखत्तयाचामरभ्रमणमितिभावः॥घोणातुप्रोथमस्त्रिया
मित्यर्थः॥७५॥ज्योतिर्लोकसत्तामाह॥दीसन्तिजोइसवहेणिसाकुचोइऊणकुसुमणिवहंवजहिं॥गहिअपढमुच्चआइं
वपहाअवोछिण्णतारआइंइवणाइं॥दृश्यन्तेज्योतिःपथेनिशामुग्धध्वाकुसुमनिवहमिवयत्रगृहीतप्रथमोच्चयानीवप्र
भातव्यवछिन्नतारकानिवनानि॥यत्रगिरोज्योतिःपथेनन्तत्रलोकेप्रभातेव्यवछिनाःरविरोचिषाभिभवाद्विरलास्तारका
यत्रतथाभूतानिवनानिदृश्यन्तेकानीवकुसुमनिवहंऊर्ध्वेवधृत्वेवनिशायामेवकिंचिद्धृत्वाकिंचिद्गृहीतमितिप्रभालेश
स्वायत्रान्तरालदृश्याःकतिपयतारकाःपुष्पतुल्ययातयेप्रेक्षितास्तथाचद्वितीयवचयइवमध्यंदिनेताअपिनस्थास्यंती
त्यञ्चलमुक्तंयद्वानिशाकुसुमनिवहंधृत्वेवगृहीतप्रथमोच्चयानीवअवचयशब्दस्यावइन्वितार्थकत्वेनगृहीतप्रथ
मावचितानि॥निशाकधृत्वाप्रभातेत्रोटितपुष्पाणीत्यर्थः॥७६॥महिषाणांनिद्रामाह॥जत्थअगमेन्तिणिद्दंणिसासु
णीसासविहुअपेलवजलआ॥चंदपरिमासपडिअअससिमणिसलिलोज्झराहआवणमहिसा॥यत्रचगमयंति
निद्रांनिशासुनिश्वासविधुतपेलवजलदाः॥चंद्रप्रतिमर्षप्रकटितशशिमणिसलिलनिर्झराहताश्चमहिषाः॥यत्रचप
र्वतेवनमहिषानिशासुनिद्रांगमयंसतिवाहयतिकिंभूताचंद्रस्यप्रतिमर्षणस्पर्शेनप्रकटितंयच्चंद्रकांतमणिसलिलंत
स्यनिर्झरेणाहताःस्पृष्टाअतएवनिश्वासेनविधुतादूरंप्रेरिताःपेलवाःकोमलाजलदायैःप्रेरणेपेलवत्वंहेतुस्तथा

चद्दिवासंनिहितरविसंतप्ततयानिशितथाविधशैत्यलाभान्निर्दत्यानिद्राधिक्यंनिश्वासप्रकर्षेणसूचितं॥ ७७॥ महीर
गसंतामाह॥ जत्थअसिहरावडिअंवलइसिलाभित्तिविसमपासहुडुअं॥ भुअंअइंदमणिणिहंसणपणट्ठउज्जोअ
संचअंससिबिंबं॥ यत्रचशिखरापतितंवलतिशिलाभित्तिविषमपार्श्वायितंभुजगेंद्रमणिनिघर्षणप्रनष्टोद्योतसंचयं
शशिबिंबं॥ यत्रचगिरेःशिखरेआपतितंसत्शशिबिंबंवलतिव प्रतिहतपथलाभायभ्रमतिकिंभूतंशिलाभित्त्योपविषमं
यथास्यात्तथापार्श्वायितंतिर्यग्विवृत्तं पुरतःप्रतिरोधादित्यर्थः॥ एवंतत्रैवभुजगेंद्रमणेर्निघर्षणेनप्रनष्टःछन्नउद्योता
नांसंचयोयस्यतंतथाचशशितेजोभिभावकतेजःशालितयाचंद्रादपिफणामणेराधिक्यमुक्तं॥ ७८॥ कंपोत्कर्षमा
ह॥ आमोइअपाआलोजस्सखउप्पाअकंपणिद्दअविहुओ॥ पव्वालेइमहिअलंअवलिछिअसेससाअरोमअर
हरो॥ आमोचितपातालोयस्यक्षयोत्पातकंनिर्दयविधुतः॥ प्लावयतिमहीतलंअप्रतीष्टशेषसागरोमकरगृहःक्ष
यःप्रलयस्तद्रूपोत्पातकृतकंपननिर्दयंविधुतआन्दोलितोमकरगृहःसमुद्रोयस्यमहीतलंतदग्रभूमिंप्लावयतिकिं
भूतःआमोचितंत्यक्तं॥ पातालंयेनकंपकृतोच्छलनात्॥ तथाचविश्वव्यापनक्षमोप्येतत्कृतप्रतिषेधादन्यत्रगंतुंनश
क्नोतीतिभावस्तदुक्तंअप्रतिष्ठाअनासादिताःशेषसागरायेनएतत्कृतव्यवधानादेवेतितुंगत्वदृढत्वदृढमूलत्वान्युक्ता
निवस्तुतस्तुयस्यक्षयोत्पातकंपेनविघ्नतःसमुद्रोमहीतलंप्लावयतीत्यन्वयस्तथाचसागरान्तरनैरपेक्ष्येणापिप्रल
येमहीयद्व्याप्नोतितत्केवलकंपादुच्छलितःसन्नित्यर्थंक्षितंतेनसमुद्रक्षोभजनककंपाधारत्वेनमहत्वमुक्तमितिमदु
भीतःपंथाः॥ ७९॥ मिथःसिंहयोःसहावस्थितिमाह॥ जत्थभमन्तिणहंकुससिहरसमासन्नमुहलकड्ढिअजलआमु
हपडिअविज्जुमंडलदरपज्जलिअधुअकेसराकेसरिणो॥ यत्रभ्रमंतिनखांकुशशिखरसमासन्नमुखरकृष्टजलदा
मुखपतितविद्युन्मंडलदरप्रज्वलितधुतकेसराःकेसरिणः॥ यत्रकेसरिणःसिंहाभ्रमंतिकिंभूताअंकुशाकारनखशिख
रेसमासन्नालग्नाविद्धत्वादतएवमुखराःपीडावेशेनशब्दायमानास्संतआकृष्टाजलदायैस्तएवसंमुखत्तयामुखेप
तितेनविद्युन्मंडलेनकिंचित्प्रज्वलिताअतएवधुताःकेशरायैस्तेतथाचकरिभ्रमान्नखविपाटितजलदोदरनिर्गतविद्युज्ज्व ३६२

लितानांकेसराणांनिर्वापणाययथाकंपनंतथातथाधिकमग्न्युत्तेजनमतःपरिभ्रमणमितिभावः॥ ८०॥ हरिचंदनेषु
गजस्थितिमाह॥ ओज्झरमज्जणसुहिआजत्थपुणोविदिवसाअवकिलिम्मन्ता॥ णिधाअन्तिणिसण्णाखंधुग्घुट्ठहरि
अंदणदुमेसुगआ॥ निर्झरमज्जनसुखितायत्रपुनरपिदिवसातपक्लाम्यमानाःनिर्घान्तिनिषण्णाःस्कंधोद्धृष्टहरिचंदनद्रु
मेषुगजाः॥ यत्रगजाःस्कंधेषुप्रकांडेषुस्कंधेनस्वासेनवाउद्धृष्टाःकंडूमार्जनायकृतवर्षणायेहरिचंदनद्रुमास्तेषुनिषण्णा
स्संतःशैत्यान्निर्वान्तिसुखीभवन्तिकिंभूतानिर्झरेषुमज्जनेनसुखिताः पुनरपिदिवसातपेनक्लान्तिनीयमानास्तथाचप्र
थमतापेनमज्जनंतदनुतापेनछायाश्रयणमितिसर्वथासुखजनकत्वमुक्तंनिर्वाणमस्तगमनेनिर्वृत्तौजलमज्जनेनि
र्वाणमपवर्गेपिनिर्वाणंनिर्वृतिंविदुरितिधरणिः॥ ८१॥ रविगतागतमाह॥ जत्थअभमिरमहुअरंकडअलआलग्गध
वलचामरपम्हम्॥ ससिउध्दुअकुसुमरअणज्जइतुरिआणरइतुरंगाणगअम्॥ यत्रचाभ्रमशीलमधुकरंकटकलता
लग्नधवलचामरपक्ष्मश्वसितोद्धूतकुसुमरजोज्ञायतेत्वरितानांरवितुरंगाणांगतं॥ यत्रचदक्षिणायनेत्वरितानांरवेस्तु
रंगानांगतंज्ञायतेकथमित्यत्रआहकिंभूतंकटकलतासुलग्नानिधवलानिचामराणामर्थात्कंठादिनिबद्धानांपक्ष्मा
णिरोमाग्राणियत्रअतएवतत्संबद्धाभ्रमणशीलामधुकरायत्रलतावर्तिनएवइत्यर्थादेवंश्वसितेनहयानामेवउद्धूतमुत्था
पितंकुसुमानांरजोयत्रलतानामेवतथाचोड्डीनमधुकरचामरपक्ष्मकुसुमपरागोद्गमैरेवानुमीयतेरविरनेनपथाग
तइतिनतुदृश्यतेकुंजकंदरादितिभावः॥ पक्ष्मसूत्रादिसूक्ष्मांशेकिंजल्केनेत्रलोमनीतिविश्वः॥ ८१॥ सुरबन्दीसत्तामा
ह॥ अंजणराएणसइधूसरंतआइंगंडअलेसुखलिअविसमोसरत्तआइं॥ सुरबन्दीणणअणगलिआइंअंसुआइं
कप्पलआणजत्थमइलेन्तिअंसुआइं॥ अंजनरागेणसदाधूसरायमानानिधूसरान्तानिवागंडतलेषुस्खलितविषमा
पसरन्ति॥ सुरबंदीनांनयनगलितान्यश्रूणिकल्पलतानांयत्रमलिनयंत्यंशुकानि यत्रसुरबंदीनांरावणेनबंदीकृत्यस्था
पितानांदेवस्त्रीणांनयनयोर्गलितान्यश्रूणिकर्तॄणिकल्पलतानामंशुकानिवस्त्राणिमलिनयंतिसकलपदार्थाकर
त्वेनतत्रवस्त्राणामपिसत्वात्तैरेवाश्रुप्रोंछनात्सन्निधेनाश्रूणांस्वतएवपतनाद्वेतिभावः कथमित्यत्रआह॥ अश्रूणिकिं

भूतानिअंजनस्यरागेणवर्णेनरदाधूसरायमानानिजकज्जसंपर्कधूसरछवीनीत्यर्थः॥धूसरोंतःस्वरूपंयेषामित्यर्थे
चातएवमालिन्यहेतुकत्वमितिभावःसकज्जलाश्रुसंपर्कादुभयथाप्येकविशेषणंवापुनःकिंभूतान्यश्रूणिविरहा
त्संतापाद्वदौर्बल्आन्ततोन्ततत्वेनगंडतलेषुस्खलितानिसंतिविषमंअपसरंत्तिदिशिदिशिपततीत्यर्थः॥८३॥दैर्घ्या
त्कर्षमाह॥एकसिहरेसमप्पइजस्सअसोसविअमलिअदुमसंघाओ॥सइदक्खिणुत्तराअणणाहगमणागम
णविलुलिओरइवंथो॥एकशिखरेसमाप्यतेयस्यचशोषितद्रुमसंघातः॥सदादक्षिणोत्तरायणनभोगमनाग
मनविलुलितोरविपथः॥यस्यचएकस्मिन्नेवशिखरेरविपथःसदासमाप्यतेकीदृक्दक्षिणोत्तरायणाभ्यांनभसि
गमनागमनेनविलुलितोघृष्टस्तथाचायनद्वयेप्यध्वनांमिथोव्यवधानोकर्षेप्येकशिखरएवसदापर्य्यवस्यतीतिशि
खरस्यबृहत्वंपुनःकीदृक्शोषितःसन्मृदितोद्रुमाणांसंघातोयत्रनित्यसंचारादितिभावः॥८४॥वृद्धिमाह॥
जेणभरभिणवस्कहंअप्फुणरसाअलंसमोत्थइअणहं॥सव्वदिसाविछूढंपरिवड्ढंतेणपरिवड्ढिअंवतिहुअण
म्॥येनभरभिन्नवसुंआक्रांतरसातलसमवस्थगितनभः॥सर्वदिग्विक्षिप्तंपरिवर्द्धमानेनवर्द्धितमिवत्रिभुव
नं॥परिसर्वतोभावेनवर्द्धमानेनयेनगिरिणात्रिभुवनंवर्द्धितमिवदूरदेशव्यापिकृतमिवेत्यर्थः।तदुपपादयति किंभू
तंयेनगिरिणाभरेणदेहपरिणाहेनभिन्नाविद्धावसुधायत्रआमूलनिखातत्वात्अथयेनआक्रान्तंरसातलंयत्रमूलवि
स्तारात्तथायेनसमवस्थगितमतिव्याप्तंनभोयत्रशिरसोमहत्वात्तथाभूतमतएवयेनसर्वासुदिक्षुविक्षिप्तंप्रेरितंतथाचोप
रिशिखरसम्बध्यनभःसमुत्तोलनंपरितोमूलस्थोत्सेनपृथिव्याःप्रसारणमधस्ताच्चमूलव्यध्यापातालयंत्रणमित्येवंक्रमा
देकस्यैवत्रैलोक्यप्रेरणक्षमत्वेनमहत्वमुक्तं॥८५॥सदासर्वर्त्तुसत्तामाह॥गंधाबद्धमहुअरावसन्तिजत्थसमअं
स्करअणाणुगआ॥अण्णोण्णपडिऊलाएककंभणिअलिअसकरगअव्वनदू॥गंधावद्धमधुकरावसन्तियत्रसमकं
स्करघनानुगताः॥अन्योन्यप्रतिकूलाएकस्तंभनिगलितस्करगजाइवऋतवः॥यत्रअन्योन्यप्रतिकूलाःपरस्परविरुद्धा
अपिऋतवःसमकमेकदैववसंतिरावणप्रभावाद्देशभेदाद्वाएकस्तंभेनिगलिताःस्करगजाइवयथातेमिथोविरुद्धाअपि १६३

वसंतीत्यर्थःउभयेकिंभूताःगंधेनसौरभेनऋतुपक्षेपुष्पस्यगजपक्षेदानस्यआबद्धाःसंबंधामधुकरायैस्तेऋतुपक्षेगंधा
बद्धमधूनांकर्त्तारइत्यर्थेर्थःएवंस्करवनेननन्दनादिनाऽनुगतास्तत्सहितान्यपिवसंतीत्यर्थःयद्वास्करजनानुगताःस्कर
गणानुगतावास्करवनानुगतावास्करवनंशोभनवाद्यादिशब्दःस्करवनानुगतावास्वनासंस्थानविशेषःसर्वत्रतृतीयास
मासइतिऋतुपक्षेगजपक्षेपिसर्वमिदंसमानमेवस्करवनंअनुगताआश्रिताइतिविशेषःस्करत्नानुगताइत्यधिकंस्कर
त्नेनमुक्ताफलेनानुगताइत्यर्थः।वयंतुएकस्तंभस्कवेलएवनिगलिताःस्करगजाइवयत्रऋतवोवसंतीतिसहोपमातथाच
यथादिग्गजाइहवसंतितथाऋतवोपीत्यर्थस्तेननानादिग्वर्त्तिसकलदिग्गजाधिकरणत्वेनमहत्वमुक्तमितिब्रूमः॥८६॥
शिखरान्तरालमाह॥दीसइवविलाअन्तोजत्थसमासणदहमुभआविग्गो॥सिहरन्तरालपडिलग्गमोइअणिक्कमण्डलोदि
असअरो दृश्यतेविफलायमानोयत्रसमासन्नदशमुखभयाविग्नःशिखरान्तरालप्रतिलग्नमोचिततिर्यङ्मण्डलोदिवसकरः
यत्रदिवसकरोविपलायमानोदृश्यतेकुतइत्यतआह॥समासन्नोनिकटस्तद्भयादाविग्नउद्विग्नःएवंशिखरयोरंतराले
मध्येलग्नंसन्मोचितंसंमुखीकृतंतिर्यग्भूतंमण्डलंयेना।अन्योपिपलायमानःकंटकादिलग्नंवस्त्रादियथातथामोचयित्वाग
छतीतिध्वनिःअणिक्कतितिर्यगर्थेदेशी॥८७॥किन्नराणांगानमाह॥जत्थअमआणमणहरकिणरगीअस्कहिओणि
मिल्लच्छाणम्॥विसमिअरोमंथाणंगइविउलंचिरेणरोमस्थायां यत्रचमृगाणांमनोहरकिंनरगीतस्कखितावमीलदृक्षाणं
विश्रामितरोमंथानामितिउर्द्धंचिरेणरोमस्थानं यत्रचमनोहरेणकिन्नराणांगीतेनतानेनस्कखितानांस्कहितानांत्रस्तानांवा
नरएवस्करववशाद्वमीलंतीमुकुलायमानेअक्षिणीयेषांतथाभूतानांसतांविरुद्धंभाववशादुत्फुल्लंरोमकर्तृचिरेण
स्थानंएतिपूर्वावस्थानंप्राप्नोतिसुखस्यधिकसमयव्यापित्वादितिभावः॥कीदृशांनांविश्रामंनीतोरामंथोऽलीकचर्वणंयैभा
वर्णानास्वाभाव्यात्।विस्मृतरोमंथानामितिवाविषमितरोमंथानमितिवाविषमितान्तराविछेदीतइत्यर्थः॥८८॥सदाकुमु
दविकासमाह॥तीरपअन्तसुहलकलहंसरोअएसुकुविअगइन्दवद्धकलहंसरोअएसु॥कुमुअवणाणजत्थणह
अदग्गआणं॥रविअरदंसणेविणहअंदलग्गआणं॥तीरप्रवृत्तमुखरकलहंसरोवकेषुकुपितगजेंद्रबद्धकलहंसउ

दकेषु उदरेषु वा सरोवरेषु वा॥ कुमुदवनानां यत्र नाभश्चंद्रलग्नानां रविकरदर्शनेपि न हतं दलाग्रतानां॥ यत्र गिरौ सरःक
तृ उदकेषु उदरेषु वा जलपानार्थमागताभ्यां कुपिताभ्यां गजेंद्राभ्यां बद्धः कलहो यत्र तज्जातयुद्धमित्यर्थस्तथाभूतंति
ष्ठतीत्यर्थात् कथंभूतेषु तीरप्रवृत्तैस्तीरसंचारिभिः कलहंसैरोचकेषु रुचिकारकेषु तेषां रोचकेष्विति वा॥ एवं यत्र कुमु
दवनानां दलाग्रेषु तानं विकाशो रविकराणां दर्शनेपि सूर्योदयेन हतं नापगतमित्यर्थः अत्र हेतुमाह किंभूतानां नभसि चं
द्रलग्नानां मिलितानां तथा च मुद्रन सामग्री सत्वेपि नित्यं विकाससामग्री सत्वं सूर्योदय्य परिवर्तित्वं च कुमुदानां चंद्रमील
ने नोक्तं॥ तदुक्तं रविकरस्य दर्शनमात्रमत एव दर्शनमिलनयोर्मिलनस्य बलवत्त्वं तत्कार्यो विकासो भवति न तु दर्शनका
र्यं मुद्रणामिति भावः यद्वा यत्र सरोवरेषु कुमुदवनानां दलाग्रतानं न हतं किंभूतं गजेंद्राभ्यां बद्धः कलहो यस्मै तथाभूतं ग
कमेव कुमुदं ग्रहीतुमुद्यतनयो युद्धमित्यर्थ इत्ति मद्व्याख्या संप्रदायस्तु सरोवरेषु कुपितगजेंद्रबद्धकलहमिति वा॥ ऋ
 वेल विशेषणं यत्र गिरावित्यस्येतनेन संबंधीति व्याचष्टे॥ ८९॥ शेषनागावष्टंभतामाह॥ वलमाणम्मि महुमहे जत्थ
अपाउछलन्तरअणुज्जोअं। विअडं फणप्भारं गाढभरुत्ताणिअं णिमेइ अणन्तो॥ बलमाने मधुमथने यत्र वयादोछलद्र
त्नोद्योतविकटफणप्राग्भारं गाढभरोत्तानितं नियोजयतितीत्यनंतः॥ अनंतः शेषः फणाशयाने मधुमथने बलमाने कृत
पार्श्वपरिवर्तने सति गाढभरेण विश्वंभरागौरवेणोत्तानीकृतं विकटं महान्तं फणाप्राग्भारं यत्र गिरौ नियोजयति पतनाभि
येन यन्मूलेन अवस्थापयतीत्यर्थः किंभूतं पादेषु प्रत्यंतपर्वतेषु उछलन्त्नानामुद्योतो यस्मात्त फणस्योत्तानीभावात्
तथा च पादपर्वता अप्यस्यापातालमूला अयं च विश्वंभराविश्वंभरभारेण्यनंतस्यावष्टंभ इति भवः फणानामुत्तानीभा
वेन तन्मनीनामधष्यतित्वेन तत्कांतीनां फणाभिरेवव्यवधानादूर्ध्वमनागमने ऋवेलस्यैव पादमूलेउछलनमिति तावद्
रमूलकत्वमस्योक्तमिति मदुन्नीतः पंथाः॥ ९०॥ चंद्रस्यावस्थामाह॥ दीसइ कडअह्लीणो जस्स अविवरसरिस्सभड
मअछाओ॥ भवहोवासम ऊहो सिहरुज्झरभिण्णमण्डघमिअंको॥ दृश्यते कटकालीनो यस्य च विवरसदृशोद्भटमृग
छायः॥ उभयावकाशमयूखः शिखरनिर्झरभिन्न इव मृगांकः॥ यस्य च कटके आलीनो मृगांकः शिखरनिर्भरेणभिन्नं १६४

ताडितं मंडलं यस्य तादृश इव दृश्यते अत्र बीजमाह विवरसदृशी उद्भटा मृगस्य छाया यत्र अत एवोभयावकाशे पार्श्वद्वये म
यूखा यस्य तथा च मृगांकस्य कटकावरुद्धत्वेन मध्यभागः स्यामिकायाः प्रकटतया तुच्छ इव लक्ष्यते शुभ्रकांतिस्तु कटका
वरोधाद् एवसंमुखमगच्छंती पार्श्वयोर्द्विधाभूयोर्ध्वगछतीति पतनिर्झरत्वेन भासत इत्ति भावः॥ ९१॥ त्रैलोक्याधारतामा
ह॥ मज्जकरालाजहिं तिणि विसमअंणिरन्तरपकुन्ताइं॥ थोनुणए हरिभुएबलआइ व भुअणमण्डलाइ ठिआइं॥ मध्य
करालानि यत्र त्रीण्यपि समकं निरंतरप्रभूतानि॥ स्थूलोन्नते हरिभुजे वलयानीव भुवनमंडलानि स्थितानि। यत्र त्रीण्य
पि भुवनमंडलानि मंडलाकाराणि भुवनानि स्थितानि कीदृशानि मध्यकरालानि सछिद्राणि ऋवेलेनैव विद्धत्वादेवस
मकं तुल्यं निरंतरं निस्संधि प्रभूतानि मिलितानि कानीव स्थूले उन्नते हरिभुजे वलयानीव यथा यथोक्तविशेषणविशि
ष्टानि वलयानि त्रिविक्रमस्य भुजे स्थितानीतिरसातलभूतलनभस्तलानि भित्वा निर्गतो यमिति भावः हरिभुजऋवेल
योर्वलयभुवनयोः साम्यं॥ ९२॥ नक्षत्राणां गतागतमाह॥ सोसिअदुमा रइवहा णववणराइ ऋहसीअरा ससिवंथा॥
जश्ववणन्तरतणुआ णवरणणज्जन्तितारआगइमग्गा॥ शोषितद्रुमा रविपथा नववनराजिऋखशीतला शशिपंथा यत्र
वनान्तरतनुकाः केवलं न ज्ञायंते तारकागतिमार्गाः यत्र गिरौ शोषिता द्रुमा यत्र तथाभूता रविपथा एवं नूतनाया वन
राजिस्तया तद्द्वाऋखदाः शीतलाः शशिपथा अपि ज्ञायंते केवलं वनांतरे वनमध्ये तनुकाः कृशास्तारकाणां गतिमार्गा
न ज्ञायंते द्रुमशोषणशैत्ययोरनुमापकत्वाद्रविचंद्रयोः पंथा ज्ञायते तारकाणां तु तथाविधचिन्हाभावात् स्वतः कृशला
च्च न ज्ञायत इत्यर्थः॥ ९३॥ देवस्त्रीसंचारमाह॥ अलअपडिलग्गगंधं तिअसवहूणं सिलाअलोत्थअमलिअं॥
आक्खिवइ जत्थ पवणो आऋखन्तऋरहिन्तमालकिसलअं॥ अलकप्रतिलग्नगंधं त्रिदशवधूनां शिलातलावस्तृतमृ
दितं॥ अक्षिपति यत्र पवनोऽवश्युष्यऋरभिंतमालकिशलयं॥ यत्र पवनस्त्रिदशवधूनां तमालकिसलयं अक्षिपति
करणात्पातयतीत्यर्थः॥ कीदृशं अलकेषु प्रतिलग्नः संक्रांतो गंधो यस्य सहवासात् अलकात् प्रतिलग्नो गंधो यत्रेति वा
गंधतैलादि संबंधाद् अत एव अवश्युष्यऋसुरभिं एवं शिलातले अवस्तृतं अत एव शयनेन गंडद्वयाभ्यां मृदितं अथ वा त्रि

दशवधूनामितितृतीयार्थेषष्टीतथान्वयत्रगिरोपवनत्रिदशवधूभिः॥शिलातलेऽवस्तृतंशयनपरिस्तरणीकृतंसत्मृदितं
दृष्टंतमालकिशलयंआक्षिपतिदिशिदिशिप्रेरयतीत्यर्थःविशेषणांतरंतुपूर्ववत॥९४॥मेघानांगतागतमाह॥पवणा
हअपल्हत्थादरिसुजस्सअपुणोविलगंतिणहं॥पडिसोत्तपत्थिउम्मुहमुहुत्तपीअसलिलाद्दरासलिलहरा॥पवनाह
तपर्यस्तादरीषुयस्यचपुनरपिलगंतिनभः॥ प्रतिस्रोतःप्रस्थितोन्मुखमुहूर्तपीतसलिलनिर्भरासलिलधराः॥सलि
लधरामेघायस्यचदरीषुपवनेनाहतास्ताडितास्संतःपुनरपिनभोविलगंतिमिलंतीत्यर्थःकिंभूताःप्रतिस्रोतसाविपरी
तमार्गेणप्रस्थिताअतएवउन्मुखउर्ध्वमुखाएवंमुहूर्त्तंव्याप्यपीतःसलिलनिर्भरोयेस्तेयद्दरीजलपानार्थंगतामेघा
स्तत्रत्यवनोद्भूतत्वादीषदेवजलंनिपीययेनेवागतास्तेनेवपथागगनंगच्छंतीतिदरीवायोरूर्द्धगतित्वेनविकटोदरत्व
मुक्तं॥९५॥श्वापदव्याकुलमाह॥अद्दिट्ठगअपणोल्लिअपडंततडव्वाअमुच्छिउट्ठिअसीहे॥सद्दूलरवविसंटुलनिव
डिअअण्णोण्णलग्गकिण्णरमिहुणे॥अदृष्टगजप्रणोदितपतत्तटव्वातमूर्छितोत्थितसिंहान्॥शार्दूलरवविसंष्टुल
निपतितान्योन्यलग्नकिन्नरमिथुनान्॥यस्यकृष्णमणिमयानागंडशैलानामर्द्धान्तास्सेवमानानामाश्रितोनांत्रिदशवधूनां
मनुरागोमनोभिनिवेशःशिथिलत्वंनप्राप्तइत्यग्निमस्कंधकेयोजनाकीदृशान्अदृष्टनाज्ञातेनगजेनप्रणोदिताःसिंहना
शायप्रेरिताअतएवपतंतोतेतटाःपर्वतैकदेशास्तदभिघातेनप्रथमंमूर्छिताअथोत्थितासिंहायेषुतान्एवंशार्दूलर
वेणविसंष्टुलंसंभ्रांतमतएवनिपतितंअथान्योन्यलग्नमिलितंकिन्नराणांमिथुनंयेषुतान्॥९६॥तुंगअडोभ्भुरमुह
लेजस्सअकसणमणिगंडसेलद्धन्ते॥सेवन्तीणणपत्तोतिअसवहूणसिठिलत्तणंअणुराओ॥तुंगतटनिर्झरमुखरान्
यस्यचकृष्णमणिगंडशैलार्द्धान्तान्॥सेवमानानांनप्राप्तस्त्रिदशवधूनांशिथिलत्वमनुरागः॥गंडशैलार्द्धांन्तान्किं
भूतान्तुंगस्यतटस्यपर्वतैकदेशस्यनिर्झरेणमुखरानूर्ध्वतःपततांशब्दायमानानुमुग्मकं॥आदिकुलकं॥९७॥ ॥
सुवेलोत्कर्षदर्शयारामदासप्रकाशिनारामसेतुप्रदीपस्यपूर्णाभून्नवमीशिखा॥९॥ ॥अथसुवेलारोहणमाह
॥ ॥अहणिअअमहिहरेसुवसुवेलसिहरेसुणिव्वडिअवीसत्थं॥परिसंठिअंहअम्मिवअहअम्मिविदहमुहे॥पवं १६९

अ गसेणम॥अथनिजकमहीधरेष्विवसुवेलशिखरेषुनिर्वलितविश्वस्तंपरिसंस्थितंहतइवाहतेपिदशमुखेप्लवंगमसे
न्यं॥अथानुवेलदर्शनोत्तरंप्लवंगमसैन्यंसुवेलशिखरेषुपरिसंस्थितंआवासग्रहणंचकारेत्यर्थःनिजकेषुमहीधरेष्विवय
थास्वीयशैलेषुस्थितिःक्रियतेएतेनस्वेच्छाहारविहारक्षोभानामामोटनादिनावानराणामभयत्वंरावणस्यचप्रतापभंगःसू
चितस्तदुक्तंहतेपिसकलसामग्रीसचिवेविद्यमानेपिदशमुखेहतइवसतिनिर्वलितंसानौसानौपृथक्भूतंविश्वस्तम
क्षुब्धमितिसैन्यक्रियायारन्यतरविशेषणं॥ यद्वानिजकंतिसाहचर्येणनिर्वलितेतिहतइवेति॥साहचर्येणपरिसंस्थितमिति
योज्यं अत्रनिर्वलितेतिपदेनकपीनामुत्साहोप्लवंगयोःसुवेलविस्तारस्यचप्रकर्षउक्तःनिजमहीधरसुवेलशिखरयोरुपमा
सभंगप्युत्प्रेक्षाचमत्कारिणी॥१॥अथसुवेलापमर्दमाह॥रइणाविअणुविछुणावीसत्थंमारुएणविअणालिद्धा॥तिअ
सेहिंविपरिहरिआपवंगमेहिंमलिआसुवेलुच्छंगा॥रविणाप्यनुज्झणाविश्वस्तंमारुतेनाप्यनालीढाः॥त्रिदशैरपिपरिह
ताःप्लवंगमैर्मृदिताःसुवेलोत्संगाः॥येरविणाप्यनुक्षुण्णाउर्ध्वमनाक्रान्ताःकिरणानामगम्यत्वातविश्वस्तंयथास्यादेवंमारुते
नाप्यनालीढाअस्पृष्टाःकुंजकंदरादिव्याकुलेनाभयात्त्रिदशैर्विमानचारिभिरपिपरिहृतानाक्रांतारावणत्रासात्तेसुवेलोत्सं
गाःप्लवंगमैर्मर्दिताःक्षोभामोटनादिनाखलीकृताइत्यर्थःएतेनकपीनामुत्साहोत्कर्षोरावणापकर्षश्चसूचितःयद्वासर्व
त्रकुंजकंदरादिगहनत्वेनरावणभयेनचेतियोजनीयंविरोधालंकारः॥२॥अथलंकादर्शमाह॥रिउणअरित्तिसरो
संजनयसुआ॥गअणिवसइत्तिसहरिसंपहुणालंकाहिमुहीउहअरसन्दोलिआविइण्णादिट्ठी॥रिपुनगरीतिसरोषंज
नकसुताःत्रनिवसतीतिसहर्षं॥प्रभुणालंकाभिमुखीउभयरसान्दोलिताकिंकीर्णाविर्तीर्णाचादृष्टिः॥प्रभुणारामेणलं
कासंमुखीदृष्टिरार्द्रायकारस्यरिपोरियंनगरीतिसरोषंविकीर्णाविशेषतश्चांचल्यातुल्यादिमतीक्षिप्ताजनकसुताम
त्रेयसीअत्रैवपुरिनिवसतीतिसहर्षंवितीर्णादत्ताप्रसादात्कुतूहलत्वादिधर्मविशिष्टासमर्पितेतियावत्अतएवोभयर
सेनपरस्परविरोधिनाक्रोधोत्साहरूपेणान्दोलिताःविभाव्यमानकमलदलशतव्यतिभेदवत्समयसौक्ष्म्यणखस्वचे
ष्टावेशिष्ट्येनेरंतर्यादेकमुपमृद्यापरेणावगाढमारब्धाप्यनवगाहितासत्प्रतिपक्षानुमानाभ्यांपक्षइवेतिक्रोधहर्षरूप

भावसंधिः॥ ३॥ अथरावणक्षोभमाह॥ तोस्फ्रअरामागमणोपवअकन्तसिहरेण जाअमरिसो रोसेणगलिअधीरो समं
स्फवेल्लेणकंपिओदहवअणो॥ ततः श्रुतरामागमनः प्लवगाक्रान्तशिखरेण जातामर्षरोषेणगलितधैर्यः समंस्फवेल्लेन
कंपितोदशवदनः॥ ततोमंतरंप्लवगैराक्रान्तानिशिखराणियस्यतथाभूतेन स्फवेलेन समंदशवदनःकंपितःक्षोभात्
स्फवेलोपिकपिचंक्रमणकंपितइत्यर्थः किंभूतोदशवदनःश्रुतरामस्यागमनंयेनततथाजातोऽमर्षःपरोत्कर्षासहिष्णुताय
स्यतिरोषोद्वेदःएवंरोषेणगलितंधैर्यंयस्यप्रस्वेदाधरस्पंदनयनारुण्यादिव्यक्त्यादयादितिधैर्यरूपभावशान्तिस्था
सरूपाभावोदयश्चगिरिरपिश्रुतंविश्रुतंख्यातंरामागमनंयत्रजातआमर्षोमर्षणंप्लवगविमर्दनंयत्रगलितंधैर्यंस्थि
रतापस्यैतादृशःरावणस्यक्षोभवर्णनमनुचितमितिरोषेणकंपितइतिवा॥ ४॥ अथदिवसापायनमाह॥ तावअआसण
ठिअकइवलणिग्घोसकलुसिअस्सभअअरं॥ दहवअणस्ससमोसरिअपरिअणंमुअइदिट्ठिवाअंदिअसो॥ तावच्चा
सन्नस्थितकपिबलनिर्घोषकलुषितस्यभयकरं॥ दशवदनस्यसमपसृतपरिजनंमुंचतिदृष्टिपातंदिवसः॥ यावत्स्फ
वेलावस्थितिंकपयःकुर्वंतितावदेवआसन्नस्थितस्यनिकटवर्त्तिनःकपिबलस्यनिर्घोषेणकलुषितस्यमदग्नेपिकप
यःप्रगल्भतइतिसक्रोधचित्तस्यदशमुखस्यदृष्टेःपातोयत्रेतिदृष्टिसंमुखंदिवसोमुंचतिचदशमुखच्छात्काप्यवस्थानं
दृष्टिपातःपरिहृतोनस्यादितिसर्वथाबहिर्गमनमेववरमितिसंध्यापक्रमोऽभूदितिभावः किंभूतंभयंकरंद्रष्टुमशक्यएव
समपसृताःपलायिताःपरिजनायस्मात्तंअस्मासुविद्यमानेष्वेवकपीनामेवंप्रसरइतिज्ञानस्मानेवव्यापादयिष्यतीतितास
र्यादत्राचेतनस्यापिदिनस्यभयोत्प्रेक्षयारावणस्यातिदुर्द्धर्षमुक्तं॥ ५॥ अथरविकराणांपिंजरतामाह॥ स्फरगअणिहस्स
रइणोकड्ढन्तस्सणलिणिंवदिअसच्छायं॥ वलइहरिआलकविलोकमलरअकवुरिउव्वकरपब्भारो॥ स्फरगजनिभस्य
रवेःकर्षतोनलिनीमिवदिवसछायां॥ वलतिहरितालकपिलःकमलरजःकलुषितइवकरप्राग्भारः॥ रवेःकरसमूहो
वलतिपरावर्त्ततेसर्वतोवर्त्तुलोभवतीत्यर्थः॥ किंभूतस्यस्फरगजोरावणस्तत्तुल्यस्यसहजशौर्यात् एवंरविप्रकाश्य
त्वेननलिनीमिवदिवसस्यछायाकान्तिर्यस्याःतादृशींनलिनीमाकर्षतःशुंडरूपकराग्रभागोवक्रीभवतिकमलरजस्संबंधा १६६

दुक्तवत्कपिलश्चेतिसाम्यं॥ ६॥ अथद्रुमछायानांदैर्घ्यमाह॥ उल्लुग्गपरिसाणंझिज्जन्तपसारिअअवणिराआण
म॥ अवरुणस्पर्शनांक्षीयमाणप्रसारितातपनिरायतानां आयम्यमानानामिवजातंतडित्वंद्रुमछायानांक्षीयमाणायः
प्रसारितआतपस्तन्मध्येनिरायतानांयथायथाआतपक्षयस्तथातथादीर्घाणांद्रुमछायानांतडिनत्वंतुछत्वंजातंतुछ
त्वेहेतुमाह॥ अवरुणस्पर्शनांक्षीयमाणप्रसारितातपनिरायतानां आयम्यमानानामिवजातंयासांतथाभूतानांप्रचंडा
तपइवतदानींतथाश्वैत्यानुपलंभादिदमुपलक्षणंतथाश्यामिकानुपलंभाच्चदीर्घत्वमुत्प्रेक्षतेआयम्यमानानामिवकेनवि
दाकृष्यदीर्घाक्रियमाणामिवजलौकादिवमित्यर्थः॥ यद्वाप्राकृतत्वात्क्षीयमाणदिवसेनहेतुनानिरायतंयथास्यात्तथाप्रसा
रितानामायम्यमानजलौकादीनामिवेतिपूर्वधर्म्मस्यइहतुधर्म्मिणःसंभावनादुत्प्रेक्षा॥ ७॥ अथरविमंडलमाह॥ दीस
इविदुमअव्वंसिंदूराहअगइन्दकुंभच्छाअं॥ मंदधाउकलंकिअवासुइमंडलनिच्चक्कलंरइबिंबं विद्रुमछायं॥ मंदरधा
तुकलंकितवासुकिमण्डलनिश्चक्रलंरविबिम्बम्॥ रविम्बिबंविद्रुमवदाताम्रंदृश्यतेकीदृक्सिंदूरेणाहतस्यस्पष्टस्यगजें
द्रकुंभस्येवछायाकान्तिर्यस्यलोहितत्वात् एवंमंदरधातुभिःकलंकितस्यमथनसमयेरज्जुभावेनघर्षणाद्रक्तीकृतस्यवासु
केर्मण्डलंवलयीभावस्तद्वन्निश्चक्रलंवर्त्तुलमितिसंध्यारागउक्तः॥ अथदिवसावशेषमाह॥ मोउलेन्तिदिसाहोअछाया
सामलइउअरंमहिवेढं॥ दिअसोकलावसेसोसिहरालग्गतणुआअवाधरणिहरा॥ मुकुलायन्तेदिगाभोगाःछायाश्या
मलितोदरंमहीवेष्टं दिवसःकलावशेषःशिखरालग्नतनुकातपाधरणीधराः॥ कलाअवशेषायस्यतथाभूतोदिवसः
स्थितइत्यर्थात्॥ अतएवदिशामाभोगाविस्तारामुकुलायन्तेसंकुचंतिप्रान्तेषुप्रकाशाभावादेवंछायाआतपाभावस्तयाश्याम
लितमुदरंयस्यतादृग्महीपृष्ठंजातमित्यर्थात्॥ एवंशिखरेषुआइषल्लग्नातनुकाःकृशाआतपायेषामुच्चत्वात्तथाभूताम
हीधराजाताःकाष्ठास्त्रिंशत्तुताःकलाःइत्यमरः॥ ९॥ अथसूर्यावतरणमाह॥ अथणिअंवपरिणापहिआअवरअम्भि
स्फरगअम्भिवदिअसे॥ दीसइपल्हत्थंतंविअडिअधाउसिहरंवदिणअरबिम्बं॥ अस्तनितंबपरिणतेहतातपरजसि
स्फरगजइवदिवसोदृश्यतेपर्यस्यद्विघटितधातुशिखरमिवदिनकरबिंबं॥ दिनकरबिंबंविघटितंगैरिकशिखरमिवप

Dr. BHAU DAJI MEMORIAL

र्यस्यत्यतदृश्यतेकुत्रसतिस्फुरगजोरावतइवदिवसेश्वैत्याच्छावीतः प्रतीर्विगतत्वाच्चअस्तस्यचरमाचलस्यनितंबेपरि
सर्वतोभावेननंतेउपनतेप्राप्तेदिनस्यतत्रैवपर्य्यवसानात्तपक्षेपरिवृत्त्यकृताघातत्वाच्चिविष्टदंतेसतिकीदृशोहतंपातितं
आतपएवरजोयेननगैरिकस्येत्यर्थादतएवातपस्यरक्ततालभ्यतेतदुद्धूलनादेवचतदानींदिनदिग्गगनादीनामपिरक्त
त्वमितिभावः अन्योपिपरिणतः करीउद्धूलिताभिर्धूलिभिः स्वंदिग्गदीनिचपूरयन्शिखरपातपतीतिध्वनिः करदंत
कृताघातोगजः परिणतोभवेदितिकोषः अत्रदिनगजयोः किरणरजसोर्विशिष्टयोश्चसाम्यं ॥ १० ॥ अथकमलानां
संकोचमाह ॥ कमलाणदिअसविगमेसंव ॥ त्तिगलिआअवकिलिन्ताइ ॥ मअरंदमत्तमहुअरचलपक्खुप्पुसिअमहु
रसाइंदलाइं ॥ कमलानांदिवसविगमेसंबध्यंतेगलितातपक्लाम्यन्तिमकरन्दमत्तमधुकरचलपक्षोप्रोंछितमधुरसानिद
लानि ॥ दिवसस्यविगमेसायंकमलानांदलानिसंबध्यंतेसकुचन्तिकिंभूतानिगलितेनातपेनक्लाम्यन्तिनिःप्रभानितेषांदिन
एवकांत्युदयादेवंमकरंदेनमत्तस्यमधुकरस्यपक्षाभ्यामुत्प्रोक्षितामधुरसोयेषुतानिमकरन्दपानतुन्दिलत्तयोड्डयितुमपार
यतोबहिर्भूवतोपिदलेषुपतनेनपक्षयोरसवरणादितिभावः मत्तस्यपतनमुचितमेवेतिध्वनिः ॥ ११ ॥ अथरविरावण
योरवस्थातौल्यमाह ॥ दीसन्तिदोविसरिसाकइचलणाइध्दमहिरअसमक्कंता ॥ अत्थाअन्तोअरइआसण्णविणासणि
प्पहोदहवअणो ॥ दृश्येतेद्वावपिसदृशौकपिचरणाविद्धमहीरजःसमाक्रान्तौ ॥ अस्तायमानश्चरविरासन्नविनाशनिष्प्र
भोदशवदनः ॥ अस्तायमानोस्तंगच्छन्रविर्निकटवर्तिनाविनाशेननिष्प्रभोरावणश्चद्वावपिसदृशौदृश्येतेबीजमाहकपीनां
चरणैराविद्धान्युत्थापितानियानिस्थूलमहीरजांसितैःसमाक्रांतौअत्रधूलीनांरविपर्यंतगमनेनकपीनामुद्वृत्तचलनर
वेरपिनिष्प्रभत्वंचसूच्यतेशिरसिकपिचरणोद्धूतधूलिपतनंसहसएवेत्यस्तायमानरविसाम्येनरावणस्याचिरेणमृत्युरुक्तः
आसन्नमृत्युः स्वतएवनिष्प्रभोभवतीतिध्वनिः ॥ १२ ॥ अथरवेरस्तमनमाह ॥ अध्दत्थमिअदिणअरोतुंगोवासपरिसंठि
आअवसेसोणं ॥ गअणेमुक्कमहिअलोपरिप्पवंततलिणोकिलिम्मइदिअसो ॥ अर्ध्दास्तमितदिनकरस्तुंगावकाशपरिसंस्थि
तातपशेषः ॥ गगनेमुक्तमहीतलः परिप्लवमानतलिनः क्लाम्यतिदिवसः ॥ त्यक्तभूतलं येनसदिवसोगगनेपरिप्लवमान
इवतलिनस्तरुः क्लाम्यतिविशिष्टप्रकाशाभावात्कीदृक्अर्द्धेनास्तमितोजलेमग्नोदिनकरोयत्रएवंतुंगावकाशेउच्चप्रदेशेगि
रिशिखरादौपरिसंस्थितमपशेषंयत्रबहूनामस्तिमितत्वादितिभावः अत्रप्लवनकर्तृवृश्चिकादित्वेनोत्प्रेक्षितस्यादिनस्यरवि
रर्द्धमग्नोमूर्द्धाउपरिसंचरन्नातपशेषःकरचरणादिःगगनंचसमुद्रइतिव्यंजनयोत्प्रेक्षितंप्लवनकर्त्तापिजलोपर्येव
मज्जन्मूर्द्धाचलत्करचरणादिःक्लाम्यतीतिध्वनिः ॥ १३ ॥ अथरविकरणामूर्द्धतामाह ॥ दिअसेणवणगएणवपरम्मु
हाइध्दपाअवस्सवरविणो ॥ दीसइथोरकरालोउध्दोमूलणिवहोव्वकरपब्भारो ॥ दिवसेनवनगजेनेवपराङ्मुखाववि
द्धपादपस्यैवरवेःदृश्यतेस्थूलकरालऊर्ध्वोमूलनिवहइवप्रैकरप्राग्भारःमूलंसिराएवस्थूलःप्रौढःपुंजीभूतावाकरा
लामध्यमध्यसछिद्रस्तुंगोवाप्राग्भारनिवहयोरपिविशेषणंरवेःकिंभूतस्यवनगजेनेवदिवसेनपराङ्मुखमन्यतोमु
खंप्रेरितस्यसतःपातितस्यवृक्षस्येवअत्रदिनगजयोरविपादपयोःकरसिरासमूहयोश्चसाम्यंविदिक्पातितत्वात्स्थू
लःतुंगतयाविरलत्वेनचकरालःशिरास्तामएवदृश्योनतुवृक्षइतिकिरणादृश्यंतेनरविरितिभावः ॥ १४ ॥ अथसंध्या
गमनमाह ॥ णवरिअदिणअरबिंबंसञ्झामइअम्मिणिअअरुहिरप्पंके ॥ दहवअणस्सभअअरंपढमसिरच्छेअम
मंडलम्वणिबुड्डम् ॥ अनंतरंचदिनकरबिंबसंध्यामयेनिजकरुधिरपंके ॥ दशवदनस्यभयंकरंप्रथमशिरच्छेदमं
डलमिवनिमग्नं ॥ दिवसपतनानंतरंचदशवदनस्यमंडलाकारप्रथमशिरःखंडमिवदिनकरबिंबसंध्यामयेनिजक
रुधिरपंकेनिमग्नं ॥ लोहित्यात्तद्रुधिरस्वपरूत्वेनोत्प्रेक्षितासंध्यातथाचसंध्याबभूवेतिभावःभयकरमित्यभयविशे
षणंरविपतनस्यापिरात्रिहेतुत्वात्तत्रप्रथमपदेनप्रधानीभूतशिवाराधनेप्युक्तमितिरावणमृत्योरावश्यकत्वादविरक
र्तनीयत्वेनाकृन्तमपिकृन्तत्वेनोत्प्रेक्षितमितिभावः यद्वातदानीमेवशिवाराधनाययत्प्रथमंनिकृन्तवान्तेनसमंस
होपमा ॥ १५ ॥ अथकमलानांमुकुलीभावमाह ॥ भमरभरोभन्ताइपरिणअकेसरपलोट्टरअगरुआइम् ॥ रवि
विरहमिलन्ताइविहोन्तिकरालाइं ॥ पंकआणदलाइभमरभरापवृत्तानिपरिणतकेसरप्रलुठितरजोगुरुकाणि
रविविरहमिलत्स्वपिभवन्तिकरालानिपंकजानांदलानि ॥ पंकजानांदलानिकरालनिसछिद्राणिभवन्तिकिंभूता

निरविविरहेसतिपरस्परंमिलंत्यपिबंधुविरहेसर्वेमिलंत्येवेतिध्वनिः अपिरत्रमिलतांसच्छिद्रत्वानतिष्ठंतीतिविरोधा
भाससूचनायसच्छिद्रत्वेहेतुमाह॥भ्रमराणांभरेणापवृत्तान्यपवनतानिवहिर्भवतामपिमकरन्दतुंदिलत्वेनोदुयना
समर्थत्वादेवंपरिणतानांकेसराणांरजोभिगुरुकाणिकेसराणांपरिणत्याभ्रमराणांकिंचिदभिघातेनैवरजस्वल
नात्यत्रेषुगुरुत्वमतोप्यवनतिःसच्छिद्रताहेतुरितिभावः॥१६॥अथप्रतीच्यांरविकांतिच्छटामाह॥अवरदिसावि
च्छिण्णादीहमऊहविसमप्पहासंघाओ॥रअणिभरोव्वदीसइकालमुहक्खित्तदिअसकड्ढणमग्गे॥अपरदिग्विस्ती
र्णोदीर्घमयूखविषमप्रभासंघातः॥रजोनिर्भरइवदृश्यतेकालमुखक्षिप्तदिवसकर्षणमार्गः॥दीर्घाणांमयूखानांवि
षमानतान्नतायाप्रभारूपतस्याःसंघातःसमूहःअपरादिकप्रतीचीनत्रविस्तीर्णःप्रोद्दोदृश्यतेसर्वेषामेवतदात्तत्रव
र्त्तुलीभावात्कीदृक्रजःपरागःतद्वत्निर्भरःपूर्णःपिंजरत्वात्कइवकालोयमःसंध्यासमयश्चतन्मुखादाक्षिप्तस्य
दिवसस्यकर्षणमार्गइवकालेनकवलितस्यदिवसस्यनिजबुध्यारविणातिक्रम्यगृहीत्वाकृष्टस्यस्वेनैवसार्द्धंनीयमान
स्यकर्षणमार्गइत्यर्थः॥अन्यत्रापिकस्यचिन्मुखादाकृष्टस्यभूम्यादौकर्षणमार्गोदीर्घोविषमोरजोधूलिस्तन्निर्भरश्चभ
वतीतिध्वनिः॥१७॥अथसंध्यारागमाह॥उद्धोवअन्तबिम्बवेअणमहिम्वदिणअरम्मिअइगए॥उच्छलिआअव
अम्वासञ्झाराअमिहिआणहम्मिणिहिन्ता॥ऊर्ध्वापवृत्तबिंबेवेगेनमहीमिवदिनकरेऽतिगते॥उच्छलितातपता
म्रासंध्यारागमेघिकानभसिनिहिता॥संध्यारागविशिष्टामेघिकास्वल्पमेघानभसिनिहितालग्नाउत्प्रेक्षतेकीदृशी
ऊर्द्धोदयवृत्तस्खलितबिंबयस्यतादृशिदिनकरेवेगेनमहीमिवातिगतउद्धृतेसत्यच्छलितेनातपनताम्राअन्यस्या
पिवृक्षादितोभूमौपतित्वाचूर्णीतस्यरुधिरादिकंपूर्वमेवोच्छलतीतिध्वनिः॥१८॥अथसंध्यारागप्रौढिमाह॥अत्थ
सिहरम्मिदीसइमेरुअडघुट्ठकणअकद्दमअम्बो॥बलमाणतुरिअरविरहपडिउट्ठिअधअवडोघसंजाराअ॥अ
स्तशिखरेदृश्यतेमेरुतटोद्धृष्टकनककर्दमाताम्रः॥बलमानत्वरितरविरथपतितोत्थितध्वजपटइवसंध्यारागःसंध्या
रागःदृश्यतेकइवबलमानोवतरणायवक्रीभवन्सन्त्वरितोयोरविरथस्तस्यपतितःसन्नुत्थितोध्वजपटइवअत्ता

चलादवतीर्णस्यैवरथस्यातिनिम्नेपतनात्पतितःपुनरुच्चारोहणादुत्थितस्तारएवरथोनदृश्यतेकिंतुपताकामात्रमिति
भावःलौहित्येहेतुमाह॥ध्वजपटःकीदृक्मेरुतटेउद्घृष्टोमृष्टोयःकनककर्दमःसूर्यतेजसंबंधेनद्रवीभावात्तेनआ
इषत्ताम्रः॥१९॥अथकुमुदविकासमाह॥ विअसइधवलाअम्वगअरुहिरालिद्धकेसरिसडच्छाअं॥पवणन्दोल
णचडुलंसंभारज्जन्तकेसरंकुमुअवणं॥विकसतिधवलाताम्रगजरुधिरालीढकेसरिसटाच्छायं॥पवनान्दोलन
चटुलंसंध्यारज्यमानकेसरंकुमुदवनं॥कुमुदवनंविकसतिकीदृक्धवलमाताम्रंवातएवगजरुधिरेणाश्लिष्टाया
केसरिसटातद्च्छायाकांतिर्यस्यततएवंपवनकृतेनान्दोलनेनचंचलंसंध्ययारज्यमानानिरागंप्राप्तानिकेसराणिय
स्यतदानींशोणत्वेनोपलंभादितिभावः॥२०॥अथछायामाह॥होइअपाअडदीहादरवोच्छिज्जन्तविसमसंझाराआ
उधूसरिअदसदिसाअबद्धतिमिरादिणावसाणछाआ॥भवत्यप्रकटदीर्घादरव्यवच्छिद्यमानविषमसंध्यारागात्अ
वधूसरितदशदिकअबद्धतिमिरादिनावसानछाया॥दिनावसानेछायावृक्षादीनामित्यर्थात्॥ भवतिकीदृशीअप्र
कसतीदीर्घासायंसर्वैवछायापूर्वाभिमुखीदीर्घाकिंतुविशिष्यनगृह्यते आगंतुकतिमिरछायया स्ताचलछाययावा
सर्वासामेकीकरणादेवंइषद्व्यवच्छिद्यमानःक्वचित्क्वचिल्लग्नत्वादतएवविषमःसंध्यारागोयत्रसाएवंअवधूसरि
तादृशदिशोयत्रसाप्रकाशप्रौढिविरहादेवंअबद्धमसंबद्धतिमिरंयत्रहित्रिक्षणोन्तरमागंतुकत्वेनतदाविरलत्वात्
केचित्तुभवतिन्वप्रकटदीर्घाप्रकटासतीदीर्घाभवतिन्वेत्यर्थमाहुः॥२१॥अथसंध्याशान्तिमाह॥संझाअवमुच्चन्तं
जलिअपसम्मन्तहुअवहट्ठाणणिहं॥दूरत्थमिअदिणअरंजाअंसम्वट्टसरिसरूअंगअणं॥संध्यातपमुच्यमानंज्व
लितप्रशाम्यधुतवहस्थाननिभम्॥दूरास्तमितदिनकरंजातंसंवर्त्तरदृशरूपंगगनं॥दूरेअस्तमितोदिनकरोयत्रतद्गमनं
संवर्त्तनप्रलयेनसदृशंरूपंयस्यतादृग्जातंकीदृक्॥ संध्याकालीनेनसंध्यारूपेणवाआतपेनमुच्यमानंअतएवप्रथ
मंज्वलितंपश्चात्प्रशाम्यनिर्वाणंगच्छद्यद्वह्निस्थानंतत्तुल्यंयथायथासंध्यातपत्यागस्तथातथाश्यामिकोदयात्संध्या
तपदहनयोर्विपदग्निस्थानयोश्चसाम्यंप्रलयेपिसंध्यातपरविशून्यःकालानलोपशमान्निर्वाणालातनीलीकृतविश्वश्चे

तिसमता प्रलयतुल्यतयावागंतुकतमसानीलिमातिशयः सूचितः॥ सव्वथ्थेतिपाठेसर्वत्रसदृशरूपमित्यर्थः भविष्यत्त
मः प्राग्भ्यादित्यर्थः॥२२॥अथदीपोद्योतमाह॥ संज्झाराअ्रथइअ्रादरसंरुद्धंधाआरकअ्रपरभाआ।दिअ्रसविपरिसेसे
जिज्झन्तेणिव्वलन्तिदीवुज्जोआ॥ संध्यारागस्थगितादरसंरुद्धांधकारकृतपरभागाः॥ दिवसछविपरिशेषक्षीयमाणे
निर्ज्वलन्तिदीपोद्याताः॥दिवसस्यछविःशोभातत्परिशेषवशिष्टभागेक्षीयमाणेसतिदीपानामुद्योतानिर्ज्वलंति
अभिभावकाभावात्पृथक्भवंतिकिंभूताः संध्यारागेणस्थगिताः किंचित्प्रकाशसत्वेनावरुद्धप्रसराः अनंतरंइ
षत्संरुद्धेनान्धकारेणकृताः परभागः अन्यतः शोभायेषांते॥२३॥अथचक्रविघटनमाह॥विहडन्तराअ्रणि
अलंउहअ्रतडट्ठिअमिलन्तदिठ्ठिरइसुहं॥ अवसंचक्काअ्रनुअ्रहुंकाराअ्रत्तजीविअ्रंवोछिण्णं॥ विघट्टमानराग
निगडंउभयतटस्थितमिलत्दृष्टिरतिसुखं॥अवशंचक्रवाकयुगंहुंकारायत्तजीवितंव्यवछिन्नंचक्रवाकयुगं
व्यवछिन्नंविश्लिष्टंकीदृकविघट्टमानोनिरोधात्समोनुरागरूपोनिगडोयस्यतत्निगडविघटनेव्यवछेदोयुज्यतए
वेतिभावः एवंनद्यादेरुभयकूलस्थितंसदूरतएवमिलतीभ्यांदृष्टिभ्यांरतिसुखंयस्यतथाभूतंस्थितांतदृष्टिविशेष
णंवा एवंअवशंअस्वतंत्रंहुंकाराधीनंजीवितंयस्यतथाचदृष्टिमिलनेपिस्पंदनिमेषयोरभावेनपरस्परंसंशयित
स्यजीवितस्यस्वस्ववृत्तपरिज्ञापनायकृतेनविरहपीडोद्भमजनितेनवाहुंकारेणानुमित्याधारणामितिभावः॥२४
॥अथतिमिरप्रादुर्भावमाह॥तावतमालकसणोकंचणकडअ्रम्बवहलसंज्झाराअ्रं॥ परिपेल्लिऊणअ्रतमोहि
अकद्दमसूअरइन्दंणिहसोव्वठिओ॥ तावदेवतमालष्णंकांचनकटकमिववहलसंध्यारागं॥ प्रतिप्रेर्यचतमोहृ
तकर्दमसूकरगजेंद्रनिघर्षइवस्थितम्॥ यावत्संध्यागछतितावदेवतमालवत्कृष्णंतमःकर्तृवहलंसंध्यारागंकां
चनकटकमिवप्रतिप्रेर्यअवपात्यस्थितंकइवहृतकर्दमस्यांगलग्नकर्दमस्यसूकरगजेंद्रस्यनिघर्षोगात्रघर्षणस्था १६९
नमिवसोपिगात्रसंबद्धकर्दमसंबंधात्कृष्णः कंडूयमानादिविधिनागिरिकटकंभंक्तातिष्ठतीतिसाम्यसूकरगजग
त्रीयत्वेनमहत्वमप्यक्तंहृतकर्दमोनिघर्षइवेतिवा॥२५॥अथतमसःप्रसरणमाह॥आसणम्मिपविरलंथो

अंतरम्मिदूरम्मिघणम्॥ ओभग्गदिट्ठिपसरंसव्वत्थसमट्ठिअंपिदीसइतिमिरं॥आसन्नेप्रविरलंवहलंस्तोकांतरेदूरे
घनं॥ अवभग्नदृष्टिप्रसरंसर्वत्रसमस्थितमपिदृश्यतेतिमिरं॥सर्वत्रसमतयास्थितमपितिमिरंइदृशंदृश्यतेकी
दृशंआसन्नेतिकटकेप्रविरलंस्तोकव्यवधानंवहलंनिकटापेक्षयाबहुलतरंदूरेघनंतदपेक्षयापिनिबिडंअतए
वअवभग्नोदृष्टिप्रसरोयत्रविषयाणामग्रहात्सर्वत्रासन्नादिषुभग्नदृष्टिप्रसरमित्तिवा॥२६॥अथद्रुमादीनामदृ
श्यतामाह॥घणविडवट्ठिअ्रतिमिराति मिरालिद्धमइलन्तमुद्धकिसलआ॥ किसलअणिसण्णकुसुमाकुसुमा
मोएणणवरणज्जन्तिदुमा॥ घनविटपस्थिततिमिराःतिमिरालीढमलिनायमानमुग्धकिशलयाः॥ किसलयनि
षण्णकुसुमाःकुसुमामोदेनकेवलंज्ञायंतेद्रुमाः॥द्रुमाःकेवलंकुसुमानामामोदेनज्ञायंतेकिंभूताघनेषुघनानिवा
विटपेषुस्थितान्यनुछेदनीयानितिमिराणियेषुतेवंएतिमिरेरालीढानिस्पृष्टान्यत्त एवमलिनायमानानिमुग्धानि
किसलयानियेषांएवंकिशलयेषुनिषण्णानिनतुदृष्टानिकुसुमानियेषामितिशाखायत्रपुष्पेषुसत्स्वपिदृष्टिपसराभावे
नसौरभ्येवानुमापयतीत्तिभावः॥शृंखलाबंधोयं॥२७॥अथसर्वत्रतिमिरस्याभिव्याप्तिमाह॥मेलविअसव्वदि
संआसण्णम्मिविपणठ्ठणअ्रणालोअ्रं॥ सूपअ्रघमहिअ्रलंजाअ्रंसूरवडणाणुरूअ्रंतिमिरं॥ मेलितसर्वदृकआस
न्नेपिप्रनष्टनयनालोकं॥ सूचयितव्यमहीतलंजातसूरपतनानुरूपंतिमिरं॥मेलिताएकीकृताः सर्वादिशोयेनभेद
ज्ञापकचिन्हाभावादासन्नेपिप्रनष्टोनयनस्यालोकस्तेजोनयनेनालोकोदर्शनंवायस्माद्विषयतिरोधायकत्वादत
एवसूचयितव्यंचक्षुरन्यप्रमाणवेदनीयंस्मर्तव्यंवामहीजलंयत्रतादृशंतिमिरंसूर्यपतनस्यानुरूपंयोग्यंज्यातं
यथासूर्येसत्यंतप्रकाशोत्कर्षहेतुरत्यंतमन्धकारापकर्षस्तथातत्पतनेसत्यंतःप्रकाशापकर्षहेतुरत्यंतमंधकारोत्क
र्षः किंवासूर्ययतनंप्रलयइत्तितदनुरूपमितिभावः॥२८॥अथगाढतामाह॥ओखण्डअ्रघ्वदृढोपसरइउक्खम्मि
अघ्ववहलुग्धाओ॥अवलंबिअव्वजोगोससिणाभेत्तव्वसंघओतमणिवहो॥अवखंडयित्तव्यदृढःप्रसरतिउख
नितव्यवहलोद्घातः॥अवलंबितव्ययोग्यःशशिनाभेत्तव्यसंघातस्तमोनिवहः॥तमोनिवहःप्रसरतिकीदृक्दृसा

दिवत्‌अवखंडयितव्यः सन्‌ दृढस्तथाचनावखंडयितव्यः पृथिव्यादिवत्‌उत्खनितव्यः सन्‌बहलोद्धातोनिबिडा
वयवसंस्थानस्तथाचनोत्खनितव्यः अविलंबितव्यः सन्‌भित्यादिवद्योग्यायदवष्टंभेनस्थीयतेशशि नाभेत्तव्यः स
न्‌वज्रादिवत्संधिमिलितस्तथाचतेनापिनभेत्तव्यइतिभावः भेदनंद्विधाकरणं॥ तेनतिर्यक्‌छेदनरूपादवखंडनादृ
ढः सर्वत्रकर्म्मणितव्यः अवखंडयितव्येऽवखंडनेवृक्षादिवत्तदृढइत्येवरूपेणसर्वत्रभावेवाशशिनापरंभेत्तव्यः स
हतोमिलितश्चेत्यपिकश्चित्‌संप्रदायस्तुअवखंडयितव्यः सन्‌दृढइतिक्रमेणव्याचष्टे॥ २९॥ अथगुरुतामाह॥ व
हइवमहिअलभरिअ्ओणोहेइवपच्छओघरेइवपुरओपेल्लेइवपासगर्भंगरुआइवउवरिसंठिओतमणिवहो
॥ वहतीवमहीतलभृतोनोदयतीवपश्चाद्धरयतीवपुरतः॥ प्रेरयतीवपार्श्वमतोगुरुकायतइवोपरिसंस्थितस्तमो
निवहः॥ तमसोनिवहोमहीतलभृतोव्याप्तः सन्‌भूमिष्ठवस्तुजातंवहत्यवहतीवभूमिर्वदाधारीभूतत्वात्पश्चात्पृ
ष्ठतोनोदयतीवपृष्ठचरइवपुरोवर्त्तिनंपुरतोऽग्रेधारयतीवपृष्ठपातुकंपुरोवर्त्तीवपृष्ठतोनोदनेप्यपतनात्‌पार्श्वयोः
स्थितः सन्‌प्रेरयतीवयंत्रवत्सिद्धार्थंतेषामेवोपरिस्थितंसन्‌ गुरुकायतइवपत्तितगृहादिवदितिवहननोदनधार
णप्रेरणगुरुत्वानुभवेनव्यापकत्वविशिष्टमूर्तत्वमुत्प्रेक्षितं॥ ३०॥ अथशशिकरोद्गममाह॥ दीसइअतिमिरमिलि
अकसनसिलाभिणसलिलसीभरधवलो॥ थोउम्मिल्लन्तदिसोउअअन्तरिअतणुओससिअरुज्जोओ॥ दृश्यते
चतिमिरमिलितः कृष्णशिलाभिन्नसलिलशीकरधवलः॥ स्तोकोन्मीलद्दिक्‌उदयान्तरिततनुकः शशिकरोद्योतः॥
उदयेनोदयाचलेन अन्तरितोऽतएवतनुकः कृशः शशिकराणामुद्योतः पुरः प्रकाशोदृश्यतेचकीदृक्तिमिरेणमिलि
तोऽतएवकृष्णशिलयाभिन्नः संभिन्नोयः सलिलशीकरस्तद्वद्धवलः शिलातिमिरयोः श्यामत्वेनशीकरोद्योतयोःश्वै
त्येनसाम्यंततएवस्तोकमल्पंउन्मीलंतीप्रकाशंगच्छंतीदिक्प्राचीयस्मात्सतथाकिंचिदवच्छेदेनधवलिम्नातिमिरापहारा
दितिभावः॥ ३१॥ अथपूर्वदिक्प्रकाशमाह॥ दीसइजुअक्खअम्मिवमहिअलपरभाअससिअराहअतिमिराणिघडि ॥ १७०
अधूमहुअवहज्जन्तसमुद्दसणिहापुव्वदिसा॥ दृश्यतेयुगक्षयइवमहीतलपरभागशशिकराहततिमिरा॥ निर्वलि

तधूमहुतवहदह्यमानसमुद्रसन्निभापूर्वदिक्‌॥ पूर्वादिक्‌दृश्यतेकीदृशीमहीतलस्यपरभागएकदेशोऽर्थात्प्रा
च्यवच्छिन्नएवतत्रशशिकरैराहतंस्पृष्टंईषद्विघटितंवातिमिरंयत्रतादृशीतदवच्छेदेनैवतदानींभूमेः शशिकरसंबं
धात्‌ उत्प्रेक्षतेयुगक्षयइवनिर्वलितः पृथग्भूतोधूमोयस्मादेतादृशोयोहुतवहः प्रलयाग्निस्तेनदह्यमानोयः समु
द्रस्तत्संनिभातथाचरात्रेस्तमोमयतया प्रलयेनशशिकराणांक्वचित्क्वचित्किंचित्तिमिरसंबंधाद्धूम्रतयाधूमेनचंद्रो
दयकालीनलौहित्यस्यदहनेनपूर्वदिशश्चतिमिरपूर्णत्वेनश्यामतयादह्यमानसमुद्रेणसाम्यं॥ ३२॥ अथचंद्रकलो
द्गममाह॥ ॥णवरिअअच्छालोआउअअगिरिक्खलिअवहलजोण्हाणिवहा॥ जाआपणट्ठतिमिरामुद्धमिअंक
परिपंडुरापुव्वदिसा॥ अनन्तरंचअच्छालोकाउदयगिरिस्खलितवृहलज्योत्स्नानिवहा॥ जाताप्रनष्टतिमिरामुग्ध
मृगांकपरिपाण्डुरापूर्वदिक॥ चंद्रालोकदर्शनानंतरंचपूर्वदिक्मुग्धनबालेनलेखारूपेणमृगांकेनपरिपांडुराजाता
धूसरत्वेहेतुमाहकीदृशीउदयगिरौस्खलितः प्रहितोवहलोनिबिडोज्योत्स्नासमूहोयत्रसमकलतेजसामनागम
नाद्धूसरत्वमितिभावः॥ अतएवकिंज्योत्स्नासंबंधात्प्रनष्टंतिमिरंयत्रअतएवतिमिराभावादच्छोनिर्मलआलो
कोदर्शनंयस्याः भूमियंकेतिकश्चित्पाठस्तत्रगूढः संमुक्तः॥ ३३॥ अथशशिबिंबोदयमाह॥ णवकमलोअरत्थ
म्बकेसरसोमारसंगलन्तमऊहं॥ विरलेइसमासणणीसेसंइतिमिरंणतास्ससिबिम्बम्‌॥ नवकमलोदराताम्रकेस
रसुकुमारसंगलन्मयूखंविरलयतिसमासन्नंनिःशेषपतितिमिरंणतावच्छबिंबं॥ शशिबिंबकंतृयावत्प्रोदं
नजातंतावत्समासन्ननिकटवर्त्तितिमिरंविरलयतिनतुनिःशेषयतिनाशयतितथाचयथायथाविधुव्यवधानं
तथातथाघनमेवतमः स्थितिमितिभावः किंभूतंनवकमलोदरवदीषत्ताम्रंउदितमात्रत्वादेवकेसरवत्सुकुमा
राः सुखस्पर्शाः संगलंतः पततोमयूखायस्यतथाचशोणकमलकेसरसाम्यंचंद्रतत्किरणयोरित्युपमा॥ ३४॥
अथमंडलप्रौढिमाह॥ तोउअअसिहरमिलिअंजाअंउप्पुसिअतिमिरधवलच्छाअं॥ इअअहुत्तठ्ठिअसुरगअदन्तच्छे
अपरिमंडलंससिबिंबं॥ ततउदयगिरिशिखरमिलितंजातंउत्प्रोञ्छिततिमिरधवलछायं॥ इतोभिमुखस्थितसुरग

जदंतछेदपरिमंडलं शशिबिंबं ॥ ततउद्गमानन्तरं इतोभिमुखःपश्चिमाभिमुखःसन्स्थितोयःस्फरगजैरावतस्तद्दंत
छेदवत्परिमंडलंवर्तुलंशशिबिंबंउदयगिरिशिखरेमिलितंसत उत्प्रोक्षितमपसारितंतिमिरंयेनतथाभूतत्वेनधवल
छायंजातंतिमिराभावादितिभावः॥ ३५॥अथनभोनीलिमोत्कर्षमाह॥णवरिअससिअरणिस्फठिअविवलाइअ
ईतिमिरकलुसताराणिवहं॥जाअंबहुकुसुमोत्थअसिलाअलाआरसणिहंगअणअलं॥ अनंतरंचशशिकरनिपा
तितविपलायिततिमिरकलुषतारानिवहं॥जातंबहुकुसुमावस्तृतशिलातलाकारसन्निभंगगनतलं॥ चंद्रधाव
ल्यानंतरंगगनतलंजातंकीदृशंशशिनाकरैर्निपातितंअतएवविपलायितंतिमिरंयस्मात्तथाभूतंचतत्कलुषचं
द्रातपेनविभूतत्वान्मंदच्छविस्ताराणांनिवहोयत्रतादृशंचेतिकर्मधारयःअतएवबहुकुसुमेनावस्तृतंव्याप्तंयत्
शिलातलंतस्याकारंस्वरूपंतत्तुल्यंतथाचश्यामत्वेनशिलागगनयोत्येनताराकुसुमश्वैत्येनतराकुसुमयोस्तो
ल्यमित्युपमा॥ ३६॥अथद्रुमच्छायामाह॥दरमिलिअचन्दकिरणादरधुव्वन्ततिमिरपरिपंडुरालोआ॥ दरया
अडतनुविडवदरबद्धछाहिमंडलाहोन्तिदुमा॥ दरमीलितचंद्रकिरणादरधाव्यमानतिमिरपरिपांडुरालोकाः
दरप्रकटतनुविटपादरबद्धछायामंडलाभवन्तिद्रुमाः॥ द्रुमाभवन्तिकीदृशाः ईषन्मिलिताःश्चंद्रकिरणायेषुअ
तएवईषद्धाव्यमानंक्षालमानंयत्तिमिरंतेनपरिपांडुराआलोकाश्चंद्रकांतिछटायत्रकिंचित्तिमिरसत्वेन
पांडुरत्वमित्यर्थः॥अतएवचंद्रकरतिमिरयोरुभयोरपिसत्वादीषत्प्रकटाःकृशाविटपायेषांप्रौढविटपानांतुप्रकट
त्वमेवेतिभावः॥एवंईषद्बद्धंछायामंडलंयैस्तेईषदर्थेदराव्ययमितिविश्वः॥ ३७॥अथेंदुमंडलप्रौढिमाह॥होइण
हलंघणसहंजाअस्थामकिरणाहउक्खअतिमिरंविअलिअमुद्धसहाअंजरठाअंतधवलंणिसाअरबिंबम्॥ भ
वतिनभोलंघनसहंजातस्थामहिकिरणाहतोत्खाततिमिरं॥ विगलितमुग्धस्वभावंजरठायमानधवलंनिशाकरबिं
बं॥ विगलितोमुग्धस्वभावोबालत्वंयस्यतत्प्रौढंनिशाकरबिंबंनभोलंघनेक्षमंभवतिकीदृक्जातस्थामस्थैर्यंये
षांतैःकिरणैराहतंताडितंसदुत्खातमुत्पाटितंतिमिरंयेनअतएवजठरायमानवर्द्धमानंचिरंतनंवासद्धवलं॥

३८॥अथज्योत्स्नाप्रौढिमाह॥तहपरिसंठिअसेलंविथिण्णादिसंतरुज्जुअणइप्पवहं॥ खत्तुणवउक्किणंससिणाम
संचअंपुणोविमहिअलं॥ तथापरिसंस्थितशैलंविस्तीर्णदिक्तथाऋजुकनदीप्रवाहं॥ खनित्वेवोत्कीर्णंशशिना
तमःसंचयंपुनरपिमहीतलं॥ शशिनातमःसंचयंखनित्वामहीतलंपुनरप्युत्कीर्णमिवकोडाकारितमिवकीदृक्
तथापूर्ववत्परिसंस्थिताःशैलायत्रएवंतथापूर्ववदेवविस्तीर्णादिशोयत्रतथापूर्ववदेवऋजवोनदीनांप्रवाहायत्र
तादृशंतथाचयथाकाष्ठादिकंखनित्वानपेक्षितभागमपसार्यकरचरणचिबुकादिमत्प्रतिमादिकंक्रियतेतथातमो
लिप्तमपिगिरिगहनगृहादिसंहितभूतलंतिमिरमपसार्यतत्तद्वयवसंस्थानविशिष्टंशशिनाप्रकाशितमितिभा
वः॥ यद्वाउत्कीर्णमुत्थापितमित्यर्थस्तेनयथाकर्द्दमग्नवस्तुकर्द्दममपसार्यास्थाप्यतेतथातमोपसार्यभूतलमुत्था
पितमितिभावः॥अथवातथापरिसंस्थितशैलमित्यादिक्रियाविशेषणंतथाचमहीतलंखनित्वेवतमस्संचयउत्की
र्णःक्षितिगर्त्तेनिक्षिप्तइत्यर्थस्ततएवावकारिरकाभावाच्छैलादीनांप्रकाशइत्यभिप्रायः॥३९॥पुनःछायामेवाह
वहलम्भिवितमणिवहेणिधालेज्जुणसच्चविअरूवा३०॥ अणुबंधेन्निससिअरावेत्तुणव्वअन्तिपाअवछाआ
३०॥ वहलेपितमोनिवहेनिर्वाल्यसत्यापितरूपाः॥अनुबध्नंतिशशिकराग्रहीतुंनशक्नुवंतिपादपछायाःशशि
कराःपादपानांछायाःकर्माणिग्रहीतुंस्पष्टंनाशयितुमित्यर्थः॥ नशक्नुवंतिवृक्षतलेतासामतिघनत्वात्किंतुअ
नुबध्नंतिवेष्टयंतिकिंभूताछायावहलेपितमोनिवहेनिर्वाल्यपृथक्कृत्यसत्यापितरूपंयासांताग्राह्यत्वेनस्थिरी
कृतरूपाइत्यर्थस्तथाचयथाकोपीश्वरोधाटिकयाविद्रावितारिसैन्यात्पृथक्कृत्यकेचिद्ध्रियमाणमरण्याश्रितं
ग्रहीतुमपारयन्वेष्टयतितथाशशिकराअपितमोनिवहमुन्मूल्यततःपृथक्कृत्वापिछायावृक्षतलमाश्रितांस्प
ष्टुमपारयंतःपरितोवेष्टयंतीत्यर्थः॥४०॥अथकुमुदोत्फुल्लतामाह॥ णवरकरालेइससीमुहपरिहट्टणसमूससस
न्तदलउडम्॥ अवडिच्छिएक्कमेक्काविसअंफान्लेतिमहुअरचिअकुमुअं॥ केवलंकरालयतिशशीमुखपरिघट्ट
नसमुच्छसद्दलपुटं॥अप्रतीष्टैकैकेविषदंपाटयन्तिमधुकराएवकुमुदम्॥ शशीकुमुदंकेवलंकरालयतिसच्छिद्र

यति मुखेदलानामीषद्विभागात्किंतुविशदंस्पष्टंयथास्यादेवंप्रतीष्टैकैकेःवेपक्षितपरस्परामधुकराएवपाटयन्ति
विकाशयंतीत्यर्थःकिंभूतंमुखंपरिघट्टनेनकरत्वरणाद्यभिघातेनसमुच्छसंतिदलपुटानियस्यतत्स्वस्येवमुखेन
परिघट्टनादित्तिवाहठादेवमधुलब्धीच्छयास्वभावतोवामुखेनैवप्रवेशइतितन्मुखमुद्दल्यप्रविशंतीत्यर्थात्तथाच
मुकुलीकरणेनवर्त्मप्रदर्शकत्वमात्रंचंद्रस्यविकाशस्तुसहजसिद्धस्ततत्कालानपेक्षएवमधुकरोत्कंठाधीनइत्य
नेनपरानपेक्षयाचमधुनामाधिक्यंव्यांजि॥४१॥अथसर्वत्रनमःशून्यतामाह॥पुसि॰णुणिरवसेसंसमूअंथोर
करपेल्लि॰णुविर॰॰थइ॰णुसमन्तोससिणापी॰णुणिद्दअन्तमणिवहो॥प्रोंछितोनुनिरवशेषसम
स्थूलकरप्रेरितानुविशीर्णःअवस्तृतानुसमस्तःशशिनापीतोनुनिर्दयंतमानिवहः॥शशिनातमोनिवहःअवशे
षशून्ययथास्यात्तथाप्रोंछितोनुकरैरित्यर्थात्यत्कर्दमादिप्रोंछ्यतेतत्किंचिदपिकरेलगत्तितमस्तुनतथेत्यत
आहसममेकदेवस्थूलकरैःप्रेरितोनुप्रेरितमपिनिकटंस्यल्कादूरेतिष्ठतिप्रकृतितुनतथेत्यतआहविशीर्णःखंड
खंडीभूतःविशीर्णमप्येकदेशेतिष्ठतीत्यतःसमस्तएवसमंततःतद्यावस्तृतानुकीर्णइत्यर्थः॥अवस्तृतमपिखंडस्फु
टितंदिशिदिशितिष्ठत्येवेत्यतआहपीतोनुयद्वासमत्तोइत्यत्रैवानेतव्यंतेनपीतोनुसमाप्तःकथाशेषंगतइत्यर्थः॥
पीतावशिष्टमपिचषकदौलगतीत्यतउक्तंनिर्दयमितिक्रियाविशेषणंतेनशत्रुवत्किमपिनरक्षितमितिभावः॥॥
४२॥अथगगनाकुलतामाह॥मंसलविकिवह्लुणिहंहत्थगोज्जंवमइलिअदिसाअक्कं॥खत्तूणवतमणिवहंचंदु
ज्जोएणखंडिअंवणहअलं॥मंसलकर्दमनिभंहस्तमाह्यमिवमलिनितदिक्चक्रं॥उत्खाय्येवतमोनिवहंचंद्रोद्यो
तेनमुंडितमिववलितमिवेतिवानभस्तलं॥चंद्रोद्योतेनतमोनिवहमुत्खायकेशादिवच्छित्वानभस्तलंमुंडितमि
वधवलितमिवेतिवातमोनिवहंकिंभूतंविस्विह्लुशब्दःकर्दमदेशीतेनबनीभूतकर्दमनिभंअतएवहस्तेनमाह्य
मिवनिविडत्वात्एवंमलिनितंदिक्चक्रंयेनतत्तथाशशिनेतिपूर्वस्कंधकादनुषंजनीयंतेनशशिनानापितेनेवे
त्यर्थात्चंद्रोद्योतेनक्षुरादिवत्करणीभूतेननभस्तलंमुंडितमित्यन्वयइतिवयं॥४३॥वनमाह॥भिणतमदु
१७२

द्दिणाइंविडवन्तरविरलपडिअचंदकराइं॥थोअमुहालोआइंपअडन्तिवमुद्धपल्लवाइंवणाइं॥भिन्नतमोदुर्दि
नानिविटपान्तरविरलपतितचंद्रकराणि॥स्तोकमुखालोकानिप्रकट्यइन्तवमुग्धपल्लवानिवनानि॥शशिनावना
निप्रकटयंतेस्फुटीक्रियंतइवकिंभूतानिविटपानामंतरेणरंध्रेणविरलंयथास्यात्तथापतितावंद्रस्यकरायेषु
अतएवभिन्नंखंडितंतमएवतमसावादुर्दिनंयेषुअतएवस्तोकमाभ्यंमुखालोकानिइषत्करपातादालोकस्तज
छटावातएवछटासंबंधान्मुग्धंमनोरमंपल्लवंयेषांतानियद्वावनानिकतृणिमुग्धपल्लवानिक्षुद्रपल्लवान्यपिक
र्माणिप्रकटयन्तिप्रकाशयन्तिचंद्रोत्कर्षादित्यर्थःविशेषणानिवनवत्पल्लवानामपीतिध्येयंविटपान्तरपतित
चंद्रकरत्वात्किरणैरेवप्रगल्भतिस्रवंतीवेतिकेचित॥४४॥कुमुदसाम्राज्यमाह॥परिमलिअदुमकुसुमाउअह
तदिसाइन्दमअनीसन्दा॥निद्दिट्ठपंकअवणा॰वगान्तिकुस॰अराइमहुअरा॥परिमृदितद्रुमकुसुमाउ
पभुक्तदिग्गजेंद्रमदनिस्यंताः॥निर्दृष्टपंकजवताआक्रमतिकुमुदोदराणिमधुकराः॥परिमृदितद्रुमकुसुमा
नियेरुपभुक्तादिग्गजेंद्राणास्पदमानामदापेरेवनिर्दृष्टमुपभुक्तंपंकजवनयेस्तेपिमधुकरं॥कुमुदोदराण्या
क्रमन्तिनतुदलानिविकाशोत्कर्षेणदलानामधोगमनात्प्रसंद्यादराएवपतनादितिभावः॥एतेनरात्रौद्रुमकुसुमा
द्यपेक्षयासामयिकत्वेनकुमुदमधूनामास्वादसाम्राज्यंसूचितं॥४५॥अथचंद्रस्याद्धारोहणमाह॥होइणिरा
अअलम्बोगवक्खपडि॰दिसागअस्सवसृसिणो॥कसणमणिकुट्टिमअलेगण्हतोसरजलद्धकरपभारो
भवतिनिरायतलंबोगवाक्षयतितोदिग्गजस्यवशशिनः॥कृष्णमणिकुट्टिमतलेगृन्हन्सरोजलमिवकरप्राग्भा
रः॥दिग्गजस्येवशशिनःकरप्राग्भारःइंद्रनीलघटितकुट्टिमतलेगवाक्षेणपतितःसन्सरोजमिवगृन्हन्निराय
तलंबोभवतिगजस्यकरःशुंडातदग्रभागःसरोजलंगृन्हनदीर्घकृतःसल्लंबोभवत्येवेत्यशयस्तथाचश्लेषेनदि
ग्गजचंद्रयोःश्यामत्वेनसरोवरकुट्टिमयोर्दैर्घ्येणकरपदश्लेषेणचशुंडाकिरणयोःसाम्येनोत्प्रेक्षा॥४६॥अथ
चंद्रारूढस्थितिमाह॥दीसन्तिगअउलणिहेससिधवलमइन्दविदुएतमणिवहेभवणच्छाहिसमूहादीहाणीस

Dr. BHAU DAJI MEMORIAL

अकद्दमपअच्छाआ॥ दृश्यंतेगजकुलनिभेशशिधवलमृगेंद्रविद्रुततमोनिवहैर्भवनछायानांसमूहादीर्घानिःसृ
तकर्दमपदछायाः॥भवनानांछायासमूहादीर्घाद्दृश्यंतेचंद्रस्यतिर्यगूर्द्धस्थितत्वादित्याशयः किंभूताःश्यामत्वाद्ग
जकुलतुल्येतमोनिवहेचंद्रएवधवलोमृगेंद्रस्तेनविद्रुतेसतिनिसृतःकर्दमोयत्रतादृशंयत्पदंपदार्पणस्थानं
तद्दछायाशोभायेषांतथाभूतास्तथाचपंकादुत्तीर्णस्यकरिणःपदपंक्तिःपंकमयीभवतीतितथाचभूतस्यविधुसिंह
भियापलायितस्यतमोगजस्यपदपंक्तितुल्यत्वंक्तितुल्यत्वंगृहछायानामित्यर्थः॥ सिंहस्यस्वभावतएवधवलत्व
मितिनिरर्थकत्वमाशंक्यपूर्वपातानियमेनमृगेंद्रवद्धवलःशशिविद्रुतइतियोजयंतिकेचित्॥ केचित्तुतमोगजविना
शक्षमत्वसूचनायधवलोधुरंधरइत्यर्थमाहुः॥४७॥अथेदानींभोमध्यस्थितिमाह॥तंस्कण्णमंतविंबोजाल
तरणिग्गओसरंतमऊहो॥भिण्णाविवरंधआरोभग्गछाहिपसरोविलग्गइचंदो॥ तिर्यगुन्नमद्विंबोजालांतरनिर्ग
तापसरन्मयूखः॥भिन्नविवरांधकारोभग्नछायाप्रसरोविलगतिचंद्रः॥चंद्रोविलगतिनभोमध्यमारोहतीत्यर्थः॥की
दृक्तिर्यग्देशादुन्नमदूर्ध्वमुपरिगच्छद्विंबयस्यमस्तकोपरिस्थितेरितिभावः॥ यदाप्रथमंतिर्यग्भूतंसत्पश्चादुपरिगच्छ
द्विंबयस्यऊर्ध्वारोहणेनतिर्यग्भावादथसमत्वादित्यर्थः॥एवंप्रथमंजालांतरेणनिर्गतानिःशेषतोगृहंप्रविष्टाश्चथापस
रंतागृहाद्बहिर्गच्छंतोमयूखायस्ययदाचंद्रस्तिर्यक्स्थितस्तदातिर्य्यग्वन्तिजालसांख्यनेनिःशेषतोगृहंप्रविष्टारुचयः
संप्रतिगृह्यमस्तकोपरिस्थितइतिगृहंनप्रविशतीत्यर्थः॥ एवंभिन्नोविवरस्योंधकारोयेनसंमुखतयाकिरणा
नांतत्रप्रवेशादेवचभग्नछायानांप्रसरोबहिर्गमनंयेनतथानिशामध्येछायानांवृक्षादिमूलएवस्थितेरित्तिभावः
॥४८॥पुनर्ज्योत्स्नामाह॥विछड्डिअचुण्णणिहाआवीअंसुअविसेसिअभच्छाआ॥ विअडगवक्खोवइआदीवुज्जो
अमिलिआकिलिम्मइजोण्हा॥ विछर्दितचूर्णनिभाआपीतांशुकविशेषितावछाया॥विकटगवाक्षावपतितादीपो
द्योतमिलिताक्लाम्यतिज्योत्स्ना॥ विकटेतिहेतुगर्भंतथाचप्रौढोपरिस्थगवाक्षेणावपतितागृहं॥ प्रविष्टाज्योत्स्नादी
पोद्योतेनमिलितासतीक्लाम्यतिस्वल्पत्वादभिभवेनमंदाभवतीत्यर्थः॥अतएवपुंजीकृतचूर्णनिभाप्रभाविरहादेवं

दीपरुचिसंबंधादापीतेनइषत्पीतछविनाप्रभारूपेणांशुकेनविशेषितासदृशीकृताःभ्रस्यछायाकांतिर्ययासुष्टत्वात्
इषत्पीतवस्त्रसदृशीकृताभ्रतुल्यकांतिर्वायद्वा आपीतांशुकेनपीतवस्त्रेणविशेषित्तविशिष्टयदभ्रकंतद्दछा
यायस्याःवस्त्रपीतिमप्रतिबिंबादभ्रकस्यापिकिर्मीरितत्वादितिभावः॥ अछछाएतिपाठेआपीतांशुकाइषत्सान
विषयीकृतप्रभासतीविशेषितात्मीकृताःछाकांतिर्यस्याःसाइषत्पीतवस्त्रवत्अछानिर्मलाछायायस्येत्यर्थोवा॥
४९॥ पुनःकुमुदविशेषमाह॥परिणामदरुम्मिल्लं ओवत्तेअव्वबहलजोण्हाभरिअं॥ थोअत्थोअमउलिअंभरवि
त्थारिअदलंबवइकुमुअं॥परिणामदरोन्मीलंअपवर्त्तयितव्यबहलज्योत्स्नाभृतं॥स्तोकस्तोकमुकुलितंभरविस्तारि
तदलमिववेपतेकुमुदं॥स्तोकस्तोकक्रमेणमुकुलितंजातमुद्रदिवसइत्यर्थात्कुमुदंनिशिपरिणामेनक्रमजरठत
याइषदुन्मीलाउन्मीलनंतद्विशिष्टंसद्वेपतेऽग्रतएवअपवर्तयितव्यमायनीभावेनहस्तादिनाहौबहिःकरणयोग्ययाबह
लज्योत्स्नयाभृतंपूर्णंअतएवभरेणज्योत्स्नागौरवेणविस्तारितपत्रमिवअयमर्थनदिवाजातमुद्रमपिकुमुदंस्वभा
वादेवनिशिकिंचिद्विकसितंअथवर्मलाभेनज्योत्स्नयापूरितत्वात्तद्भरेणदलानामधोगमनादुत्फुल्लमासीदित्यन्मीलन
कारणस्यवानद्धेतुकस्यवास्पदस्यभरहेतुकत्वोत्प्रेक्षयामुकुलनसमकालमेवविकासोत्कर्षइतिव्यत्यतेअन्योपिव
यःपरिणामेनइषदुन्मीलःकंपतइतिध्वनिः॥५०॥वृक्षावस्थामाह॥पवणाअंपिअसिहरागलिअणिअत्तत्तविडववि
हुअछाआ॥ससिकिरणपरिक्खित्ताजोण्हावेअवडिआपवतिवरुक्खा॥ पवनाकंपितशिखरागतापनिवर्त्तमान
विटपविधूतछायाः॥ शशिकिरणपरिक्षिप्ताज्योत्स्नावेगपतिताः प्लवंतइववृक्षाः॥ शशिकिरणैःपरिक्षिप्तावेष्टिताअ
तएवज्योत्स्नानवसलिलमिवतस्याःवेगेप्रवाहेपतिताःसंतोवृक्षाःप्लवंतइवप्लवनंकुर्वंतइवकिंभूताःपवनेनाकं
पितंशिखरंयेषामतएवगतैरथापनिवर्त्तमानैरागतैर्विटपैर्विधूताःकंपिताःछायायेषांतेअन्योपिप्रवाहेपतितःकर
चरणादिव्यापारेणप्लवतेइतिवृक्षाणांशाखाकंपहेतुकछायाचांचल्येनप्लवनमुत्प्रेक्षितमितिज्योत्स्नाबाहुल्यं॥५१
॥पुनर्ज्योत्स्नामाह॥घरमणिमऊहभिण्णासलिलाहअवलंइचंदणरसच्छाआ॥ उद्देसदुलिअतमोदीसइवि

वरविसमोव्वजोण्हाणिवहो॥ गृहमणिमयूखभिन्नःसलिलाहतवहलचंदनरसछायः॥ उद्देशोच्छलिततमोदृश्यते
विवरविषमइवज्योत्स्नानिवहः॥ गृहमणीनांदीपानांमयूखैर्भिन्नःसंगतःसन्गृहइत्यर्थात्सलिलेनाहतस्यसिक्त
स्यचंदनरसस्येवछायाकांतिर्यस्यपीतधवलत्वात्तथाभूतोज्योत्स्नानिवहः॥ उद्देशेक्वचित्क्वचिदुच्छलितंविपर्यस्यास्थितं
तमोयत्रशाखापत्रादिछायारूपत्वात्तथाभूतःसन्विवरैर्निम्नप्रदेशैर्विषमोविसदृशइवदृश्यतेबहिरित्यर्थात्क्व
चित्क्वचिदवस्थिताशाखापत्रादिछायाविवरबुद्धिंजनयतीत्यर्थः॥ दृशोंधनोगृहमणिः॥ स्नेहाशःकज्जलध्वजइतिहा
रावलिः॥९२॥ अथताराणांतानवमाह॥ विअलिअणिअअच्छाअंजाअंजोण्हापरिप्पवंतमिअंकं॥ विच्छूढव
मऊहं अभिभाविअसण्हतारअंगअणअलं॥ विगलितनिजकच्छायंजातंज्योत्स्नापरिप्लवमानमृगांकं॥ विक्षिप्त
व्यमयूखंअविभावितश्लक्ष्णतारकंगगनतलं॥ गगनतलंजातंकीदृशंविगलिताऽपगतानिजकछायाश्यामरू
पतायत्रज्योत्स्नाबाहुल्यादेवंज्योत्स्नासुपरिप्लवमानइवतरन्निवमृगांकोयत्रजलेफेनवत्संचारशीलत्वादेवंवि
क्षिप्तव्याहस्तादिस्फटनीयामयूखाश्चंद्रकांतयोयत्रघनीभूतत्वादतएवंअविभाविताअलक्षिताःश्लक्ष्णाश्चंद्रा
लोकेनाभिभूतत्वात्कृशास्तारकायत्रतथाभूतं॥९३॥ पर्वतावथामाह॥ णिव्वडिअतुंगसिहराधवलादीसंतिदिट्ठ
महिअलबंधा॥ णहमज्झट्ठिअससहरवोच्छिण्णछाहिमंडलाधरणिहरा॥ निर्वलिततुंगशिखराधवलादृश्यंतेदृष्ट
महीतलबंधाः॥ नभोमध्यस्थितशशधरव्यवच्छिन्नछायामंडलाधरणीधराः॥ धरणीधराःधवलादृश्यंतेज्योत्स्नाबा
हुल्यात्कीदृशानिर्वलितानिपृथग्भूतानितुंगानिशिखराणियेषांएवंदृष्टोमहीतलेबंधःसंधिर्येषांएवंनभोमध्यस्थि
तेनशशिधरेणव्यवच्छिन्नोऽपनीतःछायामंडलोयेषांतेचंद्रस्योपरिस्थित्यातलएवछायावस्थितिरितिभावः॥९४॥
ज्योत्स्नाप्रकर्षमाह॥ विवरंतिपरिहरिज्जइबहलदुमछाहिमंडलागअतिमिरं॥ अच्छुंदइवीसत्थंजोण्हाणिवहभ
रिअंथलम्मिवविवरं॥ विवरमितिपरिहृयतेवहलद्रुमछायामंडलागततिमिरं॥ आक्रम्यतेविश्वस्तंज्योत्स्नानिवह १७५
भृतंस्थलमिवविवरं॥ वहलंघनंयतद्द्रुमाणांछायामंडलंतेनागतप्राप्तंतिमिरंयत्रतत्स्थानमित्यर्थात्विवरमिदमिति

बुध्यापरिह्रियतेरंध्रस्यापितमोमयत्वादेवंज्योत्स्नानिवहेनभृतंपूर्णंविवरंरंध्रप्रदेशोविश्वस्तंनिःशंकंयथास्यादेवं
स्थलमिवाक्रम्यतेगम्यतेतमोविरहादत्रभ्रांतिमानलंकारः॥ तदुक्तंकंठाभरणेभ्रांतिर्विपर्ययज्ञानंद्विधासाप्रतिपद्य
ते॥ अतत्वेतत्वरूपावातत्वेवाऽतत्वरूपिणा॥९५॥ अथनिशाचरीणांसंभोगवर्णनमुपक्रमतेयुग्मकेन॥ इअव
ह्हजग्गाविअतीरविसूरंतणिव्वलिअचक्काए॥ जाअम्मिमउलिउप्पलदुक्खपहुत्तमहुअरम्मिपओसे॥ इतिम
न्मथजागरिततीरखिद्यमाननिर्वलितचक्रवाके॥ जातेमुकुलितोत्पलदुःखप्रभवन्मधुकरेप्रदोषे॥ इत्यनेनप्रकारेणप्र
दोषेनिशाभागेजातेसतीत्युक्तत्तरस्कंधकेनान्वयः॥ वस्तुतस्तुप्रदोषेरजनीमुखेजातेअतीतेसतीत्यर्थस्तेननिशामध्यभा
गोलभ्यतेकीदृशीमन्मथेनजागरिताउज्जागरितौजागरितमन्मथोवाऽतएवतीरयोर्नदीकूलयोःखिद्यमानौसंगमा
भावात्तु निर्वलितौविश्लिष्टौचक्रवाकौयत्रएवंमुकुलितेषूत्पलेदुःखेनप्रभवंतोमांतोमधुकरायत्ररात्रौतेषां
मुद्रणादःलितुल्यप्रमाणादरत्वाद्भूतिभावः॥९६॥ वम्महपरव्वसाइंरामागमणपरिवड्ढिआवेआइं॥ अहिलक्खं
तिमुअंतिअरइवावारंविलासिणीहिअआइं॥ मन्मथपरवशानिरामागमनपरिवर्द्धितावेगानि॥ अभिलषंतिमु
चंतिचरतिव्यापारंविलासिनीहृदयानि॥ विलासिनीनांहृदयानिप्रदोषसाम्राज्यतःमन्मथेपरवशान्यस्वतंत्राणिसं
तिरतिव्यापारंस्मरतोत्सवंअभिलषंतिरामागमनेनपरिवर्द्धितआवेगःकष्टंयत्रतथाभूतानिसंतिमुंचंतिचनिज
निजस्वामिविधुरशंकित्वादितिहर्षत्रासभावयोःसंधिः॥९७॥ तदेवोपपादयति॥ ॥लग्गगलंतासाअआवेअवि
हिण्णवम्महुच्छलिअसरहं॥ छिण्णघडिज्जंतरसंणावज्झइदइअचुम्बणंजुवइणं॥ लग्नगलदास्वादंआवेगविभि
न्नमन्मथोच्छलितसरभं॥ छिन्नघट्यमानरसंनाबध्यतेदयितचुंबनंयुवतीनां॥ युवतीनांस्वविषयेदयितकर्तृ
कंदयितविषयेस्वकर्तृकंवाचुंबनंनाबध्यतेचिरंनतिष्ठतिविषादोदयात्हृदयेनलगतीतिकेचित्॥ वस्तुतस्तु
गाढंनसंबध्यतेविरोधिरसोपस्थित्याधरोष्ठशैथिल्यादित्यर्थः॥ कीदृशंप्रथमंकामवशाल्लब्धस्तदेवावेगवशा
द्गलन्नपगच्छन्नास्वादः॥ सौहित्यंयत्रएवंआवेगेनोद्वेगेनविभिन्नंसंबद्धंखडितंवामन्मथेनोच्छलितमुत्तरलीकृतं

सुखंयत्र यद्वाऽऽवेगेनविभिन्नःसंबद्धःखंडितोवायोमन्मथस्तेनोल्लुलितमुत्तरलीकृतंसुखंयत्रएवंभिन्नःसन्नुद्घुष्यमा
नःस्थाप्यमानोरसःशृंगारादिकोयत्रहर्षविषादयोस्तुल्यत्वादितिभावः॥ ५८॥पुनस्तदेवाह॥वेवइससइकिल्लिमु
इसअणेआमुअइणीसहोअंगाइं॥णविणज्जइकिंभीउ०उ०मअणपरव्वसोविलासिणिसत्थो॥वेपतेश्वसितिकाम्यति
शयनेआमुंचतिनिःसहोंगानि॥ नविज्ञायतेकिंभीतउतमदनपरवशोविलासिनीसार्थः॥विलासिनीसार्थोवेपतेश्वासं
त्यजतिक्लांतिंपातिनिःसहःसन्शयनेअंगान्यामुंचतित्यजति तन्नविशिष्यज्ञायतेकिंरामाद्भीतउतपक्षांतरेमदनपरतंत्रो
वेपनादिकार्याणांभयसाधारणत्वादितिभावः॥ ५९॥राक्षसीनांकातरतामाह॥पिअअमवछेसुवणेउ०वइअदिसा
गइंददंतुल्लिहिए॥वेवइदट्ठुणचिरंसंभाविअसमरकाअरोजुअइजणो॥प्रियतमवक्षःसुव्रणानवपतितदिग्गजेंद्र
दंतोल्लिखितान्॥वेपतेदृष्ट्वाचिरंसंभावितसमरकातरोयुवतीजनः॥संभावितउपस्थितोयःसमरस्तेनकातरोयुवती
जनश्चिरंवेपतेकिंकृत्वाप्रियतमवक्षस्सुव्रणान्दृष्ट्वाकिंभूतान्अवपतितस्यप्रहर्तुमागतस्यदिग्गजेंद्रस्यदंताभ्यामु
ल्लिखितान्कृतचिन्हान्तथाचवक्षःक्षतदर्शनेनशूरत्वनिर्णयात्संग्रामाऽवशकत्वज्ञानसत्त्वेवेनपूर्वमिंद्रयुंसक्षताअ
पिभाग्येनजीविताःसंप्रतिकिंस्यादितिसंदेहेनकंपइतित्रासरूपभावोदयः॥ ६०॥पुनस्त्रासमेवाह॥सुरअसुहद्धम
उलिअंभसरदरकुत्तमालईमउलणिहं॥साहइसमरुप्पेसंउथिथुम्मिल्लुतारअणअणजुअं॥सुरतसुखार्द्धमुकुलि
तंभ्रमरदराक्रांतमालतीमुकुलनिभं॥शास्तिसमरोत्प्रेषंउत्पिसोन्मीलत्तारकंनयनयुगं॥तासांनयनयुगंकर्तृसमरो
त्प्रेषसमरत्रासंशास्तिकथयति॥किंदृक्सुरतसुखेनार्द्धमुकुलितंकिंचिन्मुद्रितंअतएवभ्रमरेणईषदाक्रांतयन्माल
तीमुकुलंतत्तुल्यंमुकुलोदरप्रविष्टएवभ्रमरइतिमुकुलिताक्षितारकातोल्यंअथोत्पिलयाउद्वेगेनोन्मीलंतीवहिर्भ
वंतीतारकायस्यतत्तथाचप्रथमंकामवशात्सुखभावनयाकिंचिदंतर्हितापितारकापुनरुद्वेगवशात्सुखविछेदादुन्मीलि
ताऽभूदतएवभयंज्ञापयतीतिभावः॥ ६१॥अथासांत्रासोपमर्दकस्यशृंगारस्योत्कर्षमाह॥अहससिजणिआमोएम
अपरिवड्ढिअपिआहिसारणसोक्खे मअणुम्मूलिअमाणेराअपराहीणरइसुहम्मिपउ०से॥ अथशशिजनितामोदे

मदपरिवर्द्धितप्रियाभिसारणसौख्ये॥मदनोन्मूलितमानेरागपराधीनरतिसुखेप्रदोषे॥अथरतिभयरूपविरुद्धभा
वोत्पन्त्यनंतरंप्रदोषेसरतीतिसंदेशकेनान्तरस्कंधकेक्रियाकर्तृसमन्वयःकर्तव्यः॥कीदृशेशशिनाजनितःप्रहर्षोयत्र
एवंमदेनपरिवर्द्धितानिप्रियाभिसारणरूपसौख्यानियत्र यद्वामदेनकामोत्कर्षेणपरिवर्द्धितंप्रियाभिसारणेनप्रिय
स्यानयनेनसौख्यंयत्रमदीयमदोत्पत्तिसमकालमेवमदाज्ञप्तःप्रियएवमामभिसरतीतिनायिकायामहत्सौख्यमिति
भावः॥ यद्वापरिवर्द्धितमदस्यप्रियस्याभिसारणेनसौख्यंयत्रमदाज्ञयासकामःस्वयमेवाभिसरतीतिनायिकाया
महत्सौख्यमितिभावः॥ यद्वापरिवर्द्धतमदस्यप्रियस्याभिसारणेनसौख्यंयत्रमदाज्ञयासकामःस्वयमेवाभिसरतीतिनायि
कामहदुत्कंठासमकालमेवाहमनयाहूतइतिनायकस्यचेतिभावः॥ यद्वापरिवर्द्धितमदेनप्रियेणनायिकायायदभिसा
रणंतेनसौख्यंयत्रद्वयोरित्यर्थात्॥ सकामोयमभिसारयतिमामितिनायिकायामदंकृतार्थयितुमाहूतेयमागतेवेतिनाय
कस्यचेतिभावः॥एवंमदनेनोन्मूलितोमानोयत्र यद्वामदनस्योन्मूलितंमानमियत्तायत्रएवंरागोनुरागस्तत्पराधीनंरति
सुखंयत्रकदाचिदनुरागंविनापिरतिसुखमुत्पद्यतइतितदानींचंद्रिकासाम्राज्येनसर्वेषांसर्वत्रानुरागपूर्वकमेवतदासी
दितिभावः॥यद्वाराजपराधीनेतिराज्ञोरावणस्यपराधीनंरतिसुखंयत्रेत्यर्थः॥यदीदानींरावणोयोद्धुंवमाकरयेत्तदास
र्वेपितत्रगच्छेयुरितिरतिसुखंनाभवेदितिभावः॥ ६२॥वलइअदूमिअकुविउ०अवसाइअहरिसिउ०अईइसरीरं
॥ससइअचुंबिअसुहिउ०मअपाअडिअहिअउ०विलासिणीसत्थो॥ वलतिचदूनकुपितःअप्रसादितहर्षितोऽर्पयतिश
रीरं॥ श्वसितिचचुंबितसुखितोमदप्रकटितहृदयोविलासिनीसार्थः॥ विलासिनीनांसार्थोवलतिचपरावर्त्ततेचत्रासमु
त्सृज्यशृंगारेप्रवर्त्ततइत्यर्थः॥ मानमुत्सृज्यनायकसंमुखीभवतीतिवातदेवाह॥ प्रियतमैरप्रसादितोपिहर्षितःसन्
शरीरंअर्पयतिप्रियतमोपरिसमर्पयतीत्यर्थः॥अथनायकेनचुंबितस्तेनसुखितःसन्श्वसतिश्वासंत्यजतिसुखवशा
त्॥कीदृक्मदेनप्रकटितंव्यक्तंहृदयंयस्येतिसर्वत्रहेतुः॥ स्वायत्तभावादितिभावः॥ वयंतुपूर्वस्कंधकविशेषणच
तुष्टयेनसहक्रमेणोत्तरस्कंधकवाक्यार्थचतुष्टयस्यसमन्वयस्तथाहि॥ यतःशशिजनितामोदेऽतएवअदूनकुपितःकु

पितोपिप्यदूनोऽनुप्रतप्तःसन्वलतिचंद्रजनितानंदेनकोपजन्योपतापशांत्यानायकानयनोद्योगमाचरतीत्यर्थः॥ एवं
यतोमदपरिवर्द्धितेत्यादिअतएवप्रियागमनानंतरंप्रियेप्रसादितोपिहर्षितःसन्शरीरंअर्पयतितदुपरिपातयतीत्य
र्थः॥ एवंयतोमदनोन्मूलितमानेऽतएवप्रियेणाचुंबितोपिसन्स्फुरितःश्वसितितदीयपरिरंभणजनितसुखा
विष्कारात्तश्वासंमुंचतीत्यर्थः॥ एवंयतोरागपराधीनेत्यादिअतएवमदप्रकटितहृदयोऽनुरागसाम्राज्यादितिब्रूमः॥
६३॥ नवोढाकोपमाह॥ रोसपुसिआहराणंदइअबलामोलिचुंबनपरुण्णाणं॥ णिछलिअमण्णुगुरुअंहरइपरा
ङ्मुहजंपिअंजुअईणं॥ रोषप्रोंछिताधराणांदयितबलामोटितकचुंबनप्ररुदितानां॥ निर्वलितमन्युगुरुकंहरत्तिपरा
ङ्मुखजल्पितंयुवतीनां॥ दयितस्यबलादामोटितकेनबलादामोद्यबलात्कारेणेत्यर्थः॥ कृतंयत्चुंबनतेनानभिमत्या
प्ररुदतीनांपराङ्मुखेनदयितसांमुख्यपरिहारेणजल्पितंसोपालंभवचनंनिर्वलितेनस्पष्टेनमन्युनाईर्ष्यारोषेण
गुरुकंपरिपुष्टंसत्हरतियदि॰तस्यचित्तमित्यर्थात् यथायथाकिंचिदुक्तास्मारयतितथातथामनोहारिभवतीत्यर्थः॥
किंभूतानांरोषेणप्रोंछितोऽधरोयाभिस्तासांत्वच्चुंबनमिदंनस्वीकृतमितिज्ञापयितुंमंचलेनहस्तेनवाऽधरोष्ठंप्रोंछतीतिस्त्री
णांस्वभावः॥ ६४॥ अभिसारिकाणांविषादमाह॥ अहिसारणंणगेण्हइणसंठवेइअलअंणपुछइदूई॥ चंदालोपडि
हअ॰वेवइमुदहिअओविलासिणिसत्थो॥ अभिसारणंनगृण्हातिनसंस्थापयत्यलकंनपृछतिदूती॥ चंद्रालोकप्रतिहतोवेप
तेमूढहृदयोविलासिनीसार्थः॥ चंद्रस्यालोकेनदर्शनेनतेजसावाप्रतिहतोनिवारितगमनोत्साहोविलासिनीनामभिसारि
णीनांसार्थःअभिसारणेनगृन्हातिकर्तव्यतयानस्वीकरोतिनचअलकंसंस्थापयतिसंयमयति॥ नायकनिकटगमना
यप्रसाधनभावेनेत्यर्थः नचदूतीपृछति॥ कथंगमनंस्यादित्यादिकमित्यर्थः॥ किंतुममावज्ञामेवैदग्ध्यमस्वायत्तिंवाकिं
ज्ञास्यतिप्रियःकथंवातत्समागमःस्यादितिमूढहृदयःकेवलंवेपतेमदनागमनेनसवेदन्यामाश्रयेदथवामामन्यानुरक्ताम
वगछेत्तदामयानजीवितव्यमितिभावः॥ ६५॥ अथशृंगारसाम्राज्यमाह॥ अवमण्णिअरामकहंजहापुरपउत्तदजुअइज
णवावारं॥ सोहइअरणिअराणंआसंधिअदहमुहंपओसागमणं॥ अवमानितरामकथंयथापुरःप्रवृत्तयुवतीजनव्यापा

रं॥ शोभतेरजनीचराणामध्यवसितदशमुखंप्रदोषागमनं। रजनीचराणांप्रदोषोरात्रिस्तदागमनंशोभतेप्रीतिंजनयतीत्य
र्थः॥ कीदृक्अध्यवसितोविपक्षनिवारकत्वेनावधारितोदशमुखोयत्रतादृशंयत्रस्तत्तएवअवमानिताऽनादरविषयीकृ
तारामस्यकथायत्रतथाभूतेसतिरावणेकोरामइत्येवंरूपनिश्चयादतएवयथापुरोयथापूर्वंप्रवृत्तोयुवतीजनानांव्यापारः
संभोगादियत्रेतिरतिभावस्योदयः॥ ६६॥ स्त्रीणामनुरागातिशयमाह॥ पिअपासाहिणिअत्तोसमुहंअलिअंपिजंभण
इदूइजणो॥ तंचिअकामिणिसत्थोदूमेन्तिम्मिविबहुसोणिअत्तेइकहं॥ प्रियपार्श्वान्निवृत्तःसंमुखंअलीकमपियद्भणतिदू
तीजनः॥ तामेवकामिनीसार्थोदुन्वंतीमपिबहुशोनिवर्त्तयतिकथं॥ प्रियस्यपार्श्वात्समीपान्निवृत्तआगतोदूतीजनःसंमुख
मग्नतएवअलीकमपिसत्स्वयमेष्यतिनवात्वांनेष्यतिकिंतुसवापराधानुल्कापरस्यामनुरज्यतीत्यादिमिथ्यापियद्भणतिदुन्व
तीमुपतापयंतीमपितामेवकथांकामिनीसार्थोबहुशोनिवर्त्तयतिरसनिर्भरत्वात्परुषरूपामपिदूतिसमांप्रतिकिमुक्तवान्
किंवाकरिष्यतिमयाकिंचिदत्रनश्रुतंकिंचिदत्रनबुद्धमित्यादिव्याजेनशतधापवर्त्यश्रृणोतीत्यर्थः॥ ६७॥ तासांवैदग्ध्यमा
ह॥ सअणेसपणअकलहेसमुहणिसण्णपिअवेलविज्जंतीहिं॥ परिवत्तिउणचइअंणवरंणअणेहिविअलिअंबाहजलं
॥ शयनेस्वैधुप्रणयकलहेसंमुखनिषण्णप्रियव्यावर्त्यमानाभिः॥ परिवर्तितुंनशकितंकेवलंनयनयोर्विगलितंबाष्यजलं
प्रणयकलहेसतिशयनेषुसंमुखनिषण्णेःसंमुखस्थैःप्रियैर्व्यावर्त्यमानाभिरितोबहिर्व्रजकितवप्रयोजनमित्याक्षेपात्काकरा
भ्यामन्यतोभिमुखीकर्तुंप्रेरिताभिःकामिनीभिःपरिवर्त्तितुपराङ्मुखीभवितुंनशकितंतथासतिचेदयंनवादयेत्तदारस
विछेदएवस्यादितिपरामर्शात्किंतुकेवलंनयनयोर्बाष्पजलंविगलितंत्यक्तंएवमनुरक्तामपिमामयमिथ्यागंजयतीतिभा
वः॥ रोदनादप्ययमनुरज्यत्विति। यद्वाकलहेसतिपराङ्मुखीभूयस्थायाएवप्रियायाःप्रसादनायगत्वासंमुखीभू
यस्थितस्यवृत्तांतोवर्ण्यते॥ तथाहिअत्रपक्षेवेलविज्जंतीहिंव्याकुलीक्रियमाणाभिरित्यर्थः॥ तथाचसंमुखनिषण्णैःप्रि
येरालिंगनचुंबनादिव्यापारेणव्याकुलीक्रियमाणाभिःपरिवर्तितुंनशकितंमनसाकिंचित्प्रसन्नत्वादन्यथारसाभासःस्या
त्किंतुनयनयोर्बाष्पजलंत्यक्तंतदातथापराधंकृत्वासंप्रतिप्रसादयतीतिभावस्तथाभूतापराधस्यापिसंमुखीभूयस्थितइतिवा॥

॥६८॥ मानिनीमानभंगमाह ॥ अणुणअखणलद्धसुहेपुणोविसंभरिअमण्णुदूमिअविहले ॥ हिअएमाणवइणंचिरेण
अगरुउ॰पसम्मइरोसो ॥ अनुनयक्षयक्षणलब्धसुखेपुनरपिसंस्मृतमन्युदुःखितविह्वले ॥ हृदयेमानवतीनांचिरेणप्र
णयगुरुकः प्रशाम्यतिरोषः ॥ मानवतीनांहृदयेरोषश्चिरेणप्रशाम्यति ॥ किंभूतेअनुनयःप्रसादनंततक्षणंलब्धंसुखं
येनअनुनयेनक्षणंव्याप्यलब्धसुखेइतिवापुनरपिसंस्मृतेनमन्युनाऽपराधेनदुःखितेऽतएवविह्वलेव्याकुलीभूते ॥
रोषःकीदृक् ॥ प्रणयेनगुरुकोनुन्मूलनीयस्तथाचयथायथाप्रणयाधिक्यंतथातथाऽपराधेसतिकोपाधिक्यमित्यनुनयेनप्र
सादोन्मुखमपिहृदयंमन्युबीजस्मरणेननिवर्त्ततइतिचिरकालेनप्रसादोभवतीतिभावः ॥ ६९ ॥ स्त्रीणांवैलक्ष्यमाह
॥ ॥अवअच्छिवइविलक्खोपडिसारेइबलअंजमेइणिअसं ॥ मोहंआलवइसहिंदइआलोअणवि उ॰विलासिणीस
त्थो ॥ अलकस्पृशतिविलक्षःप्रतिसारयतिवलयंयमयतिनिवसनं ॥ मोआलपतिसखींदयितालोकनर्त्तितोविलासिनी
सार्थः ॥ कुतश्चिदकस्मादागतस्यदयितस्यालोकेनदर्शनेननर्त्तितश्चंचलीकृतोविलासिनीसार्थोविलक्षःप्रतिभाश्च ॥
न्यःसलज्जइतिवाऽलकस्पृशतिएवंवलयंप्रतिसारयतिस्थानांतरंप्रापयतिनिवसनंसंयमयतिइतस्ततःसमाकृष्यसंवृ
णोतिमोघमफलंयथास्यात्तथासखीआलपतिसख्यासहतुच्छमालापंकरोतीत्यर्थः ॥ तथाचवस्तोभहेतुकंसर्वमिदंनायि
कायांदयितेऽनुरागंव्यनक्ति ॥ तदुक्तंकंठाभरणेआत्मप्रकाशनपराचेष्टाचपलतोच्यते ॥ ७० ॥ नायकोत्कंठामाह ॥
अब्भुट्ठणतुरिआणंसोहइदइउ॰वऊहणविराआणं ॥ असमत्तमंडणंनहेअसणअगमणंविलासइणम् ॥ अभ्युत्था
नत्वरितानांशोभतेदयितोपगूहनविशीर्णानां ॥ असमाप्तमंडनानांतथैवशयनगमनंविलासवतीनां ॥ असमाप्तम
पूर्णंमंडनंप्रसाधनंयासांतासांविलासवतीनांतथैवअसमाप्तमंडनावस्थमेवशयनेगमनंशोभतेरसनीयतांयातिनाय
कस्यप्रीतिंजनयतीत्यर्थः ॥ किंभूतानांअभ्युत्थानेप्रियतमागमनेसतिविनयविशेषेत्वरितानांतदेवदयितस्योपगूहनेना
लिंगनेनविशीर्णानांव्याकुलनामस्वायत्तानामितियावत्तथावाकस्मादागतंवल्लभमवलोक्यासमाप्तप्रसाधनापिकामिनी
यावदभ्युत्थानमाचरतितावदेवतेनशय्यायामारोपितेतिनायिकायाःसौभाग्यंव्यज्यते ॥ ७२ ॥ नवोढामानमाह ॥ ॥ १७७

अवसाइअदिण्णसुहोसहीहिंथिरदिट्ठिणिहुअवारिअविडिओ ॥ हिअहिअउ॰सुणिज्जइपिएहिंअलिअकु
वि उ॰विलासिणिसत्थो ॥ अप्रसादितदत्तसुखःसखीभिःस्थिरदृष्टिनिभृतवारितव्रीडितः ॥ त्रस्तहृदयोज्ञायतेप्रियैरली
ककुपितोविलासिनीसार्थः ॥ विलासिनीनांसार्थःप्रियैरलीकंमिथ्यातेनकुपितइतिज्ञायते ॥ कुतइत्यतमाह ॥ कीदृक् असो
प्रदितःसन्संभाषणादौदत्तसुखःप्रत्युत्तराद्यावरणात्तदिण्णमुहोदत्तमुखोवावैमुख्यत्यागादथसखीभिःपरावेद्यकिंचि
तभ्रुकुट्यादिचेष्टाविशिष्टयास्थिरदृष्ट्यानिवारितःसन्व्रीडितोलज्जितःअहमिदानीममूभिरेवमानंकर्तुमुपदिष्टास्तथा
कृतवत्यपिरक्षितुमजानतीदयितवशत्वेनसकामासंभावितास्मीतिभावः ॥ अतएवत्रस्तहृदयःपश्चादेतारूक्षंवदिष्यंती
त्याशयात्तथाचसंभाषणादौप्रवृत्तापिसखीमुखमवलोक्यनिवृत्तेतिशिक्षयाकोपोयंनतुपारमार्थिकइतिप्रियैरज्ञायी
तिनिगर्वः ॥ ७३ ॥ प्रौढस्त्रीणामदमदनोत्कर्षमाह ॥ सहवढ्ढिअंसहिम्मिववढ्ढन्तिपिअअमाहिसारणविग्घे ॥ वारे
इविरेणमउ॰लज्जंविछुहइवम्महोच्चिअपढमं ॥ सहवर्द्धितांसखीमिववर्द्धमानांप्रियतमाभिसारणविघ्ने ॥ वारयतिचि
रेणमदोलज्जांविक्षिपतिमन्मथएवप्रथमं ॥ मदश्चिरेणलज्जांवारयतिप्रथमंमन्मथएवविक्षिपतिलज्जापगमसा
ध्यस्यप्रियाभिसारणरूपमन्मथव्यापारस्यप्रथमतएवोत्पत्तेरालिंगनचुंबनादिरूपमदव्यापारस्यचप्रियसमागमो
त्तरकालीनत्वेनपश्चादितिभावः ॥ किंभूतांप्रियतमेनयदभिसारणंनायिकायाःस्वसमीपनयनंतद्विघ्नेसखीमिवव
र्द्धमानां ॥ वर्द्धतीमितिपाठेवर्तमानांयथाप्रियाभिसरणविघ्नहेतुःसखीलज्जाभूमित्वात्तथालज्जापीत्युपमाप्रियतमस्य
यदभिसारणंनायिकयासमानयनंतद्विघ्नइतिवाएवंसहवर्द्धितांसहप्रौढिमानंगतामितिसख्यामपितथावाज
न्मसंगतापिलज्जाकामिनीभिरभिसरणेसंगमेचमुच्यतइतिशृंगारोत्कर्षः ॥ ममतुव्याख्यामन्मथएवप्रथमंलज्जां
विक्षिपतिदूरंप्रापयतियेनाभिसारःसंपद्यतेमदस्तुचिरेणप्रियसमागमोत्तरंवारयतिमन्मथविक्षिप्तामिवलज्जां
प्रियदर्शनेसत्यागंतुमुत्कंठितामपिदूरतएवनिषेधतीत्यर्थः ॥ ततएवनिर्भरमालिंगनचुंबनादिकंजायतइति
भावः ॥ अत्रमदनेरपेक्ष्ययाचिनामन्मथेसंगतेवकारेणप्रियसमागमोत्तरमेवमदस्योत्पत्तिस्तदानींचमदस्य

मदकृत्येकामस्यापिसहकारित्वमित्येवकारशून्यमदशब्दसाहचर्यात्त्वंजयतानायिकायाधीरत्वंव्यज्यते म
दोविकारः सौभाग्ययौवनाद्यवलेपजः॥ ७४॥ हतीषुशिक्षामाह॥ सहिअणहत्थाहिमुहं दररइअविसे
सअंसमक्खिवूण॥ जुवईहिंवलिअविसमंअप्पाहिज्जइससंभमंदूरजाणो॥ सखीजनहस्तान्मुखं दररचित
विशेषकंसमाक्षिप्य॥ युवतीभिर्वलितविषमंअध्याप्यंतेससंभ्रमंदूतीजनः॥ युवतीभिर्दूतीजनःससंभ्रमं
दूतीजनः॥युवतीभिर्दूतीजनःससंभ्रमंसादरंअध्याप्यतेशिक्ष्यते॥ किंकृत्वा॥ इषद्रचितंविशेषकंयत्रसतन्मुखं
वलितंसाचीकृतमतएवविषमंतिर्यग्यथास्यादेवंसखीजनहस्तात्सखीजनहस्तात्समाक्षिप्याकृष्यतथाचप्रि
यसमीपगमनायमुखमंडनंकारयंतीभिःप्रसाधकसखीहस्तान्मुखमाकृष्यतिर्यक्कृत्वाप्रथमप्रेषितएव
दूतीजनःपुनराहूयतदेवस्फुटितंकिंचित्प्रियस्त्वयामदाचिकमित्थंवक्तव्योमदागमनंचहठान्नवक्तव्यमित्थं
चनिगूहनंकर्तव्यमित्यादिकमतिनिभृतमुपदिश्यतइतिवैदग्ध्यंसूचितं॥ तमालपत्रंतिलकंमुखबिंदुर्वि
शेषकं॥ ७५॥ ॥अथासारसमत्तमाह॥ ॥अण्णसहिअणपुरओअप्पाहेन्तोअअण्णहादूइजणं॥ जंपइ
विमुक्कधीरंअण्णंचिअदइअदंसणेजुवइजणो॥ अन्यसखीजनपुरतोऽध्यापयंश्चान्यदन्यथाचदूतीजनमध्या
पयन्नपिमकृत्वमुपदिशन्नन्यदेवविमुक्तधैर्ययथास्यात्तथादयितदर्शनेजल्पतीतिमूढतयारसमग्नत्वंव्यज्यतइ
तिसंप्रदायः॥ वस्तुतस्तुयुवतीजनःसखीजनस्यपुरतःप्रतारणयाचांचल्यमयहल्लयन्गुरुपरतंत्राभवामिसंप्रति
मदागमनंतत्रनस्यादित्यादिकमन्यदेवदूतीजनंजल्पतिसंप्रत्येताःप्रसारितामयातत्रावश्यमेतासामक्षिवारयि
त्वासमागंतव्यंतेनचतावदमुकस्थानेस्थातव्यमित्यादिक्रमेणसखीभ्योपिसंगोप्यदूतीजनमध्यापयन्नुपदिशन्नक्षि
भ्रुवादिविकारेणान्यथाजल्पतितथाकृतेचदयितदर्शनेसत्यतःपरंभवतोदृष्टागुरुजनमसंबोध्यैवागतास्मीत्यनुज्ञा
दीयतांगमनायेत्यादिकंविमुक्तधैर्यतयातात्कालिकसंभोगतात्पर्यकमन्यदेवजल्पतीतिचातुर्यचतुरस्रतासूचि
तेतिमदुभीतःपंथाः॥ ७६॥ ॥नवोढासंगममाह॥ कहविसमुहाणिअंकेकहकहविवलंतचुंबिअ०वत्तमुहोदेइखलं १७८

तुच्छावेणबहुसत्थेविसूरिअरअंपिधिइम्॥ कथमपिसंमुखानीतांकेकथमपिचलच्चुंबितापवृत्तमुखं॥ ददातिखलदुच्छापेन
वधूसार्थेखिन्नरतमपिधृतिं। नचवधूनांसार्थेविषयेखिन्नताव्याकुलतातत्प्रधानंरतमपिधृतिंप्रीतिंददातियूनामित्यर्थात्। किंभू
ते।पूर्वपातानियमात्॥ कथमपिकष्टसृष्ट्यासंमुखंयथास्यात्तथाअंकानीतेमुक्तादिसमर्पणादिव्यदानकाकूक्तिबलात्कारादिना
अंगमुत्संगमानीतेअनंतरंबलाच्चुंबितंअपवृत्तंतिर्यग्भूतंमुखंयस्यतत्रचुंबनासहत्वादेवंचुंबनसमकालमेवस्खलन्व्रीडापीडाका
मैर्भंगुरत्वाद्व्यक्तउल्लापोनिषेधादिवचनंयत्रतथाचयथायथावाम्यमासामधिकंतथातथाकामोद्दीपनानायकस्यपरानिर्वृतिरित्युक्तं
चकंठाभरणे। अभीष्टार्थस्यसंप्राप्तौस्पृहापर्याप्ततावृत्तिः॥ ७७॥ मानिनीमानभंगाभिव्यक्तिमाह॥ सासइविमुक्कमाणावहलुल्लु
ल्लिपुलउग्गमेणपिआणं पुरओकुन्तणिसण्णागअणिअन्तहिअओविलासिणिसत्थो॥ शास्यतेविमुक्तमानोबहलोद्भिन्नपुल
कोद्गमेनप्रियाणां। पुरतोभिमुखनिषण्णागतापनिवृत्तहृदयोविलासिनीसार्थः॥ प्रसादनयाविमुक्तमानोविलासिनीसार्थःप्रिया
णांकृतेप्रियेभ्यइत्यर्थः। बहलोघनउद्भिन्नःस्फुटोयःपुलकोद्गमस्तेनप्रथमंगतमथमानच्युतावपनिवृत्तंनायकाभिमुखमाग
तंहृदयंयस्यतथाभूतःशास्यतेवधूजनःप्रसन्नइतिपुलकेनप्रियैरनुमीयतइत्यर्थः॥ कीदृक्। पुरतोनायकस्याग्रेतदभिमुखनिषण्णा
पिप्राचीमुखस्यप्रियस्यपुरःप्राचीमुखएवस्थितइतिमानसमयेपराङ्मुखीभूतइत्यर्थइतिहृदयापरिज्ञानसामग्री॥ यद्वापुरतो
नायकस्याग्रेऽभिमुखस्थितोपियथाचहृदयज्ञापकसंमुखावस्थितिसत्त्वेपिपुलकेनैवहृदयंज्ञायतइत्यर्थः॥ ७८॥ विश्रब्धनवोढा
रतमाह॥ णपिअइदिण्णंपिमुहंपणएणामेइअहरंणमोएइबला॥ कहविपडिवज्जइरअंपढमसमागमपरम्मुहोजुवइजणो
नपिबतिदत्तमपिमुखंनप्रणायत्यधरंनमोचयतिबलात्। कथमपिप्रतिपद्यतेरतंप्रथमसमागमपराङ्मुखोयुवतीजनः। प्रथम
समागमेनपराङ्मुखोलज्जयाविरुद्धवृत्तिर्युवतीजनःप्रियेणदत्तमपितन्मुखेविन्यस्तमपिमुखंनपिबतिप्रियस्याधरपानंनकरोती
त्यर्थः॥ प्रियेणचुंबनाययाचितमप्यधरंनप्रणामयतिनोन्नतंकरोतिनप्रणयतिनददातीतिवा॥ नचबलान्मोचयतिप्रियस्याधरो
ष्ठेनाकृष्टमपिबलान्नत्याजयतीत्यर्थः॥ एवंकथमप्यनिर्वचनीयप्रकारेणकष्टेनवारतंप्रतिपद्यतेनतुव्यक्तंस्वीकरोतीत्यर्थः प्रि
येणालिंगितंशरीरंनमोचयतीतिकेचित्। पढमसमागमपरव्वसोइतिपाठेपरवशइत्यर्थः॥ ७९॥ सख्यादूतीपरिहासमाह

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्मारकम्

सेम्बं॰का॰ १७९

॥ ॥८०॥ [illegible]

[illegible] ॥८०॥ [illegible]

अवलंविज्जउधीरंणग्रसोएहिइइहुग्गएविपउ॰से॥ इग्रदूइहिंतुलिज्जइपदमाणिग्रणिअग्रमोविलासिणिसथो॥ अवलंव्यतां
धैर्यंनवसरण्यतिइहोद्गतेपिप्रदोषे॥ इतिदूतिभिस्तुल्यते प्रथमानीतप्रियतमोविलासिनीसार्थः॥ प्रथममानीतः प्रियतमोय
स्यतादृशोविलासिनीसार्थोदूतीभिरित्यनेनप्रकारेणतुल्यतेकिंवाचेष्टतइत्यादिहृदयनिरूपणायपूर्वमानीतस्यापिप्रिय
स्यसंगोपनादुपहस्यतइत्यर्थः इतिकथमित्यतआह।हेसखिधैर्यमवलंब्यतांसतवप्रियइत्यर्थादुद्गतेपिप्रदोषेइहनचएष्यतित
थाचत्वयैवतत्रगम्यतांतेनयत्स्यात्तत्स्यादित्यर्थः॥ अथचसत्यमेवोक्तंत्वयाधैर्यमवलंब्यतांसइहप्रदोषेनैष्यतिकिंतुसंप्रत्ये
वागतइतिछलोक्तिः॥ ८०॥ मदिरायोगमाह॥ देइविलासवईणंसुहेग्रदुःखेग्रपाग्रडिग्रसभावा॥ अणवेक्खिअलज्जाइंस
हिग्रवीसत्थजंपिग्राइपसण्णा॥ ददातिविलासवतीनांसुखेवदुःखेचप्रकटितसद्भावा॥ अनपेक्षितलज्जानिसखीवविश्वस्तज
ल्पितानिप्रसन्ना॥ प्रसन्नावारुणीविलासवतीनामितिचतुर्थ्यर्थेषष्ठीविलासवतीभ्यः विश्वस्तजल्पितानिददातिमादकतयासद
सद्विश्रंभवचनानिवादयतीत्यर्थः। कीदृशानि। अनपेक्षितालज्जायत्रतानिसखीवयथासखीलज्जानपेक्षाणिविश्रंभजल्पिता
निददातीत्यर्थःसहोपमावा। कीदृशी। प्रसन्नासुखेचसंभोगरूपेदुःखेचविप्रलंभरूपेप्रकटितःप्रकाशितःसद्भावःकामजनितोय
यासतथासाउभयदशायामपिवारुण्यासात्त्विकभावोदयात्सख्यपिसुखदुःखयोरपिप्रकाशितसौहार्दाप्रसन्नाचेतिसाम्यं॥ ॥
८१॥ उद्दीपनविभावानाह॥ चंदुज्जोएणमओमग्रणचंदाग्रवोणुवढ्ढिग्रपसरो। दोहिंवितेहिंणुमग्ररोगमग्रणेणणुदाविते
णिग्राग्रइभूमिं चंद्रोद्योतेनमदोमदेनचंद्रातपोनुवर्ध्दितप्रसरः। द्वाभ्यामपिताभ्यांनुमदनोमदनेननुद्रावपितौनीतावतिभू
मिं नुशब्दोवितर्कचंद्रोद्योतेनमदःकिंवर्ध्दितप्रसरोदत्तोमदेनकिंचंद्रातपोवर्ध्दितप्रसरोद्वाभ्यामपिताभ्यांचंद्रोद्योतमदाभ्याम
दनःकिंवर्ध्दितप्रसरोमदनेननचद्वावपितौचंद्रोद्योतमदौकिंअतिभूमिमुत्कर्षकाष्ठांनीतौ। यद्वावर्ध्दितप्रसरोमदश्चंद्रोद्योतेन
किंअतिभूमिंनीतस्तथाभूतश्चंद्रातपोमदेनकिंअतिभूमिंनीतोद्वाभ्यामपिताभ्यांतथाभूतोमदनःकिंअतिभूमिंनीतोद्वावपितथाभू
तौतौमदनेनकिमित्यादियोजनीयं। परस्परोद्दीपकत्वादितिभावःपरिवृत्तिरलंकारः संमोहानंदसंभेदोमदोमधोप्रयोगजः॥८२॥
आश्वासकविछित्तिमाह॥ चंदग्ररेणपग्रोसेणिज्जइमग्रणेणमहुमग्रणेणग्रसमग्रं दूरंदूरारूढोयुवईणंपिएणसबहुरसोग्रणु
राग्रो॥ चंद्रकरेणप्रदोषेनीयतेमदनेनमधुमदेनचसमं॥ दूरंदूरारूढोयुवतीनांप्रियेषुबहुरसोनुरागःयुवतानांप्रियेषुबहु १७९

[illegible]

॥अथजानकीदर्शनोद्दीपितमदनस्यरावणस्यविरहावस्थामाह॥ ॥इग्रपडिसारिग्रचंदेदूरुक्खंडिग्रणिसापग्रत्तविरा
मे चित्तविग्रकामिणिअणेजामछेग्रविसमंगग्रम्मिपउ॰से॥ इतिप्रतिसारितचंद्रेदूरोत्खंडितनिशाप्रवृत्तविरामेचे
तितकामिनीजनेयामछेदविषमंगतेप्रदोषे॥ इत्यनेनदूतीप्रेषणप्रसाधनसंभोगादिनाप्रकारेणप्रदोषेगतेसतीत्यग्रि
मस्कंधकेनसमन्वयः॥ कीदृशेप्रदोषेप्रतिसारितोदूरंप्रापितश्चंद्रोयेनतत्रयामिनीशेषत्वादेवंदूरंउत्खंडिताजनीकृता
यानिशातयाप्रवृत्तःप्रदत्तोवाविरामोऽवसानंसंभोगव्यतिरेकोवायत्रएवंचेतितःप्राप्तचैतन्यःकामिनीजनोयत्रपूर्ण
कामतयामदापगमात् यामस्यछेदेनापगमेनविषमंयथास्यादितिक्रियाविशेषणं। यामछेदेननिशान्ह्रासात्संभोग
साम्राज्याभावेनोद्वेजकत्वादितिभावः॥ १॥ दीहंरक्खसवइणाचिंतारेअचिअधीरदाविअहिअअं॥ दसहिंविमुहेहिंस
मअंआलोइअसुण्णदसदिसंणीससिअं॥ दीर्घराक्षसपतिनाचिंतारेचितधैर्यदर्शितहृदयं॥ दशभिरपिमुखैःसमकं
आलोकितशून्यदशदिग्निश्वसितं॥ राक्षसपतिनादशभिरपिमुखैःसममेकदेवदीर्घयथास्यात्तथानिश्वसितंसितालं
भोपायाभावादितिभावःरामःसन्निहितःसीतानसंमुखीवृत्तेत्यादिचिंतयारेचितैःशून्यीकृतंयद्धैर्यंतेनदर्शितंव्यक्तीकृ
तंहृदयमांतरंयत्रतद्यथास्यादवलंबितमपिधैर्यंतुछतयागोपनंनजनयतीत्यर्थः एवंदशभिरपिमुखैरित्यर्थादालो
किताःशून्यादशदिशोयत्रतद्यथास्यात्सीतांविनासर्वमेवशून्यंभासतइत्यर्थः॥ यद्वासीतागतमनस्कतयाशून्यतदालोकि
तंतद्विषयीकृतदशदिगित्युभयमपिक्रियाविशेषणं॥ ध्यानंचिंताहितानामेःशून्यताश्वासतापरुदितिचिंतारूपावस्थो
क्ता॥ रावणस्योन्मादावस्थामाह॥ चिंतेइससइजूरइबाहुंपरिपुसइधुणइमुहसंघाग्रं॥ हसइपरिग्रोससुण्णंसी
आणिथसरवंमहोदहवोअणो॥ चिंतयतिस्वसितिखिद्यतेबाहुंपरिप्रोंछतिधुनोतिमुखसंघातं॥ हसतिपरितोषशून्यंसी
तानिःप्रसरमन्मथोदशवदनः॥ सीतायांनिःप्रसरोनिरुद्धवृत्तिर्मन्मथोयस्यसीतायावैमुख्यात्तादृशोदशवदनश्चिंतयतिसी
तालाभोपायमर्थात्॥ तंचालभमानःश्वसितिरंभाशापस्मृत्याबलात्कारोपिनसंपद्यतइतिमनःखेदादेवरामावष्टंभात्सीतामा
मपिरावणंनगणयतीतिखिद्यते नएवबाहुंपरिप्रोंछतिपरिमार्ष्टिरामंवेदेभिर्हनिष्यामितदासीतामासादयिष्यामीतिभावः
यद्वेभिःकैलासमिवसर्वपर्वतानानीं लोद्यनष्टानकरिष्यं॥ तदासेतुरेवनस्यादितिवाएवंमुखसंघातंधुनोतियद्वेतानिमुखा

निप्रीत्तंपिनाकिनंमनुष्यादप्यवध्यत्वमयाचिषंततदारामावध्योहमभविष्यमितिरामएवमयाहनेसीतास्फुरुभाभवेदि
त्यसंतोषादितिभावः॥तथापरितोषशून्यंहसतिधिकत्रिदशानमीयत्स्वयमसमर्थामनुष्यद्वारामामभिभवितुमिछं
तीतिहेलावशादितिभावनयद्वादूरस्थितेनेपिरामेयानवशीकृतासाकथमिदानींसविधस्थितेवशमेष्यतीतिनैराश्यात्
श्वासितिअतएवसीताहरणप्रयासोममनिष्फलोभविष्युरितिखिद्यतेअथधन्योयंवाकुर्येनाहरणसमयेसीतांवक्षस्थल
मारोप्यकिंचिदपिजन्मसाफल्यमर्जितमितिसत्कुर्वचाद्रपरिप्रोंछतिपरामृशतीत्यर्थः॥अतएवालुब्धसीतामुखचुंबन
त्वादवज्ञाविषयत्वेनमुखसंघातंधुनोति॥यथाजटाचीरपरिग्रहेपिरामेदृढानुरागेयमुत्तमनायकंमामवजानातीस
ह्योझीतायामोग्ध्यमितिपरितोषशून्यंहसति॥जूरइइत्यत्रकुप्यइइतिपाठेरामेदत्तभरेयमितिक्रुध्यतीत्यर्थस्तत्रबाहुं
परिप्रोंछतिरामाद्यभिभावकत्वेनबाहोरेवसहायत्वादतएवमुखसंघातंधुनोतिएकमुखोपिमादृक्पराभवितुम
योग्यःकिंपुनर्दशमुखइतिभावः॥एवंपरितोषशून्यंहसतिअहोरामस्यमोग्ध्यंयत्स्वापिभिमत्पराभवमिछतीतिभावः
शिरःकंपहासोक्रोधानुभावोक्रियादीपकं॥उन्मादश्चापरिछेदश्चेतनाचेतनेष्वपितथाअस्थानहासरुदितगीतप्रलप
नादिकृत॥३॥स्मृतिरूपामवस्थामाह॥बहुमण्णइवछअइंहोरंतुव्वत्तजणअत्तणआलिद्धं॥णिंदइअवअणणिव
हंअव्यत्तपिआमुहामअरसासाअं॥बहुमन्यतेवक्षस्तटंह्रियमाणादृत्तजनकतनयाश्लिष्टं॥निंदतिचवदननिवहंअ
प्राप्तप्रियामुखामृतरसास्वादं॥रावणोवक्षस्तटंबहुमन्यतेऽभिनंदतिकुतस्तदाहकीदृक्ह्रियमाणयासत्याउद्वृत्तयासं
मुखीकरणायोद्वर्तितयाअंतर्भावितणिच्जनकतनययाआश्लिष्टंयतः॥वदननिवहंनिंदतिचकुतस्तदाह अप्राप्तःप्रि
यासीतातन्मुखामृतरसस्यास्वादोयेनतंबहुष्वपिसत्स्मुखेष्वेकस्यापिकृतकार्यत्वंनाभूदितिहर्षविषादरूपभावसंधिः
॥४॥चिंतासंगमाह॥पडिरुध्दंतस्सविसेभगाणिअत्तपरिसंठविअभिज्झंतं॥विसमुद्धाइअकंपेहिअएउहुलइअल
हुअम्मिविधीरं॥प्रतिरुंधतोप्यस्यभग्ननिवृत्तपरिसंस्थापितभिद्यमाने॥विषमोद्धावितकंपेहृदयेउद्धुलत्यलघुन्यपिधै
र्यं॥अस्यरावणस्यालघुन्यपिधैर्यशालित्वात्गुरुण्यपिहृदयेधैर्यमुद्धुलतिचंचलीभवतिततोबहिर्भवतीतियावत्
कीदृशस्यप्रतिरुंधतोपिचलितंधैर्यमित्यर्थात् निवर्तयतोपिधैर्यंरक्षतोपिनतिष्ठतीत्यर्थः॥किंभूतेप्रथमंस्खर्वतोपि १८०

भग्नेसीतांप्रत्यनुरूपबुध्यागतेऽनंतरंविवेकान्नलकूबरशापस्मरणाद्वानिवृत्तेसतिपरिसंस्थापितेस्थिरीकृतेपुनःसी
तासौंदर्यातिशयोपलंभाद्भिद्यमानेस्थैर्यंत्यजतीत्यर्थः॥यद्वामनुष्यएवायंमहाबलइतिचिंतयाभग्नेततोसौविष्णुरूपे
णापिमांप्रत्यशक्तःकथंमनुष्यरूपेणशक्तोद्भवेदित्यवष्टंभात्रिवृत्तेसाध्यवसायेततोमयारामेसर्वथाविक्रम्यनि
हतेसीतावशीकर्तव्येति॥परिसंस्थापितेस्थिरीकृते पश्चाद्वालिखरादिविनाशजलधिलंघनादिस्मृत्यारामस्यातिबल
त्वज्ञानाद्भिद्यमानेऽध्यवसायेत्यजतीत्यर्थः॥अतएवविषमंयथास्यात्तथाउद्भावितउद्भूतःकंपोयत्रचित्तावेगादितिधैर्य
रूपभावशांतिः॥५॥विषादरूपभावोदयमाह॥तोसेविसमुव्वत्तिअविरलपसारिअकरंगुलिदरत्थइअं॥खलिअं
अंसम्मिमुहंविअंभिआआसगलिअवाहुप्पीडं॥ततोस्यविषमोद्वर्तितविरलप्रसारितकरांगुलिदरस्थगितं॥स्खलि
तंअंसेमुखंविजृंभितायासगलितबाष्पोत्पीडं॥ततोधैर्यत्यागानंतरंअस्यअंसेमुखंस्खलितंसंबद्धंकिंभूतंचिंता
सौष्टवेनविषमंविसदृशंयथास्यादेवंउद्वर्तिताउत्तानीकृता अथचविरलंप्रसारितायाःकरांगुल्यस्ताभिरीषत्स्थगित
मवष्टब्धंचिंतावशात्करावष्टंभेनस्कंधेमुखंस्थापितमित्यर्थः॥एवंविजृंभितेनवर्द्धितेनायासेनोद्वेगेनगलितोबाष्पा
त्पीडोयस्मादितिरोदनमुक्तं॥उपायाभावजन्मानुविषादसत्वसंक्षयः॥ निश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत॥
६॥विपर्ययनिवृत्तिमाह॥विसमुग्गाहिअमहुरंदूमिअदंतव्वणाहरपरिक्खलिअं॥आअसोद्रपिआणवलंतहिअअ
अवहीरिअंजअसदं॥विषमोद्ग्राहितमधुरंदूनदंतव्रणाधरपरिस्खलितं॥आकर्णयतिप्रियाणांवलमानहृदया
वधीरितंजयशब्दं॥सप्रियाणांमंदोदरीप्रभृतीनांजयशब्दंवलमानेनसीतांप्रतिभजताहृदयेनावधीरितमवज्ञावि
षयीकृतंआकर्णयतिसीतागतचित्ततयासम्यक्श्रवणाभावादेरस्यापादकत्वाध्धानादरइत्याशयः॥किंभूतंपूर्वंनिपा
तानियमाद्दंतव्रणेनदूनादधरात्परिस्खलितं३०ष्ठ्यवर्णस्यासम्यगुच्चारणादपरिस्फुटमित्यर्थः॥अतएवविषमेनानारू
पतयाउद्ग्राहितमुच्चारितंतएवमधुरमास्वादनीयंतथाचतथाविधजयशब्दस्याप्यवहेलयाचिंतासंगोप्युक्तः॥७॥वि
पर्यासंदर्शितमाह॥आमुअइमहइसअणंमग्गइरअणिविरमंजुउच्छइदिअसं॥णीइणिअत्तइपुणोरइलंभोवाअम
गाणाउरहिअअओ॥आमुंचतिमहतिशयनंमार्गतिरजनीविरामंजुगुप्सतेदिवसं॥निरैतिविवर्ततेपुनारतिलंभोपाय

मार्गणातुरहृदय॥ रतिः॥ सीतासंबंधिस्मरतंत्रस्यकपायस्यमार्गणमन्वेषणंतेन॥ यद्वारतिः॥ कामपत्नीतस्यास्कपायोयस्य
सकामस्तस्यमार्गणैर्वाणैरातुरहृदयोव्याकुलचित्तोरावणःशयनमामुंचति अधृतिवशात्यजतिपुनरुत्थानखेदवशा
न्महतिवांछतिरोतइत्यर्थः एवंरजन्यामादकत्वात्तद्विरामंमार्गतिप्राकांक्षतिजातेचरजनीविरामेदिवसंजुगुप्सतेनि
दनितदाप्याकारसंगोपनाभावात्‌ अतएवनिरेतिआकारसंगोपनायलोकानामग्रतोबहिर्गच्छति॥ ततःकुत्रगच्छामि
बलात्कारेणैवसीतामानयामीतिनिवर्त्ततेपूर्वस्थानमेवायाति॥ यद्वासंकल्पोपनीतसीतालिंगनायशयनंमुंचतीतिहर्षः
॥ पश्चाद्भ्रमशांतोस्वप्नेपिसीतांपश्यामीतिशयनंमहतिशेतेइतिविबोधः॥ अथनिद्रानुत्पत्यामादकत्वेनरजन्याविरामसेवं
छतीतिदैन्यंपुनस्तथासतिलोकानामग्रतोबलात्कारोपिनस्यादितिदिवसंजुगुप्सतेनिंदतीतिव्रीडा॥ तदिदानीमेवनिःशेव
छतीतिदैन्यंपुनस्तथासतिलोकानामग्रतोबलात्कारोपिनस्यादितिधृतिः॥ तथाचनानाभावशबलत्वमुक्तं
लात्तामानयामीतिनिरेतिनिर्गच्छतीत्यमर्षः॥ पुनर्निवर्त्ततेरंभाशापस्मरणादितिधृतिः॥ तथाचनानाभावशबलत्वमुक्तं
क्रियादीपकं॥ ८॥ गोत्रस्खलनमाह॥ पच्छाइज्जतस्साविसोबहुसोहिअअट्ठिओपिआणविपुरओ॥ समअंमुहणिवहम्मि
विसीआमइओपअट्टइसमुल्लावो॥ प्रच्छादयतोप्यस्यबहुशोहृदयस्थितःप्रियाणामपिपुरतः समकंमुखनिवहेपिसीता
मयःप्रवर्त्ततेसमुल्लापः॥ प्रच्छादयतोप्यर्थादालापमेवसंगोपयतोप्यस्यरावणस्यहृदयस्थितः सीतामयःसमुल्लापःप्रिया
णांमंदोदरीप्रभृतीनामग्रमुखनिवहेपिसममेकदैवबहुशःप्रवर्त्ततेसीतासीतेतिबहुशोजल्पतीत्यर्थः॥ तेनावहित्थासूचि
ता॥ भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था॥ व्यापारांतरशक्त्यन्यथावभाषणविलोकनादिकरी॥ ९॥ रागाधिक्यमाह
॥ तपुलइअम्मिपेच्छइउद्दाअवतोअतीअगेण्हइगोत्तं॥ ठाइअतस्समअणेअणम्मिविचिंतिअम्मिसच्चिअहिअए॥ तोंप्रलो
कितंपश्यतिउद्दौपश्यतस्यागृह्णातिगोत्र॥ तिष्ठतिचतस्यसमदनेन्यस्मिन्नपिचिंतितेसैवहृदये चोहतोयतोस्यरावणस्य
समदनेसकामेहृदयेऽन्यस्मिन्नप्यभीष्टवस्तुनिचिंतितेसतिसैवतिष्ठतिसंकल्पवशात्सीतैवचिंताविषयीभवतीत्यर्थः॥ अतःप्रलो
कितेदर्शनेनंदर्शनकर्मणिवातामेवपश्यतिरावणइत्यर्थाउद्दपश्यतस्याएवगोत्रंनामगृह्णातिजल्पतीतिमनसिवचसिवक्षुषि
सर्वत्रसैवस्फुरतीतिविषयनिवृत्तिचित्तासंगसंकल्पादीनांसांकार्यं॥ १०॥ अथव्याध्यवस्थामाह॥ साहइसंसत्तावंवासहरद्द
त्तविसमपुंजिअकुसुमं आअअणीसासहअो किलिन्नसगातरुपल्लवोउवआरो शास्यस्यसंतापंवासगृहाद्धीतविषम १८१

पुंजितकुसुमः॥ आयतनिःश्वासहतः क्लाम्यत्स्वर्गतरुपल्लवउपचारः॥ अस्यसंतापंउपचारोविरहोपशांतिहेतुत्वेनोपादीयमा
नःपदार्थसंचयःशास्तिकथयति॥ किंभूतः वासगृहस्यावस्थितिगृहस्यार्द्धेतिएकदेशेपुंजितानिकुसुमानियत्रसएवंयतआ
यतनिश्वासेनहतोऽतःक्लाम्यंतस्तत्संबंधात्म्लायंतःस्वर्गतरूणांपल्लवायत्रतथाचपुष्पाणांवर्तुलीकरणेनयानिकथंचिदपि
नम्लायंतितेषामपिपारिजातपल्लवानांवैवर्ण्येनतापोत्कर्षोऽनुमीयतइत्यर्थः॥ व्याधिस्तुदीर्घनिश्वासपांडुताकृशतादयः॥ ११॥
देहविक्षेपादिनातदेवाह॥ देहपरिणाहविअडेवलइभरोव्वत्तदलिअपासद्धंते॥ दूरोणामिअमज्झविसमंभूमिसअणेप
ह्योलिरहत्थो॥ देहपरिणाहविकटेवलतिभरोद्वृत्तदलितपार्श्वार्द्धांते॥ दूरावनामितमध्येविषमंभूमिशयनेप्रघूर्णनशी
लहस्तः॥ भूमौयच्छयनंपुष्पपल्लवादिमयंतत्रप्रघूर्णनशीलाइतस्ततःक्षिप्यमाणाहस्तायस्यतथाभूतोरावणोविषमं
संतापवशाद्विपर्यस्तंयथास्यात्तथावलतिपार्श्वपरिवर्तनमाचरतीत्यर्थः॥ किंभूतेशयनेदेहोरावणशरीरंतस्यपरिणाहोदैर्घ्यं
तद्वद्विकटेतदनुसारित्वादेवंतस्यदेहस्यभरादेवोद्वृत्तौविपर्यस्तौअथचदलितौखंडितौपार्श्वयोरर्द्धांतावेकदेशौयत्रएकपार्श्वे
पूर्वस्थित्याःपरपार्श्वेचतदानींगत्यापार्श्वद्वयस्यापिविपर्यासइत्यर्थः॥ एवंदूरमवनामितमधःकृतंमध्यंयस्यउदरस्याल्प
त्वादत्यंतसंबंधाभावादवनमनमात्रमित्यर्थः तथाचभूमिशयनेनविरक्तिःसुखहेतूनामित्यरतिरुक्ता॥ १२॥ दाक्षिण्यमा
ह॥ दक्खिणमेत्तदिणोजणअसुआइत्तहिअअदिण्णुक्कंठो॥ उल्लुलइखणविलक्खोणिअअन्तेउरमुहस्ससमुहणिवहो॥ दाक्षि
ण्यमात्रदत्तोजनकसुताभिमुखहृदयदत्तोत्कंठः॥ उल्लुलतिक्षणविलक्षोनिजकांतःपुरमुखस्यमुखनिवहः॥ अस्यमुखनिवहोनि
जकांतःपुराणांमंदोदरीप्रभृतीनांमुखेषुउल्लुलतिचंचलोभवतिचुंबनान्निवर्त्ततइत्यर्थः॥ क्षणविलक्षोलज्जयाप्रसन्नःसन्॥
किंभूतःदक्षिणोनायकस्तस्यभावोदाक्षिण्यंतन्मात्रेणानुरोधान्नतुस्नेहाद्दत्तोर्पितः एवंजनकसुतासीतातदभिमुखेनहृदयेनद
त्ताउत्कंठायस्मैसीतामेवद्रष्टुमित्यर्थात्तथाचदाक्षिण्यनराक्षसीमुखलग्नोपिसीतामुखदर्शनोत्कंठयाकृष्यमाणःसम्यङ्नसंबध्य
तइत्यर्थः॥ योगौरवंभयंप्रेमसद्भावंपूर्वयोषिति॥ नमुंचत्यन्यचित्तोपिज्ञेयोसौदक्षिणोयथेतिकंठाभरणं॥ १३॥ संतापोत्कर्षमा
ह॥ जाअणेणहसंतोगमेइउम्मच्छरविलासिणीसत्थं॥ ताहसहसंतावंअणंसोम्मिाअदुम्मणोहोइमुहं॥ यावदन्येनहसन्नगम
यत्युन्मात्सर्यंविलासिनीसार्थं॥ तावद्दुःसहसंतापमन्यदस्यशोकदुर्मनस्कंभवतिमुखं॥ उन्मात्सर्यंजातेर्ष्यंविलासिनीसार्थं

THE ASIATIC SOCIETY OF BOMBAY

२

से॰बें॰टी॰
१८२

अन्येनमुखेनसंहृसत्तयावद्रूमयतिप्रतारयतिरावणस्तावदेवास्यदुःसहःसंतापोयेनतादृशमन्यमुखंशोकेनदुर्मनस्कंभवतिसी
तालाभोपायाभावादितिभावस्तथाचतासामीर्ष्याशांत्यर्थमेकेनसकपटंहसतोप्यन्यमुखमालिन्येनसंतापहेतुकेनसंगोपनंनतिष्ठ
तीत्यवहित्थाविषादरूपभावसंधिः॥१४॥सीतामग्नचित्तमाह॥णिउणहसिअणुविद्धंसीआलंभावहारणविसंवाअं। रूणए
इणलक्खइफुडंअण्णविइण्णहिअओपिआणदहमुहो निपुणहसितानुविद्धंसीतालंभावधारणविसंवादं॥शृणोतिन
लक्षयतिस्फुटंअन्यविर्तीर्णहृदयःप्रियाणांदशमुखः।दशमुखःप्रियाणांनिपुणंचातुर्येणयत्हसितंतेनानुविद्धंसंबद्धंसी
तायाभेस्यप्राप्तेरवधारणमनेनोपायेनसीतालाभइतिनिश्चयः।तस्यविसंवादमन्यथाकरणंसाध्वीसीताकथमनेनलब्धव्ये
त्यादिवचनरूपंशृणोतिकिंतुस्फुटंनलक्षयतितत्रहेतुमाह अन्यत्रसीतायांवितीर्णंहृदयंयेनतथाचसोपहासमेताभिरु
क्तंवचनंश्रुत्वापिसीतामग्नचित्ततयातत्तदर्थंयत्नयानप्रतिसंधत्तइत्यर्थः॥यद्वाप्रियाणामुक्तरूपंविसंवादवचनमन्यचित्ततयाशृ
णोतिन॥ किंतुहसितानुबंधात्स्फुटंलक्षयतिसीतामयानलब्धव्यतिमामेताउपद्रावयंतीतिहसितेनानुमिनोतीत्यर्थः॥१५॥ ॥सीता
परतामाह॥ ईसामच्छरगरुएसाहिक्खेवपरिवड्ढिओवालंभो॥कहकहविगमेइरवणंविलक्खहसिएहिंकामिणिसमुद्दावं॥ईर्ष्या
मत्सरगुरुकान्साधिक्षेपपरिवर्द्धितोपालंभान् कथंकथमपिगमयतिक्षणंविलक्षहसितैःकामिनीसमुद्दापान्॥निजानांका
मिनीनांसमुद्दापान्कथंकथमपिकष्टस्रष्ट्याऽनुरूपव्याजाभावाद्विलक्ष्यमप्रतिभातयाहसितैरावणोगमयत्यतिवाहयतिवंच
यतीतियावत्॥कीदृशान्ईर्ष्ययासीतागुणासहिष्णुतयायोमत्सरोमर्षस्तेनगुरुकान्प्रतिक्षेप्यान्एवमधिक्षेपस्तर्जनासंवलि
तानिदातत्सहितःपरिवर्द्धितउपालंभोपकारांक्रियत्रतान्॥तथाचयदाताभिरुपालंभादिक्रियतेतदासापराधत्वादाहार्यहा
स्येनैताःप्रसादयतीत्यर्थः॥ईर्ष्यामाहुःसमानेषुमानदानापकर्षणादितिकंठाभरणं॥१६॥पुनश्चिन्तासंगमाह॥तस्सपडिरुद्ध
सेसंवाहोथअकंठविसमपअणिक्खेवंसंकिज्जइविमणाहिंफुडंणणज्जइपिआहिंगोत्तक्खलिअं।तस्यप्रतिरुद्धशेषवाष्पा
वस्तंकंठविषमपदनिक्षेपं॥शंक्यतेविमनोभिःस्फुटंनज्ञायतेप्रियाभिर्गोत्रस्खलितं।तस्यगोत्रस्यस्खलितंनामविपर्यासः
स्त्रीणांनामरूपस्ततएवविमनस्काभिःप्रियाभिःशंक्यतेपरंकिंतुस्फुटंव्यक्तंनज्ञायते॥कीदृशंप्रतिरुद्धस्वरभंगरूपभावोदयाच्चेत
न्येसतिएतासांत्रासाद्याऽनुच्चरितंशेषमेकवद्वर्णरूपयत्रएववाष्पावस्तंतेनकंठेनविषमःस्फुटास्फुटःपदनिक्षेपःपदोच्चारणंय १८२

त्रअतएवशेषानुच्चारणेनगद्गदकंठतयावसीतांप्रतिकिमप्ययमुच्चरतीतितर्कयंतीत्यर्थः॥१७॥पुनरवहित्थामाह॥कहविठ
वेइदहमुहोकिंतिअणालविअमोहदिस्याभावं। दइआहिंगलिअवाहंरोसणिरुत्तरपुलोइअंअप्पाणं॥कथमपिस्थापयतिद
शमुखःकिमित्यनालपितमोघदत्तालापंदयिताभिर्गलितवाष्पंरोषनिरुत्तरप्रलोकितमात्मानं॥दशमुखआत्मानंस्वंकथमपि
स्थापयतिकिंभूतंकिमितिकृत्वाअनालपितःवादितःप्रश्नइतियावत् अतएवमोघःप्रश्नंविनाकृतत्वान्निःफलोमोहेनाज्ञानेनवा
दत्तउल्लापोयेनतं अतएवगलितवाष्पंगलिताश्रुयथास्यादेवंदयिताभीरोषेणनिरुत्तरमवचनंयथास्यादेवंप्रलोकितंदृष्टंसंकल्प
नोपस्थितायाःसीतायाःप्रश्नभ्रमात्किमित्युक्ते रुष्टाभिर्मंदोदरीप्रभृतिभिःसक्रोधकटाक्षनिरीक्षितमात्मानंज्ञानेसतिस्वीकृतामव
हेलांसोढाकृच्छ्रात्किंकर्तव्यतामूढःसंवरणंकृत्वाप्रकृतिंप्रापयतीत्यर्थः॥१८॥भ्रमोत्कर्षमाह॥अण्णहिअओविपिआणउम्मच्छ
यसारिअग्घविअहुंकारं॥अहिणंदइदहवअणोसमत्तणिव्वूढिआहराब्भपुलइअं अन्यहृदयोपिप्रियाणामुन्मत्सरप्रसारिताघि
तहुंकारं॥अभिनंदतिदशवदनःसमस्तनिर्व्यूढिताधरोष्ठप्रलोकितं॥सीतागतचित्तत्वादन्यहृदयोदशवदनःप्रियाणांसमस्तंसं
पूर्णंनिर्व्यूढितंप्रस्फुरितमधरोष्ठंयत्रतादृशंप्रलोकितंदर्शनमभिनंदतिश्लाघतेकामविलासप्रसूतत्वभ्रमाद्धर्ममन्यतइतिशून्य
हृदयत्वाच्चिन्तासंगएवोक्तः॥१९॥अथसंकल्पमाह॥दुच्चिंतिआवरासंपिआहिंउम्मच्छसंभमकआलोअं॥हसइखणंअप्पाणंअ
ण्णहिअअविसज्जिआसणणिअत्तंतम्॥दुश्चिंतितापदेशंप्रियाभिरुन्मत्सरसंभ्रमकृतालोकम्॥हसतिक्षणमात्मानंअन्यहृदय
विसृष्टासननिवर्तमानं। सक्षणमात्मानंहसतिकथंभूतंअन्यहृदयेनसीतारूपान्यगतचित्तत्वेनविसृष्टंसंकल्पोपस्थितसीता
भ्युत्थानायत्यक्तंयदासनंतस्मान्निवर्तमानंबहिर्भूयभूमावेवोपविशंतं॥निसंमंतमितिपाठेविवेकेसतितत्रपुनर्निषीदंतं
एवंप्रियाणांतथाबुध्यजनकत्वात्दुश्चिंतिताःपदेशोविवेकोत्तरंकिंचिन्मिथ्यादूषणमुद्भाव्यनैतदासनंमह्यंरोचतइत्यादिव्याजोये
नतं॥अतएवप्रियाभिरुन्मत्सरेणोद्धतेर्ष्येणसंभ्रमेणोद्वेगेनकृतआलोकोदर्शनंयस्यतथाचस्वस्यस्वथासनपरित्यागेनप्रिया
णामीर्ष्याहस्यावेवंविधोहमसमीक्ष्यकारीत्यात्मानंनिंदतीत्यर्थः॥यद्वाकीटसत्वभ्रमादेतदासनंव्यर्थेवोक्तितवानस्मीत्यहो
ममसौग्ध्यमितिलब्धविवेकस्तासांप्रतारणायस्वयमेवस्वमात्मानमुपहसतीत्यर्थः अतएवदुश्चिंतितएवंरूपोव्याजोयेनता
सांतथाप्रतीत्यजननात्। दुच्चिंतिआवएसमितिपाठेरंभानलकूवरयोःशापतःस्वनाशहेतुत्वेनदुश्चिंतितोवलादेवसीतामानया

४

सं॰ बं॰ टी॰ १८३

मीत्येवंरूपउपदेशः सीताप्राप्त्युपायो येनेत्यर्थः॥२०॥ विप्रलंभप्रकर्षमाह॥ तह्रसगओअइभूमिंजह एणविणि उत्तणंपिअहि
णणाओ॥ णअणाऊणणाहसिओणअहसिऊणअणुसोइउणाअतिणा॥ तथासगतोऽतिभूमियथानविनियंत्रणं प्रियाभिनज्ञातः॥
नचज्ञात्वानहसितानच्चहसित्वाऽनुशोचितुंनवतीर्णः॥ सरावणस्तथातेनप्रकारेणअतिभूमिंसीताप्रत्यनुरागस्यपरमकाष्ठाविर
हवेदनानिमर्यादांवागतोयथाप्रियाभिर्मंदोदरीप्रभृतिभिर्विनियंत्रणंसप्रकाशमव्याजंवासीतानुरागमूर्छितोयमितिनज्ञा
तोऽपितुज्ञातएवज्ञात्वाचअहोमृदोयमननुरक्तायामप्येवमनुरज्यतीत्यादिरूपेणननहसितोऽपितुहसितएवहसित्वाचहाक
ष्टमीदृशीविरहवेदनामुष्यकथंवाजीवेदस्माभिरपितथाक्रियतांयेनसीताभजत्येनमित्यादिप्रकारेणानुशोचितुमनुकंपितुंन
चनतीर्णःशंकितोऽपितुशंकितएवेतिप्रकारांतराचिकित्स्यत्वेनकादाचित्कीमूर्छासूचिता॥२१॥ अथरावणस्यचिंतामवा
ह॥ चिंतेऊचपउत्तोअवहोवासपसरंतणीसासहअदोसकणिमेऊणसमंणवंअोसणमुहकवोलेसुकरं॥ चिंतयितुंचप्रवृत्तउ
भयावकाशप्रसरन्निश्वासहतं॥ द्वयोर्नियोज्यसमंएकंआसन्नमुखकपोलयोःकरं॥ रावणश्चिंतयितुंप्रवृत्तश्चसीताप्राप्त्युपाय
मित्यर्थात्॥ किंकृत्वाआसन्नमुखकपोलस्यनानात्वेनतत्कारस्यनिकटवर्तिन्यनायासलभ्येमुखकपोलेचद्वयोरेकंकरंसमं
तुल्यवन्निक्षिप्यकरंकीदृशंउभयावकाशेउभयपार्श्वेप्रसरद्भिर्निश्वासैर्हतंताडितंमुखस्यनानात्वेनोभयदिशिवर्तमानत्वादि
त्रिनिश्वासाधिक्यंनचिंताधिक्यंनचकरस्याधेयत्वंलब्धंनत्वाधारत्वमितिवाच्यंसंयोगमात्रस्यतदवस्थायाएववाविवक्षितत्वादि
तिभावः॥ अभिलाषःस्पृहाचिंताप्राप्त्युपायानुचिंतनमितिसाहित्यदर्पणः॥२२॥ अथरामसभिश्चिंताकारमाह॥ अंकागअंसहिज्ज
इपओसरइविग्गणसंकिएणकइवलं तंकस्सविसीओअसंबलइअलइरुसअंमहंचिअजीअम् अंकागतंसह्यतेप्रदोषरजनिवि
घ्नशंकितेनकपिबलं तत्कस्यापिशोकार्थंस्खलब्धस्फुरतंममैवहृदयं प्रदोषेरजन्यायारतिःस्फुरतंतदिघ्नशंकावतामयाऽके
ऽकांडेआगतंकपिबलंसह्यतेक्षम्यतेतद्धेतोरलब्धस्फुरतंसन्ममैवहृदयंयद्दलतिस्फुरताभावाकुलतयायच्चंचलीभवतितत्कस्या
पिरामस्यवासीतायावाममैववाशोकार्थंयदीदानीमीर्ष्ययायुद्धामिनदाप्रदोषस्फुरतंविघ्नितंस्यादितिशंकयाप्रदोषयुद्धंपरिहृत
मथापिचेत्तत्रसंपत्स्यतेतदेतत्कालुष्येणक्रुद्धोरामंहनिष्यामितदासीतायाःशोकस्तदभावेसीतामेवव्यापादयिष्यामि तदारा १८३
मस्यशोकःस्यादथस्त्रीरूपयातदपिचेन्नकरिष्यामितदाहमेवविरहदुःखमितोपिलप्स्यइतिममैवशोकःस्यादितितथापायःत्रि

यतांयेनैषावशावर्त्तिनीभवेद्धितिभावः॥ यद्वाप्रदोषस्फुरतार्थिनामयाकपिबलंयत्सह्यतेतत्कस्यविशोकार्थंशोकाभावायअपि
तुनकस्यापियतोलब्धस्फुरतंममैवहृदयंबलतितयाचयस्यस्फुरतस्यार्थंक्षमाक्रियतेतदलाभेनस्वःप्रातस्तथारौद्रंकर्मक
रिष्यामियथारामादीनांसर्वेषांमुपतापःस्यादितिभावः यद्वायत्सह्यतेतत्कस्यविशोकार्थंअपितुनकस्यापिराक्षसस्ययत्रस्फुर
तमात्रालाभेनममैवधीरस्यहृदयंव्याकुलीभवतितत्रशत्रुकृतमुपरोधंदृष्ट्वाकेषांराक्षसानांहृदयंव्याकुलंनस्यादितीदानीमिं
वयुद्धंयुज्यतइतिभावः॥२३॥ अतएवयुद्धकांडिकंविकल्पमाह॥ किंतुअविवरपहोल्लिरसंकखोहप्फिडिअगहिअकड्ढिअणि
हअं अत्थक्कासणठिअंणिप्फलचडुलमुहलंमलेमिकइवलं॥ किंभुजविवरप्रघूर्णनशीलसंक्षोभस्फेटितगृहीतकृष्टनिहृ
तं अकस्मादासन्नस्थितंनिष्फलंचटुलमुखरंमृद्नामिकपिबलं॥ अकस्मादकांडेआसन्नस्थितंनिकटवर्त्तिकपिबलंकिंमृद्ना
मिकरभुजादिनामर्दयामीत्यर्थः॥ कीदृशंभुजानांविवरेष्वंतरालेषुप्रथमंप्रघूर्णमानंपश्चात्संक्षोभेनभयेनस्फेटितंभ्रष्टंपलायि
तमितियावत्ततोगृहीतंपुनर्भर्त्सनंततःकृष्टमाकृष्टंपश्चान्निहतंताडितंअतएवनिष्फलंवृथाचटुलंचंचलंमुखरंराद्धायमानंतथा
चतथासतिरामोभग्नमनोरथासीतामामेवाश्रयेदितिभावः॥२४॥ बलात्कारपक्षमाह॥ ओससिकराहउम्मिल्लुलोअणंदोल
माणवाहतरंगं॥ आसाएमिकअग्गहणिरुत्तरुत्ताणिआणणंजणअसुअ॥ उतशशिकराहतोन्मीलल्लोचनांदोलमानवाष्पत
रंगं॥ आस्वादयामिकचग्रहनिरुत्तरोत्तानितानंजनकसुतां॥ उतयदिप्रथमःपक्षोनस्यात्तदाकचग्रहणकेशाकर्षणेननिरु
त्तरंनिःशब्दंसतउत्तानितमूर्ध्वमुखीकृतमाननंयस्यास्तांजनकसुतांआस्वादयामिसकचग्रहचुंबनाद्युपभोगविषयीकरोमि
नक्तमेवेत्यर्थात्॥ बलादितिभावः आसादयामिवाकिंभूतांशशिकरैराहतयोःस्पृष्टयोरतएवमदतिक्रमजनितमूर्छाविरामादु
न्मीलितोर्लोचनयोरांदोलमानाघूर्णमानावाष्पतरंगायस्यास्तामनभिमत्यारुदतीमित्यर्थः॥२५॥ रंभाशापादयमपिपक्षोन
स्यादित्याशयगाशंक्याह॥ कहविरहप्पडिऊलाहोहिइसमुहहिअआपइम्मिउवगणेछइइअरावि ससिंकिंउणादिन्नम्मिदि
णअरम्मिकमलिणी॥ कथंविरहप्रतिकूलाभविष्यतिसंमुखहृदयापत्यावुपगते॥ नेच्छतीतरथापिशशिनंकिंपुनर्दृष्टेदिनक
रेकमलिनी॥ पत्युर्विरहेप्रतिकूलामांप्रत्यसंमुखीसीतासंप्रतिपत्यावुपगतेसतिकथंसंमुखहृदयाभविष्यति॥ अर्थांतर
न्यासमाह॥ कमलिनीइतरथाप्यन्यथाप्यनुदितेपिदिनकरेशशिनंनेच्छतिकिंपुनर्दृष्टेसतितथाचतदानीमिच्छाशंकापि

Dr. BHAU DAJI
डाक्टर भाऊदाजी इत्यस्य पुस्तकसंग्रहः

नास्तीत्यर्थः॥ अत्रकमलिनीप्रायासीताशशिप्रायोरावणःसूर्यप्रायोरामः॥२६॥अभ्यर्थनादिप्रकारोपिनास्तीत्याह॥ अब्भत्थ
णेणगेह्नइतीरइतिक्कुअणसिरीअविंपुरिसोओटीर्मह्नंकारोययासातथासाजनकसुतावेवलंलूनस्यराघवशीर्षस्यदर्शनंय
स्यास्तथाभूतासतीयदीतिसंभावनायातेनयदिवावश्याभवेत्तदाभवेदित्यर्थः प्रकारांतरंनास्ति॥ भाव॥ णालोह्नेउ॥ णगण
इसरीरवह्नकरूमसीह्नाज्जजाणइसाणुणआ॥ अभ्यर्थनांनगृह्णातिशक्यंनेत्रिभुवनश्रियापिनलोभयितुं॥ नगणयतिशरीर
वधंकथंमन्यंभवेज्जानकीसानुनया॥ जानकीअभ्यर्थनांकाकायोक्तांनगृह्णातिनस्वीकरोतित्रिभुवनश्रियापिदीयमानयालो
भयितुंनशक्यंनंकिमपरंअस्माभिःक्रियमाणंशरीरवधमपिनगणयति-तदेवंदैन्योक्तिदानप्राणग्रहणरूपोपायत्रयवैगुण्या
न्मन्येतर्कयामिकथंसानुनयागृहीतानुनयाप्रसन्नाभवेन्नभविष्यतीत्यर्थस्तथाचप्रकारांतरमनुसरणीयमितिभावः॥१७॥अत
स्तदेवाह॥ पइमाहप्पणिसण्णाअवमणिअसंससपुरिससोंडीरा॥ जइणवरहोज्जववसालुअराहवसीसदंसणाजणअसुआ
पतिमाहात्म्यनिषण्णाअवमानितस्तोपसत्पुरुषशौटीर्या॥ यदिकेवलंभवेद्वाचशोलूनराघवशीर्षदर्शनाजनकसुता॥ पत्युर्माहा
त्म्यस्वाभाविकंवालिवधादिजनितंवगौरवंनिषण्णादत्तभराःतएवावमानितमवज्ञाविषयीकृतंशेषस्यरामभिन्नस्यसत्पुरुष
स्यशौटीर्यमहंकारोययासातथासाजनकसुतावेवलंलूनस्यराघवशीर्षस्यदर्शनंयस्यास्तथाभूतासतीयदीतिसंभावनायातेन
यदिवावश्याभवेत्तदाभवेदित्यर्थः॥ प्रकारांतरंनास्तीतिभावः॥१८॥तत्रोपपत्तिमाह॥ अद्दिट्ठलज्जणिज्जोभग्गपरित्ताणविअलि
आसावंधे॥ अवसोअवंधुलहुओभणणठिइभंगसाहसंकुणइजणो॥ अदृष्टलज्जनीयोभग्नःपरित्राणविगलिताशाबंधः अ
वशोबंधुलघुकोभयेनास्थितिभंगसाहसंकरोतिजनः अदृष्टलज्जनीयंलज्जास्थानंयेनलज्ज्यतेऽस्मादस्मिन्निति वाकृत्यल्युटोब
हुलमितिनीयर्॥ एवंभग्नंयत्परित्राणंरक्षणंतेनविगलितआशाबंधोमनोरथोयस्ययद्वाभग्नपरित्राणश्चासौविगलिताशाबंध
श्चेतिकर्मधारयः॥ अवशोऽस्वाधीनःअविद्यमानबंधुत्वेनलघुकोऽनादरणीयःसुखसाध्योवाजनोभयेनस्थितिरित्थंकर्त्तव्यतानि
श्चयःस्वभावदार्थ्यंवातद्भंगरूपंसाहसमशक्यानुष्ठानंकर्मकरोतितथाचराघवस्त्वज्ञानाल्लज्जास्थानाभावेनभयेनचमद्वशव
र्तिनीभवेदितिभावः॥१९॥अथसेवकाह्वानमाह॥ णवरिअणंरवेअालसज्जिभाअत्तवलिउद्धमुहसंघाअं भुमआभंगाणत्तासम
अंपासेसुपरिअणोअल्लीणो अनंतरंचैनंखेदालसजृंभायमाणवलितोर्ध्वमुखसंघातं भ्रूभंगाज्ञप्तःसमकंपार्श्वयोःपरिजन

आलीनः॥ एतच्चिंतनानंतरंचरणंरावणंभ्रूभंगमात्रेणज्ञप्तःपरिजनःसमकमेकदेवपार्श्वयोर्वामदक्षिणयोरालीनःसन्निहितः
परमप्रभोर्विशिष्यव्याकुलचित्तस्यसंमुखेस्थातुमशक्यत्वादितिभावः॥ सेवकाह्वानहेतुभ्रूसंज्ञासमकालीनचेष्टांतरमाह॥ किंभूत
मेनंखेदनविरहजन्यदुःखेनालसंयथास्यादेवंजृंभायमाणोऽथचवलितःसेवकाह्वानायतिर्यग्भूतःसन्नूर्ध्वोगगनाभिमुखोमुखानां
संघातोयस्यतं॥ कामोद्रेकाज्जृंभादिमत्त्वमूर्ध्वमुखत्वंचेतिभावः॥ नानादिग्वर्त्तिनानासेवकाह्वानायनानामुखानामेकदैवभ्रूसंज्ञा
यामेषावस्थाभूदितिसूचयितुंसंघातपदमुक्तम्॥३०॥अथाज्ञापूर्वावस्थामाह॥ तोएक्कहिअअगुणिअंदसहिविसमअंमुहेहिंअ
प्पाहिउं॥ णपहुप्पइदहवअणोचिरकंखिअलंभगब्भिणक्खरगुरुअम्॥ ततएकहृदयगुणितंदशभिरपिसमकंमुखैरध्यापयितुम्
नप्रभवतिदशवदनश्चिरकांक्षितलंभगर्भिताक्षरगुरुकं ततःसेवकागमनोत्तरंएकेनहृदयेनमनसागुणितंचिंतितंप्रमेयंयद्दशभि
रपिमुखैःसमकमेकदैवाध्यापयितुंदशवदनोनप्रभवतिनक्षमतेअत्रहेतुमाहकीदृशंचिरकांक्षितोयःसीताप्राप्त्युपायस्तस्य
लंभेनप्राप्त्यागर्भितंतत्कालोत्पन्नहर्षेणगद्गदकंठतयाऽस्फुटीभूतानियानिवक्तव्याक्षराणितैर्गुरुकमतिशयितं॥ तदुक्तंहर्षस्वि
द्वावासेर्मनःप्रसादोऽश्रुगद्गदादिकरइतितथाचबाष्पस्थगितकंठत्वेनबहुभिरपिमुखैर्वक्तव्यस्यननिष्पत्तिरितिस्वरभंगरूपभावो
दयः॥३१॥अथानंदोद्रेकमाह॥ असोणसमारद्धवअणअणोणहरिसगहिअप्फिडिअं॥ असोणअद्धभणिअंमुहेणअणे
णसेवकह्नविणिम्मविअं॥ अन्येनसमारब्धंवचनंअन्येनहर्षगृहीतस्फेटितं॥ अन्येनार्द्धभणितंमुखेनान्येनास्यकथमपिनिर्मि
तं॥ अस्यरावणस्याज्ञारूपंवचनंअन्येनमुखेनसमारब्धंवक्तुमिच्छाविषयीकृतंअन्येनमुखेनहर्षेणगृहीतंवक्तुमुपक्रांतंस
त्पश्चात्स्फेटितंआनंदोद्गतस्वरभंगेनगद्गदकंठतयाऽस्पष्टंवक्तुंनपारितमित्यर्थः॥ अन्येनार्द्धमेवभणितंपश्चादस्यस्वरभंगादिरू
पप्रतिबंधकाभावेप्यन्येनोत्कंठावशादस्मादाच्छिद्यगृहीत्वाकथमप्यवशिष्टमर्द्धमुत्कानिर्मितंसमापितंयद्वाअन्येनार्द्धमेवभणि
तंपुनर्भावादयादथान्येनकथमपिभावादयादेवकष्टसृष्ट्याऽवशिष्टमर्द्धमुत्कासमापितमित्यर्थः॥ इष्टानवाप्तेरौत्सुक्यंकाल
क्षेपासहिष्णुता चित्ततापत्वरास्वेददीर्घनिश्वसितादिकृत॥३२॥अथवाक्योपक्रमेनिश्वासमाह॥ तोउग्गाहिअसीअंतेण
भणंतेनसुहपहोलिरधूमं संताविएक्कहिअअंदसकंठकवलिअपलहुअणीससिअं॥ ततउद्ग्राहितशोकंतेनभणताभुख
प्रघूर्णनशीलधूमं संतापितैकहृदयंदशकंठस्खलितप्रलघुकंनिश्वसितं॥ ततोवक्तव्यस्थिरीकरणानंतरंभणतावक्तुमुपक्रां

सं०बे०टी० तेनतेनरावणेननिश्वसितंनिश्वासःकृतःसीतासमागमायकातरकत्अनीयंकर्माचरामीतिमनःखेदादितिभावः॥ उद्घाहितः
१८५ प्रकाशितःशोकोमनोदुःखंयत्रएवंमुखेषुप्रघूर्णमानोधूमोयत्रमनस्तापादेवंसंतापितमेकंहृदयंचिन्नयत्रतद्यथास्यादेवं
दशसुकंठेषुस्खलितंहृदयादेकमेवघस्थितमतेरादशधाभूतमतएवप्रलघुकंस्वल्पंस्वल्पंचयथास्यादितिसर्वक्रियाविशे
षणंसीतासमागमंप्रतिकश्चिदुपायश्चिंतितोक्तिसक्रियतामितिवाक्यपरत्वेनपूर्वस्कंधकद्वयव्याख्यानंकेचित्कुर्वंति॥ तदस्फु
तस्यैवसंगतत्वादुपेक्षणीयं॥ ३३॥ अथरावणवचनप्रस्तावि॥ आहासइअणिक्खिअंरआणासमकालदिण्णपडिसंलावा॥ म
ह्निणिमिओहअकरअलतसठिअतिअभरुणमिअंदेहद्धं॥ आभाषतेचनिशिचराणांआज्ञासमकालदत्तप्रतिसंलापात्॥ मही
निवेशितोभयकरतलतिर्यकुस्थितत्रिकभरान्नमितदेहार्द्धात्॥ सनिशिचरानाभाषतेचकिंभूतानाज्ञासमकालंदत्तःप्रतिसंलापः
प्रत्युत्तरंयैस्तानतिसन्निहितत्वात्॥ एवंमह्यांनिवेशितंयदुभयकरतलंतेनतिर्यकुस्थितंयत्त्रिकंतत्रभारेणउन्नमितोदेहार्द्धोताद
ह्रस्यपश्चाद्भागोनितंरूपांपिस्तान्॥ भूमिनिवेशितजानुकरतलशिरस्कान्॥ तदुक्तं॥ पंचांगचुबिभूमिकःप्रणमेदास्थिरेनरइति
प्रभुत्वमुक्तं॥ ३४॥ अथतद्वचनस्वरूपमाह॥ तम्मायाणिम्मविअंरिउदंसणविसमवलिअणिच्चलणाअणं॥ दावेह कंठरहि
अंसीआइविओअपंडुरंरामसिरं॥ तन्मायानिर्म्मितंरिपुदर्शनविषमवलितनिश्चलनयनं॥ दर्शयतकंठरहितंसीतायाविये
गैपांडुरंरामशिरः॥ हेनिशिचरामाययानिर्म्मितमनलीकवद्दर्शिततत्कंठश्चन्यंरामशिरःसीतायाःकृतेसीतायैवादर्शयत॥
किंभूतंरिपुदर्शनायविषमंचक्रोधेनभयानकंयथास्यादेवंवलितवक्रीभूतेसतीनिश्चलेस्थिरेनयनेयत्रतद्धनुःसंधानकालीन
चेष्टाविशिष्टलोचनमित्यर्थः॥ एवंवियोगेनसीतायाविरहेणपांडुरमितिसर्वविशेषणमनलीकत्वज्ञापनार्थं॥ ३५॥ अथमाया
शिरोघटनमाह॥ तोअमरिसमेभाविअभुमउग्गाहितअतरंगिअणिलाडअणं॥ छिण्णाणिअंवतंचिअताहेच्चिअतेहिणिम्मि
अंरामसिरं॥ ततोऽमर्षमेलितभ्रूद्घाहिततरंगितललाटतटं॥ छिन्नानीतमिवतदेवतदेवतैर्निर्मितंरामशिरः॥ ततस्तदाज्ञानंत
रंतैःरेवकैस्तदेवतत्क्षणएवतदेवसाक्षादेवनतुकृतकत्वेनज्ञायमानंरामशिरःछिन्नानीतमिवछिन्नंसद्यस्तदानीतंतदिव
निर्मितंकीदृशंअमर्षेणमेलितासामेकीभूताभ्यांभ्रूभ्यामुद्घाहितमुक्षिप्तमतएवतरंगितंसभ्रुकुटीकंललाटतटंयत्रतथाचयुद्ध
कालीनावस्थाविशिष्टत्वेनपारमार्थिकमेवतदितिघटनापाटवमुक्तं॥ ३६॥ अथसेवकानांप्रस्थानमाह॥ संपत्थिआअरांभम १८५

चलणेवडणविसमुठ्ठिआपमअवणं॥ कहविसमत्तयाहिअदहवअणाणत्तिवावडारअणिअरा॥ संप्रस्थिताश्चसंभ्रमचर
णावपतनविषमोत्थिताःप्रमदवनं॥ कथमपिसमस्ताध्यापितदशवदनाज्ञप्तिव्यापृतारजनीचराः॥ रजनीचराःप्रमदवनंसीता
वस्थितिवनंप्राप्ताश्चकिंभूताःसंभ्रमेणभयेनादरेणवायच्चरणयोरवपतनंत्वरयाविन्यासस्तेनविषमंयुगपदुत्थितास्त्वरया
गंतुंसत्वरमुत्थिताइत्यर्थः॥ यद्वाचरणयोरवपतनेनाधोविन्यासविशेषेणविषमंउत्थिताइत्यर्थः॥ कथमपिलज्जानिबंधनक
ष्टेनसमस्तमध्यापितायथारामशिरःश्रइतेमांचस्वीकरोतिसातथातर्कव्यमित्याद्युपदिष्टाःसंतोदशवदनाज्ञप्तौमायामस्तको
पनयनरूपायांव्यापृताःसयत्नाः॥ यद्वासमस्तंयदध्यापितमुपदिष्टरूपंवस्तुतदेवदशवदनाज्ञप्तिस्तत्रव्यापृताइत्यर्थः॥ ३७॥
अथप्रमदवनप्राप्तिमाह॥ पत्ताअफुडिअमणिअडविवरुठ्ठिअसलिलवद्धपंकअमउलं॥ पवणसुअभग्गपाअवभंगुग्ग
अबालकिसलअंपमअवणं॥ प्राप्ताश्चस्फुटितमणितटविवरोत्थितसलिलबद्धपंकजमुकुलं॥ पवनसुतभग्नपादपभंगोद्ग
तबालकिसलयंप्रमदवनं॥ तेप्रमदवनंप्राप्ताश्चकिंभूतंहनूमत्कृतोपमर्द्देनस्फुटितंयद्वापीषुमणितटंतद्विवरेणोत्थितयत्स
लिलंतत्रबद्धःसंवद्धउत्पन्नःपंकजानांमुकुलोयत्रएवंपचनसुतेनभग्नायेपादपास्तेषांभंगेषुभंगस्थानेषूद्गतानिबालकिसल
यानियत्रएतेनहनूमद्विमर्दस्याचिरंतनत्वमुक्तंएवंविधमादकस्थानस्थित्यापिसीतायामनोविकारोनाभूदितिसतीत्वमुपद
र्शितं॥ ३८॥ अथद्वादशभिःस्कंधकैरादिकुलकेनसीतावस्थामाह॥ पेच्छंतिअसइसंठिअवअणविसंवइअथणणिसण्णक
रअलं॥ दहवअणागमसंकिअपअसद्दुक्खित्तलोअणंजणअसुअं॥ पश्यंतिचसदासंस्थितवदनविसंवादितस्तननिष
ण्णकरतलां॥ दशवदनागमशंकितपदशब्दोत्क्षिप्तलोचनांजनकसुतां॥ रजनीचराजनकसुतांपश्यंतिचेतिसमन्वयः
किंभूतांसदासंस्थितायद्वदनाडिसंवादितंस्खलितंपश्चात्स्तनयोर्निषण्णंकरतलंयस्यास्ताएवंपूर्वनिपातानियमात्शंकित
दशवदनागतःशंकितःशंकाविषयीकृतोदशवदनस्यागमोयेनतथाभूतोयोराक्षसानांपदशब्दस्तेनोत्क्षिप्ताउद्गेोगययो
स्तेउद्विग्नेलोचनेयस्याःरावणागमनजिज्ञासावशात्तथाचनिशाचराणांपदशब्दंश्रुत्वारावणागमत्रासेनव्याकुलमालोक
यंत्यासीतयाअाःकिमत्रमितिक्षोभेणकपोलतःकरोहृदिन्यस्तइत्यर्थः॥ दशवदनागमशंकिताचासौपदशब्दोद्विग्नलोच
नाचेतितामितिकेचित्॥ उक्षिप्तशब्दःत्रस्तव्याकुलवाचीदेशीतिकश्चित्॥ ३९॥ पिअअमसहस्सपसिअमणिरुण्ण

असिठिलइवेणीवधं धोअकलधोअपंडुरपडंतवाहपहउणअथणअलसं॥ प्रियतमस्वहस्तप्रेषितमणिशून्यीकृतशि
थिलार्द्धवेणीबंधा॥ धौतकलधौतपांडुरपततवाष्पप्रहतान्नतस्तनकलशां॥ पुनः किंभूतांप्रियतमस्यकृतेस्वहस्तेनाभि
ज्ञानायप्रेषितोयोमणिस्तेनशून्यीकृतोऽतएवशिथिलोग्रथितान्यावेणीबंधोयस्यास्तामुद्वाप्यसंवृतकेशीमित्यर्थः॥ एवंधौ
तंमार्जितंयत्कलधौतंरूप्यंकज्जलविरहात्तद्वत्पांडुरैःपतद्भिर्बाष्पैरश्रुभिःप्रहतौताडितौस्तनकलशौयस्यास्तामुन्नतत्वे
नस्तनयोरेवाश्रूणांपातइत्यर्थः॥ यद्वाधौतजलेनक्षालितंयत्कलधौतंसुवर्णंतदाकृतीपांडरवाष्पप्रहतौस्तनकलशौयस्या
इत्यर्थः॥ निरंतरमश्रुपतनाजलक्षालितसुवर्णतुल्यत्वेनस्तनयोस्तस्याअतिगौरांगित्वमुक्तं॥ ४०॥ अजमिअपम्हलवेणिवा
हजलपहाविअलउंअथइअमुद्दिं। रसणासुणणिअंबंविछड्डिअमंडणग्घविअलावणं॥ अयमितपक्ष्मलवेणीबाष्पजलप्र
धावितालकावस्थनमुखीं॥ रसनाशून्यनितंबांविछर्दितमंडनार्घितलावण्यां॥ किंभूतांअयमिताऽसंयताऽतएवपक्ष्मलाजातप
क्ष्मारूक्षावेणीयस्यास्तां॥ एवंबाष्पजलैरश्रुभिःप्रधावितैःप्रक्षालितैर्बाष्पजलेषुप्रधावितैर्गतिस्तत्तोगामिभिरितिवाऽलकैर
वस्ततंव्याप्तंमुखंयस्याः॥ एवंरसनयाशून्योनितंबोयस्याएवंविछर्दितंत्यक्तंयन्मंडनमंगरागोऽलंकारश्चतेनार्घितमुत्कर्षितंला
वण्यंशोभायस्यास्तोपाधिकरूपादपिस्वाभाविकरूपस्याल्हादकत्वमितिस्वभावसौंदर्यमुक्तं॥ ४१॥ थोअमउलाअहिअपि
अअमगअहिअअसुण्णणिच्चलणअणं॥ कइवलसद्दाअण्णणवाहतरंगपरिघोलमाणपहरिसं॥ स्तोकमुकुलायतस्थित
प्रियतमगतहृदयशून्यनिश्चलनयनां॥ कपिबलशब्दाकर्णनवाष्पतरंगपरिघूर्णमानप्रहर्षां॥ स्तोकमीषन्मुकुलितेअतए
वायतस्थितेदीर्घीभूतेऽथचप्रियतमेरामेगतंयद्धृदयंमनस्तेनहेतुनाशून्येविषयाग्राहकेअतएवनिश्चलेबाह्यसंवेदना
भावात्स्थिरेनयनेयस्यास्तां॥ भावनोपस्थितरामदर्शनसमुत्थसुखास्वादेननयनयोर्मुकुलनमितिभावः॥ एवंकपिबल
स्यशब्दानांलोकोहलानामाकर्णाद्भावनाविछेदेसत्यपजातेषुबाष्पतरंगेषुपरिघूर्णमानःप्लवमानइवप्रहर्षोयस्याः
मामपिरामस्मरतीसश्रुजनकत्वेनानंदस्यस्फुटत्वादितिभावः॥ वस्तुतस्तुकोलाहलेनभावनाविछेदेरामदर्शनसुखवि
छेदादपिपादेनोपजातेषुवाष्पेषुमदुद्धारायैतेकपयःसमागताइत्यानंदाश्रुभिरुपचितेषुदोलयमानइवप्रहर्षइत्याक्षि
सविषादाहर्षयोःसंधिरितिमदुन्नीतःपंथा॥ ४१॥ दूसिरअभिणपाडलवसुअअआयरुसवाहबिंदुट्ठाणं विछड्डिअप १८६

रिधूसरणिअअसहावपरिसंठिअआहरराअं। ईषद्रजोभिन्नपाटलशुष्कपरुषबाष्पबिंदुस्थानं॥ विछर्दितपरिधूसरनिजकस्व
भावपरिसंस्थिताधररागां॥ एवंईषद्रजोभिर्भिन्नसंबद्धअतएवगौरिमसंबंधात्पाटलश्वेतरक्तोअश्रूणामभावात्शुष्कस
त्परुषंरूक्षंबाष्पबिंदूनांस्थानंयस्यास्तां॥ पाअडेतिपाठेप्रकटमित्यर्थः अश्रुस्थानेषुधूलिसंबंधात्शुष्कत्वंपाटलत्वप्रक
टत्वंवारूक्षत्वंस्पृतिभावः॥ एवंविछर्दितोऽलक्तकतांबूलत्यागात्त्यक्तोऽतएवपरिधूसरःसन्निजकस्वभावपरिसंस्थितःकृ
त्रिमारुण्यरहितोऽधरस्यरागोयस्याइतिकुलस्त्रीत्वमुक्तंकेचित्वग्निमस्कंधकस्थवदनविशेषणतयानपुंसकांतत्वेन
सर्वमिदंयोजयंति॥ ४२॥ वअणसमुव्वहंतिं ओलुग्गकओलणिब्बलंताआमं॥ असमत्तकलादीहंकइदिअहासणपू
रिअव्ववसस्सि॥ वदनंसमुद्वहंतीमवरुग्णकपोलनिर्बलदायामं असमस्तकलादीर्घंकतिदिवसासन्नपूरयितव्यमिव
शशिनं॥ एवमवरुग्णौदुर्बलौयौकपोलौताभ्यांनिर्बलन्नस्पर्शीभवन्नायामऊर्ध्वाधःक्रमेणदैर्घ्यंयत्रतद्वदनंसमुद्वहंतीं
अत्रोत्प्रेक्षतेअसमस्ताभिरसमाप्ताभिरपूर्णाभिर्वाकलाभिर्दीर्घाकारंशशिनमिवाशशिनंकीदृशंकतिपयेदिवसैरासन्न
निकटवर्तिपूरयितव्यंपूरणंयस्यतं॥ भावेतव्यःकतिदिवसैरासन्नेनिकटएवपूरयितव्यमितिकर्मणिवा॥ वदनमपिदि
त्रदिनैरेवरामसंदर्शनात्कलावध्यापूरयितव्यमित्याभिसंधिः॥ ४३॥ देहछविणिव्वलिएभिण्णदरुव्वत्तरोअणासछाए
भूसणबंधणमग्गेलक्खिज्जंततलिणत्तणवहमाणे॥ देहछविनिर्वलितान्भिन्नदरोद्वृत्तरोचनासछायान्॥ भूष
णबंधनमार्गान्लक्ष्यमाणतलिनत्वान्वहमानां॥ एवंभूषणस्यवलयादेर्बंधनंयोजनातस्यमार्गान्स्थानानिवहमा
नांभूषणशून्यामित्यर्थः॥ किंभूतान्लक्ष्यमाणंतलिनत्वंस्तोकत्वंकार्श्यंयेषांतान्तत्तदलंकारस्थानानांतत्तदाका
रेणकृशीभूयपरिणतत्वादितिभावः॥ पुनःकीदृशान्देहस्यस्वभावसिद्धायाछविर्गौरतातयानिर्वलितान्पृग
कभूयप्रकाशमानानन्यत्रछविमालिन्यादिपिहितानत्रतत्रैवपरंतदभावादुज्वलेतिभावः यद्वादेहाछविभिन्निर्व
लितानन्यदेहापेक्षयाछविविशेषणपृथग्भूतानित्यर्थः अतएवभिन्नासंबद्धापश्चादीषदुद्वर्त्तितायारोचनातयास
छायानिवेत्युत्प्रेक्षाव्यंग्यारोचनोद्वर्त्तनादिवकांतिविशेषंगतानीत्यर्थः॥ अन्यशरीरापेक्षयागौरिमविशेषोदयादि
तिभावः॥ भिन्नापिषाउद्वर्त्तितालोडितायारोचनातत्तुल्यकांतीनितिकेचित्॥ तलिनंविरलंस्तोकइतिविश्वः॥ ४४॥ ॥

दट्ठव्वचडुलणअणं उवऊहणलालसप्फुरिअबाहुलअं॥ आसण्णट्ठिअदइअं रसेण एक्कसअणम्मि व विसूरन्ति
द्रष्टव्यचटुलनयनामुपगूहनलालसस्फुरितबाहुलतां॥ आसन्नस्थितदयितां रसेनैकशयन इव खिद्यमानां॥ एव
मासन्ने निकटे स्थितो दयितो रामो यस्यास्तां अत एव रसेनोत्कण्ठया द्रष्टव्ये रामे रामदर्शने वा चटुले चंचले नयने य
स्यास्तां॥ एवमुपगूहने तदालिंगने लालसेन लोभेन स्फुरिते सस्पंदे बाहुलते यस्याः सन्निहित एव प्रियः कदा द्रष्टव्यः
कदा वा तदालिंगनं लब्धव्यमित्युत्कंठितामित्यर्थः॥ अत एव तदुभयप्राप्त्यभावात् खिद्यमानां॥ उत्प्रेक्षते एकशयन इव
यथा एकत्र शयने काचिदासन्नस्थितदयिता रसेन पूर्वोक्तविशेषणद्वयवती सती मानपरिग्रहादिना तदुभयालाभा
त्खिद्यत इत्यर्थः॥ यद्वा भावनावशादासन्नस्थितदयितामुक्तविशेषणवतीं च अत एव तदुभयासिध्या रसेनैकशयन
इव खिद्यमानां नीं॥ ४५॥ दूसहमिअंकदंसणदुउणअरुक्कण्ठणीसहणिसण्णङ्गिं॥ गअजीविअपरिसंकिअणिसि
अरिहत्थपरिमट्ठणिच्चलहिअअं॥ दुःसहमृगांकदर्शनद्विगुणतरोत्कंठानिःसहनिषण्णांगीं॥ गतजीवितपरिशंकित
निशिचरीहस्तपरिमृष्टनिश्चलहृदयां॥ एवं विरहिणीनामतिपीडाकरत्वात् दुःसहेन मृगांकस्य दर्शनेन द्विगुणतराया
उत्कंठातया निःसहानि निश्चेष्टानि संति निषण्णानि भूमावित्यर्थादंगानि यस्यास्तां मूर्छितामित्यर्थः॥ अत एव गतजीवि
तेयमिति परिशंकिताभिः शंकावतीभिर्निशिचरीभिरवेक्षिताभिर्हस्तेन परिसर्वतोभावेन श्वासानवाप्त्या मृष्टं श्वासनिरो
धान्निश्चलं हृदयं यस्यास्तां॥ ४६॥ हत्थेण वाहगरुइअदूरपलंबालउत्थअणवहन्तिम्॥ पिअपेसिअंगुलीअअमणि
प्पहापाअडेक्कपासव्वमुहं॥ हस्तेन बाष्पगुरूकृतदूरप्रलंबालकावस्तृतेन वहन्तीम्॥ प्रियप्रेषितांगुलीयकमणिप्रभाप्रक
टैकपार्श्वमिव मुखं॥ एवं बाष्पैरश्रुभिस्तिमितत्वात् गुरूकृतैरत एव दूरं व्याथ प्रलंबैरलकैरवस्तृतेनाच्छादितेन हस्तेन मु
खं वहन्तीं मुखं हस्ते कृत्वा तिष्ठन्तीमित्यर्थः॥ किमिव प्रियेण रामेण प्रेषितं यदंगुलीकं तन्मणिप्रभाभिः प्रकटं व्यक्तमेकं पार्श्वं
यस्य तत्तथाभूतमिव॥ तथा च एकपार्श्वस्य करालकपिहितत्वादप्रकटत्वमेवोपरिगतपार्श्वस्य तु प्रकटत्वं॥ स्वच्छमुखात्
न्निर्गताभिरधस्थितकरांगुलीयप्रभाभिः कृतमित्युत्प्रेक्षितं॥ यद्वा पाविएक्कपासंवमुहमिति पाठस्तथा च मणिप्रभाप्रा १८७
वृतैकपार्श्वमिव तेन मणिप्रभाभिः प्रावृतं छन्नमेकं पार्श्वं यस्येत्यर्थस्तथा च मणेरिन्द्रनीलत्वेन तत्प्रभावृतैकपार्श्वमुखे व

क्ष्यमाणमलकेषु नीलतया तत्प्रभात्वमवगमयतीति निरवद्यं॥ ४७॥ आरासाजक्कवि मर्णरामभआसंवणिट्ठविअसंता
वं॥ हिअआवलिअदहमुहं किं मण्णे होहिइत्ति विमुहिज्जन्तिं॥ आसन्नयुद्धविमनसरामभुजाध्यवसायनिष्ठापितसं
तापां॥ हृदयापतितदशमुखां किमन्यो भविष्यतीति विमुह्यन्तीं॥ एवं आसन्नमचिरभावि यद्युद्धं तेन विमनस्कां युद्धे वा
नियतो जय इत्याशया तत्र अथ रामभुजयोरध्यवसायेन निष्ठापितो नाशितो युद्धे किं स्यादित्यादिसंतापो यस्यास्तां रामो जे
ष्यत्येवेति निश्चयात्॥ पश्चाच्च हृदये आपतितो दशमुखो यस्यास्तां॥ तथा च तस्य लब्धवरत्वं पौरुषं स्मृत्वा पुनः संदिहाना व
मित्यर्थः॥ अत एव मन्ये विचारयामि मनसि वा एकत्र रामोऽपरत्र रावण इति कोटिद्वयतोल्माल्किं भविष्यतीति विमुह्यन्ती
मूर्छन्तीं संशयानां वा॥ ४८॥ समुहालोअणविडिअं विडिअणिमिल्लपिअदंसणुक्कअहिअअं॥ ऊक्कअहिअउम्मिल्लउ
म्मिल्लोसरिअपइमुहकिलिम्मन्तिं॥ संमुखालोकनव्रीडितां व्रीडितनिमीलितप्रियदर्शनोत्सुकहृदयां॥ उत्सुकहृद
योन्मीलितां उन्मीलितायस्तपतिमुखक्लाम्यन्तीं॥ एवं संकल्पोपस्थितस्य रामस्य संमुखालोकनेन व्रीडितां त्वद्विरहेपि
जीवितास्मीति लज्जितां ततो व्रीडितत्वेन पुनर्निमीलितां निमीलितनेत्रां अनंतरं प्रियस्य दर्शने उत्सुकहृदयामिति कर्म
धारयः॥ ०तदनूत्सुकहृदयत्वात् पुनरुन्मीलितां प्रियद्रष्टुमुन्मीलितनेत्रां पश्चादुन्मीलितेन नयनोन्मीलनेन भावनापरि
त्यागादपसृते ऽदृष्टे सति पतिमुखे क्लाम्यन्तीं पुनर्दर्शनोत्कंठावशाद् अथवा व्यर्थैव भावनाविच्छेदकारि नयनोन्मीलनं कृत
मिति चिंतावशात्खिद्यमानां॥ आदिकुलकं॥ १२॥ ४९॥ अथामी षां सीतासमीपगमनमाह॥ दट्ठूण अणं दूमिअहिअअ
पहोलंतसंभरिअकाअव्वा॥ अह्लीणा माआमअरामसिरुहउअणकाअरा रअणिअरा॥ दृष्ट्वा चैनां दूनहृदयप्रघूर्ण
मानसंस्मृतकर्तव्याः॥ आलीना मायामयरामशिर उद्वहनकातरा रजनीचराः॥ स पुनः शोच्यामेनां सीतां दृष्ट्वा दयावशा
द्दूने दुःखिते हृदये प्रघूर्णमानं विस्मृतमित्यर्थः॥ पश्चात्पुनर्लंकेशभयात्संस्मृतकर्तव्यं मायाशिरः प्रदर्शितरूपं यैस्ते र
जनीचरा मायामयं यद्रामशिरस्तस्योद्वहने ऽर्पणे कातराः संत आलीनाः सीतासमीपमुपगताः जीवत्येव रामे स्वत एव
म्रियमाणा वराकी कथमसत्येन व्यापादनीयेति घृणावशादलीकशिरोनानुदर्शयामासुरिति भावः॥ ५०॥ अथ शिरः
प्रदर्शनमाह॥ अह ते हि तीअ पुरओ छेअसमुव्वत्तमासदिण्णावेदं॥ ठविअं राहवचअणं तुअमजुविलुगावामहत्थंच

धणुम्॥ अथवैस्तस्याः पुरतः छेदसमुद्वृत्तमांसदत्तावेष्टं॥ स्थापितं राघववदनं लूनमध्यविलग्नवामहस्तं च धनुः॥
अथसीतासमीपगमनानंतरं छेदनकर्तनेन समुद्वृत्तमुच्छ्वसितं यन्मांसं तेन दत्तमावेष्टं सर्वतो वेष्टनं यत्र तादृशं राघववदनं
लूनः छिन्नः सन्मध्ये विलग्नः संबद्धो वामहस्तो यत्र राघवस्येत्यर्थात्तद्धनुश्च तैर्निशाचरैस्तस्याः सीतायाः पुरतः स्थापितं तथा चे
कव्यापारेणैव शिरो धनुर्लग्नः करश्च हृदयमपि छिन्नमिति भावः॥ ५१॥ अथ सीतायामोहमाह॥ आलोइए विसणाठवणिज्जंत्ते
म्मि चेविउं आदत्ता॥ सीआरअणिअरेहिं रामसिरत्ति भणिए गअच्चिअ मोहं॥ आलोकिते विषस्याउपनीयमानेपि तुमारब्धा
सीतारजनिचरे रामशिर इति भणिते गतैव मोहं॥ शिरसि दूरादालोकिते सति सीता विषणा विषादमुपगता कस्येतदिति कृत्वे
त्यर्थः॥ अथ रजनीचरै रुपनीयमाने निकटं प्राप्यमाणे सति वेपितुमारब्धा ममैव निकट्यदानयंतितत्प्रायो रामस्यैव भवेदिति
कृत्वा कंपवती बभूवेत्यर्थः॥ पश्चात्तैरेव रामशिर इति भणिते सति निःसंदेहा सती मोहमेव मूर्छामेव गता नानुमृत्यमपि सीताजी
विताभिन्नरामजीवितस्य विद्यमानत्वादिति भावः॥ ५२॥ (~~अथसीतायामोहमाह॥ आलोइए विसणाउवणिज्जंतम्मि वेविउं आ~~
~~दत्ता सीआरअणिअरेहिं रामसिरत्ति भणिए गअच्चिअ मोहं॥ आलोकिते विषणा उपनीयमाने वेपितुमारब्धा सीतारजनिच~~
~~रै रामशिर~~) अथ सीतायाभूमौपतनमाह॥ पडिआ अ हत्थसिढिलिअणिरोहपंडरसमूससंतकवोला॥ पेल्लिअवामपओ
हरविसमुणअदाहिणत्थणी जणअसुआ॥ पतिता च हस्तशिथिलितनिरोधपांडुरसमुच्छ्वसत्कपोला॥ प्रेरितवामपयोधर
विषमोन्नतदक्षिणस्तनी जनकसुता॥ जनकसुता पतिता च भूमावित्यर्थात् केवलं मोहमेव गतेति न किंतु पतितापीति चार्थः
किंभूता हस्तेन शिथिलितो निरोधो यत्र तथाभूतः पश्चाद्दिरहेण करतवयंत्रणपसारितरुधिरत्वेन वा पांडुरः सन् समुच्छ्वसन्
यंत्रितमांसोत्फुल्लतया पुष्टिं व्रजन् कपोलो यस्यास्तथाविधा॥ ज्ञानदशायां कराक्रुद्धः कपोलस्थितो मूर्छायां करः शिथिलीभू
य बहिः स्खलित इत्यर्थः॥ एवं प्रेरितेन वामपार्श्वेन पतितत्वाद्वामभुजयंत्रणायां तिर्यगुत्थापितेन वामपयोधरेण विषमोन्नतः
स्वानुसारेण तिर्यगुत्थापितो दक्षिणस्तनो यस्यास्तथा च कुचयोः काठिन्यमुक्तं॥ ५३॥ भूम्यचष्टंभेन सीताजीवितेत्याह॥॥
मरणम्मि बंधवाणं जणस्स किं होइ बंधवोच्चिअ सरणं॥ तह गुरुसोअकवलिआ धरम्मि पडिआ विमुच्छिआ धरणिसुआ
रमणे बांधवानां जनस्य किं भवति बांधव एव शरणं॥ तथा गुरुशोककवलिता धरायां पतिता विमूर्छिता धरणिसुता॥ बांधवा ३८८

नां मरणे सति जनस्य बांधवशरणं किं भवति बांधव एव प्राणावलंबनं भवतीत्यर्थः तत्रोपपत्तिमाह॥ तथा रामविपत्तिज्ञान
जेन गुरुणा शोकेन कवलिता समाक्रांता सती विमूर्छिता धरणिसुता सीता धरायां पतिता यतस्तत्काले तस्या माहृतत्वाद्धरणि
रेवावलंबनमभूदिति भावः॥ ५४॥ अथ सीतायामोहोत्कर्षमाह॥ नकउ बाहविमुक्खो णिव्वणेउं पिणवइरं रामसिरं
णवर पडिवण मोहा गअजीविअ णीसहा महिम्मि णिसण्णा॥ न कृतो बाष्पविमोक्षो निर्व्वणयितुमपि न शकितं रामशिरः
केवलं प्रतिपन्नमोहा गतजीविते निःसुहा मह्यां निषण्णा॥ तया बाष्पविमोक्षो न कृतो रामशिरो निर्व्वर्णयितुं विशेषेण द्र
ष्टुमपि न शकितं केवलं प्रतिपन्नः स्वीकृतो मोहो यया तथाभूता सती गतजीविता मृतस्तदभिः सहा निश्चेष्टा सा मह्यां निष
ण्णा लिखितेव स्थिताभूदित्यर्थः रोदनदर्शनादीनां ज्ञानसाध्यत्वेन तदानीं प्रसह्य मोहादयात्तत्किमपि न कृतमिति भावः॥ वस्तु
तस्तु दर्शनविच्छेदः स्यादिति बाष्पत्यागो न कृतो दर्शने सति महत् दुःखं स्यादिति दर्शनमपि न कृतं॥ किंतु मोहे सति किम
पि दुःखं न लब्धव्यमिति मोह एव परं स्वीकृतस्तत एवाचैतन्यान्मह्यां लेखेवस्थितेत्यर्थः॥ ५५॥ अथ मूर्छावस्थामाह॥ खण
णिच्चलणीसासं जाअं मोहंधआरसामच्छाअं॥ विरलमिलिअच्छिवत्तं मुच्छाहीरंततारअं तीअ मुहं॥ क्षणनिश्चलनि
श्वासं जातं मोहांधकारश्यामच्छाया॥ विरलमिलिताक्षिपत्रमूर्छान्ह्रियमाणतारकं तस्या मुखं॥ तस्या मुखं जातं कीदृ
शं क्षणं व्याप्य निश्चलो निश्वासो यत्र मूर्छया प्राणवायोरवरोधादेवं मोहोज्ञानाभावस्तद्रूपेणांधकारेण श्यामा छाया
कांतिर्यस्य प्रसादाभावात्॥ एवं विरलमल्पं मीलितं किंचिन्मुद्रितं अक्षिपत्रं पक्ष्मणी यत्र तथाभूतं सन्मूर्छया ह्रियमा
णं परावर्तितं तारकं दृष्टिगोलकं यत्र तादृशं॥ मूर्छापूर्वावस्था मोहः॥ यद्वा मोहो ज्ञानमात्रं मूर्छा तु मनोविक्षोभविशे
षइतिभेदः॥ ५६॥ मूर्छयादुःसंवेदनाभावमाह॥ विसरिअविउअदुःखं तक्खणपब्भट्ठराममरणाआसं॥ जणअ
तणआइ णवरं लद्धं मुच्छाणिमीलिअच्छीअ सुहं॥ विस्मृतवियोगदुःखं तत्क्षणप्रभ्रष्टराममरणायासं॥ जनकत
नयया केवलं लब्धं मूर्छा॥ निमीलिताक्ष्या सुखं मूर्छामुद्रिताक्ष्या जनकपुत्र्या तदानीं केवलं सुखं लब्धं ज्ञाने सति दुः
खमात्रानुभवादज्ञाने दुःखाभाव एव तदिति भावः॥ सुखं कीदृक् विस्मृतो विरहदुःखं यत्र एवं तत्क्षणं प्रभ्रष्टः प्रस्मृतो
रामस्य मरणे नायासः पीडा रामनिष्ठा स्वनिष्ठा च त्रयं तत्र यद्वा विस्मृतवियोगेति विशेषणद्वयं विशिष्टं यथा स्यादेवं

सेऽबंधका ३८९

मूर्छानिमीलिताक्ष्यातयाकेवलंसुखंलब्धमित्यन्वयः नयननिमीलनेनशिरोदर्शनजन्यमपिदुःखंनाभूदितिभावः
॥५७॥अथकालेनश्वासपरावृत्तिमाह॥थणपरिणाहोत्थइएहिअअमिपअणुअंपिणदिट्ठं॥दीहंपिसमूससि
अंसूइज्जइणवरवेविरेअहरोट्ठे॥स्तनपरिणाहावस्थगितेतस्याहृदयेप्रतनुकमपिनदृष्टं॥दीर्घमपिसमुच्छ्वसि
तंसूच्यतेकेवलंवेपनशीलेअधरोष्ठे॥स्तनयोःपरिणाहेनविशालतयाऽवस्थगितेव्याप्तेतस्याहृदयेप्रतनुकमल्पमपि
नदृष्टंवक्षस्पंदापरिज्ञानान्नलक्षितंदीर्घमहदपिसमुच्छ्वसितंनिश्वासःकेवलंअधरोष्ठेवेपनशीलेकंपितेसतिसू
च्यतेश्वासंविनाकथमधरोष्टकंपइतिपरंतर्क्यतइत्यर्थः॥एतेनस्तनयोराभोगशालित्वमधरोष्ठस्यतनुत्वंसूचितं॥
५८॥अथमोहापशांतौचक्षुरुन्मीलनमाह॥अपरिप्फुडणीसासातोसामोहविरमेविणीसहपडिआ॥अणुवद्धवाह
गरुइअदुःखसमुव्वूढतारअंउम्मिहऊ॥अपरिस्फुटनिश्वासाततःसामोहविरामेपिनिःसहपतिता॥अनुबद्धबाष्पगुरूक
तदुःखसमुव्यूढतारकंउन्मीलिता॥ततःश्वासपरावृत्त्यनंतरंनपरिसर्वतोभावेनस्फुटाव्यक्तोनिश्वासोयस्यास्तथाविधातक्यो
माणनिश्वासासामूर्छाविरामेपिनिःसहनिःश्चेष्टयथास्यादेवंपतितासतिउन्मीलिताचक्षुरुन्मुद्रणंचकारेत्यर्थः॥अनुबद्धेनअ
नेसतितदानीमुत्पन्नेनबाष्पेनाश्रुबिंदुनागुरूकृतयत्नितेअतएवदुःखेननसमुव्यूढउत्तानितेतारकेगोलकेयत्रतद्यथा
स्यादित्युन्मीलनक्रियाविशेषणं॥५९॥अथचतुर्भिराद्कुलकेनचैतन्यसतिशिरोदर्शनार्थमीषदुत्थितायाःसीतायाः
शिरोदर्शनमाह॥पेछइअसरहसोहरिअमंडलग्गाहिघाअविसमछिण्णं॥दूरधणुसंधिअंचिअसरपुंखालिढसा
मलिअआवंगं पश्यतिचसरभसावहतमंडलाग्राभिघातविषमछिन्नं॥दूरधनुःसहितांचितशरपुंखालीढश्यामलि
तापांगं॥सीतारामशिरःपश्यतिचेत्यग्रेतनचतुर्थस्कंधकेनसहसमन्वयःकीदृशंसरभसंवेगेनावहतस्ययातितस्यमं
डलाग्रस्यखड्गस्याभिघातेनविषमंतिर्यक्क्रमेणछिन्नंएवंदूरव्याप्यधनुःसहितांचितस्यधनुरारोपिताकृष्टस्यशरस्यपुंखे
नालीढौस्पृष्टौअतएवनित्यंशराकर्षणेनपुंखावमर्षाज्जातकिणत्वेनश्यामलितावपांगौयत्रतदितिसव्यसाचित्वमु
क्तं॥६०॥णिव्वुदरुहिरपंडुरमउलंतछेअमासपेल्लिविवरं॥भज्जंतपडिअपहरणकण्ठछेअदरलग्गधाराचुण्णं॥निर्व्यू ३८९
दरुधिरपांडरमुकुलायमानछेदमांसप्रेरितविवरम्॥भज्यमानपतितप्रहरणकंठछेददरलग्नधाराचूर्णं॥पुनःकिं

भूतंनिःशोषतो॥व्यूढेनगलितेनरुधिरेणपांडरंसन्मुकुलायमानंसंकुचद्यच्छेदस्थानमांसंतेनप्रेरितंमुद्रितंविवरंकं
ठनालरंध्रंयत्रतत्तमांसस्योत्फुल्लनादितिभावः॥एवंपतितस्यसतोभज्यमानस्यभग्नस्यप्रहरणस्यखड्गस्यकंठछेदेत
त्स्थानेलग्नंधाराचूर्णंयत्रखड्गभंगेनचूर्णाकारस्यधारासन्निहितलोहकणिकारूपस्यधाराचूर्णस्यचसंबंधेनकंठ
स्यकाठिन्यमुक्तं॥६१॥णिद्दअसंदट्ठाहरमूलुक्खित्तदरदिट्ठदाढाहीरं॥संक्खाअसोणिअप्पंकपडलपूरंतकसण
कंठछेअं॥निर्दयसंदष्टाधरमूलोत्क्षिप्तदरदृष्टदंष्ट्राहीरं॥संस्त्यानशोणितपंकपटलपूर्यमाणकृष्णकंठछेदं॥ए
वंशरसंधानकालीनक्रोधान्निर्दयंसंदष्टस्याधरस्यमूलेउत्क्षिप्तउत्थापितंअतएवबहिर्भूतत्वेनकिंचिद्दृष्टदंष्ट्राहीरकंदं
ष्ट्राग्रंयत्रदंष्ट्रारूपहीरकंमणिविशेषइतिवाएवंसंस्त्यानशोणितस्यविष्टब्धरुधिरस्यपंकपटलेनपूर्यमाणोऽतएवकृष्णः
श्यामवर्णःकंठछेदोयत्रतत् विष्टब्धरुधिरस्यशामत्वादितिभावः॥सूच्यग्रेणसमंश्लक्ष्णंदंष्ट्राग्रंहीरकंविदुः॥६२॥णि
सिअरकरग्गहाणिअणिलाडअणट्ठभिउडिभुमआभंगं॥गलिअरुहिरद्दलहुअंअणहिअउम्मिलतारआरामसि
रं॥निशाचरकचग्रहानीतललाटतटनष्टभ्रुकुटिभ्रूभंगं॥गलितरुधिरार्द्रलघुकंअहृदयोन्मीलत्तारकंरामशिरः॥ए
वंनिशाचरैःकचग्रहणकेशमाकृष्यानीतंअतएवललाटतटेनष्टोभ्रुकुटिभ्रूभंगोयत्रकेशाकर्षणेनललाटत्वगुन्नय
नात्कोधोपजातयोर्भ्रुकुटीभ्रूभंगयोर्नाशइतिभावःनष्टोभ्रुकुट्याभ्रुवोश्चभंगोयत्रेतिवाएवंगलितरुधिरत्वेनार्द्रलघुकं
एवमहृदयमचेतन्यादनभिप्रायंउन्मीलत्प्रकाशमानेतारकेगोलकेयत्रकचाकर्षणान्नयनपक्ष्मणोरप्युन्नयनादिति
भावःसंत्यत्वख्यापनायसर्वमिदंकल्पितंरूपं॥६३॥अथशिरोदर्शनानंतरंपुनःसीतापतनमाह॥तहणिमिअच्चिअ
दिट्ठीमुक्ककवोलविहुरोउरच्चिअहत्थो॥गअजीविअणिच्चेट्ठाणवरंसामहिअलंथणभरेणगआ॥तथानियोजितैव
दृष्टिर्मुक्तकपोलविधुरउरस्येवहस्तः॥गतजीवितनिश्चेष्टाकेवलंसामहीतलंस्तनभरेणगता॥सीतायादृष्टिस्तथैवनियो
जितायथापूर्वंशिरसिनियोजितासीत्पुनर्दर्शनानंतरमपितथैवस्थितेत्यर्थः॥एवंमुक्तःकपोलोयेनतथाभूतःसन्विधुरो
विकलोहस्तोयथापूर्वमुरसिस्थितस्तदानीमपितथैवस्थितःकिंतुगतेनजीवितेननिश्चेष्टायद्वागतजीवितमृतकशरी
रंतद्वन्निश्चेष्टासतीसासीताकेवलंस्तनयोर्भरेणमहीतलंगताअयमर्थःपूर्वंनिशाचरनिवेदनजनितज्ञानजन्यशो

Dr. BHAU DAJI MEMORIAL

से॰ बं॰ ध॰ केनपतिताभूत्तदानींपुनरुत्थायनिपुणनिभालनोपजातनिर्णयवशात्तात्कालिकमोहोत्कर्षेणपुरोदृश्यमाणरामशिरःसं
३९० मुखेवाधोमुखीभूयपतितेतिदृष्टिरप्यभीष्टत्रिजटादिमुखनगताकरोप्युरस्ताडनादिव्यापृतानाभूदितिनिरवद्यदेहा
तरनेरपेक्ष्येणस्तनभरस्यभूमिसंबंधादुत्तुंगिमाकाठिन्यंचसूचितमितिकिंचित् ॥ ६५ ॥ अथपुनश्चैतन्येसतिपूर्वनिश्च
याप्रामाण्यशंकयापुनर्दर्शनेनस्फुटदनिर्णयायपुनरुत्थितेत्याह ॥ तोमुच्छिउट्ठिआएकिंएअतिगअणेदिसासुअस
मअ ॥ खणपरियोलिअच्छंजात्अंमूढपरिदेविअंतीअमुहं ॥ ततोमूर्छितोत्थितायाःकिंएतदितिगगनेदिक्षुचसमकं ॥
शून्यपरिघूर्णिताक्षंजातंमूढपरिदेवितंतस्यामुखं ततःपुनःपतनानंतरंप्रथमंमूर्छितायाःपश्चाच्चैतन्येसत्युत्थिताया
स्तस्यामुखंमूढस्येवपरिदेवितंदुःखप्रकाशनयत्रतिमूढपरिदेवितमनक्षरपरिदेवितंजातंचेष्टयैवपरिदेवनंचका
रेत्यर्थस्तच्चेष्टामाह किंभूतं किंएतदितिकृत्वाकिंएतदित्यभिलप्यगगनेदिक्षुचसमकमेकदैवशून्यमनोविकल्पनवि
षयाग्राहकेसतीपरिसर्वतोभावेनघूर्णितेअक्षिणीयत्रतत्तथाचरामपतनेसतिदिवाकरःप्रकाशतएवनक्षत्राण्यपि
नव्यवतेनवादिग्दाहधूमकेतूत्पातपवनादिकंदृश्यतेतत्कथमितिजिज्ञासावशादितिभावःकिंएतदितिकृत्वाउत्थि
तायाइतिकिंचित् ॥ ६९ ॥ अथवाक्स्तंभमाह ॥ णिव्वण्णेऊणाअणंतत्तोहुत्तन्ति ऽऽसिअत्तणिसण्णो ॥ कंखंत्तीअणपं
त्तोवअणंमरणंचसेकहविअप्पाणं ॥ निर्वर्ण्यचैतत्ततोभिमुखस्थितावसीदन्निःसंज्ञः ॥ कांक्षंत्याअपिनप्राप्तोवचनं
मरणंचास्याःकथमप्यात्मा ॥ वपुनःअस्याआत्मावचनंमरणंचनप्राप्तःरामजीवनायत्तजीवनत्वान्मरणाभावस्ततएव
संप्रतिजीवाम्येवेत्यप्रतिभयावचनभावइतिभावः ॥ किंभूतायाएतद्रामशिरोनिर्वर्ण्यनिरीक्ष्यकांक्षंत्याःतदुभयमर्थादि
च्छंत्याःआत्माकीदृक् ॥ रामशिरोभिमुखस्थितःसन्नवसीदन्निःसहोभवन्नथचनिःसंज्ञःयद्वाततोभिमुखस्थितत्वेना
वसीदन्नतएवनिषण्णस्तत्रैवस्थितःसमीपगमनसामर्थ्याभावादितिभावः ॥ ६६ ॥ पुनरस्यावेगात्पतितमाह ॥ एावरिअप
सारिअंगीरअभरिउघ्यहपइण्णवेणीबंधा पडिआउरसंदाणिअमहिअवेलेकलइअथणीजणाअसुआ अनंतरं १९०
चप्रसारितांगिरजोत्यथप्रकीर्णवेणीबंधा पतिताउरःसंदानितमहीतलेचक्रीकृतस्तनीजनकसुता निर्वचनतानंतरं
चजनकसुतापतिताभूमावित्यर्थात्तभूमावपिनिपत्यात्मानंव्यापादयामीत्याशयात्किंभूताप्रसारितमंगंययातादृशी

क्वचिदप्यंगेमृत्युहेतुरभिघातोजायतामितीच्छयेतिभावः ॥ एवंरजोभृतोधूलिपूर्णउत्पथप्रकीर्णःपृष्ठमपहायययत्रकुत्र
चिद्विपर्यस्तोवेणीबंधोयस्याएवंउरःसंदानितेनाधोमुखपतनादुरसावष्टब्धेनमहीतलेनचक्रितोयत्रणावशाच्चक्रवन्मंड
लाकृतीकृतौस्तनौयस्याःसाएतेनस्तनयोरुन्नतकठिनत्वमुक्तं ॥ ६७ ॥ स्तनजघनोन्नतिमाह ॥ सव्वंगणिसण्णाअविणीसे
सकवविअवलिविभंगणिराऽऽ तीएमज्झपएसोथणजहणकरालिऽऽणयावइवसुहं ॥ सर्वांगनिषण्णायाअपिनिः
शेषक्षपितवलिविभंगनिरायतायाःतस्यामध्यप्रदेशःस्तनजघनकरालितोनप्राप्नोतिवसुधां ॥ भूमावधोमुखीमुखीभूय
सर्वांगेणनिषण्णायाअपितस्यामध्यप्रदेशउदरंस्तनजघनेनकरालितःसांतरालीकृतःसन्वसुधांनप्राप्नोति ॥ स्तनयो
र्जघनस्यचोन्नतत्वादुभयतोप्युत्तोलमधृतत्वादवनींनस्पृशतीत्यर्थः ॥ अतएवकरालितपदेनोदरस्यातिकृशत्वमुक्तं
कीदृक्निःशेषतःक्षपिताअपगतावलीविभंगायस्यतथाभूतःसन्निरायतोदीर्घःदैर्घ्यादुभयतोप्याकर्षणात्त्रिवलिव्यप
गमइत्यर्थः ॥ ६८ ॥ अथचैतन्यसमकालमश्रुपातमाह ॥ हसालोअविराअंदइअमुहेतम्मिसाणुसअदट्ठव्वे ॥ मोहंगतू
णचिरंससअंवाहेणआगअंसेहिअअं ॥ सहसालोकविशीर्णदयितमुखेतस्मिन्सानुशयद्रष्टव्ये ॥ मोहंगत्वाचिरंस
मंवाष्पेणागतमस्याहृदयं ॥ अस्याहृदयंमनोबाष्पेणाश्रुणासममागतमितिसहोक्तिःहृदयमप्येकदाविर्भूतमित्यर्थःकिं
भूतंअनुशयःपश्चात्तापस्तथाचसानुशयंद्रष्टव्येवियोगेनरावणवधविलंबेनचसक्रोधंद्रष्टव्यमित्यवधारितेतस्मि
न्दयितस्यरामस्यमुखेसतियत्सहसाऽलोकोनिकृत्तस्यतस्याकस्मिकदर्शनंतेनविशीर्णेव्यपगतेअतएवचिरंमोह
मप्रतिपत्तिदशांगत्वासमागतमितिसंबंधस्तथाचपुनर्ज्ञानंवृत्तमितिभावः ॥ ६९ ॥ अथशिरोदर्शनायव्यापारमाह ॥ तो
कहविलद्धसण्णावाहोवग्गिअकवोलअलसंदट्ठं ॥ मग्गाइसंगोवेउंअलअंतीअविहलोणपावइहत्थो ॥ ततःकथमपिलब्धसं
ज्ञाबाधाक्रांतकपोलतलसंदष्टंमार्गतोपयितुंअलकंतस्याविह्वलोनप्राप्नोतिहस्तः ॥ ततोमनःसमागमोत्तरंकथमपिलब्धसं
ज्ञाप्राप्तचैतन्यासाबाष्पेणाक्रांतयोःकपोलतलयोःसंदष्टंअश्रुसंबंधाल्लग्नंअलकंसंगोपयितुंसंयमयितुंमार्गतिव्यापा
रंकरोतिकिंतुतस्याविह्वलोविपर्यस्तोहस्तोनप्राप्नोतिरामशिरोदर्शनायदृष्टिव्यवधायकालकसंयमनायव्यापारितोपि
हस्तःशोकवशादस्वायत्तालकपर्यंतमपिनोत्तिष्ठतीत्यर्थः ॥ ७० ॥ अथमीतयाविहस्ततामाह ॥ आवेअसमुक्खित्तंतोसे

रवेत्र्रागमोसित्र्रत्तावत्तं॥ पडित्र्रणित्र्रउच्छंगेत्र्रपत्तंचित्र्रपऊ्हरेत्र्रयाणं॥ त्र्रावेगसमुक्षिप्तंततोस्याःरवेदागमावसी
ददपवृत्तां॥पतितंनिजोत्संगेःप्राप्तमेवपयोधरोकरयुगलं॥ततोऽलकासंवरणानंतरमस्याःकरयुगलंत्र्रावेगेनोद्वे
गेनसमुत्क्षिप्तमुक्षापितंसत्पयोधरौत्र्रप्राप्तमेवत्र्रस्पृष्टस्तनमेवेत्यर्थः निजोत्संगेक्रोडएवपतितंकुतस्तदाह॥रवेदा
गमेनावसीदत्पीडयाविह्वलमतएवापवृत्तंस्खलितंस्तनतटताडयितुमभीप्सोरपितस्याःरवेदावसन्नतयाकरयुगेतावद्दू
रमपिनगतंकिंतुक्वचिदन्यत्रैवस्खलित्वापतितमित्यर्थः॥ ७१॥अथकटाक्षेणशिरोदर्शनमाह॥मूढहित्र्रत्र्राइहहुं
त्र्रचत्र्रंतीत्र्रसमुहंकहविरामसिरं॥तंसोणमंतणीसहचत्र्रणछंदबलित्र्राएणाइपुलइत्र्रं॥मूढहृदययाद्रष्टुमश
क्नुवत्यासंमुखंकथमपिरामशिरः तिर्यगवनमन्निःसहवदनछंदवलितानननयाप्रलोकितं॥मूढहृदययातयारामशि
रःसंमुखंद्रष्टुमपारयंत्यासत्याकथमपिकष्टेनप्रलोकितंदृष्टंदर्शनप्रकारमाह॥ किंभूतयातिर्यग्विवृत्तंसङ्गमिष्टस्यतस्य
दर्शनसिद्ध्यर्थमवनमनमन्नत्र्रथचनिःसहदौर्बल्येनहगव्यापारयितुमयोग्यंयद्वदनंतस्यछंदेनवशेनवलितावृ
क्रीभूतात्र्रलकायस्यास्तयायथायथाशिरोदर्शनायमुखंतिर्यक्कृत्यावनतंक्रियतेतथातथाविकीर्णात्र्रलकाअपितिर्यग
वनमंतीत्यर्थः॥तथाचदर्शनेसतिछेदकालीनरामदुःरवज्ञानादर्शनेसतिनिजोत्कंगवशादिस्फभयथापिकष्टमितिमध्य
मवृत्त्याकटाक्षेणदृष्टमितिभावः॥ अभिप्रायवशौछंदावित्यमरः॥७२॥अथवक्षस्ताडनसंहितंपरिदेवनमाह॥परि
देविउंपवित्ताणित्र्रत्र्रसरीरपडिमुक्कराहवदुक्ख॥ करमग्गुट्ठित्र्रसोणित्र्रविवण्णउण्णत्र्रपऊ्हराजणत्र्रसुत्र्रा॥परि
देवितुंप्रवृत्तानिजकशरीरप्रतिमुक्तराघवदुःखं॥करमार्गोत्थितशोणितविवर्णोन्नतपयोधराजनकसुता॥रामशि
रोदर्शनानंतरंजनकसुतापरिदेवितुंविलपितुंप्रवृत्तानिजकशरीरेप्रतिमुक्तंकरप्रहारादिनासंक्रमितंराघवदुःखंय
त्रेतिक्रियाविशेषणं॥ किंभूताकरमार्गेणप्रहारद्वाराकररूपेणवर्त्मनायद्वाकरप्रहारस्थानेनउत्थितंयत्शोणितंतेनविवर्णौ
श्यामतांप्रीकृतौपयोधरौयस्याइतिमार्दवमुक्तं॥ ७३॥अथदशभिःस्कंधकैःपरिदेवनावाक्यमाह॥आवात्र्रभत्र्रंकरंचित्र्र
णहोइदुःखस्सदारुणंणिव्वहणं॥जंमहिलाबीहच्छंदिहंसहित्र्रंचतुह्हिमएत्र्रवसाणं॥आपातभयंकरमेवनभवति १९३
दुःखस्यदारुणंनिर्वहणं॥यन्महिलीबीभत्संदृष्टंसोढंचतवमयात्र्रवसानं॥आपातेउपक्रमएवभयंकरंदुःखमित्यर्थात्

यद्वाषष्ठीनिर्देशात्दुःखस्यापातभयंकरत्वमेव॥निर्वहणंतुपर्यवसानंतुदारुणंनभवतीतिज्ञायतेयद्धेतोःमहिलानांवी
भत्संस्त्रीणांनिंदाकरंतवावसानंमरणंमयादृष्टंनकेवलंदृष्टमपितुसोढंच॥मरणरूपतदनुरूपव्यापाराभावात्तथाचे
तस्यदर्शनमेवायोग्यंसहनंतुदूरएवेत्यहमारंभेमूर्छितापरंनतुपर्यवसानेमृतेत्येकस्याममनिंदयामत्सजातीयानां
सर्वासामेवमहिलानांमत्कृत्यानिंदाभूदितिभावः॥७६॥वाहुण्हंतुजुउरेजम्माछिहिम्मित्तिसंठिअंमहहिअए घरणि
गामणएपअत्तंसाहरूतंकम्मिणिव्वविज्जउदुःखं॥बाष्पोष्णंतवोरसियन्मोक्ष्यामीतिसंस्थितंममहृदये गृहनिर्गमन
प्रवृत्तंशाधितत्कस्मिन्निर्वाप्यतांदुःखं॥गृहनिर्गमनात्प्रभृतिप्रवृत्तंबाष्पेणोष्णंउष्णबाष्पंवादुःखंतवोरसिमोक्ष्या
मित्वामुपालभ्यरावणवधेसतित्वयिनिवेद्यवाशमयितव्यमितियन्ममहृदयेसंस्थितंत्र्रवधारितंतत्शाधिकथयकस्मि
न्निर्वाप्यतांकस्यद्वाराशांतिंनीयतांत्वय्यपगतेस्थानाभावादितिभावइतिसंप्रदायः ममतुव्याख्यागृहनिर्गमनप्रवृत्तंदुः
खेनोष्णंसत्तवोरसिमोक्ष्यामितवोरसिरुदित्वात्यक्ष्यामिरोदनेनैवज्ञापनादन्यत्समानंशोकजत्वेनबाष्पस्योष्णतया
दुःखस्याप्युष्णत्वमितिमंतव्यं॥७७॥विरहम्मितुज्झधरित्र्रंदच्छामितुमंतिजीवित्र्रंकहविमएण॥तंएसमएदिट्ठोफलि
आविमणोरहाणंपूरेंतिमहं॥विरहेतवधृतंद्रक्ष्यामित्वामितिजीवितंकथमपिमया॥तदेषमयादृष्टःफलिताअपिम
नोरथानपूर्यंतेमम॥त्वांकदाचिदपिद्रक्षामीतिप्रत्याशयातवविरहेमयाकथमपिजीवितंधृतंसत्वएषमृतस्त्वंदृष्टोसि
अतःफलिताअपिमनोरथाममनपूर्यंतेत्वद्दर्शनंजातमितिफलितामृतोदृष्टोसीतिनपूर्यंतेसंभाषणाद्यभावादितिभा
वः॥यद्वानपूरयंतिमहंदृष्टोसीतिफलितात्र्रपिमहमुत्सवंनपूरयंतिमरणदर्शनादितिभावः॥७८॥पुहवीत्र्रहोहि
इपईबहुपुरिसविसेसचंचलारात्र्रसिरी॥कहतामहंचित्र्रइमणीसामण्णउत्र्रत्थित्र्रवेहव्वं॥पृथिव्याभविष्यतिपति
र्बहुपुरुषविशेषचंचलाराजश्रीः॥कथंतावन्ममैवेदंनिःसामान्यमुपस्थितंव्यवैधव्यं॥पृथिवीराज्यलक्ष्मीरहंचतवति
स्रःपत्न्यस्तत्रत्वद्विगमेपृथिव्याःपतिर्भविष्यतियएवराजाभवेत्सएवतस्याःपतिरित्याशयस्तथाबहुषुपुरुषविशेषेषुचं
चलाराजश्रीरतःसापिराज्ञोलक्ष्मीरितिपृथिव्यनुगामिनीराजानमेवयास्यतितावदित्यवधारणे॥ममैवकथंनिःसामा
न्यमेतदुभयापेक्षयाःसाधारणमिदंवैधव्यमुपस्थितंतथाचासत्योतेभवत्यारोक्षममेवछतःकुलस्त्रियाममपरंगतिर

से०बँ०टी० न्यानास्तीतिमयामर्तव्यमेवेतिभावः॥ ७९॥ किंणअत्तिपलत्तंविसमु मिसहेहिलोअणेहिंअदिठ्ठं॥ विअलिअलज्जाइम
१९२ राहोइफुडंणाहतुहमुहंतिपरुण्णं॥ किंएतदितिप्रलपितंविषमोन्मीलिताभ्यांलोचनाभ्यांचदृष्टं॥ विगलितलज्जयामया
भवतिस्फुटंनाथतवमुखमितिप्ररुदितं॥ दूरादेवशिरोदर्शनानंतरंमयाकिंएतदितिप्रलपितमनर्थकमुक्तंविशिष्यज्ञा
नाभावादथसन्निधानाच्चिरइतिनिर्णीतेभयदीयत्वशंकयाविषमंयथास्यादेवमुन्मीलिताभ्यांयद्वाजिज्ञासावशाद्विश
दं उन्मीलिताभ्यांविकाशिताभ्यांलोचनाभ्यांदृष्टंएतत्संभवेदपिहेनाथसंप्रतिविशेषदर्शनास्फुटंतवमुखंभवतीति
ज्ञातेविगलितलज्जयामयाप्ररुदितंभवतीत्यन्वयस्तथाचनिर्णयानंतरमपियन्नमृतमिदंनसंभवतीतिनिर्लज्जत्वमि
तिभावः॥ ८०॥ सहिऊणतुज्झविरहंअणिअंरअणिअरीहिंसमअंसहीहिंविवुत्थं॥ दुक्खंतुमेत्तिहोन्तंजइपत्ताहिंविजीविअंविअ
लुत्तं॥ सोढस्तवविंयोगोरजनीचरीभिःसमकंसखीभिर्विव्यक्षितं॥ दृष्ट्वासीतिभवद्यदीदानीमपिजीवितंविगलत्॥ तवविं
श्लेषः सोढस्तथाचप्रथमंतदेवाशक्यंतदुपरियथासखीभिः सहस्थीयतेतथारजनीचरीभिःसमंव्यक्षितमितिततोप्य
शक्यमित्येतद्वयोत्वाद्दृष्टंकृतमितितदाभवदभविष्यत्तल्लड्‌र्थेशत्वक्तव्यः यदीदानीमपित्वद्विपर्ययज्ञानानंतरम
पिजीवितविगलद्विगलिष्यत्तथाचतदानीमेवमयाम्रतस्यात्तथासतिभवद्दर्शनंनभविष्यतीतिनम्रतमितिवक्तुंतदा
शक्यतयदिसंप्रतित्वद्दर्शनसंभावनाविरहम्रियेतनचैतत्संपद्यतेतदाकेवलंप्राणरक्षायैतत्कृतमितिपर्य्यवसन्न
मितिभावः॥ ८१॥ जाएपरलोअगएतुमम्मिववसाअमेत्तसहहरिसट्ठाणेविमहंउज्जुइअहिइअदहमुहवहंहिअ
अं॥ जातेपरलोकगतेत्वयिव्यवसायमात्रसुखद्रष्टव्ये॥ हर्षस्थानेपिममदह्यतेः दृष्टदशमुखवधेहृदयं॥ परलोक
गतेत्वपिव्यवसायमात्रेणानुमरणादिनासुखद्रष्टव्येजातेसतिहर्षस्थानेपिभवद्दर्शनेसंप्रतिममायात्तिर्जातिस्यानदस्था
नेपिनदृष्टोदशमुखवधोयेनतथाभूतंममहृदयंदह्यतेभवदपकर्ताहतोनदृष्टइत्येवपरंविषादबीजमितिवीरपत्नीत्वमु
क्तं॥ ८२॥ वाहणवारेइमुहंआसाबंधोविमेणरुंभइहिअअं॥ एवरिअचिंत्तिज्जन्तेणविणज्जइकेणजीविअंसंतुद्धं॥
बाष्पंनधारयतिमुखंआशाबंधोपिमेनरुणद्धिमुखंहृदयं॥ अनंतरंचचिंत्यमानेनविज्ञायतेकेनजीवितंसंरुद्धं॥ मम १९२
मुखंकर्तृबाष्पंनधारयतिनप्रतिबध्नातिनित्यंप्रवहद्रूपत्वादेवंआशाबंधोपिरामदर्शनमनोरथोपिहृदयंनरुणद्धिनसं

कोचयतिनित्यमुपचीयमानत्वात्यद्वासंप्रतिपुनर्दर्शनशंकाविरहणस्वसाद्धहिभवदपिमनोनस्वाधीकरोतिअनंत
रंचचिंत्यमानेविचार्यमाणेसतिनविज्ञायतेजीवितंकेनसंरुद्धंतथाचबाष्पहृदयजीवितानामत्यन्तमेकमेव
स्थानंतत्रतदुभयोरवरोधःकेनापिनक्रियतेस्यैवपरंक्रियतइतिविधिनाकिमेपरंदर्शनीयास्मीतिभावःकेचित्तुमुखंबा
ष्पंनधारयतिअश्रुविनैवरोदनंरामदर्शनप्रत्याशापिनास्तीत्यभयंमरणलक्षणंतथापियन्नम्रियेतन्नजानामिजीवि
तंकेनरुद्धमित्यर्थमाहुः॥ ८३॥ वोलीणोमअरहरोमज्झकएणमरणंपिदंपडिवण्णंणिव्वूढंणाहतुमेअज्जविपरइअ
कअणुअमहहिअअं॥ व्यतिक्रान्तोमकरगृहोममकृतेनमरणमपितेप्रतिपन्नं॥ निर्व्यूढंनाथत्वयाऽद्यापिध्रियतेऽकृ
तज्ञंममहृदयं तत्त्वयाममकृतेनकारणेनमकरगृहःसमुद्रोव्यतिक्रान्तोलंघितःकिमपरंमरणमपिप्रतिपन्नंस्वीकृ
तंहेनाथअतस्त्वयानिर्व्यूढंनिस्तीर्णंअद्यापीदृशत्वद्व्यपरोक्तरमपिममहृदयंअकृतज्ञंयतस्ततोध्रियतेतिष्ठतिस्था
तुंनयुक्तमित्यर्थः धृङ् अवस्थानेधातुस्तथाचातःपरमस्यानुमर्तुमुचितंततनकरोतिचेत्तदायत्त्वयाकृतंतत्रजाना
तीत्यकृतज्ञमितिभावः॥ ८४॥ उग्गाहिइरामतुमंगुणेगणेजणपुरिसमइअत्तिजणो॥ गलिअमहिलासहावंसंभरिज
णाअममंणिअत्तिहिइकहं॥ उद्गास्यतिरामत्वांगुणान्गणयित्वापौरुषमयइतिजनः॥ गलितमहिलास्वभावांसंस्मृत्यच
मांनिवर्त्तयिष्यतिकथां॥ हेरामजनस्तेगुणान्सौर्यादीन्गणयित्वात्वांपौरुषमयइतिकृत्वाउद्गास्यतिस्तोष्यतिउद्गाहयिष्य
त्युदाहरिष्यतीतिवातत्रैवप्रस्तावेगलितोमहिलायाःस्वभावःपत्यनुमरणादिर्यस्यास्तथाभूतांसंस्मृत्यकथामेवनिवर्तयि
ष्यतिममासच्चरितायानामापिनग्राह्यमितित्यक्षतीत्यर्थः यद्वाकथानिवर्तयिष्यतिसत्पुरुषेषुत्वामसच्चरितासुमामुदाहृ
त्यकथांसंपादयिष्यतीत्यर्थः॥ महंइतिपाठेममगलितंमहिलास्वभावंसंस्मृत्येत्यन्वयः॥ ८५॥ तुहवाणुक्खअणिहअं
दच्छिमिदहकंठमुहणिहाअन्तिकआ॥ महभाअधेअवलिआविवराहुत्तामणोरहापल्हत्था॥ तवबाणोत्खातनिहतंद्र
क्ष्यामिदशकंठमुखनिघातंइतिकृताः॥ ममभागधेयवलिताविपराङ्मुखामनोरथाःपर्यस्ताः॥ तवबाणोत्खातमुखंछि
न्नंअतएवनिहतंनिपातितंदशकंठस्यमुखनिघातंद्रक्ष्यामीतिकृत्वाकृताममनोरथाभागधेयेनदूरदृष्टेनवलिताःप्र
तिहताअतएवविपराङ्मुखाविपरीताःसन्तःपर्यस्ताविशीर्णारामशरलूनंरावणशिरोद्रष्टव्यमेवंरूपतायांरावणशर

से०बैं०टी० न्यानास्तीतिमयामर्तव्यमेवेतिभावः॥ ७८॥ किंएअत्तिपलत्तंविसमुम्मिसिएहिंलोअणेहिंअदिट्ठं॥ विअलिअलज्जाइम
१९२ राहोइफुडंणाहतुहमुहंतिपरुण्णं॥ किंएतदितिप्रलपितंविषमोन्मीलिताभ्यांलोचनाभ्यांचेदृष्टं॥ विगलितलज्जयामया
भवतिस्फुटंनाथतवमुखमितिप्ररुदितं॥ दूरादेवशिरोदर्शनानंतरंमयाकिंएतदितिप्रलपितमनर्थकमुक्तंविशेषज्ञा
नाभावादथसन्निधानाच्छिरइतिनिर्णीतेभयदीयत्वशंकयाविषमंयथास्यादेवमुन्मीलिताभ्यांयद्वाजिज्ञासावशाद्दिश
दंउन्मीलिताभ्यांविकाशिताभ्यांलोचनाभ्यांदृष्टंएतत्संभवेदपिहेनाथसंप्रतिविशेषदर्शनात्स्फुटंतवमुखंभवतीति
ज्ञातेविगलितलज्जयामयाप्ररुदितंभवतीत्यन्वयस्तथाचनिर्णयानंतरमपियन्नमृतमिदंनसंभवतीतिनिर्लज्जत्वमि
तिभावः॥ ८०॥ सहिदुंअनुज्जविआओरअणिअरीहिंसमअंसहीहिंविवुत्थं॥ दुल्लंतुमेत्तिहोन्तंजइपत्ताहंविजीविअविअ
लत्तं॥ सोढस्तववियोगोरजनीचरीभिसमकंसखीभिर्विव्युषितं॥ द्रष्टव्यामितिभवद्यदीदानीमपिजीवितविगलत्॥ तवविं
श्लेषः सोढस्तथाचप्रथमतदेवाशक्यंतदुपरियथासखीभिः सहस्थीयतेतथारजनीचरीभिः समंव्युषितमितितत्तोप्य
शक्यमित्येतद्वयोत्वाद्रष्टुंकृतमितितदाभवदभविष्यत्तल्लङ्र्थेशतृवक्तव्यः यदीदानीमपित्वद्विपर्ययज्ञानानंतरम
पिजीवितविगलद्यद्यगलिष्यत्तथाचतदानीमेवमयामृतस्यात्तथासतिभवद्दर्शनंनभविष्यतीतिनमृतमितिवक्तुंतदा
शक्यतयदिसंप्रतित्वद्दर्शनसंभावनाविरहंघ्नियेतनचैतत्संपद्यतेतदाकेवलंप्राणरक्षायैतत्कृतमितिपर्यवसन्न
मितिभावः॥ ८१॥ जाणपरलोअगएतुमम्मिववसाअमेत्तकहदव्वे॥ हरिसट्ठाणेविमहंउज्जुइअहिअदहमुहवहहिअ
अं॥ जातेपरलोकगतेत्वयिव्यवसायमात्रकखद्रष्टव्ये॥ हर्षस्थानेपिममदह्यतेदृष्टदशमुखवधेहृदयं॥ परलोक
गतेत्वपिव्यवसायमात्रेणानुमरणादिनाकखद्रष्टव्येजातेसतिहर्षस्थानेपिभवद्दर्शनेसप्रतिममायत्तिर्जातिस्यानदस्था
नेपिनदृष्टोदशमुखवधोयेनतथाभूतंममहृदयंदह्यतेभवदपकर्ताहतोनदृष्टइत्येवपरंविषादबीजमितिवीरपत्नीत्वमु
क्तं॥ ८२॥ वाहणवरइमुहंआसावधोविमेणरुंभइहिअअं॥ णवरिअचिंत्तिज्जन्तेणविणज्जइकेणजीविअंसंतुद्धं॥
बाष्पंनधारयतिमुखंआशाबंधोपिमेनरुणद्धिमुखंहृदयं॥ अनंतरंचचिंत्यमानेनविज्ञायतेकेनजीवितंसंरुद्धं॥ मम १९२
मुखंकर्तृबाष्पंनधारयतिनप्रतिबध्नातिनित्यंप्रवृद्धपत्वादेवंआशाबंधोपिरामदर्शनमनोरथोपिहृदयंनरुणद्धिनस्थ

कोचयतिनित्यमुपचीयमानत्वात्यद्वासंप्रतिपुनर्दर्शनशंकाविरहणस्वस्थाद्धहिभवदपिमनोनस्वादीकरोतिअनंत
रंचचिंत्यमानेविचार्यमाणेसतिनविज्ञायतेजीवितंकेनसंरुद्धंतथाचबाष्पहृदयजीवितानामल्पमस्थान्तरमेकमेव
स्थानंतत्रतदुभयोरवरोधःकेनापिनक्रियतेस्यैवपरंक्रियतइतिविधिनाकिमेपरंदर्शनीयास्मीतिभावःकेचित्तुमुखंबा
ष्पंनधारयतिअश्रुविनैवरोदनंरामदर्शनप्रत्याशापिनास्तीत्यभयंमरणलक्षणंतथापियन्नम्रियेतन्नजानामिजीवि
तंकेनरुद्धमित्यर्थमाहुः॥ ८३॥ वोलीणोमअरहरोमज्झकएणमरणंपिदेपडिवण्णंणिव्वूढंणाहतुमेअज्जविषरइअ
कअणुअमहहिअअं॥ व्यतिक्रान्तोमकरग्रहोममकृतेनमरणमपितेप्रतिपन्नं॥ निर्व्यूढंनाथत्वयाद्यापिध्रियतेकृ
तघ्नंममहृदयं तेत्वयाममकृतेनकारणेनमकरगृहःसमुद्रोव्यतिक्रान्तोलंघितःकिमपरंमरणमपिप्रतिपन्नंस्वीकृ
तंहेनाथअतस्त्वयानिर्व्यूढंनिस्तीर्णंअद्यापीदृशत्वद्व्यपरोत्तरमपिममहृदयंअकृतज्ञंयतस्ततोध्रियतेतिष्ठतिस्था
तुंनयुक्तमित्यर्थःधृङ्अवस्थानेधातुस्तथाचातःपरमस्यानुमर्तुमुचितंतत्तन्नकरोतिचेत्तदायत्त्वयाकृतंतत्रजाना
तीत्यकृतघ्नमितिभावः॥ ८४॥ उग्गाहिइरामतुमंगुणेगणेजणपुरिसमइअत्तिजणो॥ गलिअमहिलासहावंसंभरिज
णत्थममंणिअत्तिहिइकहं॥ उद्गास्यतिरामत्वांगुणान्गणयित्वापौरुषमयइतिजनः॥ गलितमहिलास्वभावांसस्मृत्यच
मानिवर्त्तयिष्यतिकथां॥ हेरामजनस्तेगुणान्शौर्यादीन्गणयित्वात्वांपौरुषमयइतिकृत्वाउद्गास्यतिस्तोष्यतिउद्गाहयिष्य
त्युदाहरिष्यतीतिवातत्रैवप्रस्तावेगलितोमहिलायाःस्वभावःपत्यनुमरणादिर्यस्यास्तथामांसंस्मृत्यकथामेवनिवर्तयि
ष्यतिममासच्चरितायानामापिनग्राह्यमितित्यक्ष्यतीत्यर्थःयद्वाकथांनिवर्तयिष्यतिसत्पुरुषेषुत्वामसच्चरितासकमामुदाहृ
त्यकथांसंपादयिष्यतीत्यर्थः॥ महंइतिपाठेममगलितंमहिलास्वभावंसंस्मृत्येत्यन्वयः॥ ८५॥ तुहवाणुक्खअणिहअं
दच्छिमिदहकंठमुहणिहाअत्तिकअा॥ महभाअधेअवलिआविवराहुत्तामणोरहापल्हत्था॥ तववाणोत्खातनिहतंद्र
क्ष्यामिदशकंठमुखनिघातंइतिकृताः॥ ममभागधेयवलिताविपराङ्मुखामनोरथाःपर्यस्ताः॥ तववाणोत्खातमुखंडि
तंअतएवनिहतंनिपातितंदशकंठस्यमुखनिघातंद्रक्ष्यामीतिस्त्वाकृताममनोरथाभागधेयेनदूरदृष्टेनवलिताःप्र
तिहताअतएवविपराङ्मुखाविपरीताःसन्तःपर्यस्ताविशीर्णारामशरच्छिन्नंरावणशिरोद्रष्टव्यमेवंरूपतायांरावणशर

लूनंरामशिरोदृष्टमतोवैपरीत्यमितिभावः॥ ८६॥ जंनणुअंमिविविरहेपेमाबंधेनसंकइजणस्सजणो॥तंजाअणवरं
इमपेछ्न्तीएअतारिसमकफलं॥ यत्तनुकेपिविरहेप्रेमाबंधेनशकतेजनस्यजनः॥तज्जातंकेवलमिदंपश्यंत्याश्वता
दृशंममफलं॥ जनःअलेपिविरहेप्रेमाबंधेनस्नेहवशेनजनस्ययतशकतेनत्तादृशंफलंइदंशिरःपश्यस्याःकेवलं
मेमैवजातंतथाचविश्लेषेणादर्शनाज्जनोजनस्यमरणमाशंकतेतदाशंकामात्रंममतुलूनरामशिरोदर्शनेनप्रत्यक्षमेव
तज्जातमितिभावः॥ ८७॥अथसीतांप्रतिसमाश्वासनपरंत्रिजटावाक्यंप्रस्तौति॥तोविलविउणिप्फंदंगलत्तहिअअ
परिसुणलोअणजुअलं॥ महुरंआसासत्तीहथुणामिअमुहीभणइएणंतिअडा॥ततोविलापितनिस्पंदागलद्धृदयप
रिशून्यलोचनयुगलां॥मधुरंआश्वासयंतीहस्तोन्नामितमुखीभणत्येणांत्रिजटा॥ ततस्तत्परिदेवनोत्तरंहस्तेनोन्ना
मितंमुखंययासीतायाइत्यर्थादेवंभूतात्रिजटामधुरंप्रियंयथास्यादेवमाश्वासयंतीसतीएनांसीतांभणतिकिंभूतांविलपि
तेननिस्पंदाएवस्थानात्भ्रश्यताहृदयेनपरिशून्यंविषयाग्राहकंलोचनयुगलंयस्यास्तां॥ ८८॥अथद्वादशभिस्त्रिज
टावाक्यस्वरूपमाह॥अवरिगलिआविसाओअखंडिआमुद्धआणपेछ्इपेम्मं॥मूढोयुवइसहाओतिमिराहिंविदिण
अरस्सचित्तेइभयं॥अपरिगलितोविषादोऽखंडितामुग्धतानप्रक्षते प्रेममूढोयुवतीस्वभावस्तिमिरादपिदिनकरस्यचिंत
यतिभयं॥अपरिगलितःपूर्णोविषादःअक्षुण्णामुग्धताप्रेमचत्रयमपिनप्रेक्षतेवस्तुविचारक्षमंनभवतीत्यर्थः॥एतानियथात
थायुवतीस्वभावोपिमूढेनपश्यतिविचारक्षमोनेत्यर्थः यतस्तिरादपनाश्यान्नाशकस्यापिदिनकरस्यभयंचिन्तयतितथाच
विषादादिसत्वंविचारविरोधीतितच्चतुष्टयवतीभवतीतिमिरादिवरावणाद्दिनकरस्येवरामस्यभयंचिन्तयतिशंकतेइ
दंतुशंकास्पदमपिनेतिभावः केचित्तुपूर्वार्द्धंपूर्ववद्व्याख्यायविषादादिवस्तुत्रयस्वरूपोयुवतीस्वभावोमूढःअज्ञोयत
स्तिमिरादपीत्यादिव्याख्यानमाहुः॥अपरिगणिओइतिपाठअपरिगणितःअपंडिआइत्तिपाठेअपंडिताप्रज्ञाशून्येत्य
र्थः॥ ८९॥तिहुअणमूलाहारंविसंढमहिंदपडिमुक्कवूढाणधुरं॥जाणंतीकीसतुमंतुलेसिसेसपुरिसाणुमाणेणपइं॥
त्रिभुवनमूलाधारंविह्वलमहेंद्रप्रतिमुक्तव्यूढरणधुरं॥जानतीकिमितित्वंतुलयसिशेषपुरुषानुमानेनपतिं॥हेजान ३९३
किपतिंरामंएतादृशंजानतीत्वंशेषपुरुषाणांप्राकृतजनानामनुमानेनमनुष्यत्वादिसाधर्म्येणकिंतुलयसिसदृशीकरो

षिकीदृशंत्रिभुवनानांमूलस्यकारणस्याधारमाश्रयंकारणमित्यर्थस्तेनजगत्स्रष्टारंतथाहिरण्याक्षतःपराजयाद्विकले
नमहेंद्रेणप्रतिमुक्तात्यक्ताऽथस्वयंविष्णुरूपेणव्यूढाधृतारणधुरायेनतंतथाचहिरण्याक्षवधात्त्रयीमार्गरक्षया
स्थितिकर्तारमित्युत्पत्तिस्थितिहेतुतयाप्रलयहेतुमपीतिनारायणरूपोयमितिसाधारणजनवत्कस्यापिवध्यइतिमाबुध्य
स्वेतिभावः॥ ९१॥अमिलिअसाअरसलिलाअणद्दिअमहिहराअणुब्बत्तअला॥रामस्सछिन्नपडिअंकडपत्तिअ
सिधरणीधरेइतिसिरं॥ अमिलितसागरसलिलाअनद्यस्थितमहीधराअनुद्वृत्ततला॥रामस्यछिन्नपतितंकथंप्रत्येषि
धरणीधारयतीतिशिरः॥अमिलितानिपरस्परमेकीभूतानिसागराणांसलिलानियत्रएवंअनद्याअविशीर्णास्थिताम
हीधरायत्रतथाऽनुद्वृत्तंउपरिनागतंतलमधोभागोयस्यास्तथाभूताधरणीछिन्नंसत्पतितंरामस्यशिरोधारयतीति
कथंप्रेषित्यत्तथाचयदिसत्यंरामशिरःपतनंस्यात्तदासागरमिलनादिरूपाप्रलयावस्थोत्पातावस्थावाभवेदित्येतदभा
वादिदमप्यसत्यंमन्यस्वेतिभावःवृयंतुयदिरामशिरःपतनंसत्यंस्यात्तदात्वन्मात्रत्वेनत्वमिवधरण्यपिव्याकुलाभवेदि
स्यादेवंनिकेंचित्तथाचरामजीवनमर्थापत्यानिर्णीतमित्यवधेयं॥ ९२॥मारुअमोडिअविडवमिअंककिरणपडिमास
मौलिअकमलं॥कहहोइरामवडणेइअणिछाअंदसाणणघरुज्जाणं॥मातुतमोटितविटपंमृगांककिरणप्रतिमर्षमु
कुलितकमलंकथंभवतिरामपतनेइतिनिःछायंदशाननगृहोद्यानं॥ रामपतनेसतिइत्यनेनप्रकारेणदशाननगृहो
द्यानं॥कथंनिःछायंकान्तिशून्यंभवतिप्रकारमाहकीदृशंमानुतेनमोटितंविटपयत्रएवंमृगांककिरणानांप्रतिमर्षात्संस्प
र्शात्मुकुलितंकमलंयत्रतथातथाचरामपतनंयदिसत्यंस्यात्तदामानुतेनशाखाभंगश्चंद्रेणकमलसंकोचःकर्तुंकिंशक्य
तेभवतिचतथातज्ज्ञानीहिरामप्रतापोजागरूकइतिभावः॥ ९३॥मारुअमफुसस्कवाहउअजंहेजणअसपरिअ
त्तमुहं॥संभरिअविरहदुःखंरोत्तवंदेपुणोपइस्सविअंके॥मारोदीःप्रोंछवाष्पंउपगुह्यअंसपरिवर्त्तमुखं॥संस्मृत्य
विरहदुःखंरुदितव्यंतेपुनःयत्पुरस्यांके॥त्वंमारोदीर्बाष्पंप्रोंछस्वस्यपत्युर्वाअंसेपरिवृत्ततिर्यग्भूतमुखंयन्नतद्यथास्या
देवंउपगुह्यालिंग्यपतिमित्यर्थात्विरहदुःखंचस्मृत्वातेत्वयापुनरपिपत्युरंकेरोदितव्याविश्लेषदुःखानंतरंमिलनेबंध

वोधंधुमालिंग्यरुदन्तीतित्तवापिपुनर्मलिनंरोदनंचस्यादित्यस्थानेनामंगलमाचरेतिभावः॥ ९४॥ अथइराग्रदहि
हितुमंतुहविरहोलुग्गपंडुरमुहच्छाअं॥ गअरोसमुहालोअं ओआरिअचावणिधुअंदासरहिं॥ अविराच्चद्रक्ष
सित्वंतवविरहाविरुग्लपांडुरमुखच्छायं॥ गतरोषस्फुखालोकंअवतारितचापनिर्वृतंदाशरथिं॥ अचिराच्चत्वंदाशर
थिंद्रक्ष्यसिकीदृशंतवविरहेणावसन्नादुर्बलाथचापांडुरमुखच्छायायस्यतंएवंरावणवधेनगतरोषत्वात्सुखदृश्यंत
थाथाकृतकार्यत्वादवतारितंनहस्तादपसारितेनचापेननिर्वृतंसुखितंव्यग्नताविरहादितिभावः॥ ९५॥ पत्तिहिअ
मरिसभरिअहरेणविअपत्थणिज्जकंठछेअं॥ फुडत्तंजइहोत्तंछिन्नपिकअगगहुगाअंरामसिरं॥ प्रतीहिअमर्षभ
रितंहरेणाप्यप्रार्थनीयकंठछेदं॥ स्फुटंयदिभवच्छिन्नमपिकचग्रहोद्धृतंरामशिरः॥ प्रतीहिइदंयदिछिन्नमपिरामशिरो
भवदभविष्यत्तदाकचग्रहेणोद्धृतमुत्थापितंसत्स्फुटिष्यंतिरस्कृतत्वादितिभावः कीदृक्अमर्षेणधृतपूर्णयतः
अन्यदप्यन्तःपूर्णंस्फुटत्येवेतिध्वनिः॥ एवंरावणोपिजीव्येनहरेणाप्यप्रार्थनीयावक्तुमप्यशक्यःकंठछेदोयस्यतदतोप्य
लीकमिदमितिभावः लड्‌र्थेशतृप्रार्थितःशत्रुसंरुद्धयाचितेभिहितेपिच॥ ९६॥ किंतिसमाससिअछेमुज्जुसिदहवअ
णदप्पभंगुप्फालं॥ पेच्छन्तीपमअवणंरामाणत्तिअरपवआविडदुमं॥ किमितिसमाश्वसितव्यंमुह्यसिदशवदनदर्पभंगो
त्फालं॥ पश्यतीप्रमदवनंरामाज्ञप्तिकरप्लवगाविद्धद्रुमं॥ दशवदनस्ययोदर्पभंगस्तदुत्फालंतत्सूचकंप्रमदावनंपश्य
न्तीत्वंसमाश्वसितव्येहर्षस्थानेकिमितिमुह्यसिरामशिरःशंकित्वाविषादसिदर्पभंगसूचकतामाहरामाज्ञप्तिकरेणहनूम
तआविद्धाःपातिताद्रुमायत्रतत्तथाचतदानीमेकेनेनप्लवगेनवाटिकाभंगलंकादाहाक्षमारणादिशूरकर्मणिप्रत्यूहमाच
रितमिदानींतादृशकोटिकोटिप्लवगसमेतयोरामलक्ष्मणयोःकावार्त्तेतिभावः॥ ९७॥ णिहउक्खअसहलोअंदरिअणि
साअरणिहाअलद्धपत्तं॥ कहतेनरवणंविविनाधरेइजस्सभुअणंभुअअवट्टंभं निहतोत्खातसुरलोकंदत्तनिशाचरनि
घातपर्यस्यमानंकथंतेनक्षणमपिविनाध्रियतेयस्यभुवनंभुजव्यवष्टंभं॥ भुजोव्यवष्टंभआश्रयोयस्यतत्भुजव्यवष्टंभं १९४
तथाचनिहतःसंनुत्खातःस्थानान्तरंप्रापितःसुरलोकोयत्रतदेवंदृष्टेननिशाचराणांनिघातेनपर्यस्यमानंव्याकुलीक्रिय
मानंभुवनंविनश्वरमपियस्यभुजव्यवष्टंभंयद्भुजावाश्रित्यविद्यमानंतेनरामेणविनाक्षणमपिकथंध्रियतेतिष्ठतिनह्याश्रये

×मलयोरन्तरालेनिर्मितस्सेतुपथोयेननथाभूतेनदनुप्रेरितान्यांदोलितानित्रिकूटस्यसुवेल×९

भग्नेसत्याश्रितंतिष्ठतीत्यर्थापत्त्यापिज्ञायतेरामोजीवतीतिभावः॥ ९८॥ तहतंसिगआमोहंमुच्छागअपडिअणीसह
विसंणागी॥ रक्खसमाएत्तिफुडंजाणत्ताजहइमंअहंपिविसणा॥ तथात्वमसिगतामोहंमूर्छागतपतितनिःसहविषणा
गीं॥ राक्षसमायेतिस्फुटंजानतीयथेदमहमपिविषणा॥ हेसीतेमूर्छांगतंमूर्छाप्राप्तंअतएवपतितंसन्निःसहंनिश्चेष्टंवि
षणमवसन्नंविसणंगीइतिपाठेनिषण्णअंगंयस्यास्तादृशीत्वंतथानिर्वचनीयंमोहंगतासियथाइयंराक्षसमायानतुशि
रइतिस्फुटंजानतीअहमपिविषणाशिरोदर्शनेनममविषादोनाभूत्किंतुत्वद्विषादोनसत्यमेवेतत्स्यादितिभ्रान्त्याविषादो
जातइतिभावः॥ ९९॥ मिलिअणिसाअरपुरओसुवेलमलअन्तरालणिम्मविअवहे॥ पेल्लिअतिज्जडसिहरेअज्जवि
किंतुज्जुराहवेअग्गहणं॥ मिलितनिशाचरपुरतःसुवेलमलयान्तरालनिर्मितपथे॥ प्रेरितत्रिकूटशिखरेअद्यापिकिं
तवराघवेअग्रहणं॥ मिलितानांबिभीषणादीनांशत्रुसमागमादेकीभूतानामिंद्रजित्प्रभृतीनांवानिशाचराणांपुरतःसुवे
लस्यशिखराणियेनतादृशीराघवेअद्यापिनव्यापारप्रत्यक्षानंतरमपियद्वानिशाचरैरप्रतिरोधेपिकिंप्रश्नेविस्मयेवा
तवअग्रहणमनादरःयत्तस्मिन्नर्थेवंसंभावयसीतिभावः॥ ग्रहणंयत्रयमिच्छंतिज्ञानमादानमादर॥ १००॥ मलिआम
लअणिअंग्वाथलेवचंकम्मिअमहोअहिसलिलेवुत्थंसुवेलेसिहरेअज्जविकिंतुज्जुराहवेअग्गहणं॥ मृदितामलय
नितंवास्थलइवचंक्रमितंमहोदधिसलिले॥ व्युषितंसुवेलशिखरेअद्यापिकिंतवराघवेअग्रहणं॥ येनकपिद्वाराम
लयनितंबामर्दिताःस्थलेयथासंचारःक्रियतेतथामहोदधिसलिलेपिकृतःसेतुकृत्वेत्यर्थात्किमपरंसुवेलशिखरेव्युषि
तंअद्यापिकिंतत्रराघवेतवअग्रहणंतथाचत्वमतिमूढापुनरपिमेवंशंकिष्यइतिभावःचिवुकं॥ १०१॥ अथसीतायाः
त्रिजटाहृदिपतनमाह॥ ततोअगहिओवएसागउणिअत्तजीविअमुहिज्जतीतिआइआजणअतणआसहिसद्भा
वसरिसंउरम्मिणिसन्ना॥ ततोगृहीतोपदेशागतापनिवर्तमानजीवितमुह्यन्ती॥ त्रिजटायाजनकतनयासखीसद्भावस
दृशंउरसिनिषण्णा॥ ततस्त्रिजटावचनोत्तरंजनकतनयासख्यायःसद्भावःसौहार्दितत्सदृशंतद्योग्यंयथास्यादेवंत्रिजटा
याउरसिनिषण्णाइद्दृशविपत्तौयएवानुकूलंवक्तितत्रैवांगसमर्पणंक्रियतइतिभावःकिंभूताअगृहीतइदमित्थमेवेत्यस्वी
कृतस्त्रिजटायाउपदेशोययाःतएवप्रथमंव्यतिरेकनिश्चयाद्गतेनपश्चात्त्रिजटावाचासंदेहादपनिवर्तमानेनपराव

३५

सें० बं० टी० त्यागतेनजीवितेनमुह्यंतीप्राणसंबंधेसतिमोहोत्कर्षादितिभावः केचित्तुपुनर्मोहात्पतंतीतदुपरिनिषण्णेतिभावमाहुः॥३॥॥
१९९ अथदवस्थायांसीतायारोदनमाह॥ लोअणवइअरलग्गंवसणिसण्णाअतीअतिअडावेछे॥ गलिअंकओलपेल्लुण
पीडिज्जत्तालुइग्गअंबाह्रजलं॥ लोचनव्यतिकरलग्नंतिर्यङ्निषण्णायाःतस्याःत्रिजटवक्षसि॥ गलितंकपोलप्रेरण
पीड्यमानालकोद्गतंबाष्पजलं॥ त्रिजटायावक्षसितिर्यङ्निषण्णायास्तस्याबाष्पजलंलोचनयोर्व्यतिकरेणसंपर्केणलग्न
सत्वक्षसीत्यर्थात्गलितंत्रिजटावक्षसिसांमुख्येनैवपतितत्वाल्लोचनसंबंधादश्रुसंबंधइतिइतिभावःकिंभूतंकपोल
नयत्प्रेरणंयत्रएतेनपीड्यमानालकेभ्यउद्गतंनिःसृतंतिर्यङ्निषण्णत्वादश्रुणोरैक्यमितिभावः॥३॥पुनश्चैतन्यसमतिज
ल्पनमाह॥ तोजंपिउंपाउत्तापुणोविअत्थेक्कउच्छिअसमूससिआ॥ उरघोनिरेवणीमुहथणलग्गुब्बुहमहिरआजण
असत्ता॥ ततोजल्पितुंप्रवृत्तापुनरप्यकस्मादुत्थितसमुच्छ्वसिता॥ उरोघूर्णनशीलवेणीमुखस्तनलग्नोद्धृष्टमहीरजाजन
कसुता॥ ततोश्रुत्यागानंतरंजनकसुताजल्पितुंप्रवृत्ताअकस्मादुत्थितंसमुच्छ्वसितंप्राणवायुर्यस्यासापुनरागताप्राणास
५तीत्यर्थःत्रिजटावक्षस्थलादुत्थितासतीसमुच्छ्वसिताकृतोच्छ्वासाइतिवापुनःकिंभूताउरसिघूर्णमानेनवेणीमुखेनोद्धृष्टमु
त्प्रोञ्छितंस्तनलग्नंमहीरजोयस्याः॥४॥अथचतुर्भिःपुनर्जल्पनस्वरूपमाह॥ साहसुजच्चिअपढमंदइणअहंइमंमहि
म्मिणिसण्णा॥ सच्चिअमोहुम्मिल्लायेच्छामिअणंपुणोधरेमिअजीअं॥ साधियैवप्रथमंदृष्ट्वाहंइदंमह्यांनिषण्णा॥ सैवमोहो
न्मीलितापश्यामिचैतत्पुनर्धारयामिवजीवं॥ हेत्रिजटेशाधिकथयइदंरामशिरोदृष्ट्वाप्रथमंमयैवाहमह्यांनिषण्णामूर्छितास्मी
त्यर्थः॥ सैवाहंमोहसत्यकन्मीलितापुनःप्राप्तचैतन्यासतीएतत्शिरःपश्यामिन्वजीवंधारयामिचतत्किंययारामशिरोदृष्टंसा
मान्यायाचमूर्छितासाप्यन्याइदानीमहमप्यन्येतिइदृगवस्थयारामशिरोदृष्टंसाजीवितुंनयोग्येतिधिग्मांनिष्ठुरहृदयांया
प्रथमतएवनमृतास्मीतिभावः॥५॥सहिअआरक्खसवसंमह॥ दिट्ठंतुहणाहएरिसंअवसाणं॥ अज्जविवअणिज्जहअंधूमा
इच्चिअणपज्जलइमेहिअअं॥ सोढाराक्षसतिर्दृष्टंतवनाथईदृशमवसानं॥ अद्यापिवचनीयहतंधूमायतएवनप्रज्वलति
मेहृदयं॥ हेनाथमयाअसह्यापिराक्षसवसतिस्त्वद्दर्शनप्रत्याशयासोढा॥ तत्रापितवईदृशमयोग्यमवसानंचदृष्टंएतत्तो
प्यशक्यमितिभावःअद्यपिएतद्दर्शनोत्तरमपिवचनीयेनवाच्यतयाहतंममहृदयंधूमायतएवसंतापेनमोहांधकारावि १९९

ष्टंसदुःखमेवानुभवतिनतुप्रज्वलतितथाचज्वलनपूर्वकालीनाधूमायमानावस्थेतिज्वलिष्यत्यवशंकितुंराक्षसवासाग
मनकालएवज्वलितुंयोग्यमवसानदर्शनेतिनज्वलतीतिलोकानामपवादेनपरास्तमित्यहमधन्येतिभावः॥६॥पुरिस
सरिसंतुहइमंरक्खससरिसंकअंणिसाअरवइणा॥ कहतावचिंतिअसुलहंमहिलासरिसंणसंपडइमेमरणं॥ पुरुष
सदृशंतवेदंराक्षससदृशंकृतंनिशाचरपतिनाकथंतावच्चिंतितसुलभंमहिलासदृशंनसंपद्यतेमेमरणं॥ तवइदंअवसा
नरूपंकर्मपुरुषाणांसदृशंपुंसांदारहरणेसतियुद्धादिनातदुद्धारः॥ तर्कव्यःसंमुखेवामर्तव्यमितियोग्यत्वमित्यर्थःनिशा
चरपतिनाचराक्षसानांसदृशंक्रूरंकर्मकृतंचोरिकयाममापहरणंकृतंभवानपिहत्वाममोपदर्शितस्तदपित्तद्योग्यमेवेति
कथंतावन्महिलानांसदृशंचिंतितेनेच्छयासुलभंमेमरणंनसंपद्यतेभर्तुरनुमरणंस्त्रीभिःक्रियतइतितद्योग्यतथाचय
स्ययद्योग्यंतेनतत्कृतंमयातुनकृतमित्यहमविश्वसनीयेतिभावः॥७॥पवणसुअसिट्ठतुरिअंइहएन्तस्सअवलंबिउम
हजीअं॥ विरहलहुअंपिराहवमएत्तिअंतोअजीविअंतुज्झहिअं॥ पवनसुतसिष्टत्वरितंइहागच्छतोऽवलंबितुममजी
वं॥ विरहलघुकमपिराघवमयाजीवत्याजीवितंतवहृतं॥ सीताजीवितीतिपवनसुतेशिष्टेकथितेसतित्वरितंयथाभव
त्येवंविरहेणलघुकमपिगत्वरमपिममजीवमवलंबितुंरक्षितुमिहागच्छतस्तवजीवितंजीवंत्यामयाहृतं॥८॥अथपुनरस्या
मोहमाह॥ अलुधंअआरिअमुहीसमुहागअकंठभमिअवेणीवधा मोहपडिवण्णहिअआदरजंपिअणीसहपुणोवि
णिसण्णा॥ अलकांधकारितमुखीसंमुखागतकंठभ्रमितवेणीबधा॥ मोहप्रतिपन्नहृदयादरजल्पितनिःसहपुनरपिनिषण्णा
॥ अलकैर्विकीर्णतयाश्यामत्वेनांधकारीकृतंमुखंयस्याःतथासमुखागतःसन्कंठेभ्रमितोवेणीबंधोयस्याइतस्ततःसंचा
रात्सासीतामोहेनप्रतिपन्नमाक्रांतंहृदयंयस्यास्तथासतीईषज्जल्पितेनापिनिःसहंकंठादिशोषात्सामर्थ्यंयथास्यात्तथानिष
ण्णापुनरपिमत्यानिपतितेत्यर्थः निःसंज्ञावाआसीदित्यर्थः॥९॥भूमीपतनमेवस्फुटयति॥ तोफुडिअवेणिबंधणभंगुग्ग
अविसमकेसपज्झत्थरणेपजिआरामोरत्थलसअणणिरासहिअआमहिअलुछंगे॥ ततःस्फुटितवेणीबंधनभंगोद्गत
विषमकेशपर्यस्तरणे॥ पतितारामोरस्थलशयननिराशहृदयामहीतलोत्संगे॥ ततःकिंचिद्विलापानंतरंरामस्यउर
स्थलेयत्शयनंतत्रनिराशंहृदयंयस्यास्तथासतीसीतामहीतलस्योत्संगेपतितांएवंविधविपत्तौपुत्र्यामातुःक्रोडए

DR. BHAU DAJI MEMORIAL

वपतंतीतिभावः किंभूतेस्फुटितस्यशिथिलत्वात्स्थानभ्रष्टस्यवेण्याबंधनस्यबंधनपाशस्यभंगेनापगमेनउद्गताःप्रसृ
ताःअतएवविषमान्यस्तायंकेशास्तएवपर्य्यस्तरणंयत्रतत्रकेशानांतृणादिवदस्तरणीभावेनबाहुल्यमुक्तं॥१०॥पु
नरपिशिरोदर्शनानुकूलव्यापारमाह॥ तीअणवपल्लवेणवपहराअंवविहलेणहत्थेनमुहं॥परिमज्जिउणच्चइअ
एक्ककवोलमिलिआलअंकहविक्कअं॥तयानवपल्लवेनेवप्रहारात्ताम्रविव्हलेनहस्तेनमुखंपरिमार्ष्टुंनशकितंएक
कपोलमिलितालकंकथमपिकृतंनवपल्लवेनेववक्षसःप्रहारादाताम्रेणातएवविव्हलेनमार्जनाद्यसमर्थेनहस्तेनत
यासीतयामुखंपरिमार्ष्टुंनशकितंकिंतुएकस्मिन्कपोलेमिलिताःसंवरणादर्त्तुलीकृताअलकायत्रतादृशंकृतंतथाच
मुखमार्जनाभावेपिमुखोपरिविकीर्णत्वेनशिरोदर्शनप्रतिबंधकत्वादलकानांसंवरणंक्रियमाणमेककपोलमेवनिष्प्र
नंकरस्यविव्हलत्वाद्दर्शनस्यतावताप्युपपत्तेरपरकपोलेतुविकीर्णाएवतेस्थिताइत्यसामर्थ्यमुक्तं॥११॥अथाश्रुमार्जन
माह॥ ॥समुहंमिलिअंपिजाहेतूअंवाहविहलाणगेण्हइदिट्ठीताहेकहकहविकअउहअकतुप्पुसिअलोअणंतीअ
मुहं॥संमुखमिलितमपियदारूपंबाष्पविकलानगृह्णातिदृष्टिः॥तदाकथंकथमपिकृतउभयकरोत्प्रोंछितलोचनंतया
मुखं॥बाष्पैरश्रुभिर्विव्हलाछन्नादृष्टिस्तस्याइत्यर्थात्संमुखमिलितमपिरूपंघटपटादिस्वरूपंयदानगृह्णातिनविषयी
करोतितदातयासीतयामुखंकथंकथमपिवक्षःप्रहारजन्यवैकल्येसत्यपिउभयकराभ्यांप्रोंछितेमार्जितेअश्रुणीलोचनेयत्र
यत्रतथाभूतंकृतंशिरोदर्शनोत्कंठवशादितिभावः॥१२॥अथपुनःशिरोदर्शनमाह॥तोसाभमन्तमारुअविसमपइण्णाल
उप्पुसिअवाहजला॥पेच्छइराहववअणंणिसाअरोच्छुणमहिअलपहोलन्तं॥ततःसाभ्रमन्मारुतविषमप्रकीर्णालकोत्
प्रोंछितबाष्पजला॥प्रेक्षतेराघववदनंनिशाचरावस्कुणमहीतलप्रघूर्णमानं॥ततोश्रुमार्जनान्तरंसाराघववदनंप
श्यतिकीदृशीभ्रमताममारुतेनवायुनास्वाससरूपेणवाविषमंप्रकीर्णैरितस्ततश्चालितेरलकैरुत्प्रोंछितानिमार्जितानिवा
ष्पजलानियस्याःसावदनंकीदृक्निशाचरैरवक्षणंकृतंसन्महीतलेप्रघूर्णमानंप्रलुठत्॥१३॥अथपुनरपिरोदनमा १९६
ह॥लक्खिवज्जन्तविसाआआभहिउम्मिल्लणिच्चलट्ठिअणअणारामसिरवद्धवेलक्खाधुव्वइवाहेणसेणरुंभइदिट्ठील
क्ष्यमाणविषादाऽभ्यधिकोन्मीलनिश्चलस्थितनयना॥रामशिरोबद्धलक्षाधाव्यतेबाष्पेणास्यानरुध्यतेदृष्टिः॥रामशि

रोबद्धलक्षाधाव्यतेबाष्पेणास्यानरुध्यतेदृष्टिः॥रामशिरसिरामशिरोरूपेवाबद्धमनुबद्धंलक्ष्यंजयातादृशीअस्यादृष्टि
बाष्पेणधाव्यतेक्षाल्यतेनतुरुध्यतेभ्रियतेवाष्पस्याविश्रान्तपतनादालोकनाप्रतीघातादितिभावःकिंभूतालक्ष्यमाणो
विषादोयस्याःएवंअभ्यधिकमुन्मीलितेतत्तत्वजिज्ञासयासम्यग्विस्तारितेअथचविस्मयान्निश्चयैलस्थितेनयनेगोलके
यस्यादृष्टिरेकैवदर्शनंवा॥१४॥अथतस्यादैन्यमाह॥तोत्तदघूणपुणोमरणेक्करसाइवाहनीसारच्छं॥आऊच्छसमन्ति
कअंतिअडागअलोअणाइदीणविहसिअं॥ततस्तदृष्ट्वामरणैकरसयाबाष्पनिस्साराक्षं॥अपृच्छस्वमामितिकृतं
त्रिजटागतलोचनयादीनविहसितं॥ततःपुनरश्रुमार्जनानन्तरंपुनस्तच्छिरोदृष्ट्वात्रिजटायांगतेउन्मुखेलोचनेयस्या
स्तथाभूतयातयामांआपृच्छस्वसेवदमरनाकृतोद्यमांमामनुजानीहीतिदीनशोच्यंसकरुणंवाहास्यंकृतंबाष्पेणगलि
तत्वान्निःसारेअक्षिणीयत्रतद्यथास्यात्देवंकिंभूतयामरणएवएकस्मिन्नेकोवारसोयस्यास्तादृश्यातादृशीतयाचराक्षसीम
ध्येमरणमपिदैन्यमृत्वाहठादेवरामोदृष्टव्यइतिहास्याद्यहारूनशिरोदर्शनोत्तरमियत्कालमेवजीवितास्मीत्यात्मनिंदा
वदशाद्दीनविहसितमितिभावः॥१५॥अथत्रिजटांप्रत्यस्यावचनमाह॥संहिअभिरामविरहेदारुणहिअअप्पडिच्छिएवे
हव्वे॥सहसागअणेहलहुअंमहणिल्लज्जंमरणंत्तिपरुणा॥सोहेरामविरहेदारुणहृदयप्रतीष्टेवैधव्ये॥सहस्वगतस्नेह
लघुकंममनिर्लज्जमरणमितिरुदिता॥हेत्रिजटेप्रथमंरामविरहेसोढेसम्प्रत्यनन्तरंदारुणहृदयेनप्रतीष्टेअंगीकृतेवैधव्ये
चसतिगतोयःस्नेहस्तेनलघुकमनादरनीयंयत्रविरहएवमर्तुमुचितंतत्रवैधव्यमितिसादवतीत्यहानिःस्नेहादारुणा॥
वेतिदुर्वादविषयत्वादितिभावः॥अतएवनिर्लज्जमरणमिदंममसहस्वक्षमस्वनोपहासविषयीकुर्याइत्युक्त्वासीतापुनः
प्ररुदितामममायेवमनक्षरंप्रसक्तमितिभावः॥१६॥पुनर्विलापमाह॥सव्वस्सअएसगईणउणोमाणुसाआणइमम
वसाणं॥अनुसरिसन्तिभणंतीआहच्चूणपडिआथिरत्थणअलसं॥सर्वस्यचैषागतिर्नपुनर्मानोन्नतानामिदमव
सानं॥अनुसदृशमितिभणन्तीआहत्यपतितास्थिरस्तनकलशं॥सर्वस्यएषागतिरुत्पन्नस्तरंविनाशरूपेत्यर्थःमानोन्न
तानांपुनरिदमवसानमेवंरूपेणमरणंनअनुसदृशंनयोग्यमितिभणन्तिसीतास्तनकलशंआहत्यकराभ्यांप्रहत्यथिरंपति
ताभूमावित्यर्थात्यद्वासर्वस्यस्त्रीजनस्यएषावैधव्यरूपागतिर्मानोन्नतानांपुनरिदमवसानंनयोग्यमित्यन्वयस्तथा

चप्रियस्यमरणेनस्वस्यवैधव्येनवातथानदुःखंयथाभर्त्तुरसदृशमित्युनेतिभावः एतेनमरणनिश्चयःसूचितः ॥१७॥
आत्मन्यवज्ञामाह ॥ तहजीवललज्जिआएविलवन्तीअविविसाअणीसहमउअंदासरहित्तिफलन्तेपि ॥ज्जत्तिसिआइण
चइअंवाहत्तुं॥ तथाजीवल्लज्जितयाविरुपत्यापिविषादनिःसहमृदुकं॥ दाशरथिरितिप्रलइतप्रियइतिसीतयानाश
कितंव्याहर्त्तुं॥तथाल्लनशिरोदर्शनानांतरमपियाजीवोजीवितंतेनलज्जितयासीतयाविषादेननिःसहमसामर्थ्यंअतएवमृ
दुकंलघुलघुयथास्यादेवंविलपत्यापिसत्यारामसंबोधनेदाशरथइतिप्रभूताक्षरमपिप्रलइतंप्रियइत्यल्पाक्षरमपिव्या
हर्त्तुंनशाकितंनिःसहप्रलापेसुखंवाद्यवर्णोच्चारणस्ययोग्यत्वेपिल्लनशिरोदर्शनमात्रेणामृतायाममकुतःप्रियत्वमस्मिन्नि
तिभावः स्नेहमरणनिबंधनमरणशालित्वेनदशरथस्यांचितमपत्यमसीतिविशिष्यतंनामग्रहणंतात्पर्यं॥१८॥अथप्रला
पनिवृत्तिमाह॥अणुसोइउणइच्छइणदेइ अंगम्मिसापरम्मिवपहर॥ वाहमुअइणरुंभइमरिअलद्धपच्चअंसेहिअअं
अनुशोचितुंनेच्छतिनददात्यंगेसापरस्मिन्निवप्रहार॥बाष्पंमुंचतिनरुणद्धिमर्तव्येलब्धप्रत्ययमस्याहृदयं सासीताअनु
शोचनंकर्तुंनेच्छतिकठशोषात्परस्मिन्निवशत्राविव अंगप्रहारंनददातिनिःसहत्वात्॥ बाष्पंनमुंचति किंतुरुणद्धिबहुरो
दनदुःस्थचक्षुःपीडाकरत्वात्शिरोदर्शनविलोपकत्वाच्चतर्हिमरणयस्यन्यूनत्वमतोहेतुमाह॥ अस्याहृदयंमनोमर्तव्येलब्ध
प्रत्ययंयतःलब्धःप्रत्ययोनिश्चयोयेनतज्जातनिश्चयमित्यर्थस्तथाचमरणरूपसर्वाधिकव्यापारंदत्तभरत्वादितिभावः
॥१९॥अथत्रिजटायासांत्वनवचनंप्रस्तौति॥तोतंमरणनिमित्तेअणिअत्तंतहिअअंपअत्तावत्तुंतिअडाधुअगाकर
अलुदपडिअपडिछिअंगविसमोअणम्॥ ततस्तांमरणनिमित्तेअनिवर्त्तमानहृदयांप्रवृत्तावक्तुं॥त्रिजटाधुताग्रकर
तलदरपतितप्रतीष्टांगविषमावनता॥ततःसीतायाअनुसोचनादिनिवृत्यनन्तरंत्रिजटातांसीतांवक्तुंप्रवृत्ताकीदृशींम
रणनिमित्तेअनिवर्त्तमानंहृदयंयस्याःकृतमरणनिश्चयांएवंधूताग्राभ्याकरतलाभ्यांकिंचित्पतितंसत्प्रतीष्टमवलंबितं
यदंगंतेनविषमं॥व्यस्तंयथास्यात्तथाऽवनतांभूमिपतनादिरूपमरणव्यापाराविष्टसीतादेहस्ययथायथातत्प्रतिबंधक
त्रिजटाकरतलाभ्यांधारणंतथातथातत्याजनायतदंगभंग्यातदवनतत्वमतएवत्रिजटाकरतलयोरपिसीतांगभंग्या
धुताग्रत्वमितिभावः॥२०॥त्रिजटावचनस्वरूपमाह॥जाणइसिणेहभणिअंमारअणिअरित्तिमंजुउच्छसवअणं॥उ १९७

ज्जाणम्मिवणम्मिअजंसुरहितंलआणंगेण्हइकुसुमं॥ जानकिस्नेहभणितंमारजनिचरीतिमेजुगुप्सस्ववचनं॥उद्यानेवने
चयत्सुरभितल्लतानांगृह्यतेकुसुमं॥हेजानकिस्नेहेनभणितमुक्तमरिअमितिपाठेभृतपूर्णमेववचनंअहरजनिचरी
तिमाजुगुप्सस्वमागर्हयअर्थान्तरन्यासमाहउद्यानेगृहारामेवनेऽरण्येचलतानांयत्कुसुमंसुरभितदेवगृह्यतेनोद्यान
मितिवदरीविभीतकादीनांगृह्यतेनवावनमितिसुगंधिपाटलादीनांत्यजतेवनम्मिवेतिपाठेउद्यानेवनेवावदरादीनामुपा
दानंबकुलादीनांचानुपादानमेवंनकिंतुयत्रयत्सुरभितत्रतदुपादीयतेतदन्यत्त्यजतइतिग्रहणपरिहारयोनुद्यानवना
दित्वमुपाधिर्नप्रयोजकः किंतुसौरभादिरितिवस्त्रकृतेपिवचनस्यप्रियत्वंविचार्यतांराक्षसीत्वमप्रयोजकमितिभावः॥२१॥
अथत्रिजटास्वोक्तनिरुपाधित्वंव्यंजयति॥किमुजीअन्तीअतुमेजइअलिअंसहिणहोज्जराहवमरणं॥अणहेउणरहुणा
हेतुहमेमरणविहुरंकिलम्महिइअअं॥किमुजीवत्यात्वयायद्यलीकंसखिनभवेद्राघवमरणं॥अनघेपुनारघुनाथेतव
मेमस्णाविधुरंक्लाम्यतिहृदयं॥हेसखिराघवमरणंयद्यलीकंमिथ्यानभवेत्तदात्वयाजीवत्याकिमुकिंप्रयोजनमित्यर्थस्तर्हि
तवमरणमेवश्रेष्ठमितिभावःयदायद्येतन्नालीकंतदात्वयाजीवत्याकिमुहोज्जकिंभूयत्तइत्यर्थस्तदात्वयापिमृतमेवस्याद्व
वयोरेकजीवत्वात्तथाचत्वज्जीवितमेवतज्जीवनेप्रमाणमितिभावः॥रघुनाथेपुनरनघेऽक्षतेजीवतिवातवमरणेनविधुरं
दुःखितंममहृदयंयतस्ततःसंप्रतिक्लाम्यतितथाचरामोजीवत्येवत्वंवृथानात्मानंव्यापादयेतिभावः॥२२॥पुनर्निरुपाधि
त्वमेवद्रढयति॥चिन्तेउंपिणलब्भइजहसंभावेसितहइमंजइहोन्तं॥तादाणिकिंजणम्मिवतुमम्मिसंठावणामहअनुरूवा
चिंतयितुमपिनलभ्यतेयथासंभावयसितथाइदंभवत्॥तदाइदानींकिंजनइवत्वयिसंस्थापनाममानुरूपाहेसीतेयथात्वं
संभावयसितर्केणजानासिराममरणमित्यर्थात्तथाचिंतयितुमप्याहार्योपस्थितिविषयाकर्तुमपिनलभ्यतेनयुज्यतेअथत
थसत्यमेवेदंयदिभवदभविष्यत्॥स्त्रइऽर्थेसत्यतदानींरामंविनाजनइवसाधारणजनइवत्वयिममसंस्थापनाजीवयितुंव्यवसा
यःसमाश्वासनाकिंअनुरूपायोग्याऽपितुनेत्यर्थस्तथाचरामादरनिवेनस्त्वथादरःप्रस्कृतपुत्यनुमरणरूपधर्मप्रतिषेधःयापज
नकइत्यतोपिजानीहिरामोजीवतीतिभावः॥२३॥पुनरपिसोपपत्तिमर्थयन्तिमाह॥असेलानिसाअरपुरीवरपरिवाडि
समणीहरिअरुणअवा॥एक्केणअवा।एक्केणकआकइणाकहहोइहिअणहररेक्वसंरहुवडणं॥सकलानिशाचरपुरी

गृहपरिपाटिसमनिह्रदितनुदितरवा॥ एकेनकृताकपिनाकथंभविष्यत्यनघराक्षसंरघुपतिनं॥सकलासंपूर्णाकलासहि
तामनोरवानिशाचरपुरिलकागृहपरिपर्य्यायेसमंयुगपन्निह्रदितःशब्दान्तरोत्यादीरुदितरवोराक्षसानामित्यर्थाद्यस्यां
तादृशीयद्यागृहपरिपाट्यासमस्तुल्योनिह्रदितोयथादाहजन्यशब्दद्वारागृहपरिपाटिःशब्दान्तरोत्पादिकातथारुदितरवोपि
यस्यामित्यर्थः॥गृहदाहशब्दराक्षसरोदनशब्दयोस्तुल्यवदुत्पत्तेरेवभूताएकेनासहायेनअनिर्द्धारितविशेषेणसाधारणेनवा
हनूमताकृताअतःकथंअद्यःक्षतादितद्रहिताराक्षसाअपिनिहतास्फुरतस्तदभावेतत्कथंतर्कयसीतिभावः॥२४॥अथ
राक्षसप्रलयंसिद्धान्तयति॥णत्थिणिहम्मइरामोअइराहोहिइअरक्खसंत्तेल्लोक्कं॥दिट्ठंतिभणामिफुडंपत्तिअकस्सविपिअ॰
कुलस्सविणासोनास्तिनिहन्यतेरामःअचिराद्भविष्यत्पराक्षसंत्रैलोक्यं॥दृष्टमितिभणामिस्फुटंप्रतीहिकस्यापिप्रियःकुलस्य
विनाशः॥निहन्यतेरामइतिपक्षोनास्तिनारायणरूपत्वात्यद्वासनास्तियेननिहन्यतेरामःनेतिपाठेसनास्तियन्नहन्तिरामःनकं
वलमेतावदेवकिंविरात्रैलोक्यंराक्षसशून्यंभविष्यतिइदंमयास्फुटंव्यक्तंदृष्टमितिभणामियोगेनपुराणादिनावेत्यर्थः यद्वादृष्टं
ज्ञातमितिस्फुटंभणामिरावणादपिनबिभेमीत्यर्थःविपक्षेबाधकमाह॥प्रतीहिकस्यापिकुलस्यविनाशःप्रियःकाक्काप्रियइत्यर्थ
स्तथाचकुलविनाशमलीकमभिधायपरसमाश्वासनकेनापिनक्रियतइतिमद्वचनमन्यथामाशंकिष्ठाइतिभावः॥२५॥अनिष्टा
पत्तिमुखेनशोकंत्याजयति॥उट्ठेसुमुअसुसोअंपुसएअंवाहमइलिअंत्थणवदं॥सुणसुसउणेणवट्टइसमराहिमुहेपडम्मि
अंसुणिवाअ॰ उत्तिष्ठमुंचशोकंप्रोंछबाष्पमलिनितंस्तनपृष्टं॥श्रृणुशकुनेनवर्त्ततेसमभिमुखपत्यावश्रुनिपातः॥उत्तिष्ठशोकं
मुंचबाष्पैरश्रुभिश्वासैर्वामलिनितंस्तनपृष्टं॥शृणुशकुनेनवर्त्ततेसमराभिमुखेपत्यावश्रुनिप्रोंछउपपत्तिमाहश्रृणुपत्यौसमरा
भिमुखेसत्यश्रुपातःशकुननिमित्तंनवर्त्ततेकिंत्वमंगलनिमित्तमितिभावः॥२६॥अथरामसत्तायामनुमानमाह॥मोत्तूणअर
हुणाहंलज्जागअसेअविंदुइज्जन्तमुहोकेणवअणेणकअ॰पाआरन्तरिअणित्थहोदहवअणे मुक्त्वारघुनाथंलज्जागतस्वेद
बिंदूयमानमुखःकेनवान्येनकृतःप्राकारान्तरितनिष्प्रभोदशवदनःचपुनःरघुनाथंमुक्त्वाकेनवान्येनदशवदनःकपिरुद्ध
त्वात्प्राकारमात्रेणान्तरितःसतनिष्प्रभकृतःतथाचरामेणैवकृतइत्यर्थः कीदृकअवरोधजन्ययालज्जयाआगतैस्वेदैविदूयमा
नंबिंदुभिःपूर्यमाणंमुखंयस्यसतथातथाचसन्निहितमृत्योर्मुखश्रीरन्यथाप्रतिपद्यतइत्यतोपिरावणमृत्युमनुमायरामजीवनेम ११८

नुमीयतामितिभावः यद्वासीताप्राप्तिव्यतिरेकनिश्चयात्निष्प्रभइत्यर्थस्तेनततोपितदनुमीयतामितिवा॥२७॥अथभाविनंराम
स्यानुरागव्यापारमभिधायसीतांशीतलयति॥अइराअदेरहुसुलंतणाअंतगाहत्थमउइअपम्हं॥मोछिहिवेवन्तंगुलिगुथंतु
क्खिवन्तविसमभाअंवेणीं॥अचिराच्चतेरघुसुतआर्द्रायमानाग्रहस्तमुकुलितपक्ष्माणंमोक्ष्यतिवेपमानांगुलिव्याकुलोत्क्षिप्त
विषमभागांवेणिं॥अचिराच्चरघुसुतस्तेवेणिंमोक्ष्यतिकिंभूताआर्द्रायमानाभ्यांत्वत्स्पर्शात्स्विद्यद्भ्यांहस्ताग्राभ्यांमुकुलितानि
स्वेदसंबंधात्संवृतानिपक्ष्माण्यसंयमनादुत्थितलोमाग्राणियस्यास्तांएवंभावादयादेववेपमानाभिरंगुलीभिरुत्क्षिप्ताःसमीकृ
ताविषमभागायस्याःप्रोषितभर्त्तासमागत्यप्राकृतंविरहिण्यावेणीबंधनंमोचयतीतिसमाचारः॥२८॥अथरावणस्यनिंदया
मरणध्रौव्यमाह॥विअलिअलज्जाबहुअंएअकरन्तस्सरहुवइम्मिधरन्तेण अतहदुःखामितुमेजहपरिवत्तंम्मिदहमुहस्सस
हावे विगलितलज्जालघुकंएतत्कुर्वतारघुपतौध्रियमाणेनचतथादूयेत्वयापथापरिवृत्तेदशमुखस्यस्वभावे॥अहंत्वयाहेतु
भूतयातथानदूयेयथादशमुखस्यस्वभावेपरिवृत्ते अन्यथाभूतेसतीत्यर्थःअन्यथाभावमेवाहकिंभूतस्यरघुपतौध्रियमाणेजी
वतिसतिविगलितायावंचनभूलिकालज्जातयालघुकमश्लाघनीयंएतन्मायामस्तकरूपछलंकुर्वतस्तथाचैवंविधत्वदुः
खेनापिममतथानदुःखंयथालोकनिंदितेकछलतदुस्यलज्जापरित्यागरूपप्रकृतिविपर्य्ययाभ्यांरावणस्यासन्नमृत्युज्ञाना
दितिभावः॥२९॥अथरामस्योत्कर्षेणपरानभिभाव्यत्वमाह॥वालिवहदिट्ठसारंवानगलत्थिअसमुद्ददिणत्थलवहं॥रोहिअ
लंकावलअंमालहुअंपेछराहवस्सभुअबलं॥वालिवधदृष्टसारंवाणगलहस्तितसमुद्रदत्तस्थलपथं॥रुद्धलंकावययंवैंल
यंमालघुकंपश्यराघवस्यभुजबलंहेजानकिराघवस्यभुजबलंमालघुकमल्पंपश्यजो॥नीहिकीदृकवालिनोवधोदृष्टसारंज्ञात
वालिवध्यरावणबाधकत्वरूपनिगर्वंअथबाणेनगलहस्तितःप्रेरितोयस्समुद्रस्तेनदत्तोरामायेत्यर्थात्स्थलरूपः पंथायस्मा
दयरोधितंलंकावलयंयेनतथाचरामेनैतत्संभाव्यमितिभावः॥३०॥अथशकुनदर्शनेनसत्यापयति॥दिट्ठासिमएसिविणे
ससिसूरालिहणसोहिउम्मुहपडिमा॥खंधुट्ठिअसुरगअकण्णालविहुअधवलंसुअंअदसद्धन्तां॥दृष्टासिमयास्वप्नेशशि
सूर्यालिहनशोभितोन्मुखप्रतिमा॥स्कंधोत्थितसुरगजकर्णतालविधुनधवलांशुकदर्शार्द्धान्ता॥हेसीतेत्वमयास्वप्नेदृष्टासि
कीदृशीशशिसूर्ययोरालिहनेनमिलनेनशोभिताउन्मुखीप्रतिमाआकृतिर्यस्याःसाएवंस्कंधेनोत्थितउन्नतस्कंधोयस्सुरग

जस्तत्कर्णनालेन विधृतो धवलांशुकस्य दशार्द्धचीनं यस्यास्तथा चैरावतस्कंधोपरि पार्श्वद्वयवर्त्तिचंद्रसूर्यौ श्वेतांबरावलंब
निमाहृद्देति पुष्यकोपरि रामलक्ष्मणसाहित्यं सीतायाः सूच्यमानरावणक्षयेन राज्यलक्ष्मीप्राप्तिं सूचयति तदुक्तं स्वप्नाध्या
ये आरोहणं गोहयकुंजराणामित्यादि ३१ ॥ पुनः स्वप्नेनैव रावणाशुभं स्फुटयति ॥ दिट्ठो अ मे दहमुहो दहमुह परिवाडिवि
अडकतृणमग्गो ॥ कालदढदपासकड्ढि अदरघडिउच्चाडि खलिअमुहसंघा ३० ॥ दृष्टश्च मे दशमुखो दशमुखपरिपाटि
विकटकर्षणमार्गः कालदृढपाशकृष्टदरघटितोच्चाटित स्खलितमुखसंघातः ॥ मे मया दशमुखश्च दृष्टः स्वप्न एवेत्यर्था
त्केवलं त्वमेवेत्यर्थः कीदृक् दशानां मुखानां परिपाट्यानुक्रमेण विकटो विस्तीर्णः कर्षणमार्गः छेदस्थानं यस्य स तथा छि
न्नशिरस्कतया मुखावलंबनस्थानस्य विकटत्वमित्याशयः अत एव कालस्य यमस्य दृढपाशेन कृष्टः सन् पुनः किंचिद्घटि
तः संबद्ध उत्पन्न इति यावत्पुनरुच्चाटितः छिन्नोतः पतितः स्खलित इत्यर्थान्मुखसंघातो यस्य वारं वारं यमपाशकृष्टः छिद्यते उत्प
द्यते पतति चेत्यर्थः तथा चासन्नो मृत्युः सूचितः ॥ ३२ ॥ अथ मस्तकस्य मायात्वं सिद्धांतयति ॥ तं अवलंबसु धीरं णास
उ संपइ अमंगलं जाव इमं मुणिअपरमत्थलहुई अवहीरिअणिप्फलानि अत्तउ माआ ॥ तदवलंबस्व धैर्यं नश्यतु संप्रत्य
मंगलं यावदिदं ॥ ज्ञातपरमार्थलघुकावधीरित निष्फला निवर्ततां माया ॥ तत्पूर्वोक्तहेतोर्धैर्यमवलंबस्व यावदिति प
रिच्छेद इदमनंगलं रोदनादिरूपं संप्रति नश्यतु इयं च शिरोघटनरूपा माया निवर्त्ततां कीदृशी ज्ञातपरमार्था सती लघुका
तुच्छा कपटस्य विशेषादर्शनमात्रावधिकत्वादतोऽवधीरिता ऽनादृतासती निष्फला भग्नाजनिका तथा च कपटत्वेन निर्णी
या च हेलया निष्फलास्त्वितिभावः ॥ ३२ ॥ अथ शिरोऽलीकत्वनिगमनेन त्रिजटाया वचनमुपसंहरन्नाह ॥ होंत्तं जइ रामशिरं
ए आवत्थं पितो समुह समगाणं ॥ मअं मिव णाअरसं आसाएजण तु हकर प्फुरिसमुहं ॥ भवद्यदि रामशिर एतावदवस्थमपि
ततः समुच्छसत ॥ अमृतमिव ज्ञातरसं आसाद्यतव करस्पर्शसुखं ॥ एतद्यदि रामशिरोऽभवदभविष्यत्तदा एतावदवस्थं छिन्न
मपि ज्ञातरसं तव करस्पर्शसुखं अमृतमिवासाद्य आस्वाद्य वा समुच्छसत्समुदश्वशिष्यद जीविष्यदित्यर्थः मृतमप्यमृतेन
जीवतीति रामशिरः सर्वथा नैतदितिभावः लृङर्थे शतृ ॥ ३४ ॥ अथ नूनमनिष्टाशंकिनीवं युजनहृदयानीति पुनरपि सी
तायारोदनमाह ॥ इअ राम पेम्म कित्तण दूसह वज्जाहिघ्घा अदूमिअहिअआ संभरिअ मुक्क कण्ठ अण मत्र्यं मरण णिच्छुआ

विपरुणा ॥ इति रामप्रेमकीर्त्तनदुस्सहवज्राभिघातदुःखितहृदया संस्मृत्य मुक्तकंठं अन्यमयं मरणनिश्चयापि प्ररु
दिता ॥ इत्यनेन प्रकारेण त्रिजटाकृतं यद्रामप्रेमकीर्तनं तदेव दुःखहेतुत्वाद्दुस्सहो वज्राभिघातस्तेन दुःखितहृदया
सती सीता संस्मृत्य पूर्वं प्रेमव्यवहारमित्यर्थान्मुक्तकंठमुच्चैर्यथा स्यादेवं मरणे कृतनिश्चयाप्यन्यमयं पूर्वरोदनापेक्ष
यापि शृंगारात्मकत्वेन विलक्षणं यथा भवत्येवं प्ररुदिता यथा यथा मृतस्यानुबंधस्मरणं तथा तथा रोदनाधिक्यं भवतीति
भावः ॥ ३९ ॥ अथ प्रकारांतरेण सीतासमाश्वासनमाह ॥ तो ति अ डाव अणेहिं विणासंठिआ जाव त्तो अपवअकलअलो
॥ आरणरमाह गभीरो णसुउ राहव पहा अमंगल पडहो ॥ ततस्त्रिजटावचनैरपि न संस्थिता यावत्तया प्लवगकलक
लः ॥ रणसन्नाह गभीरो न श्रुतो राघव प्रभात मंगल पटहः ॥ ततश्च रमदी रोदनानन्तरं सीता त्रिजटावचनैरपि तावन्न
संस्थिता रावणसंबंधित्वान्न समाश्वस्था या वत्तया प्लवगानां कलकलः तथा राघवस्य प्रभातकालीन मंगलपटहध्वनि
श्च न श्रुतः पटहध्वनिः कीदृक् रणसन्नाहनिमित्तं गभीरः सर्वे श्रुत्वा सन्नद्धं त्विति तारतारीकृतस्तथा च प्लवगकोलाह
लपटहनिर्ह्रादयोः श्रुत्वा त्रिजटावचसि प्रामाण्यग्रहात्प्रतीता सत्याश्वसीदित्यर्थः रणसण्णागंभीरो इति पाठे रणसंज्ञारण
संकेतस्तदर्थं गभीर इत्यर्थः प्लवगकलकलरूपो मंगलपटहध्वनिरित्यर्थ इति कश्चित् ॥ ३६ ॥ अथ समाश्वस्थायाः सीता
या निश्वसितमाह ॥ अह वहुविह संठावण पच्चानिज्जन्तजीविआसावंधं तीअ गअसो अविसअं दूरुणामिअपउहरणी
॥ अथ प्रत्ययानंतरं तया निश्वसितं निश्वासः कृतः असंभाविनप्लवगकोलाहलादिना रामसत्तानिश्चयादितिभावः ब
हुविधसंस्थापनेन त्रिजटाकृतसमाश्वासनेन प्रत्यानीयमानस्य गच्छतः परावर्त्तनेन तस्य जीवितस्याशाबंधो यस्मादिति क्रिया
विशेषण सीतया हर्षनिश्वासः कृत इति त्रिजटादीनामपि सीताजीविताशाबंध उत्पन्न इत्यर्थः एवं गतेन शोकेन विषदं आ
नदत्त्वादनुष्णं एवं दूरमुन्नामितौ पयोधरौ यत्रेत्यपि द्वयं क्रियाविशेषणं तथा च दीहं पि समूससीअ इति पूर्वोक्ति
शोकहेतुकनिःश्वासापेक्षयाप्यानंदहेतुकनिःश्वासस्य महत्ववर्णनेन शोकान्तरकालीनत्वादानंदस्य शोकापेक्षया
प्युत्कर्षः सूचितः ॥ ३७ ॥ अथ पुनः सीताया विरहदुःखोत्पत्तिमाह ॥ तो आसासिअ सहिएवीए युनरुत्तसञ्चविअ वीस

थंविहडि अंवहव्वभणपुणोविसंघडइविरहदुःखंहिअए॥ ततआश्वासितसखितेतस्याःपुनरुक्तसत्यापितविश्वस्ते॥ विघ्व
दितवैधव्यभयेपुनरपिसंघटते विरहदुःखहृदये ततोरामसत्तानिश्चयेनजीवधारणोत्तरंतस्याहृदयेविरहदुःखं
पुनरपिसंघटतेलगतीत्यर्थः अन्तराशिरोदर्शनेन विरुद्धबीभत्सादिरसोत्पत्त्या जागरूकस्यापि विप्रलंभस्य विछे
दादितिभावः किंभूते प्रथमंत्रिजटावचसाआश्वासिते सति सखिते अथ रामसत्तारूपेकार्थतयापुनरुक्तेन प्लवग
कोलाहलादिनायत्सत्यापितंरामोस्तीतिस्थिरीकरणंभावेक्तस्तेन विश्वस्ते प्रमाणसंभवेन विशेषेनाश्वस्ते अतएव
विगलितंवैधव्यभयंयत्रतथाभूते॥ ३८॥ अथसीतायाःत्रिजटानुरागकथनमुखेनाश्वासकंविच्छिनत्ति॥ माआमोह
म्मिगएरूणअपवआणसमरसन्नाहरवे॥ जणअतणआइदिट्ठुत्तिअडाणेहानुराअभणिअस्सफलं॥ मायामोहेगतेश्रुते
च प्लवगानांसमरसन्नाहरवे॥ जनकतनयादृष्टंत्रिजटास्नेहानुरागभणितस्यफलं॥ जनकपुत्र्यासीतयात्रिजटायाः
स्नेहोवात्सल्यंदयाअनुरागाप्रीतिः तत्पूर्वस्यभणितस्यफलंतात्पर्यंपर्यवसानंवादृष्टंमत्प्रीत्यायथैवानयाकथितंत
थैवजातमितिज्ञातमित्यर्थः कुत्रसति मायया जनितामोहेगते प्लवगानांसमरनिमित्तसन्नाहस्यरवेसद्धतांसन्नद्ध
तामित्यादिरूपेचसतिद्वाभ्यांरामसत्तानिश्चयाभावः॥ १३९॥ ॥मायोत्तमांगदर्शयाराममदासप्रकाशिता॥ रामसेतुप्रदी
पस्यसंपूर्णेकादशीशिखा॥ ११॥ ॥ ९९॥ अथप्रत्यूषमाह॥ तावअदरदलिडप्पलपलोट्टधूलिमइलंतकलहंसउलो
॥ जाओदरसंमीलिअहरिआअन्तकुमुआअरोपच्चूशो॥ तावच्चदरदाद्लितोत्पलप्रलुठितधूलिमलिनायमानकलहं
सकुलः॥ जातोदरसंमीलितहरितायमानकुमुदाकरःप्रत्यूषःयावत्प्लवंगकलकलश्रुतःसीताविलापादुपरतावातााव
देवप्रत्यूषोजातः कीदृक् दरदलितेभ्यइषद्विकसितेभ्यउत्पलेभ्यः प्रलुठिताभिर्निर्गताभिर्धूलीभिर्मलिनायमानानि
कलहंसानांकुलानियत्रसतथानकेवलमुत्पलानांविकासारंभकिंतुकुमुदानामपिमुद्रणारंभइत्याहदरसंमीलिता
निकिंचिन्मुकुलितानिअतएवहरितपृष्ठस्यप्रान्तपत्रचतुष्टयस्योपरिस्थित्याहरितायमानानिकुमुदानियत्रतथाभूता
आकराःसरोवरादयोयत्र॥ १॥ अथनिशावसानमाह॥ अरुणाअंवछाओणवसलिलाकलुषचंद्रिकाहतमूलः॥ धा
तुकलंककलुषोऽपसरतितटइवरजनीपश्चिमभागः॥ रजन्याःपश्चिमोभागस्यचरमयामोऽपसरतिप्रभातंजातमित्यर्थः २००

कीदृक्अरुणेनअरुणोदयेनसंध्यारागेनवाआताम्रछायःएवंनवसलिलंवन्यातोयंकर्द्दमाविलत्वात्तद्वदाकलुषाप्रा
भातिकत्वाद्धूसरायाचंद्रिकातयाआहतंस्पृष्टंमूलंयस्यउदयाचलावछेदोऽग्रभागस्तत्रारुणसंबंधावृताम्रत्वंअस्ताच
लावछेदोमूलभागःतत्राविलचंद्रिकासंबंधाद्धूसरत्वमितिभावः॥ तटइवयथाधातुकलंकेनगैरिकक्षोदेनकलुषोवि
चित्रोनद्यादीनांतटःकलुषवन्याजलाहतमूलस्सन्नपसरतिपततिसोपिधौतुयोगात्ताम्रइत्युपमायद्वारजनि
शेषःपश्चिमावलस्येवारुणत्वाद्गैरिकमयस्तटश्चंद्रिकारूपजलाहतमूलत्वात्पततीत्युत्प्रेक्षा॥ २॥ अथवृक्षछायानां
दुर्लक्ष्यत्वमाह॥ णिव्वणिजइरूअंअरुणसिहालुगाचंदिअमिमहिअले ओवृत्तधूसराणंणवरवलंतीणयाअवछा
आणं॥ निर्वर्ण्यतेरूपंअरुणशिखावरुग्णाचंद्रिकमहीतले॥ अपवृत्तधूसराणांकेवलंचरंतीनांपादपछायानां अरुण
शिखाभिरवरुग्णामृष्टाचंद्रिकायत्रतत्रमहीतलेकेवलंचलन्तीनामेवपादपछायानांभूपस्वरूपंनिर्वर्ण्यतेलक्ष्यतेन
तुस्थिराणामित्यर्थः किंभूतानांअपवृत्तानामपगतानामतएवनीलिमापगमाद्धूसराणाअरुणचंद्रिकयोरेकतरतेजःप्रा
गल्भ्याभावाछायाविविच्यनगृह्यंतेकिंतुपवनांदोलितशाखावशतयाचलनोदीषदाकारतयालक्ष्यतइतिभावः॥ ३॥
प्राभातिकरूपमाह॥ संमीलइकुमुअवणंअद्धत्थमिअगलिअप्पहंससिबिंबं॥ विअलइरअणिछाआअरुणाहअ
मुद्धतारआपुव्वदिसा॥ संमीलतिकुमुदवनंअर्द्धास्तमितगलितप्रभंशशिबिंबं॥ विगलतिरजनीछायाअरुणाहत
मुग्धतारकापूर्वदिक्॥ कुमुदवनंसंकुचतिशशिबिंबं॥ अर्द्धास्तमितत्वाद्गलितप्रभंअनुज्वलंभवतीत्यर्थात्रजन्याःछा
याकान्तिर्विगलितप्रभातवशादरुणेनारुणकान्त्याआहतास्पृष्टातएवमुग्धामंदाक्षुद्रावातारकायत्रताहृशीपूर्वदिग्भ
वतीत्यर्थः॥ ४॥ अथगगनस्यपरुषनाभित्वमाह॥ दीसइअतिमिरेरेइअपहलवअंवतरुणारुणाहअमिहिअं॥ विस
मविह्निणमणसिलाभंगप्फरुसमणिपव्वअद्धंवणहं॥ दृश्यतेचतिमिरेरचितपल्लवाताम्रतरुणारुणाहतमेधिकं॥ विष
मविभिन्नमनःशिलाभंगपरुषमणिपर्वतार्द्धमिवनभः॥ तिमिरेणरेचितंत्यक्तंसत्पल्लववत् आताम्रेणतरुणेनारु
णेनाआहताछन्नाअरुणीकृतेतियावत् तादृशीमेघिकास्वल्पमेघोयत्रएवंभूतंप्राच्यवच्छिन्नंनभोविषमंविभिन्नाखं
डखंडीकृतायामनःशिलातस्याभंगेनचूर्णेनपरुषंरूक्षंविचित्रवामणिपर्वतस्यार्द्धमिवदृश्यतइत्यन्वयःतथाचगगन

स्यनीलत यापर्वतेन प्राच्यवछिन्नस्यतस्यारुणोदयारुणमेखिकाविशिष्टस्य पद्म रागादि मणिविशिष्टपर्वतार्द्धेनत
त्रैवतस्ततः प्रस्तानामरुणकान्तीनामनःशिलाचूर्णेनतोल्यमित्युपमा ॥ ५॥ अथचन्द्रस्यास्तमनमाह ॥ तावअ
अथणिअवणवसलिला उणगअप अछविकलुसो ॥ पत्तोअरुणुणामिअ पासहउत्तगअणोसरत्तोवससी ॥ ताव
स्वास्तनितंवनवसलिला पूर्णजंगे पदछविकलुषः ॥ प्राप्तोःरुणोन्नामितपार्श्वायमानगगनापसरन्निवशशी ॥ या
वदरुण प्रागल्भ्यंभवतितावदेवशशी अस्ताचलनितंबं प्राप्तः कीदृक्नवसलिलेनापूर्णयद्गजस्यपदंमंडलाकृ
तिपदस्थानंतस्ययाछविस्तद्वत्कलुषःपांडुरः तात्कालिकवृष्टिजलस्यकर्दमाविलत्वादितिभावः उत्प्रेक्षते अरु
णेनोन्नामिनमुत्तोलितंअतएव पार्श्वायमानं पूर्वपार्श्वेनोत्थितंसत्पश्चिमपार्श्वेनावनतंतथाप्रतिभासाद्यद्गमनंतस्मा
दपसरत्स्खलन्निव अन्यत्रापिगृहादीवकपार्श्वेनोत्थाप्यमानेशिरस्थितंवस्त्वपरपार्श्वेनपततीतिध्वनिः॥ ६॥ अ
थवनानामवस्थामाह ॥ होंत्तिपवणाहआइफुडमहुरविहगणिह्रंतरुआइ ॥ गुंजन्तमहुअराइंधुअसिलिलहुअ
किसलआइंवणाइं ॥ भवतिपवनाहतानिस्फुटमधुरविहगनिह्रदइतानि ॥ गुंजन्मधुकराणिधुतशीललघुककि
सलयानिवनानि ॥ वनानिपवनेनाहतानिसन्तिधुतंपतितंयतशीतंतेनलघुनिकीसलयानियेषांतथाभूतानिभवं
तिवायुनाशीतपतनात्पत्राणांलघुत्वमित्यर्थः किंभूतानिस्फुटंमधुराणिविहगानांनिह्रदन्तिशब्दान्तरेत्यादीनिरुता
नियन्नतानिप्रातर्विहगानांशब्दोत्पत्तेरितिभावः एवंगुंजंतोमधुकरायेषुशिलिहाशीतेदेशी ॥ ७॥ अथचन्द्रस्यपतनमा
ह ॥ अरुणक्कत्तविअलिअंणिअअंकानुगअवहलजोण्हाभरिअं ॥ अत्थसिहराहिपडिअंउक्खडिअकरावलंबन
ससिबिंबं ॥ अरुणाक्रान्तविगलितंनिजांकानुगतबहलज्योत्स्नाभृतं ॥ अस्तशिखरात्पतितंउत्खडितकरावलंबनं
शशिबिंबं ॥ अस्तशिखरात्शशिबिंबपतितंकीदृक् अरुणेनाक्रान्तत्वादुत्तानीकृतत्वाद्विगलितंस्थानभ्रष्टंएवंबहि
रसत्वान्निजांकेऽनुगताभिर्बहलज्योत्स्नाभिर्भृतंपूर्णंगुरुत्वात्पतनंयुक्तमेवेत्याशयः एवंउत्खंडितंविघटितंकरैःकि
रणैरवलंबनंयस्यकिरणानामसत्वादन्योपिवृक्षादौवर्त्तमानस्याजितशाखादिनिष्ठहस्ताद्यवलंबनःसन्गुरुत्वाद २०१
धःपततीतिध्वनिः॥ ८॥ अथचक्रयोःसंघटनमाह ॥ पिअअमविओअदुःक्खंकहविगमेऊणजामिणीअपहाए ॥

अनुधाइपडिरुअन्तीअभुट्ठाउंवसहअरीचक्काअं ॥ प्रियतमवियोगदुःखंकथमपिगमयित्वायामिन्यांप्रभाते ॥ अनुधा
वतिप्रतिरुवन्तीअभ्युत्थातुमिवसहचरीचक्रवाकं ॥ सहचरीचक्रीप्रभातेचक्रवाकंअनुलक्ष्यीकृत्यधावतिगच्छति उत्प्रे
क्षते अभ्युत्थातुमिवचक्रस्यागमनंज्ञात्वाभ्युत्थानंकर्तुमिवयथैकस्मिन्नागच्छत्यन्योभ्युत्थानंकरोतीत्यर्थः ॥ पाठान्तरेवाति
गच्छतिवागतिगंधनयोरितिधातुः किंकृत्वायामिन्यांरात्रौयामिन्यावाकरणभूतयाप्रियतमस्यचक्रस्यवियोगेनदुः
खंकथमपिकष्टेनगमयित्वातिबाह्यकीदृशीप्रतिरुवन्तीएतज्जिज्ञासानिमित्तंचक्रेणरुतेकृतेसतिप्रतिरवंकुर्वतीप्रतिरो
दनंकुर्वतीत्यर्थं प्रतिरुदतंवाएतेनोत्कंठासूचिता ॥ ९॥ अस्ताचलस्यावस्थामाह ॥ जाअंसमल्लिअंतेअब्भहिउसहि
सिहाकरालिअपासं ॥ अत्थसिहरंमिअंकेअणणअपआहचंदमणिणीसंदं ॥ जातंसमालीयमानेअभ्यधिकौषधि
शिखाकरालितपार्श्वं ॥ अस्तशिखरंमृगांकेअन्यमयप्रवृत्तचंद्रमणिनिस्पंदं मृगांकेसमालीयमानेसंबद्धेशिखरेणे
वनिगूहितत्वाद्धीनतांगच्छतिवा अस्ताचलशिखरंजातंकीदृशअभ्यधिकाभिश्चंद्रस्यसन्निधानेनप्रौढाभिरोषधीनां
शिखाभिः करालितंदन्तुरितंपार्श्वंयस्यतथाभूतंएवंअन्यमयमन्यादृशंयथास्यात्तथाप्रवृत्तःश्चंद्रमणीनांनिःस्पंदोजल
स्यन्वयः ॥ एवंच अन्यमयमन्यमित्यर्थः तथान्चंद्रस्यास्तमनादोषधिप्रभाणांदंतुरितत्वमात्रंनतु प्रौढिश्चंद्रमणीनामपिज
लनिर्गमादपिपूर्वापेक्षयास्वल्पएवसूर्योदयकालसान्निध्यादितिभावः ॥ १०॥ अथारुणोदयमाह ॥ दूरोणअण
क्खत्तअरुणसिहाहअगलत्थिउणाअजोण्हं ॥ अत्थमइवससिसहिअंउद्देइवउअअपव्वआहिंणहअलं ॥ दूरावनत
नक्षत्रंअरुणशिखाहतगलस्तितावनतज्योत्स्नं ॥ यस्त्वायतइवशशिसहितंउत्तिष्ठतीवोदयपर्वतान्नभस्तलं ॥ दूरादवन
तानिनक्षत्राणियस्मादेवअरुणशिखाभिसराहतास्पष्टाअतएवगलहस्तिताःप्रेरिताःसत्याःवनताःप्रतीयांपतिता
ज्योत्स्नायत्रतादृशंनभस्तलंशशिनासहितमस्तायतेःस्तंयातीवउदयपर्वतादुत्तिष्ठतीवचंद्रास्तमनारुणोद्गमभ्यांतया
बुध्युत्पत्तेरियमुत्प्रेक्षा ॥ ११॥ अथप्रत्यूषापगममाह ॥ पइलंभेणपउसोजाआदिणफलोरइरूहेणणिसा आणिअ
विरहुक्कंठोगलइअणिव्विणयंमहोपच्चूसो ॥ पतिलंभेनप्रदोषोजातोदत्तफलारतिस्फरंवन निशा ॥ आनीतविरहोत्कं

DR. BHAU DAJI MEMORIAL

ठो गलत्यनिर्विण्णमन्मथः प्रत्यूषः स्त्रिणां प्रति प्राप्य प्रदोषो निशाद्यभागो दत्तफलो जातः असति प्रतिसमागमे द्रुतागता
गतेन नत्त्वर्चया सनिचतद्दर्शनादिना पूर्वरसोत्पत्तिरिति भावः तदुत्तरमालिंगनचुंबनादिना रतिसुखेन निशापि दत्त
फला जातेत्यर्थात् आनीताविरहादुत्कंठायेन अत एवा निर्विण्णः पूर्णोऽनिर्वाण उद्दीप्तो वा मन्मथो यत्र न तथाभूतः सन्
प्रत्यूषः परं गलति गच्छति प्रियविश्लेषशंकया रसविच्छेदकत्वेन हृदयेन लगतीत्यर्थः ॥१२॥ अथ प्राभातिकं सुरतमा
ह ॥ वीसंभवड्ढिअरसं अइराअक्खलिअसेससंठिअरसनं ॥ विअलिअमअणणिउणं पच्चूसरअं पउ॰ सदूरब्भहि
अं ॥ विश्रंभवर्द्धितरसं अतिरागस्खलितशेषसंस्थितरसनं ॥ विगलितमदेननिपुणं प्रत्यूषरतं प्रदोषाद्दूराभ्यधिकं
प्रत्यूषरतं प्रदोषरतात् दूरेणाभ्यधिकं प्राप्यमिकादपि प्रदोषरतादृसनीयं तयातिश्लाघनीयं जातमित्यर्थः तदेवाह कीदृ
क् विश्रंभेण प्रत्यासत्त्या वर्द्धितो रसः संभोगरूपः शृंगारो मनः प्रीतिर्वा यत्र द्वितीयरते विश्रंभेण लज्जाविरहादुत्कंठा
ग्रथायठावदभिव्यंजनान्न तु प्रथमरत इति भावः ॥ इतिरागेन अत्यनुबंधेनात्यासंगेन वा स्खलिता अपगता शेषेण क
देशेन संस्थिता रसना यत्र शेषपसंस्थिता अपि रसना अतिरागेन स्खलिताइत्यर्थः ॥ प्रदोषरते लज्जासत्त्वेनोत्कंठावशाद
अकालव्याप्त्या च तथाविधो प्रमर्द्दाभावाइ रसनादिकं शेषावच्छेदेन स्थितमेव द्वितीयरते तु विश्रंभापगतलज्जत्वेनधिकस
मयव्याप्त्या च बहुविधोपमर्द्दाच्छेषावच्छेदेनापि न स्थितमिपितिरसनारूपाप्युत्तरायः स्खलतेन स्थितइतिभावइतिवयं सांप्र
दायिकास्तु ॥ अतिरागेन स्खलिता अपि रसनाशेषेन स्थिता यत्रेत्यर्थमाहुः वसनमिति पाठे शेषेणांचलादिनेत्यर्थः तथा
च प्रथमरते लज्जासत्त्वादंगावरणार्थं मंचलादीनां भूयो भूयः समर्प्पणादेकदेशेन वसनं स्थितमेव द्वितीयरते त्वतिरा
गेन तदपि स्खलितमन्यत्पूर्ववद्व्याख्येयं एवं च विगलितमदत्वेन हेतुना निपुणं चतुरं ज्ञानपूर्वकतयालिंगनाचुंबनादि
व्यापारवैशिष्ट्यविशिष्टमित्यर्थः ॥ प्रथमरते तु मदसत्त्वेन रसविशेषमग्नचित्ततया तादृशनैपुण्याभावादिति भावः दूरत्तरि
अमिति पाठे प्रत्यूषरतं प्रदोषरताप्रेक्षया दूरांतरितं चिरकालेन जातमित्यर्थः विगलितमदेन निपुणं सलज्जं प्रथमं मदाधि
क्यात् लज्जानासीदित्यपि केचित् ॥ अचिरात्चेति संस्कृत्य प्रदोषरतानन्तरमचिरादेवोत्कंठया प्रत्यूषरतं जातमित्यर्थस्ते २०२
न प्रथमरतस्य चिरकालव्यापकत्वमित्यन्ये ॥१३॥ चषकमाह ॥ संकंताहरराअं थोअसुरासंठिउप्पलद्धथइअं वसअं

का मिणिमुक्कं किलित्तवउलतणुअ॰ ण मुंचइ गंधो ॥ संक्रान्ताधररागं स्तोकसुरासंस्थितोत्पलार्द्धस्थगितं ॥ चषकं का
मिनीमुक्तं क्लाम्यत् च कुलतनुकोन मुंचति गंधः ॥ कामिनीभिर्मुक्तं त्यक्तमपि चषकं क्लाम्यत् म्लायद्बकुलपुष्पं तद्वध
वत्तनुकः स्वल्पो गंधो न मुंचति इषत्सुरागंधस्तिष्ठत्येवेत्यर्थः ॥ कीदृशं संक्रांतः पानसमये लग्नोऽधरस्य रागस्तांबूला
दिकृतो यत्र एवं स्तोकसुरायां संस्थितेनोत्पलेन अर्द्धस्थगितमड्डाच्छादितं सुरायानिपीतत्वेन किंचिदवशिष्टसत्त्वात्तत्रचो
त्पलानामवशिष्टत्वादितिभावः क्लाम्यता बकुलेन तनुरल्पीयानित्यपि केचित् ॥१४॥ स्त्रीणां रतान्तावस्थामाह ॥ पसिढि
लकेसकलाउ॰ उव्वत्तिअमेहलावत्तुदृणिअंबो ॥ छायालग्गापरिमलो पिअअममुक्कतणुअ॰ विलासिनिसत्थो ॥ प्रशि
थिलकेसकलापउद्वर्त्तितमेखलावरुद्धनितंबः छायालग्नपरिमलः प्रियतममुक्ततनुको विलासिनीसार्थः विला
सिनीनां सार्थः ॥ प्रियतमेन मुक्तः संभोगानन्तरं त्यक्तः सन् तनुको दुर्बलो जातइतिशेषः अतिसुरतोपमर्द्दाद्वा विविरहा
दित्यन्ये किंभूतः प्रशिथिलो विकीर्णः केशकलापो यस्येति विपरीतरतावस्था एवं उद्वर्त्तितया ऊर्ध्वमुखीभूय स्थितया मेखल
दित्यर्थः लग्नः परिमलः कस्तूरिकादिविमर्द्दोच्छ्रितद्रुधावायस्य एतेनात्मकपभोगः सूचितः यद्वा संभोगानन्तरमुषसिना
रीणां गृहगमनाय शरीरसंयमनावस्थेयं तथाहि प्रशिथिलोऽक्षमतया बंधदार्ढ्याभावेन दिशि दिशि पतितः एवं उद्वर्त्तित
या आलस्यात्त्वरया वा यथातथार्पणेन पूर्वविपरीतयेत्यर्थः ॥१५॥ नष्टतासां गृहगमनारंभमवाह ॥ दुणिमिअवामचल
नं वलन्तपीणोरुपिसमपाउद्धारं ॥ दुक्खेण संठविज्जइ पिअहित्तणिअत्तपत्थिअं जुवईहिं ॥ दुर्न्नियोजितवामचरणंब
लत्पीनोरुविषमपादोद्धारं ॥ दुःखेन संस्थाप्यते प्रियाभिमुखनिवृत्तप्रस्थितं युवतीभिः युवतीभिः प्रियाभिमुखाभिव
त्तं प्रियं पश्चात्कृत्य प्रवृत्तं प्रियपराङ्मुखमित्यर्थः यत्प्रस्थितं गृहगमनोद्यमस्तत् दुःखेन संस्थाप्यते स्थिरीक्रियते तात्का
लिकविरहात्संभोगश्रमाच्चेति भावः किंभूतं दुःखेन नियोजितं भूमावर्पितं वामचरणं यत्र एवं पीनत्वाद्दलतासमुखसु
स्थापयितुमसामर्थ्याद्वक्रीभूवता ऊरुणा हेतुभूतेन विषमः समसाध्यतया विपर्य्यस्तो दक्षिणपादस्योद्धार उत्थापनं यत्र
स्त्रियो हि प्रथमं वामपादमग्रे विन्यस्य पश्चाद्दक्षिणपादमुत्थाप्य चलंतीति स्वभावस्तथा च तथा कर्तुमुद्यता अपि संभो

गोत्कर्षाज्जंघानितंबस्यजडीभूतत्वेनझटित्यक्षापनमर्पणंवाचरणयोःनशक्नुवतीतिभावः॥ १६॥ अथदिनागमन
माह ॥ संखोहिअकमलसरोसंझाअवअंवधाउकदमिअमुहोठाणप्फिडिउ॰व्वगाउ॰रतिंभमिजणपडिअणिअ
त्तोदिअसो॥ संक्षोभितकमलसराः संध्यातपाताम्रधातुकर्दमितमुखः॥ स्थानस्फटत्तइवगजोरात्रिंभ्रमित्वाप्रतिनि
वृत्तोदिवसः॥ स्थानएवभ्रष्टोअपगतोदिवसोरात्रिंव्याप्यभ्रमित्वाद्वीपान्तरंगत्वागजइवप्रतिनिवृत्तः॥ पुनरागतः
यथाबंधनस्थानाद्भ्रष्टोगजोरात्रौभ्रमित्वाप्रतिनिवर्तते प्रातःस्वस्थानमायातीत्यर्थःसाम्यमाहकीदृक्संक्षोभितंवि
कासितंकमलप्रधानंसरोयेनपक्षेसंक्षोभितंशुंडाद्यभिघातेनोपमर्दितंएवंसंध्यातपएवाताम्रोधातुकर्दमोगैरि
कपंकस्तद्दिग्धंमुखमुपक्रमोयस्यपक्षेसंध्यातपवदाताम्रमित्यर्थस्तटाभिघातादिनामुखेगैरिकसंपर्कादितिभावः
॥ १७॥ अथकमलप्रकाशमाह ॥ अरुणपडिबोहिआएअब्भुत्थत्तीअआअअंवदिणअरंसाहतिविहडिआएणिमि
अंकमलाइंदिअसलच्छीअपहं॥ अरुणप्रतिबोधितायाःअभ्युत्तिष्ठत्यागतमिवदिनकरं॥ शासतिविघटितानिनियो
जितंकमलानिदिवसलक्ष्म्याःपदं॥ विघटितानिविकशितानिकमलानिआगतंदिनकरंअभ्युत्तिष्ठत्याइवत्तदायुत्था
नमाचरंत्याइवदिवसलक्ष्म्यानियोजितमर्पितंपदंचरणंशासतिकथयंत्तिदिनकरप्रत्युद्गजनेदिनश्रियाऽत्रचरणं
निहितमितिकमलदलविघटनेनज्ञायतइतिभावःकिंभूतायाःअरुणेनप्रतिबोधितायाजागरितायानिशितत्र
सक्तायाइत्यर्थादरुणोदयमुपक्रम्यप्रथमंकमलवनएवतदुद्भवादितितात्पर्यंअन्योपिकेनविदयमान्याभवत्यस्यो
पस्थानंक्रियतामित्यादिप्रतिबोधितस्त्वरयागच्छयत्रपदंन्यस्यतितत्राभिघातादन्यथासस्थानभवतीतिध्वनिःयद्वाअ
रुणेनप्रतिबोधितायास्तवस्वामीदिनकरइहागतइतिज्ञापितायाइत्यादिरूपेणसमासोक्त्याप्रोषितभर्तृकावृत्तान्तए
वसूचितः॥ १८॥ कंबूनाव्यवस्थानमाह ॥ एक्केक्कमवोछिण्णंपल्लसवीसत्थविहडिअंउअहिजले॥ जणणिवचंदप
डिमंअल्लिअइविहाअकाअरंसंखउलं॥ एकैकक्रमव्यवछिन्नंप्रदोषविश्वस्तविघटितंउदधिजले॥ जननीमिवचं
द्रप्रतिमामालीयतेविभातकातरंशंखकुलं॥ प्रदोषेविश्वस्तमभयंयथास्यात्तथाविघटितंसत एकैकक्रमेणव्यवछि
न्नंविश्लिष्टंशंखकुलंप्रभातेकातरंविश्लेषेणदुःखितंसत जननींमातरमालीयतेएकस्याएवैकदाशतावधिशंखा

उत्पद्यंतेतथाचतेसंहैवसंचरंतःसायंविश्लिष्टाःप्रातःपुनर्जननीमनुसंधायतत्समीपेवर्तुलीभवन्तीत्यर्थः किंभूतामि
वउदधिजलेचंद्रप्रतिमामिवस्थितामित्यर्थःप्रातश्चंद्रस्यप्रतिबिंबस्यतत्रस्फुटत्वादितिभावः॥ श्वेत्येनशाम्यंयद्वा
जननीमिवचंद्रप्रतिमांआलीयतइत्युत्प्रेक्षाजननीभ्रमाच्चंद्रप्रतिबिंबमाश्लिष्यवर्तुलीभवन्तीत्यर्थः॥ यद्वायथा
जननीमालीयंतेतथातद्भ्रमाच्चंद्रप्रतिबिंबमपीतिसहोपमा ॥ १९॥ अथकमलसौरभोद्गममाह ॥ होइकमलाअ
राणंसमुससत्ताणचिरणिरोहेक्कमुहो॥ संवालिअमहुमहुरोमारुअभिन्नोविमसलोच्चिअगंधो॥ भवतिकमला
कराणांसमुच्छसतांचिरनिरोधैकमुखः संवालितमधुमधुरोमारुतभिन्नोपिमांसलएवगंधः॥ समुच्छसतांविकस
तांकमलाकराणांगंधःप्राभातिकेनमारुतेनभिन्नोपिदिशिदिशिक्षिप्तोपिमांसलोघनएवभवतिअत्रबीजमारुचिरं
निरोधेनमुद्रणाद्बहिर्गमप्रतिबंधेनएकमुखःएवंमुखंयस्येहेत्यमहमिकयावहिर्भवितुमुत्कंठितइत्यर्थः॥ यद्वाचिर
निरोधेसतिएकंमुखंद्वारंयस्येत्यर्थस्तेनप्रतिरुद्धानामीषत्कमलविकाशेनतत्पथेनबहिर्भवतामनिलेनाथलस्ताकर्तुं
नशक्यतइतिभावःएवंसंचालितेनमधुनामधुनोमनोहारी॥ २०॥ अथराक्षसानामपशकुनमाह ॥ जंचिअकामिनि
सत्थंआउछत्ताणमुक्कवाहवअं॥ रक्खसभडाणतंचिअजाअंणिप्पछिमोवजहणसोक्खं॥ यएवकामिनीसार्थस्त्रा
पृछमानानांमुक्तबाष्पस्तवकः॥ राक्षसभटानांसएवजातोनिःपश्चिमोपगूहनसौख्यः॥ आप्रश्नयुद्धायसंवदनंकुर्वतां
राक्षसभटानांयएवकामिनीसार्थःसमरशंकयात्यक्ताश्रुपूरोवृत्तःसएवनिःपश्चिमपुनर्भाविउपगूहनसौख्यमालिं
गनसौख्यंयस्यतथाभूतोजातस्तथाचसंवदनकालीनपरिरंभणातिरिक्तंपरिरंभणंनास्तीत्यमंगलत्वात्कालिकाश्रुनि
र्गमेनसूचितमितिसंग्रामेरक्षसांक्षयउक्तः॥ २१॥ अथरामस्यनिद्राभंगमाह ॥ अहसमरत्तरिअस्सहोदहमुहवेरपडि
मुंचनाअअदिअहो॥ लद्धामरिसावसरोअलद्धणिद्दोविराहवपडिउद्धो॥ अथसमरान्तरितसुखोदशमुखवैरप्र
तिमुंचनागतदिवसः॥ लब्धामर्षावसरोऽलब्धनिद्रोपिराघवःप्रतिबुद्धः॥ अथप्रत्यूषोत्तरंदेवतारूपत्वाद्विरहदुःखाद्वा
अलब्धनिद्रोपिराघवःप्रतिबुद्धोजागरितःलौकिकचक्षुर्मुद्रणंविरहजन्यमोहंवातत्याजेत्यर्थःकीदृक्समरेणयुद्धर
सेन्नातरितंविघ्नितंसकलआपनीतसीतासमागमजन्यंसुखंयस्ययदासमरेणान्तरितमत्तःप्रापितंसुखंयस्यविर

हृदुःखेसत्येववीररसस्योद्रेकेणपरंस्फ़ुरत्खोत्पत्तिरित्यर्थः एवंदशमुखेयद्वैरंतत्प्रतिमोचनायतत्प्रहत्यपकारायश्चाग
तोदिवसोयस्यएवंरूपोऽमर्षस्यावसरोयेनतथाचतात्कालिकामर्षान्वितयुद्धरसेनशृंगाररसोत्तरितइतिभावशाल्क
दयो ॥ २२ ॥ अथरामस्यमनःखेदमाह ॥ सीआविओअदुःक्खविसहन्तस्सचउज्जामभेत्तन्तरिअं ॥ दीहोअगओका
लोणसमाएक्काअसाणिसारहुवइणो ॥ सीतावियोगदुःखंविषहमाणस्यचतुर्याममात्रान्तरितं ॥ दीर्घश्चगतःकालोन
समाएकाचसानिशारघुपतेःचत्वारोयामाः प्रहरचतुष्टयंतन्मात्रेणान्तरितंसीतावियोगदुःखंविषहमानस्यप्रात
ति स्तदुःखापशमादिभावःरघुपतेःदीर्घोबहुतरश्चकालोगतःशाएकानिशापरंनगतानगतेवसन्निहितसीतास
मागमोत्कंठयातिवाहयितुंदुःसहाबभूवेत्यर्थः ॥ कीदृशीनसमाअतीतरकालेनापिनतुल्यातावत्समयजन्यविरहदुः
खापेक्षयातद्वात्रिजन्यतत्वदुःखाधिक्यादियमेवाधिकेत्यर्थः ॥ काकाक्षिगोलकन्यायादुभयत्रान्वयोनकारस्यवस्तुतस्तु
रघुपतेर्दीर्घश्चकालोगतःसाचनिशागताकिंत्वियंनसमादुःखहेतुत्वात्ततोधिकेत्यर्थः ॥ २३ ॥ अथरामस्यधनुर्दर्शनमा
ह ॥ उम्मिल्लंतिचिअसेणिद्दासेसोणअच्छिवत्तक्खलिआ गुरुओलग्गिअरणभरेदिट्ठीदिट्ठसमरेधनुम्मिणिसण्णा ॥
उन्मीलंत्येवास्यनिद्राशेषावनताक्षिपत्रस्खलिता ॥ गुरुकावलगितरणभरेदृष्टिर्दृष्टसमरेधनुषिनिषण्णा ॥ उन्मीलं
त्येवउन्मेषसमकालमेवास्यदृष्टिर्धनुषिनिषण्णा ॥ कीदृशीनिद्रायाःशेषेणतंद्रारूपावशिष्टभागेननिद्राविच्छेदेन
वाऽवनताभ्यामक्षिपत्राभ्यांस्खलितापृथग्भूतातथाचनिद्राजन्यालस्येनकिंचिन्मिलदथक्षिपत्रद्वयविजित्यप्र
बोधसमकालमेवनिखिलविषयपरित्यागेनधनुषिलग्नेतिवीररसोत्कर्षःसूचितःकिंभूतेगुरुकोऽन्यानिर्वाह्यो
ऽवलगितोरणभरोयत्रएवंदृष्टसमरोयस्येतिसर्वत्रजयशीलत्वादध्यवसाययुक्तः ॥ २४ ॥ अथरामस्योत्थानमाह
॥ मुअइअकिलिन्तकुसुमंअवहोवासमलिओवहाणद्धन्तं ॥ सइपरिअत्तणविसमंहिअआवेअपिसुणंशिला
शअणीअमुंचतिचक्लाम्यत्कुसुमंउभयावकाशमृदितोपधानार्द्धान्तं ॥ सदापरिवर्तनविषमंहृदयावेगपि
शुनंशिलाशयनीयं ॥ रामोनकेवलंधनुःपश्यतिअपितुशिलारूपंशयनीयंमुंचतिचशिलायाःशीतलत्वेन २०४
शयनीयतयाविरहतापस्याधिक्यमुक्तंकीदृशंसदापरिवर्तनेनपार्श्वान्तरशयनेनविषमंनिम्नोन्नतंअत
एवक्लाम्यंतिकुसुमानियत्रएवंवामदक्षिणावकाशद्वयेमृदितौघृष्टावुपधानस्यार्द्धान्तौपत्रेतिस्थैर्याभावेन
संतापस्याधिक्यमुक्तंअतएवहृदयावेगस्यमनस्तापस्यपिशुनंकथकंशाभिरेवसंतापोत्कर्षोनुमीयतइतिभावः ॥
२५ ॥ अथजटासंवरणंसंदानितंकमाह ॥ तोसेलसारगरुअंअइराहोन्तदइआसमागमपिसुणं ॥ अहिणं
दिऊणसुइरंफुरमाणब्भहिअपीवरंवामभुअं ॥ ततःशैलसारगुरुकंअचिराद्भविष्यद्दयितासमागमपिशुनं
अभिनंद्यसुचिरंस्फुरदभ्यधिकपीवरंवामभुजं ॥ ततस्तल्पत्यागानंतरंजटाप्राग्भारंबध्नातिरामइत्यथादित्यकत्त
रस्कंधकेनान्वयःकिंकृत्वास्फुरत्स्पंदमानमतएवाभ्यधिकमांसलंवामभुजंसुचिरंअभिनंद्यस्तुत्वातथाचशाकुन
शास्त्रेणस्याभिनंदनंकर्तव्यमितिसूचितंकिंभूतंशैलवत्सारेणबलेनगुरुकंअचिराद्भाविनःसीतासमागमस्य
पिशुनंकथकमितिकार्यसिद्धिरुक्ता ॥ २६ ॥ खणसम्माणिअधम्मो धनुकड्ढणमग्गमोइअपरिट्ठविअं ॥ बंधइम
लिअविसज्जिअतमालसअणसुरहिंजडापब्भारं ॥ क्षणसम्मानितधर्मोधनुःकर्षणमार्गमोचितपरिस्थापितं
बध्नातिमृदितविसृष्टतमालशयनसुरभिंजटाप्राग्भारं ॥ सकीदृक्क्षणंक्षणेनोत्सवेनवासम्मानितोधर्मोये
नदेवपूजादेःतत्कालेकर्त्तव्यत्वादितिमंगलसूचनंजटाप्राग्भारंकिंभूतंधनुःकर्षणमार्गान्मोचितंशरत्यागकाले
करस्खलनशंकयाकर्णमूलाद्बहिःकृतंअथचपरिस्थापितंसंयतंएवंपार्श्वपरिवर्तनादिनामृदितंतदनुतदानी
विसृष्टंयत्तमालपुष्पशयनंतेनसौरभयुक्तं ॥ युग्मकं ॥ २७ ॥ अथधनुर्ग्रहणमाह ॥ दाजणगलिअवाहंचिरधुरि
आऊरमाणरोसाअंबं ॥ दिट्ठिंलंकाहिमुहींसमत्थणिघडिअत्तारआदुप्पेच्छं ॥ दत्वागलितबाष्पांचिरधृतापूर्यमा
णरोषाताम्रांदृष्टिंलंकाभिमुखींसमस्तनिर्वलिततारकादुःप्रेक्ष्यां ॥ लंकाभिमुखींदृष्टिंदत्वालंकांदृष्ट्वेत्यर्थःरा
मश्चापंगृह्णातीत्यकत्तरस्कंधकेनसदानितकंकिंभूतांगलितोबाष्पोयतइतिसीतापहारात्दुःखमुक्तं एवंचिरंधृत
नसंचितेननतदानींसमयलाभादापूर्यमाणेनसन्नद्धेनरोषेणाताम्रांअतएवसमस्तनिर्वलितयारोषेणविस्फा
रणात्पृथग्भूतयातारकयादुःप्रेक्ष्यामितिसपक्षस्यापिदुःप्रेक्षणीयतयाविपक्षनाशकत्वमुक्तं ॥ २८ ॥ गेण्हइग
हिअत्थामंसीआसुणइअसअणमग्गाहविअं ॥ बहुसोविरहुक्कंठिअणिमिअमुहारुणमइअकोडिंचावं ॥ गृ

से॰बं॰टी॰ ण्ह्वातिगृहीतस्थामं सीताशून्यीकृतशयनमार्गस्थापितं॥ बहुशोविरहोत्कंठितनियोजितमुखावरुदितमृदित
२०५ कोटिचापं॥ चापंकीदृशं गृहीतंज्ञातंस्थामबलंयस्यतत् एवं सीतयाशून्यीकृतेशयनस्यमार्गेवामपार्श्वरूपे
स्थानेसीताप्रतिनिध्यनुस्थापितं एवंविरहाद्दुत्कंठितनोत्कंठयायद्वाविरहोत्कंठितंसन्नियोजितंसीताभ्रमेण
प्रागिवतन्मुखबुध्यानिवेशितंपन्मुखंतस्यरुदितैस्तदश्रुभिर्नभ्रमनिवृत्तौमनःखेदोद्भूतैरश्रुभिर्मृदिताकोटि
र्यस्यस्येतिवामनेत्रापांगसंगंवाटनित्वमुक्तं॥२९॥युग्मकं॥अथज्यारोपणमाह॥तोतंमहिअलणिविअंवा
मकरावेढणिदुरपरिगाहिअं॥ दाहिणहत्थेणकअंवलंतदेहभरणामिअंसज्जीअं॥ ततस्तन्महीतलनिवे
शितंवामकरावेष्टननिष्ठुरपरिगृहीतं॥ दक्षिणहस्तेनकृतंवलद्देहभरनामितंसजीवं॥ ततोग्रहणानन्तरंतद्धनु
स्तेनरामेनप्रथममहीतलेनिवेशितमेकाटन्यावष्टब्धंअनन्तरंवामकरस्यावेष्टनमुष्टिनानिष्ठुरंदृढंयस्यादे
वंपरिगृहीतंतदनुज्यारोपनसमयेवलतस्तिर्यग्भूतस्यदेहस्यभरेणनामितंसद्दक्षिणहस्तेनसजीवंजीवाज्या
तत्सहितंकृतंयथायथादेहस्यनम्रतातथातथातद्भरेणधनुषोपीतिजातिरलंकारःज्याजीवाजीवनंजीवोजी
वोकर्णबृहस्पती॥३०॥अथरामस्यप्रस्थानमाह॥काऊणससिअमंथरगरुअसिरोअंपतज्जिअंपडिव
क्खं॥ चलिओचलन्तपव्वअविलुडइअधणुमेत्तसाहणोरहुणाहो॥ कृत्वाश्वसितमंथरगुरुकशिरःकंपत
र्ज्जितंप्रतिपक्षं॥चलितश्चलत्पर्वतविगलितधनुर्मात्रसाधनोरघुनाथः॥रघुनाथश्चलितोयुद्धायेत्यर्थात्किं
भूतःचलतिपर्वतेविलगितंनिवेशितंयद्धनुस्तन्मात्रंसाधनंसिद्धिसामग्रीयस्यविरहदौर्बल्येनसंचारायध
नुःकोट्यावष्टब्धस्यस्कंधेलस्यचलनेनबलप्रकर्षउक्तःकिंकृत्वाप्रतिपक्षंरावणंसीतादुःस्मरणजन्यश्वसितेन
मंथरस्तद्विलंबेनविलंबितोयःशिरःकंपस्तेनतर्जितंभीषितंकृत्वाश्वसितहेतुकोवास्तविकःशिरःकंपस्तर्जन
रूपत्वेनोत्प्रेक्षितः॥३१॥अथकपिसैन्यसंचारमाह॥चलिअंचतुलिअपव्वअमिलन्तसिहरणहणिम्मिअपक्क
मद्दिहरं॥अणुरूअभुअपरिट्ठिअविडवमुणिज्जन्तपाअवंकइसेण्णं॥ चलितंचतुलितपर्वतमिलच्छिखरन २०५
भोनिर्मितैकमहीधरं॥ अनुरूपभुजपरिस्थितविटपज्ञायमानपादपंकपिसैन्यं॥नकेवलंराम एवचलितःकिं

तुकपिसैन्यमपिचलितंकीदृक्तुलितानामुत्थापितानांपर्वतानांसदृशाकारेषुभुजेषुपरिसंस्थिताःसंतोविटपैर्ज्ञा
यमानाःपादपायत्रतादृशंआकारतोल्पान्द्रुजैः॥संभेदाग्रहसामग्रीसत्वेपिविटपरूपस्यविशेषस्यदर्शनेनवृक्षो
ऽयमितिविविच्यग्रहइतिकपीनांमहत्वंपर्वतवृक्षादीनामस्त्रीकृत्योत्थापनादुद्योगशालित्वंसूचितंस्वानुरूपै
र्भुजरूपैःपरिस्थितैर्विटपैर्ज्ञायमानवृक्षस्वरूपभुजेषुविटपभ्रमादुर्लक्षत्वेनभ्रमविषयइत्यर्थःइतिकेचित्॥३२
॥कपीनांतेजःप्रकर्षमाह॥सणजुत्तिकुरिसासणाहभरेणकिंकरेत्तिसमत्था णिअअवलंचिअकवअंकइ
णअप्पडिहआभुआअपहरणं॥सन्नह्यंतिकुपुरुषाःसन्नाहभरेणकिंकुर्वन्तिसमर्थाःनिजकबलमेवकवचंकपी
नामप्रतिहतोभुजौचप्रहरणं॥कुपुरुषाअशूराःसन्नाहंकुर्वतेसमर्थाःपुनःसन्नाहरूपेणभरेणदेहगौरवापा
दकमात्रेणाकिंकुर्वन्ति अपितुनकिमपीत्यर्थः इतिकृत्वाकपिभिःसन्नाहोकृतइतिभावःअतएवकवचादेरन्य
थासिद्धिमाहकपीनांनिजकबलमेवकवचंपरशस्त्रेभ्यःनतुत्राणकारणमित्यर्थः एवंचअप्रतिहतौपराण
भिभाव्योभुजावेवप्रहरणपराभिभवकारिशस्त्रंखड्गादीनांतुकदाचित्प्रतीघातशंकापीतिभावः॥३३॥अथसं
नासन्निवेशप्रकारमाह॥णाअणिसाअरसारंमाआणिक्कलुसज्जुजुगइपवुद्धं॥ अग्गक्खंधम्मिकअंलंकाम
ग्गणिउणंविहीसणसेण्णं॥ ज्ञातनिशाचरसारंमायानिष्कलुषयुद्धगतिप्रबुद्धं॥अग्रस्कंधेकृतंलंकामार्गनिपुणं
विभीषणसैन्यं बिभीषणसैन्यंअग्रस्कंधेसैन्याग्रेकृतंस्थापितंसुग्रीवादिभिरित्यर्थात्कुतइत्यतआहज्ञातंनिशा
चराणांसारंबलंनिगूढमंत्रणावायेन एवंमाययानिष्कलुषानिरुपद्रवामायास्फुनिष्कलुषावायेराक्षसास्तेषांयु
द्धप्रकारेप्रबुद्धंप्रवीणंयद्वामाययाकपटेननिष्कलुषेनकपटव्यतिरेकेणचयायुद्धगतिस्तत्रोभयत्रप्रवीणंए
वंचलंकायामार्गस्यअन्तर्वर्त्तिदुरूहनानास्थानस्यनिपुणंज्ञातारंयतइतिराजनीतिरुक्ता॥३४॥अथरामस्या
युधग्रहणमाह॥समरतुरिअस्सस्फकअंकहमोत्तव्वत्ति दुमिओस्फुगीवो॥गहिआउहम्मिरामेसोअइअविहि
सणेणाणिसाअरवंसं॥समरत्वरितस्यस्फुकृतंकथमोक्तव्यमितिदुःखितःसुग्रीवः॥गृहीतायुधेरामेशोचतिवि
बिभीषणोनिशाचरवंसं॥रामेगृहीतायुधेसतिसमरत्वरितस्यस्वयमेवयुयुत्सतोरामस्येत्यर्थात्स्फुकृतंशो

भनंकृतमुपकारोवालिवधादिरूपःकथंमोक्तव्यंप्रत्युपकारेणसदृशीकर्तव्यमितिकृत्वासुग्रीवोदुःखितः
रामस्यामोघशरस्यतत्पारावणवधादेरितएवसंभवादस्माकमन्यथासिद्धिःस्यादितिभावःएवंविभीषणोपिनि
शाचरवंशशोचनाविषयीकरोतिसकलराक्षसक्षयध्रौव्यादितिभावः॥३५॥अथधनुरास्फालनमाह॥अप्फा
लिएधणुम्मिअक्खोहिअगिरिविहुअसाअरेरहुवइणा॥कंपिअघरपाआराअंगक्खिवणविसमंववेवइलंका
आस्फालितेधनुषिक्षोभितगिरिविधुतसागरेरघुपतिना॥कंपितगृहप्राकाराअंगक्षेपनविषममिववेपतेलं
का॥क्षोभितःकंपितोगिरिःसुवेलस्तेनविधुतस्तत्कंपेनभूमिकंपात्कंपितःसागरोयस्मादेवंभूतेधनुषिरघुपति
नाआस्फालितेसतिकंपितागृहाःप्राकाराश्चयत्रतथाभूतालंकाअंगानामवयवानांयत्क्षेपणमितस्ततःप्रापणं
तेनविषमंयथास्यादेवंवेपतइवअन्यस्यापिकंपेकरचरणादिक्षेपणंभवतीतिध्वनिः॥तथाचगृहप्राकारादिक
मंगत्वेनोत्प्रेक्ष्यतत्कंपेलंकाकंपत्वमुत्प्रेक्षितमित्यास्फालनशब्दस्यसकलकंपहेतुत्वादुच्चैस्त्वंसूचितं॥३६॥अ
थास्फालनशब्दस्यसीताकर्णगोचरत्वमाह॥झीणपुलआइअंगीअउव्वहरिसमिलिआणणाजनअसुआ॥सोऊ
णसमासत्थापढमुल्लावंवराहवस्सधनुरवं॥क्षीणपुलकाचितांगीअपूर्वहर्षमिलिताननाजनकसुता॥श्रुत्वास
माश्वस्ताप्रथमोल्लापमिवराघवस्यधनूरवं॥राघवस्यप्रथमसंभाषणमिवप्रथमाह्वानशब्दमिवधनुःशब्दंश्रुत्वा
जनकसुतासमाश्वस्तामत्प्रत्युद्धारःस्यादित्यध्यवसायेनप्रीतहृदयाभूदित्यर्थः॥कीदृशीक्षीणंचिंतादुर्बलंअथ
चपुलकैराचितमंगंयस्यास्तादृशीतिरामधनुःशब्देनसात्विकभावोदयउक्तः॥एवंअपूर्वेणप्रागनाशंकितेनहर्षेन
मिलितमाननंयस्याइतिविकसितत्वादिरूपमुखचेष्टासूचनंअन्यापिदेशांतरादागत्याहूयकुशलप्रश्नादिनावि
रहिणीमाश्वासयतीतिध्वनिः॥३७॥अथकपीनांकलकलमाह॥मुच्छाविअजुवइजणोरक्खसवइहिअअमहि
हरासणिघाओ॥वामोहेइपुरिअणंसीआकणसुहओपवंगकलअलो॥मूर्छितयुवतीजनोराक्षसपतिहृदय
महीधराशनिघातः॥व्यामोहयतिपुरीजनंसीताकर्णसुखदःप्लवंगकलकलः॥प्लवंगानांकलकलःपुरीलंकात
ज्जनंव्यामोहयतिगभीरत्वादाकस्मिकत्वाच्चकीदृक्मूर्छितोराक्षसयुवतीजनोयेनयुवतीत्येनपतिविनाशशंक

याकातरताधिक्यादेवंराक्षसपतेर्हृदयमेवदृढत्वात्तुगत्वाच्चमहीधरः॥तत्राशनिघातएवभेदकत्वादशनिःपत
तीतिध्वनिःएवंभूतोदुःसहःसीताकर्णयोःपरंसुखदःसुखभागीवापतिसंबंधित्वादितिभावः॥३८॥अथक
पीनांदिशिदिशिधावनमाह॥कइवररहसुद्धाइअधुअसमअपहाविउअहिसमक्कंतो॥सलिलभरेंत्तदरि
मुहोरसइपसम्मंत्तपडिरवंधरणिहरो॥कपिवररभसोद्धावितधुतसमयप्रधावितोदधिसमाक्रान्तःसलि
लभ्रियमाणदरीमुखोरसतिप्रशाम्यत्प्रतिरवंधरणीधरः॥धरणीधरःसुवेलोरसतिशब्दायतेकीदृक्कपिव
राणांरभसेनयदुद्धावितंवेगस्तेनधुतसमयोमुक्तमर्यादोऽतःप्रधावितउत्पथगामीयउदधिस्तेनसमाक्रांतः
अतएवसलिलेनभ्रियमाणंपूर्यमाणंदरीमुखंयत्रतथाभूतस्तथाचदरीषूच्छरितसमुद्रजलप्रवेशादुत्थितशब्द
त्वेनरसतीत्यर्थःअतएवप्रशाम्यत्तनुत्तिष्ठन्प्रतिरवोयत्रतद्यथास्यादितिक्रियाविशेषणंकंदराणांजलपूर्णत्वा
प्रतिध्वनेरनुत्पत्तिरितिभावः॥३९॥अथरामधनुःशब्दनिवृत्तिमाह॥णिज्जिअसेसकलअलोपढमप्फालिअ
रसन्तघणुणिग्घोसो॥सामरिसविअंभिआणणदहवअणाअणिओचिरेणपसन्तो॥निर्जिताशेषकलकलः
प्रथमास्फालितरसद्धनुर्निर्घोषः॥सामर्षविजृंभिताननदशवदनाकर्णितश्चिरेणप्रशान्तः॥रामेणप्रथमंआस्फा
लितस्याअतएवरसतोधनुषोनिर्घोषःप्रतिरवः॥एतावानतिगभीरोयमितिसामर्षत्वाद्विजृंभितमाताम्रभुकु
टिमत्वादुद्धतमाननंयस्यतेनदशवदनेनाकर्णितःसन्चिरेणप्रशान्तोगभीरत्वात्कीदृक्निर्जितोअशेषःस
कलःशेषःस्वभिन्नोवाकलकलोयेनातथाचसामर्षेणापिरावणेनश्रुतगांभीर्यमुषितवित्तेनप्रत्युत्तरमा
चरितुंपरितमितिभावःश्रुतिबाहुल्येनाकर्णवैलक्षण्यप्रतिपादनायदशवदनपदेनोपन्यासः॥४०॥अथरा
वणजागरणमाह॥रक्खसणाहोपाआरन्तरिअकडइअकइसेण्णं॥रणमहिअंअगणेन्तोणिअएणिद्दापरिक्ख
अम्मिविउद्धो॥तावच्चराक्षसनाथःप्राकारान्तरितकटकितंकपिसैन्यं॥रणमहितंअगणयन्निजकेनिद्रापरि
क्षयेविबुद्धः॥यावद्रामधनुर्ध्वनिःशाम्यतितावदेवनिजकंस्वभावसिद्धंनतुभयादिनिमित्तकंनिद्रापरिक्षयेस
तिराक्षसनाथोविबुद्धोजागरितःकिंकुर्वन्प्राकारेणान्तरितंव्यवहितंअथचकटकितंकटकत्वेनसनाथत्वेन

व्यवस्थितं यद्वाकटकं वलयस्तद्दष्ट्वा कामोवस्थस्थितं कपिसैन्यं रणे मद्दितं सत्कृतमप्यगणयन्नेतेनाहं कारित्वमुक्तं ॥४१॥अथरावणस्यपार्श्वपरिवर्त्तनमाह ॥ वहइ विबलाअणिद्दं विइउ०वासपरिअत्तणाबद्धसुखं हं विसमसुअमंगलरवं उ०ह्णीअत्तपलाअइ अदहवअणो ॥ वहतिविपलायमाननिद्रं द्वितीयावकाशपरिवर्त्तनाबद्धमुखं ॥ विषमश्रुतमंगलरवं अवहीयमानप्रचलाइतं दशवदनः ॥ दशवदनः अवहीयमानं क्रमेण मसमानप्रचलायितं तल्पे आलस्याद्घूर्णनं वहति किंभूतं विपलायमाना ऽपगच्छतीनिद्रा यत्र एवं द्वितीयावकाशे तल्पस्यापरभागे परिवर्त्तनेन पार्श्वशयनेनाबद्धं सुखं येन अत एव किंचित्तंद्रासत्वाद्विषममपरिस्फुटं श्रुतो मंगलरवो जयजीवेत्यादिरूपस्वारणादिकृतो मृदंगादिसमुत्थोवा यत्र तथाभूतमिति मंगलरवस्याकर्णनवैषम्यनाशन्नविनाशत्वमपिध्वनितं घूर्णितं प्रचलायितमित्यमरः ॥४२॥अथामुष्यनिद्राभंगमाह ॥ तामहुमअमुच्चंतामसिणाहीरंतलोहिअच्छिणिहाअ ॥ धनुसद्दामरिसहअणिद्दासेसं दसाणणस्स विअलिअं ॥ ततामधुमदमुच्यमानामसृणापन्हियमाणलोहिताक्षिनिघातं ॥ धनुःशब्दामर्षहतं निद्राशेषं दशाननस्य विगलितं ॥ ततो घूर्णितानन्तरं दशाननस्य निद्राशेषमालस्यरूपं विगलितमपगतं किंभूतं मधुमदेन मुच्यमानोऽत एव आइषन्मसृणं अपन्हियमाणो मंदं मंदं मुन्मील्यमानो लोहिताक्षिसमूहो यत्र दशमुखत्वान्मुद्रणादिव्यापारेण मधुमदश्चक्षुषितिष्ठतीति भावः अत्तइतिपाठे अवहीयमानमपचीयमानलौहित्यं यत्र तथाभूताक्षिवृंदमित्यर्थः मुच्यन्तमिति पाठे निद्राशेषस्यैव विशेषणं मधुमदस्यापि तदानीमपगमादित्यर्थः पुनः किंभूतं मदस्पेषवं प्रार्टिरितिरामधनुःशब्दामर्षेण हतं खडितं वीररसात्यन्तेरितिभावः ॥४३॥अथामुष्यांगभंगिमाह ॥ तुंगमणितोरणाइं वएक्कक्कमलंघिअंगुलिकरालाइं ॥ उद्धंभुअजुअलाइं मुअइ वलेंजणणिअअसअणुछंगे ॥ तुंगमणितोरणानीव एकैकक्रमालंघितांगुलिकरालानि ॥ ऊर्ध्वभुजयुगलानि मुंचति वलयित्वा निजकशयनोत्संगे ॥ रावणः भुजयुगलानि उर्ध्वं बलायित्वा उत्थाप्य तिर्यग्गमीत्वा वलित्वा स्वयमेव पार्श्वायितो भूत्वा वा निजकमात्मीयं न तु सीतागतमनस्कत्वादरुचिविषयमंदोदरीप्रभृतीनामपि यत् शयनं तदुत्संगे मुंचति क्षिपति २०७

विंशतिभुजत्वात् द्वयोर्द्वयोर्वामदक्षिणभुजयोरंगभंगावेकीकरणात् युगलानीति बहुत्वोपन्यासः किंभूतानि एकैकक्रमेण लंघिताः परस्परसंधिभिर्निर्गत्य परस्परमतिक्रम्य संबद्धा या अंगुलयः करयोरित्यर्थात्ताभिः करालानि दंतुराणि अत एव तुंगानि यानि मणिविशिष्टानि तोरणानि पुरद्वाराणि तानीव तत्सदृशानि भुजयोद्वारपार्श्ववर्तिस्तंभाभ्यामंगुलीनामुपरिस्थकंगुराभिस्तुल्यत्वादित्याशयः अंगदादिसत्वान्मणिशब्दोपादानं ॥४४॥अथयुद्धोद्योगसूचकरावणवाद्यरवमाह ॥ अहभअचलिएरावणभज्जंतक्खंभदिण्णसंरंसंक्खोहं ॥ आहम्मिउं पअत्तंरणसण्णाहपिसुणंदशाननतूरं ॥ अथभयचलितेरावणभज्यमानस्तंभदत्तस्फुरसंक्षोभं ॥ आहंतुं प्रवृत्तं रणसन्नाहपिशुनं दशाननतूर्यं ॥ अथरावणोत्थानानंतरं रणाययुः सन्नाहस्तस्य ज्ञापकं दशाननस्य तूर्यं पटहश्चाहंतुं प्रवृत्तं वादयितुमारब्धं किंभूतं भयाच्चलितेन पलायमानेन रावणेन भज्यमाना या बंधनस्तंभस्तेन दत्तः स्फुरंभ्यः सक्षोभो येन तं तदानीमन्योपरोधनिबंधनत्वेनातिगभीरतया तादृशरवस्य कदाप्यसंभवादितिभावः ॥४५॥अथमत्ताभिः स्कंधकैरवलाभिः सदृशपितानामपि रक्षसां श्रृंगारजित्वरं वीररसमाह ॥ रणसण्णापडिउद्धागहिअजहासन्नपहरणा रअणिअरा ॥ मीलन्तकंठलग्गं थोअं घेत्तूण निग्गआ जुवइजणं ॥ रणसंज्ञाप्रतिबुद्धा गृहीतयथासन्नप्रहरणरजनीचराः ॥ मीलन्तकंठलग्नं स्तोकं गृहीत्वा निर्गता युवतिजनं ॥ रजनीचरा मीलन्नेव निद्रालस्येन मुद्रितनेत्र एव कंठलग्नः समराय गच्छतीति कृतालिंगनो यस्तं युवतीजनमपि स्तोकं गृहीत्वा अपिश्रितेकभुजव्यापारादिनैव तत्संतोषाय प्रत्यालिंग्य निर्गता मदग्ने माके पि गच्छंतित्यहमहमिकया प्रस्थिता इति वीरोत्कर्षः सूचितः अत एवोक्तं रणाय संज्ञा संकेतो वाद्यरवः परकृतकरादिव्यापारो वा तेन प्रतिबुद्धा जागरिताः संतो गृहीतं यथानिकटवर्तिखड्गमारभ्य लगुडपर्यंतं प्रहरणमस्त्रं यैस्तथाभूता इति सत्वरतासदसद्विचारवैमुख्येन जितकाशित्वं च सूचितं ॥४६॥अजक्कमाणगहिआसअम्मि अथक्कसमरसण्णावडहे ॥ जुअइमुहाहिपिआणं णेन्ति अमुक्कसिढिलट्ठिआ अहरोट्ठा ॥ आपृच्छ्यमानगृहीताः श्रुतेआकस्मिकसमरसंज्ञापटहे ॥ युवतिमुखाल्प्रियाणां निर्यान्त्यमुक्तशिथिलस्थिता अधरोष्ठाः ॥ अकस्मात्समरायसंज्ञासंकेतस्तत्सूचक

DR. BHAU DAJI MEMORIAL

पटहे तद्ध्वनौ श्रुते सति आपृच्छ्यमानाभियोद्धुमनुज्ञाप्यतामित्यादिसंवदनविषयीक्रियमाणाभिः स्त्रीभिर्गृहीना
स्तदीनामुत्कंठयानिजाधरोष्टेन पातुमाक्रान्ताः प्रियाणामधरोष्टाः युवतिमुखान्निर्यान्ति बहिर्भवति किंभूता
अमुक्ताः प्रियैस्तासामनुरोधेनात्याजिता अपि संग्राममचिन्तत्वादव्यापारितत्वेन शिथिलस्थितास्ताभिरपि पूर्व
मनस्यैनतथानाक्रान्ततया दृढनसंबद्धा अतः स्वयमेवापसरन्तीति भावः यद्वा प्रियाभिरेव अमुक्ता अपीत्यर्थः॥
ऊर्ध्वोष्टस्य पानावर्णनेन अधस्थिता अधररूपा वा ओष्टा इत्यर्थः यद्वा अधरसहिता ओष्टा गृहीताश्चुंबिता इत्यु
भयोरन्वयः॥४७॥प्रियतमकण्ठालग्नं स्फुटम्मि अत्थक्कसमरसंणाहरवे॥ इसिणिहं णवरभअं स्फुरअक्खे
वणगलइ वाहाजुअलं॥ प्रियतमकंठावलगितं श्रुते आकस्मिकसमरसंनाहरवे॥ इषन्निभं केवलं भयं स्फुरत
क्षेपण गलति वाह्वायुगलं॥ युद्धाय गच्छतीति प्रियतमस्य कंठे अवलगितं आलिंगनाय नियोगितं युवतीनां वा
ह्वा वाहुस्तत युगलं अकस्मात्समरसंनाहायरवे ढक्कायां श्रुते सति नायकस्य युद्धरसोत्पत्त्या स्फुरस्तस्य क्षेपणत्या
गेन गलति स्खलति तत्र भयं केवलं किंचिन्निभं व्याजः तथा च संभावितयुद्धभियावाहू यविश्लथाविति व्याजमा
त्रं वस्तुतस्तु रसाश्रुरितनायकौदास्येन विलक्ष्यचित्ततया नायिकानामथालिंगनं विघटितमिति भावः रसभं
गवर्णनमशाकुनत्वेन कवीररसपोषकत्वेन च न दोषावहमित्यवधेयं॥ वाह्वा भुजायां वाहस्तु मानभेदे वृषेहये॥
४८॥ स्फुअसंणारवतुरिआ पडिवण्णा उहविहत्थवलिअकरअला॥ उव्वेलन्ति णिसिअरा वच्छवलन्तथणपिआवेट
स्फुहं॥ श्रुतसंज्ञारवत्वरिताः प्रतिपन्नायुध विहस्तवलितकरतलाः॥ उद्वेल्लयन्ति निशिचरा वक्षोवलत्स्तनं प्रिया
येष्टस्फुरवं॥ श्रुतेन संज्ञारवेनैण युद्धसंकेतशब्देन ढक्कादीनामित्यर्थात्त्वारितानिशिचराः प्रतिपन्नं प्राप्तं यदायु
द्धं तत्र वीरकामसमयोरुत्पत्त्या विहस्तं व्यग्रं अतएव धर्तुं वा एकतरपरिच्छेदाभावादङ्लितं वक्रत्वेनासम्यक्संव
द्धं करतलं येषां तथाभूताः संतो वक्षसि वलंतौ स्थिरत्वाभावादालिंगनदार्ढ्याभावेन तिर्यग्लुठंतौ स्तनौ यत्र तादृशं प्रि
याणामावेष्टमालिंगनं तत्स्फुरवं उद्वेल्लयंति चं वल्लयंति हिन्नत्ततया न स्थिरीकुर्वन्तीत्यर्थः स्तनादिपरिहारेण खड्गा २०८
दावेव हस्तस्य व्यग्रतया पि वीरस्यैवोत्कर्ष इति भावः उद्वेल्लयंतित्याजयन्ति करस्य व्यापृतत्वाद्दक्षस्यैवेति भाव इति

केचित्॥४९॥ नुभत्तीण पिअअमे अक्कअ उच्चेविपण अभंगमिकाण॥ जुअईण चिरपरूढो भयोद्विग्नेहृदयेन लग
तिमानाः॥ नायकैरकृतपूर्वेपि अकर्त्तव्येपि वा प्रणयस्य भंगेनापकान्तरासंगादिना कृते सति चिरप्ररूढो युव
तीनां मानो युद्धे किं स्यादिति भयोद्विग्नेहृदयेन लगति किंभूतानां प्रियतमात्रुंधतीनां युद्धान्निवर्तयंतीनां तथा
चानिवर्तने गमिष्यत्येवेत्यवगत्यैवतत्प्रतिबंधायमानोपगच्छतीत्यर्थः यद्वा प्रियतमारुंधतीनां भाविविश्लेषशं
कया स्फुरते नियोजयन्तीनामित्यर्थः॥५०॥ जहजह पिआइ णुब्भसंभाविअसामिआघमाणब्भहिअं॥ तहतह भडस्स
वड्ढइ सम्माणिअमच्छरेण समरुच्छाहो॥ यथा यथा प्रियया रुध्यते संभावितस्वाम्यपमानाभ्यधिकं॥ तथा तथा भटस्य व
र्द्धते सम्मानितमत्सरेण समरोत्साहः॥ भटस्य समरोत्साहः प्रियया यथा यथा रुध्यते निवर्त्तने नालिंगनौ चुंबना
दिरसात्तरापादनेन वा विव्रियते तथा तथा संभाविते न तर्किते न स्वामिनोपमानेन अभ्यधिकं यथा स्यादेवं सम्मानि
तेनादृतेन शत्रुं प्रति मात्सर्येण सह वर्द्धते अगमने सति स्वामी रावणोपमानं कुर्यादित्युत्साहमात्सर्ययोराधिक्यमि
ति भावः॥५१॥ अथ राक्षसमानां प्रयाणमाह॥ दइआकरेहिं धरिआ खलिआ पणएण पेम्मराएण हिआ॥ माणेण ववत्थ
विआ रणपरिओसेण णिग्गआ रअणिअरा॥ दयिताकराभ्यां धृताः स्खलिता प्रणयेन प्रेमरागेण हृताः॥ मानेन व्यव
स्थापिता रणपरितोषेण निर्गता रजनीचराः॥ प्रथमं दयितानां कराभ्यां धृता अथ प्रणयेन स्खलिता विहितगमनोद्य
मास्तदनु प्रेम्णा रागेण च हृता दयिताभिमुखीकृता एवंभूता अपि रजनीचरा मानेनाहंकारेण व्यवस्थापिता गमना
य स्थिरीकृतास्ततः संभोगापेक्षया रणे परितोषेण पक्षपातेन निर्गता इति प्रस्थाने निवर्त्तने नामंगलमुक्तं प्रणयप्रे
मरागानां णामुत्तरोत्तरमुत्कर्षेण भेदः॥५२॥ कियद्भिः सन्नहनं कृतमित्याह॥ स्फुरसमनुवच्छंदा कइसमसीसलु
हु आइ अम्मि रणभरे॥ लज्जंति असण्णहिउं ण अविसहन्ति पसरं परस्स णिसिअरा॥ स्फुरसमराच्चछंदाः कपिस
मशीर्षलघुकायिते रणभरे॥ लज्जन्ते सन्नद्धुं न च विषहन्ते प्रसरं परस्य निशिचराः॥ निशिचराः स्फुराणां सम
रे उच्चश्छंदोऽभिप्रायो येषां तथाभूता अतएव कपिभिः समं समशीर्षेण स्पर्द्धया लघुकेऽश्लाघनीये प्रकृते रणा
भरे सन्नद्धुं सन्नाहं कर्त्तुं लज्जन्ते स्फुरसमर एव सन्नाहो युक्त इत्याशयात् बहिर्युध्यन्ति कुत इत्यत आह वा हेतौ यतः

परस्यशत्रोः प्रसरमतिक्रमंनविषहंतेतथाचपरातिक्रमभंजनायपरंयुद्धंतितत्संन्नाहेनविनापिस्यादितिगर्व
सूचितः अभिप्रायवशाच्छदाविस्यमरः॥ ९३॥ अथप्रभूणांक्रियतांचिन्हानिमिद्धत्वपुनःसन्नहनमाह॥ वणविरे
वरूककरालंवणवेदरूमुहलंखलतद्धन्तम्॥ होइउरत्थलविसमंपुट्ठिणिराअट्ठिअंमहोअरकवअं॥ व्रणवि
वरेषुकरालंव्रणवेष्टेषुमुखरंस्खलदर्धान्तं॥ भवतुरस्थलंविषमंपृष्टनिरायतस्थितंमहोदरकवचं॥ महो
दरस्यरावणभ्रातुःकवचंभवतिकीदृशंसंधुक्षितानांव्रणानांविवरेषुकरालंसच्छिद्रं एवंव्रणानांवेष्टेषुउच्छ्वसि
तसंधुक्षितमांसभागेषुबुद्बुदाकारेषुमुखरंमिथःसंबद्धाच्छब्दायमानंअतएवतत्रैवस्खलन्नवरोधेनहठादन
पसरन्नेकदेशोयस्यएतेनबहुयुद्धविजयित्वमुक्तंएवंअःस्थलंविषमंउदरस्यमहत्वेननिम्नोन्नतं एवंपृष्टेनि
रायतंदीर्घंसंस्थितस्थितंरसमत्वेनमिलितत्वादितिभावः॥ ९४॥ प्रहस्तस्यसन्नाहनमाह॥ रूरसमरदिट्ठसा
रोरस्वसणाहस्सजंगमोयाआरो॥ सरमोकवरूकहत्थोरांणजुइहरिसिउकमेनपहत्थो॥ रूरसमरदृष्टसारो
राक्षसनाथस्यजंगमःप्राकारःशरमोक्षेषुरूहस्तःसन्नद्यतेहर्षितःक्रमेणप्रहस्तःप्रहस्तोरावणमातुलःसेनापति
क्रमेणासंभ्रमाद्यथोचितप्रकारेणसन्नह्यतेकीदृक्रूराणांसमरेदृष्टंसारंबलंयस्यतत्रकृतकार्यइत्यर्थःएवंरा
क्षसनाथस्यजंगमोगतिशीलःप्राकारोमहत्वादावरकत्वाच्च एवंशराणांमोक्षेषुरूहस्तोलघुहस्तःअतएवहर्षि
तोयुद्धरसवत्वादितिभावःपात्थ्राओइतिपाठेप्रतापइत्यर्थः॥ ९५॥ त्रिशिरस्तदाह॥ तिसिरस्ससमुक्खित्तोबद्धक
ठत्तरंकरालिउसणाहो॥ सिढिलविअउसरिआएकमुहक्खित्तहत्थतणुअम्मिउरे॥ त्रिशिरसःसमुक्षिप्तोब
द्धकंठान्तरकरालितःसन्नाहः॥ शिथिलमेवापसृतएकमुखोत्क्षिप्तहस्ततनुकेउरसित्रिशिरसोरावणपुत्रस्यमस्त
कत्रयउत्क्षिप्तःसन्नाहोबद्धानांकंठानामन्तरेषुमध्येषुकरालितःसच्छिद्रःसन्नुरसिशिथिलंमदमेवापसृतो
ऽधोगतःनतुहठादुरसिकीदृशेएकमुखेनैकोपक्रमेणउत्क्षिप्तैःसन्नाहबाहुमध्यप्रवेशनायोत्तोलितैर्हस्तैस्त
नुकेमिलितोत्थापितहस्तषट्कतयाकृष्याकृशीभूतेपीत्यर्थः अतएवकंठत्रयकरषट्कयवैषम्येनतिर्यग्भूतत्वात्प्र
तिरुद्धगतित्वेनापसरणेशैथिल्यमितिभावः॥ ९६॥ महोदरस्यतदाह॥ दिणमहिअंपगरुअसंचालेन्तमहोअरम्मि २०९

थाणं॥ वच्छत्थलपुंजइउसरइभरेणअथणोसणाहो॥ दत्तमहीकंपगुरुकंसंचालयतिमहोदरेआत्मा॥ नं॥ वक्ष
स्थलपुंजितोऽयसरतिभरेणात्मनःसन्नाहः॥ दत्तेनमहीकंपेनगुरुकंयथास्यादेवंमहोदरेआत्मानंशरीरंसंचा
लयतिसतिवक्षस्थलेपुंजितोवर्तुलीभूतोपिसन्नाहस्त्यात्मनःसन्नाहस्यैवभारेणगौरवेणापसरतिउदरमहत्वेन
प्रतिरुद्धगतिरपिदेहसंचारजनितसंचाराद्धःपततीत्यर्थः इतिसन्नाहमहत्वेनदेहमहत्वमुक्तंपूर्वंउरसिविषम
स्थितत्वमात्रमुक्तमिदानींपरिधानपर्यंतमित्यपौनरुक्त्यंअन्यएवमहोदरोयमितिवा॥ ९७॥ इंद्रजितस्तदाह॥ णी
सरिएरावणदत्तमुशलदीसन्तमसिणणिहसछाअं॥ कवअंमज्जुकरालंउत्तंभिज्जइउरत्थलेइंदइणा॥ निःसृते
रावणदंतमुसलदृश्यमानमसृणनिघर्षछायं॥ कवचंमध्यकरालंउत्तभ्यतेउरस्थलेइंद्रजितनइंद्रजितोरावण
पुत्रस्यउरस्थलंकवचमुत्तभ्यते उत्तानीक्रियतेहृदयस्योन्नतत्वेनेत्यर्थात्किंभूतंनिःसृतानांभित्वाबहिर्गतानामै
रावदगादंतमुशलानांदृश्यमानस्यमसृणस्यनूतनत्वाच्चिक्कणस्यनिवर्षस्यनिघर्षणछायाकान्तिरुज्वलतायत्र
तत् अतएवमध्यंकरालंसच्छिद्रं॥ ९८॥ अतिकायस्यतदाह॥ अइकाअस्सविकवएवच्चिरेणरूत्तरूठिअपलं
बोसारे॥ देहप्पहाविमुक्कंजाअंवोच्छिन्नकसणमिहिअंबनहं॥ अतिकायस्यापिकवचेचिरेणार्घाःस्थितप्रलंबाव
सारे॥ देहप्रभाविमुक्तंजातंव्यवच्छिन्नकृष्णमेघिकमिवनभः॥ चिरेणदेहदैर्घ्यादिलंब्यावपतनेनऊर्ध्वास्थित
ः प्रलंबावसारःप्रस्तारोयस्यस्यूरूपर्यंतलंबितेअतिकायस्यापिरावणपुत्रस्यकवचेनभोगगनंव्यवच्छिन्ना
पृथकभूयसंगताकृष्णमेघिकायत्रतथाभूतमिवजातंनभसिमेघवन्नीलकवचमपिलग्नमित्यर्थः॥ नभःकी
दृशंदेहस्यकवचान्तरितत्वेनतत्प्रभयाविमुक्तंत्यक्तमितिस्वरूपनिर्वचनमात्रंकवचमितिप्रथमान्तपाठे
देहप्रभयाश्यामयाविमुक्तंत्यक्तंसतव्यवच्छिन्नापगताकृष्णमेघिकायत्रतथाभूतंनभवजातंयथानिर्मेघ
तयाकेवलमेवनभोलक्ष्यतेतथादेहकान्तितिरोधानात्कवचमपीत्यर्थः॥ वस्तुतस्त्वत्रपक्षेदेहप्पहाणुविद्धमि
तिपाठस्तथाचदेहप्रभाभिरनुविद्धंलौहवलयच्छिद्रैःबहिर्भूयसंबद्धंज्यजातंतत्रव्यवच्छिन्नापृथकभूताकृ
ष्णमेघिकायत्रतादृशंनभवतिश्यामत्वेनकवचनभोदेहप्रभामेघयोश्चतौल्यमियथानभसिमेवालक्ष्यते

तथाकवचेदेहप्रभापीत्यर्थः ॥ ५९ ॥ धूम्राक्षस्यतदाह ॥ समरतुरिओविस्तरइ उरत्थलुब्धत्तदाविअंसो
वासं ॥ आवंधिजणकवअंवज्जमुहछिणवंधणंधुम्मक्खा ॥ समरत्वरितःखिद्यतेउरस्थलोद्वृत्तदर्शिता
शावकाशं ॥ आबध्यकवचंवज्रमुखाछिन्नबंधनंधूम्राक्षःसमरायत्वरितोधूम्राक्षःकवचंआवध्यखिद्यतेयो
हमिंद्रेणसमंयुद्धंवास्स एवकपिभिर्योद्धुंसन्नह्यामीत्याशयात्तुकिंभूतंवज्रमुखेछिन्नंबंधनंयस्यतत्तथाभूतं
अत एवउरस्थलेउद्वृत्तंबंधनाभावेनविपरीत्यपतितंअवोदर्शितोःशावकाशोःशप्रदेशोयोनेतिसंमुखघा
तेनशूरत्वमुक्तं ॥ ६० ॥ अशनिप्रभस्यतदाह ॥ रोसेणचिरपरूढेफुडिएअसणिप्पहस्सवणसंघाए ॥ कवअ
विवरंहिंगाऌअंरूहरंउप्पाअजलहरस्सवरुहिरं ॥ रोषेणचिरप्ररूढेस्फुटितेअशनिप्रभस्यव्रणसंघाते
कवचविवरेगलितंरुचिरंउत्पातजलधरस्येवरुधिरं ॥ अशनिप्रभस्यरावणमातुलस्यरुधिरंकवचविव
रेगलितंकस्मिन्सतिचिराप्ररूढेउन्नतमासीभूयसंरूधितेव्रणसंघातेरोषेणस्फुटितेसतिरोषजन्यस्यंदेनो
त्फुल्लतयाकवचघर्षणात्किंभूतस्येवउत्पातजलधरस्येवयथातस्माद्रुधिरंगलतीत्यर्थःश्यामत्वादनिष्टसू
चकत्वाच्चतेनोपमा ॥ ६१ ॥ निकुंभस्यतदाह ॥ उक्खिप्पत्तनिराअआअमरिसवेअचलिअणिउञ्जस्सउरे ॥ फुडदा
विअसीमंताविअलिअलोहवलआविसढइमाठी ॥ उक्षिप्यमाननिरायताअमर्षवगबलितेनिकुंभस्यार
सि ॥ स्फुटदर्शितसीमंताविगलितलोहवलयाविशीर्यमाठीनिकुंभस्यकुंभकर्णसुतस्यअमर्षस्यक्रोधस्यवे
गेनत्वरयासमुद्गमेनवलितोछसितेउरसिमाठीदेश्यालोहांगुलीयघटिताजिरहइतिप्रसिद्धःसन्नाहोवि
शीर्यतेद्विधाभवतिकिंभूताउक्षिप्यमाणासतीनिरायतादीर्घाएवस्फुटदर्शितःसीमंताद्विधाभावरेखाययया
अत एवविगलितानित्रुटित्वापतितानिलोहवलयानियस्यास्तथाचक्रोधेनहृदयस्योत्फुल्लतयाकवचस्याति
पीडनाद्विधाभावेनामंगलंसूचितं ॥ ६२ ॥ शुकस्यतदाह ॥ खरपहरणव्वाअसहंसुरू ३० विरुपरिछअंनिबंध
इकवअं ॥ समुहट्ठिअंणआणइपुरआदुवाररामसरदुज्जीअं ॥ खरप्रहरणघातसहंशुकोपिसुरपरिछदं
निबध्नातिकवचंसंमुखस्थितंनजानातिपुरतोदुर्वाररामशरदु।र्जीतंमुपद्रवंतेषांदुर्जतिंदेहंभित्वादुर्निगमंवा २१०

संमुखंस्थितंपुरोवर्त्यपिनजानातिनपश्यतिअत एवसन्नह्यतीत्यर्थः ॥ रामशरनिपातेकवचेनापिनरक्षेतिभा
वः ॥ ६३ ॥ सारणस्यसन्नहनाभावमाह ॥ तुरिआउछिअकामिणिवलत्तधणिअोवऊहणाहिणाणं ॥ यणपरि
मलंअदत्तोणीइच्चिअसारणोणवंधइकवअं ॥ त्वरितापृष्टकामिनीवलद्धन्योपगूहनाभिज्ञानं ॥ स्तनपरि
मंडलंदयमानोनिरंत्येचसारणोनबध्नातिकवचं ॥ अपरोमंत्रीसारणःनिरेतिगुर्द्धंयगच्छत्येवपरंकवचंन
बध्नातिकिंभूतस्त्वरितंआपृष्टायायास्यामीतिसंभाषितायाःकामिन्यास्तदेववलतोधन्योपगूहनस्यगाढालिंग
नस्यअभिज्ञानंचिन्हंस्तनयोःपरिमलंकस्तूरिकापंकलेपंआलिंगनकालेस्ववाक्षसिलग्नमित्यर्थादयमानो
रक्षन्कवचापमर्द्दनतन्निष्टदितिश्रृंगारितयाप्रियायामनुरागित्वमुक्तं ॥ ६४ ॥ अथरथानांघटितमाह ॥ जुत्ता
कुंभस्सरहेमाआबद्धमुहलंधआरधअवडेरुररुहिरदट्टकेसरगुप्पत्तभुअंगपग्गहाकेसरिणो ॥ जुत्काः
कुंभस्यरथेमायाबद्धमुखरागान्धकारध्वजपटे ॥ रुररुधिरदष्टकेसरव्याकुलभुजंगप्रग्रहाःकेसरिणः ॥ माया
बद्धोमुखरागान्धकारएवध्वजपटोयत्रतत्रकुंभकर्णपुत्रस्यकुंभस्यरथेकेसरिणायुक्तायोजिताःकीदृशा
रुराणायुधिरेदृष्टपुव्याकुलाभुजंगाएवप्रग्रहारवलीनरज्जवोयेषुतेरुधिरशोणितसंबंधात्स्कंधवालानांका
र्कश्येनदुःस्थतयाभुजगानांव्याकुलत्वमितिभावः ॥ ६५ ॥ अथराक्षसानांखड्गग्रहणमाह ॥ णिम्माएइअमरिसं
पडिहत्थेइगरुअंपिसामिअसुकअं ॥ विहुणइपराहिमाणंणिमि ३० मुट्ठिम्मिमंडलग्गस्सकरो ॥ निर्मापयत्य
मर्षंप्रतिहस्तयतिगुरुकमपिसामसुकृतं ॥ विधुनोतिपराभिमानंनियोजितोमुष्टौमंडलाग्रस्यकरः ॥ अयं
खड्गःअमर्षंजनयतिअतोगुरुकमपिस्वामिनःसुकृतमुपकारंप्रतिहस्तयतिप्रतिस्वीकरोतिप्रत्युपकरोती
त्यर्थः ॥ एवंपरेषामपिमानमहंकारंविधुनोतीकृत्वाकरोहस्तोमंडलाग्रस्यखड्गस्यमुष्टौखड्गधारणस्थानेनियो
जितोवीरैरित्यर्थात्मिलिओइतिपाठेमिलितइत्यर्थः ॥ ६६ ॥ अथदेवस्त्रीणांस्वयंवरोत्कंठामाह ॥ सणज्जुत्ति
समत्थाणसहिज्जइकलुअलोविसूरइहिअअं ॥ विरएइसुरवहूजणोविमाणतोरणओगोग ३० णेवछं ॥ सन्न
ह्यंतिसमर्थानिसह्यतेकलकलःखिद्यतेहृदयं ॥ विरचयतिसुरवधूजनोविमानतोरणगतागतोनेपथ्यं ॥

समर्थाराक्षसासन्नह्यंतितैरेवकलकलःकपीनामित्यर्थान्नसह्यंतेतेषामेवहृदयंखिद्यतेयुद्धालाभादितिकृ
त्वासुराणांवधूजनाविमानस्थतोरणद्वारिगतागतस्यनेपथ्यमलंकारंविरचयतिवीराणांवरणायुद्धजिज्ञास
याविमानस्थद्वारपर्यंतमागच्छंतीतदानींयुद्धाभावान्नेपथ्यचिकीर्षयापुनरन्तर्गच्छतिचेतिसंग्रामेभविष्यद्व
हुशूरपतनंसूचितं ॥ ६७ ॥ अथलंकावरोधमाह ॥ इअजासमरसअण्हो सणज्जइहरिसिउ०णिसाअरलो
उ० ॥ तारबंधु इदीसत्तं अल्लीणंचिअसमत्तओकइसेणं ॥ इतियावत्समरसतृष्णःसंनह्यतिहर्षितोनिशा
चरलोकः ॥ तावद्रघुपतिदृश्यमानंलीनंकआलीनमेवसमंततःकपिसैन्यं ॥ इत्यनेनप्रकारेणसमरेसतृ
ष्णानिशाचरलोकोहर्षितःसन्यावत्सन्नह्यतितावदेवरघुपतिनादृश्यमानंकपिसैन्यंसमंतादालीनमे
वसंगतमवलंकायामित्यर्थादितिहठाल्लंकावरोधनंकपीनामहंकारित्वमुक्तं ॥ ६८ ॥ अथलंकोपमर्दमा
ह ॥ भग्गारामविउ०लदलिउज्जाणभवणावणिगामलहुईं ॥ लवगात्तिपवंगासाहाविणिअंसणिणिसाअरण
अरिं ॥ इहप्लवंगाःशोभायाविशेषतानिर्दशनंदृष्टान्तभूतानिशाचरनगरींलंकामवक्रामन्ति उपमर्दंयतित्र
त्रप्रकारमाह ॥ कीदृशींभग्नेआरामैःसाधारणोपवनैर्विलासैभग्नारामांविलोकांचेतिवागवंदलितैरुद्यानैःरा
जोपवनैर्भवनैगृहैरूपनिर्गमैद्वारैर्लघुकामल्पीभूतांशोभांवविशिष्टनिवसनवस्त्रंयस्यइत्यर्थोवाआरामः
स्यादुपवनंपुमानाक्रीडउद्यानमित्यथमरः ॥ ६९ ॥ अथप्लवगानांकालाहलमाह ॥ अंकाअअरअणिअर
धीराअन्तपवंआह्विवधरिज्जन्त ॥ रसइविसमाअअपअरोसरुद्धाइअपरिट्ठिअंपवअवलं ॥ अंकागतर
जनीचरंधारायमाणप्लवगाधिपध्रियमाणंरसतिविषमागतपदंरोषाद्धावितपरिस्थितंप्लवगवलं ॥ अंके
आगतालंकातःप्रत्यासन्नारजनीचरायस्यतथाभूतंप्लवगबलंरसतिशब्दायतेराक्षसातदृष्ट्वेत्यर्थात्किं
भूतंधीरायमानंप्लवगयतिनाध्रियमाणमवेक्ष्यमाणंहेकपयोमाधावतरजनीचरानिर्यान्तुततोमारयते
त्युक्त्वानिरुध्यमानंवाअतएवनिशाचरानागच्छतोदृष्ट्वाहंतुंरोषेणाद्धावितंपश्चात्सुग्रीवनिषेधेनपरिस्थि २३१
तंव्यस्तमागतंपदंयस्यतथाजातिस्वभावादित्यर्थः ॥ ७० ॥ अथनभसिदेवतावतरणमाह ॥ रहसहिअत

गविअकइसेन्नछंदणहअलल्हीणसुरं ॥ बंदित्तणदट्ठव्वंपेच्छइसुरबहुजणोणिसाअरणअरिं ॥ रभसा
लीयमानगर्वितकपिसैन्यछंदनभस्तलालीनसुरा ॥ वंदीत्वद्रष्टव्यांप्रेक्षतेसुरवधूजनोनिशाचरनगरीं
लंकांप्रेक्षतेहर्षेणेत्यर्थात् ॥ किंभूतांपूर्वंबंदीत्वेनवंदीभावेनद्रष्टव्यांनतुरावणभियास्वारसिकंतयेति
रावणप्रतापभंगःसूचितःपुनःकीदृशींरभसेनवेगेनालीयमानंसंगतंसद्गर्वितंयत्कपिसैन्यंतच्छंदेनतद
शेननभस्तलेआलीनाअवतीर्णासुरायत्रतथाभूतांयेनैवक्रमेणप्राकारंपरितःकपयःस्थितातेनैवक्रमे
णराक्षसभियाकपिसन्निधिमाश्रित्यलंकापरिनभसिदेवताअपिस्थिताइत्यर्थः ॥ ७१ ॥ अथप्लवगानामितस्त
तोधावनेवेगातिशयमाह ॥ रणरहस्सपसत्थिआणउरुवेअविसट्टशेलसिहरक्खलिआ ॥ पवआणपढम
भग्गापडन्तिसमइच्छिआणमग्गेणदुमा ॥ रणरभसप्रस्थितानामूरुवेगविशीर्णवेगशिखरस्खलिताः ॥ प्लव
गानांप्रथमभग्नाःपतन्तिसमतिक्रामतांमार्गेणद्रुमाः ॥ रणेरभसादुत्साहात्प्रस्थितानांप्लवगानांसमति
क्रामतामतिक्रम्यगच्छतांसतांमार्गेणपश्चाद्दीर्घवेगेनविशीर्णेभ्यःशैलशिखरेभ्यःस्खलिताःपृथक्भूता
द्रुमाःपतन्तिभूमावित्यर्थात् किंभूताप्रथमंभग्नाःवेगवशात्तदूरमप्रेगतेनोरूवातेनप्रथमंभग्नाअप्यतिक्र
म्यगतेषुकपिषुपश्चात्पतंतीतिवलवेगवपुःप्रकर्षउक्तःकेचित्तुप्रस्थितानांगतानामथातिक्रामतामागच्छ
तामित्येकेनैवयथागतागतमाचरतामित्यर्थेप्रथमंगमनसमयेभग्नाअपिभंजकवेगमारुताक्रांतत्वादेवनप
तिताअथागमनोत्तरंतन्निवृत्तौपतिताइत्यर्थमाहुः ॥ ७२ ॥ अथरावणस्यगजव्यूहाचरणमाह ॥ णहअलस
मुट्ठिएहिंयाआरन्तरिअधुअवडेहिंपवंगासूएतिगुडिअरेरइअवडाबंधसंठिएरअणिअरे ॥ नभस्तलसमुत्थि वण
तैःप्राकारान्तरितध्वजपटैःप्लवंगाःसूचयन्तिगुटितरावणरचितघटाबंधसंस्थितान्रजनीचरान्प्लवंगा
गुटितानांकृतसन्नाहानांवारणानांरचितेषुघटाबंधेषुसंस्थितान्रजनीचरान्सूचयंतितर्कयंतिकैःनभस्त
लेसमुत्थितैःप्राकारान्तरितानांध्वजानांपटैस्तथाचप्राकारव्यवधानाददृष्टानप्युत्थितपताकासमूहेनज्ञान
नुमायानुमिछंतीत्यर्थः ॥ ७३ ॥ अथकपीनांपरस्परालापमाह ॥ भमइपवणाणुसारीपवअवलस्सखलिउ

ह्निअ पउछलिउ॰ दुमभंगसहृविसमोमहिणीहरिअगरूउ॰ समुहुवणरउ॰॥ भ्रमतिपवनानुसारीप्लवग
बलस्यस्खलितोत्थितपदोछलितः॥ द्रुमभंगशाद्दविषमोमहीनिह्नदितगुरुकः समुहुपनरवः॥ प्लवगब
लस्यसमुहुपनरवोनिशाचरगमनशंकाजनितयुद्धव्यवस्थानकूलपरस्पराभाषणकोलाहलः पवनानु
सारिसन् भ्रमतिवेगजनितः साहजिकोवावायुर्दयदायह्निशिवाभितदातत्रायमपीत्यर्थः किंभूतः प्रथमंस्ख
लितंत्वरावशाद्भूमावेवविपर्यस्तपतितं अथोत्थितमुत्थापितं यत्पदंतस्मादुछलितः संचारशद्वाहृद्धाऊर्ध्वं
परितश्चप्रापितइत्यर्थः॥ अथास्यार्थद्रुमाणांभंगाछेदेनविषमानीचोच्चस्तनुमह्याभिह्नदितेनगुरुकोमांसलः
॥ ७४ ॥ अथलंकापरिखातटभंगमाह॥ णिद्दलिअमणिअडाणंदेन्तिजहासणविवरपल्हत्थाण विहडिअरूव
लरुंविअदिसावलत्तोज्झरत्तणंफडिहाणं॥ निर्दलितमणितटानांददतियथासन्नविवरपर्यस्तानांविघटितस्फवे
ललंबितदिग्बलन्निर्झरत्वंपरिखाणांनिर्दलितप्लवगसंचारात्त्रुटितंमणिमयंतटंयासांतासामतएवयथास
न्नैर्विवरैर्निम्नभागैः पर्यस्तानामितस्ततागतानांलंकापरिखानांतद्दर्तिजलानांविघटितात्कपिचंक्रमणात्कचि
त्कचिद्विशीर्णास्फवेलाह्लंबिताः पतितातिजबलंतोचक्रीभूयचहृत्तोयेनिर्झराद्भावंददतिवानराइत्यर्थात्तक
पिचंक्रमणद्विधाभूतनानास्फवेलप्रदेशानुस्यूतनानामहीनिम्नप्रदेशेनपरिखाजलानिस्फवेलमूलमतिक्रम्य
गतानिस्फवेलावतीर्णनिर्झरबुद्धिंजनयंतितत्सर्वबद्धमणिमयपरिखातडविदलनद्वारावानरानिष्पादयंतीत्य
र्थः॥ ७५॥ अथलंकागोपुरातिक्रममाह॥ जेचिरआलपरूढासमराइछिअमहिन्दपअणिक्खेवा॥ तेनवरंगोउरन्त
रविहडणचटुलेहिवाणरेहिंविहडिआयेचिरकालप्ररूढाः समरातिक्रांतमहेंद्रपदनिक्षेपाः॥ तेकेवलंगोपुरान्तर
विघटनवटुलैर्वानरैर्विघटिताः समरादतिक्रांन्तस्यपलायितस्यमहेंद्रस्ययेपदनिक्षेपाश्चरणविन्यासस्थानानिचि
रकालमारभ्यप्ररूढाउपचिताः प्रव्यक्ताइतियावत्तेगोपुरस्यपुरद्वारस्ययदन्तरंआयंतरंतस्यविघटनेविमर्दनेवटुलै
श्चंचलैर्वानरैः केवलंविघटिताविमर्दितानान्यैरित्यर्थः॥ पूर्वंलंकावंधरोसमयेपुरद्वारतएवमहेंद्रःपलायितःतच्च ॥ २३२
रणचिन्हानिसर्वैपश्यंत्विितिरावणेनाद्यापिरक्षितानितानिपुनस्तदावानरैरेवस्वरचंक्रमणविमर्दैरन्तरितानीतिमहें

द्रापकीर्तिः कपिभिरपहस्तितातत्ररावणेनप्रतिबंधः कर्तुंनशकितइतिभावः॥ केपिनलक्षयंत्विितिराक्षसानामप्य
गम्येनातिनिगूढेनक्वाचित्कलंकांतःप्रदेशेनपलायितस्यमहेन्द्रस्याद्यापिस्थितानिचरणचिन्हानिकपिभिर्विलुलि
तानीतितत्प्रदेशगमनेनकपीनामतिप्रसरःसूचितइतिवा॥ ७६॥ अथपरिखाजलक्षोभमाह॥ जाआणिसाअन्तपुरी
पाआरब्भन्तरावसेसधअवडा॥ खणवाणरसंवेल्लिअफलिहाविज्झविअरक्खसेन्दपआवा॥ जातानिशाचरपुरी
प्राकारभ्यन्तरावशेषध्वजपटा॥ क्षणवानरसंवेल्लितपरिखाविध्मापितराक्षसेंद्रप्रतापा॥ राक्षसपुरीजाताकीदृ
शीप्राकाराभ्यंतरेऽवशेषाअवशिष्टाध्वजपटायस्यांतथासागोपुरासन्नध्वजपटानांकपिभिरपनीतत्वादितिभावः
एवंक्षणंव्याप्यवानरैः संवेल्लिताभिश्चक्रमान्चंचलीकृताभिः परिखाभिर्विध्मापितोनिर्वापितः प्रशमंनीतइतियावत्
राक्षसेंद्रस्यप्रतापोयत्रतथाबहिस्तत्प्रतापरूपोवन्हिर्नास्तीतितत्प्रशमेविक्षोभितपरिखाजलप्रसरणहेतुक
त्वमुत्प्रेक्षितमन्योपिवन्हिर्जलेनशाम्यतीतिध्वनिस्तेनप्राकाराभ्यंतरमात्रपर्यवसायीरावणप्रतापस्थितइतितात्प
र्यं॥ ७७॥ अथपरिखावेष्टनमाह॥ विब्भडगिरिकूडसणिहणिरन्तरासणवाणरपरिक्खित्ता॥ जाआपाआरोह
अमज्झुव्वूढफडिहवरक्खसणअरी॥ विकटगिरिकूटसन्निभनिरन्तरासन्नवानरपरिक्षिप्ता॥ जाताप्राकारोभय
मध्यव्यूढपरिखेवराक्षसनगरी॥ विकटानियानिगिरीणांकूटानिशृंगाणितत्सन्निभैस्तत्तुल्यैर्निरंतरमासन्नैर्मि
लितैर्वानरैः परिक्षिप्तावेष्टिताराक्षसनगरीप्राकारद्वयस्यमध्येव्यूढाउपचितापरिखायस्यास्तादृशीवजातापरि
खायाएकःप्राकारस्थितएवापरःपरदिशिमंडलाकारास्थितःकपिव्यूहएवाभूदित्युत्प्रेक्षातचोभान्तरघोद्वितीयं
हेमप्राकारंकुर्वद्भिरिववानरैः॥ ७८॥ अथद्वारलंघनैःकपिभिर्द्वारमतिक्रम्यप्राकारेधिरूढमित्याह॥ तोतंचलंतवि
अडंवानरसेणंविहत्तदाराहोअं॥ जाअंणिवहणिरन्तरलंकापाआरघडिअमंडलिबंधं॥ ततस्तद्दलद्विकटंवा
नरसैन्यंविभक्तद्वाराभोगंजातंनिवहनिरंतरलंकाप्राकारघटितमंडलीबंधं॥ ततःपरिखापरोधानंतरंतद्वान
रसैन्यंवलनद्वारप्रदेशात्प्रवेशायदिशिदिशिगवलत्सविकटंविस्तीर्णततोविभक्तः संकीर्णत्वाद्युगपत्प्रवेशाक्षमवि
स्तारायराक्षसनिर्गमायचभग्नोद्वारस्याभोगोविस्तारोयेनतथाभूतंसन्निवहैःसजातीयैर्निरंतरंमिलितंयथास्यात्त

से॰बं॰टी॰ २१३ थालंकाप्राकारेघटितोनिर्मितोमंडलीबंधोमंडलाकारवृस्थितिर्येनतथाजातंप्राकारोपरिप्राकारक्रमेणस्थितमि
त्यर्थः॥ विभक्तःकपिमुख्येभ्योविभज्यदत्तोद्वारणामाभागोयेनलंकाद्वाराणांबहुत्वादित्यर्थः॥७९॥ अथापरंपि
परिखाप्रांतवर्तिनस्तत्रदृष्ट्वापरिखामतिक्रम्यप्राकारंलंघितवंतइत्याह॥ विइउ॰अहिगंभीरेफलिहावत्तम्मिवि
इअबद्धगिरिवहा आढत्तालंघेउंविइअस्कवेलम्ववाणरापाआरं द्वितीयोदधिगंभीरेपरिखापृष्टेद्वितीयब
द्धगिरिपथाः॥आस्वालंघयितुंद्वितीयस्कवेलमिववानराःप्राकारं॥ वानराद्वितीयंस्कवेलमिवप्राकारंलंघयितु
मारब्धालंघितवंतइत्यर्थः॥ किंभूताद्वितीयसमुद्रवद्गंभीरेपरिषावेष्ठितम्मंडलेद्वितीयोवद्धोगिरिभिःपंथायैस्तेएको
गिरिपथःसमुद्रेदत्तःपरःपरिखायामित्यर्थस्तथाचयथास्कवेलमूलेसमुद्रस्तथाप्राकारमूलेपरिखेत्युभयोरुभ
यत्वेनोत्प्रेक्षयामहत्वमुक्तं॥८०॥ अथरक्षोबलप्रयाणमाह॥ णवरिअमुक्ककलअलंवाणरतुलिअम्मिदहमुहाहि
ह्वाणे वलिअंरअणिअरबलंखअग्गिविहुएव्वमहिअलेउअहिजलं॥अनंतरंचमुक्तकलकलंवाणरतुलितेदश
मुखाधिष्ठानेचलितंरजनीचरबलंक्षयाग्निविधुतइवमहीतलेउदधिजलं॥ प्राकारातिक्रमानंतरंचरजनीचराणां
बलंमुक्तकलकलंसञ्चलितंयुद्धायेत्यर्थात्कसतिदशमुखस्याधिष्ठानेपुरेवानरैस्तुलितेआक्रांतेसतिएतदुपरि
स्थातुंनयुक्तमित्याशयात्किमिवउदधिजलमिवयथाक्षयःप्रलयस्तत्कालीनाग्निभिर्विधुतेव्याप्यव्याकुलीकृतेम
हीतलेतन्निर्वापणायसमुद्रजलंचलतीतिकपिसत्वेनवह्निकपिसैन्ययोःश्यामत्वेनजलधिजलरावणबलयोर्मह
त्वेनचलंकामहीतलयोस्तोल्यं॥८१॥ अथनिकुंभस्यप्रयाणमाह॥ आरूढोणीइरहंआसणगइन्दलंघणबलंतेहिं
सरहेहिंसमरतुलिउ॰जुत्तंजुअभग्गकेसरेहिणिउंभो॥ आरूढोनिरेतिरथंआसन्नगजेंद्रलंघनबलमानैःशरभैः
समरत्वरितोयुक्तंयुगभग्नकेसरैर्निकुंभः॥ समरायत्वरितोनिकुंभःशरभैरष्टापदैर्युक्तंरथमारूढःसन्निरेतिनिर्ग
च्छतिकिंभूतैःआसन्नाःपुरोवर्तिनोयेगजेंद्रास्तल्लंघनायबलमानैःसारथिनाप्रतिरोध्यातियभवद्भिःसिंहाभिभा
वकत्वेनहस्तिलंघनसमर्थत्वादेवंयुगेनस्कंधवर्तिकाष्टविशेषेणसंघर्षणाद्भग्नाःकेसरायेषांतैरित्यभ्यासतःस्क
शिक्षितत्वमुक्तं॥८२॥ अथप्रजंघस्यप्रयाणमाह॥ कहविपडिबद्धकव॰उ॰समरासंघिअसमत्थवाणरलो॰उ॰ णीइ २१३

धणुकोडिताडणतूरविअतुरंगमोरहणयअघो॥ कथमपिप्रतिबद्धकवचःसमराध्यवसितसमस्तवानरलोकः
निरेतिधनुःकोटिताडनत्वरिततुरंगमोरथेनप्रजंघः॥ प्रजंघनामराक्षसोरथेननिरेतिकीदृक् कथमपित्वरयायथा
तथाप्रतिबद्धःकवचोयेनएवंसमरेऽध्यवसितःसर्वैःसहमयैवयोद्धव्यमितिस्थिरीकृतःसमस्तवानरलोकोयेनै
तथाधनुःकोट्याताडनेनप्रेरणयात्वरांकारितास्तुरंगमायेनेतियुद्धोत्साहःसूचितः॥८३॥ अथेंद्रजिन्निर्गमनमाह॥ च
डुलवडाआणिवहोकंचणघरभित्तिविअडकूवरबंधे॥ इन्दइणाविपसरिउ॰एक्कुद्देसोव्वरक्खसउरीअरहो॥ चटुल
पताकानिवहःकांचनगृहभित्तिविकटकूवरबंधः॥ इंद्रजितोपिप्रसृतएकोद्देशइवराक्षसपुर्यारथः॥ इंद्रजितोपिरथः
प्रसृतःचलितःकीदृक्॥ चटुलश्चंचलःपताकानिवहोयत्रकांचनगृहभित्तिवद्विकटोविस्तीर्णःकूवरस्यबंधोविन्यासो
यत्रकइवराक्षसपुर्यालंकायाएकउद्देशःप्रदेशइवचलितइत्युत्प्रेक्षातत्रापिपताकानांकनकगृहभित्तीनांवसत्वादिति
भावःकूवरस्तुयुगंधरः॥८४॥ तस्यतुरंगानाह॥ खणपरिअत्तमइन्दाखणलक्खिअकुंजराखणन्तरमहिसा॥ तस्स
खणमेत्तमेहारहंवहन्तिखणपव्वआअतुरंगा॥ क्षणपरिवृत्तमृगेंद्राःक्षणलक्षितकुंजराःक्षणान्तरमहिषाःतस्यक्ष
णमात्रमेघारथंवहन्तिक्षणपर्वताश्वतुरंगाः॥ तस्यरथंतुरंगावहंतिकीदृशाःक्षणंपरिवृत्तास्त्यक्ततुरंगरूपागत
व्यदिग्विपरीतमुखावारणाकान्तरयावामृगेंद्राःसिंहाकाराःक्षणंलक्षिताःकुंजराःक्षणांतरेमहिषाक्षणमात्रंमे
घाःक्षणंगतिमन्तःपर्वताइतींद्रजितोमायावित्वमुक्तं॥८५॥ अथयोधानामितरानपेक्षनिर्गमनमाह॥ अविसज्जिअ
णिक्कन्ते अत्थाणक्खोहहलहलुट्ठिअमुहले॥ दहवअणस्सरक्खावइआणाभंगोवितक्खणंणिअअवले॥ अविस
र्ज्जितनिष्क्रान्ते अस्थानक्षोभहलहलोत्थितमुखरे॥ दशवदनस्यरक्षायत्ते आज्ञाभंगोपितत्क्षणंनिजकबले॥ तत्क्ष
णंनिर्गमावसरेअविसर्ज्जितंगंतुमनाज्ञापितंएकेकंनगंतव्यंकिंतुसंभूयेतिनिवारितनिर्गमंपिवानिष्क्रांते॥ हम
हमिकयापुरोगतेनिजकबलेदशवदनस्याज्ञाभंगोपिरक्षायतेआज्ञाभंगोनरेंद्राणामितिनिषेधेपिधन्याअ
मीयन्निवारिताअपिनतिष्ठंतीतिमदासाःशूरश्चेतिमनःप्रीतिमुत्पादयंतीत्यर्थःकिंभूतेअस्थानक्षोभादाकस्मिक
क्षोभादुत्थितेनहलहलेनकलकलेनमुखरेशब्दायमानेपूर्वपातानियमात्यद्वाहलहलशब्दोयुद्धोत्कंठायांदेशी

डा॰भाऊदाजीइदपुस्तकसंग्रहः DR. BHAU DAJI MEMORIAL

युद्धोत्कंठया मुखरइत्यर्थः वस्तुतस्तु हलहलमलिरितिप्रसिद्धार्थवाचीतेन हलहलस्योत्थितेनोत्थानेन मुखरइत्य
र्थः॥ ८६॥ अथतत्कालसेनासज्जीकरणमाह॥ गुडिअगुडिअन्तभडसोहइरणतुरिअजुज्जन्तरहं॥ घडिअ
घडन्तगअघडंवलिअचलन्ततुरङ्गणिसाअरसेणं॥ गुटितगुध्यमानभटंशोभते रणत्वरितयुक्तयुज्यमान
रथं॥ घटितघट्यमानगजघटंचलितचलत्तुरंगंनिशाचरसैन्य निशाचरसैन्यंशोभते॥ कीदृक् गुटिताः कृतस
न्नाहाः गुध्यमानाः सन्नह्यमानाभटा यत्र केचित्संनद्धाः केचित्सनह्यन्तीत्यर्थः॥ एवंरणत्वरितेनवीरेणकेचिद्यु
क्ताः केचिद्युज्यमानारथा यत्र तुरगादिभिरित्यर्थादेवंकाश्चिद्घटिताकाश्चिद्घट्यमानागजघटायत्र तथाकेचिच्च
लिताः केचित्तदाचलन्तस्तुरगायत्र तथाभूतमितिरणसंरंभउक्तः॥ ८७॥ अथबलस्यनिष्क्रमणमाह॥ हत्थि
गअवरिअरामं रहगअसघविअपवअवइसोमित्तिं॥ आसगअवरिअहणुमं भूमीगअवरिअकइवलंणीइवलं॥
हस्तिगतवृत्तरामं रथगतस्थापितप्लवगपतिसौमित्रिअश्वगतवृतहनूमन्तंभूमीगतवृतकपिबलंनिरेतिबलं हस्ति
गतैर्वृतोऽनेनसममस्माभिर्योद्धव्यमितिस्वीकृतोरामोयत्रतस्यनायकत्वान्मुख्यबलेनयुद्धमितिभावः एवंरथगतैःस
स्थापितावताभ्यांसहास्माभिर्योद्धव्यमितिस्थिरीकृतौसौमित्रिप्लवगपतीयत्र एवं अश्वगतैर्वृतोयोद्धव्यत्वेनस्वीकृतो
हनूमान्यत्र तथाभूमिगतैःपत्तिभिर्वृतंस्वीकृतमवशिष्टंकपिबलंयत्र तद्बलंनिशाचराणामित्यर्थान्निरेतिकेचित्तुव
रियइत्यत्रवारितःपरिवारितइत्यर्थस्तेनहस्तिगतैर्वारितावेष्टितोरामोयत्रेतिक्रमेणसर्वत्रार्थमाहुः॥ ८८॥ अ
थबलस्यनिष्क्रमणप्रकारमाह॥ रहसंघट्टक्खलिअंगोउरमुहपुंजइज्जमाणगअघडं॥ भवणंतरंगुप्यन्तंअ
घडन्तेक्कमुहंणिग्गमवलइवलं॥ रथसंघट्टस्खलितंगोपुरमुखपुंज्यमानगजघटं॥ भवनान्तरथ्याकुलंअघ
टमानैकमुखनिर्गमंवलतिवलं॥ तद्बलंअघटमानोसंपद्यमानएकमुखेनैकोपक्रमेणएकदेतियावत् निर्गमो
पस्यतथासद्बलतिनिर्गमंव्यग्रतयादिशिदिशिमंडलीमाचरतीत्यर्थः किंभूतंरथानांसंघट्टेनसमर्द्देनस्खलितं
प्रतिहतगतिएवंगोपुरमुखेनपुंज्यमानाःसंकीर्णतयावर्त्तुलीक्रियमाणागजघटायत्रयुगपन्निर्गमनाभावात्त
थाभवनयोरन्तरमध्येथ्याकुलंऋजुमार्गालाभादितिभावः॥ ८९॥ अथरथानांवहिर्भावमाह॥ दुःखेणगोउराइव २१४

लन्तजुअकोडिविहडिअकवाडाइं॥ वोलन्तिरक्खसरहातंसोणामिअधआहउंवरितडिमादुःखेनगोपुराणिव
लद्युगकोटिविघटितकपाटानि॥ व्यतिक्रामन्तिराक्षसरथास्तिर्यगवनामितध्वजाहतोपरितडिमाः राक्षसरथागोपुराणि
पुरद्वाराणिसंकीर्णतयादुःखेनव्यतिक्रामन्तिलंघन्ते किंभूतानिकपाटयोरन्तरासंकीर्णतयालग्नकोटित्वेनवलतोवक्री
भवतोयुगस्यतुरगस्कंधकाष्ठस्यकोटिभ्यांप्रान्ताभ्यामतिक्रमसंचारेणविघटितेकपाटेयत्रतानिरथाः किंभूताउच्च
तयानिर्गमसौकर्याय तिर्यगवनामितेनसारथिनेत्यर्थात् ध्वजेनआहतंस्पृष्टमुपरितडिमंद्वारस्योपरिभागोयैः॥ ९०॥
अथभूमेभारमाह॥ णिस्सढिअदिसागइन्दभग्गभुअंगप्फुणंदलिअपाआलं॥ गतुअंपिरक्खसाणअइराहोत्तलहुअं
भरंसहइमही॥ निपातितदिग्गजेन्द्रभग्नभुजंगफणंदलितपातालं गुरुकमपिराक्षसानामचिराद्भविष्यल्लघुकंभ
रंसहतेमही॥ महीस्कंधंसहाराक्षसानांगुरुकमपिभरंसहतेकुत इत आह॥ अचिरादल्पकालेनैवभविष्यल्लघु
कंलघुभविष्यतंराक्षसानांक्षयादितिभावः होत्तइतिलड्वर्थेशतृवस्तुतस्तुभविष्यतीलघुतायस्येतिभविष्यल्लघुसंभावि
ष्यदल्पताकमित्यर्थः भरंपुनः किंभूतंनिपातितादिग्गजेन्द्रायेनभूमेरवनमनेनदंतावष्टंभत्यागादितिभावः अत
एवभग्नाभुजंगस्यशेषस्यफणायस्मात्तथादलितंपातालंयेनभूपतनादित्यर्थः अन्येनापिगुरुकमपिदुःखमल्पका
लव्यापिबुध्वासह्यतइतिध्वनिः॥ ९१॥ अथार्द्धबलनिर्गममाह॥ अग्गक्खंधावडिअंमज्झद्दारमुहरुद्धपुंजिअ
पिहुलं॥ ऊसासिअसाहिमुहंकूलाभरिअभवणंगणंणीइवलं॥ अग्रस्कंधापतितंमध्यद्वारमुखरुद्धपुंजितपृथुलं
उच्छ्वासितरथ्यामुखंकूलधृतभवनगणंनिरेतिवलं॥ वलंनिरेतिबहिर्भवति॥ कीदृक् अग्रस्कंधनसैन्याग्रभागेन
आयतितंवहिर्भूयप्रसृतंयदाअग्रस्कंधंवहिर्वर्त्तिकपिसैन्याग्रेआपतितंस्वाग्रभागेनैवेत्यर्थात् मध्यमध्यभा
गेसंकीर्णतयाद्वारमुखेनरुद्धंसत्पुंजितंवर्त्तुलीकृतमतएवपृथुलंपुष्टंअथउच्छ्वासितंक्रियतांनिर्गमनादसं
वाधीकृतंरथ्यामुखंयेनसाहिशब्दोराजमार्गोदर्शितथाकूलेनपश्चाद्भागेनभृतंझटितिनिर्गमनाभावात्पूरितंरथ्या
सन्निहितंभवनांगणंयेनेतिलवबाहुल्यमुक्तं॥ ९२॥ अथवलस्यबहिर्गमनमाह॥ इअदारकअत्थंभंणीइविहिण
विअडणिसाअरसेणं॥ एक्कमुहदरविणिग्गअसमत्थलुत्ताणपहिअणइच्छाअं॥ इतिद्वारकृतस्तंभंनिरेतिविभिन्न

विकटं निशाचरसैन्यं ॥ एकमुखदरीविनिर्गतसमस्थलोत्तानप्रस्थितनदीच्छायं ॥ निशाचरसैन्यं इत्यनेन प्रकारे
ण द्वारेकृतस्तंभसंकीर्णतया पुञ्जितसन्निर्गच्छति अत एव विभिन्नबहिर्भूय दिशि दिशि प्रसृतं सहिकटं विस्तीर्णं
पुनः किंभूतं एकमुखी या दरी ततो निर्गता अथ बहिः समस्थले उत्तानप्रस्थिता गभीरप्रसृता या नदी तदच्छा
याकांतिर्यस्य तथाभूतं बलबाहुल्येन द्वारसैन्यप्रतिभासोदकमुखस्यकृत तथा च यथा कंदरातो जलं निर्गत्य बहिः
प्रसरति तथा लंकातस्सेनापीति दरीलंकयोर्जलसैन्ययोः साम्यं ॥ ९३ ॥ अथ लंकायां सैन्यशून्यतामाह ॥ जाआई तं
मुहूत्तं पुण्णज्झीणसरिआपुलिणसोहाइं ॥ रक्खसघरंगणाइं गअसमराहिमुहजोहपडदिक्काइं ॥ जातानि तं
मुहूर्त्तं पूर्णक्षीणसरित्पुलिनशोभानि ॥ राक्षसगृहांगणानि गतसमराभिमुखयोधप्रतिरिक्तानि तन्मु
हूर्तव्याप्य राक्षसानां गृहांगणात निर्गतैः समराभिमुखयोधैः प्रतिरिक्तानि शून्यानि सति प्रथमं जलेन पूर्णं अथ
क्षीणं वन्याजलनिर्गमात तुच्छं यत्सरितां पुलिनं तत्समानशोभानि जातानि यथा जलनिर्गमात्पुलिनं तुलं भाम
ते तथा सेनानिर्गमाद्गृहांगणान्यपीत्यर्थः ॥ ९४ ॥ अथ कपिसैन्यस्य राक्षससैन्यसंमुखागमनमाह ॥ लंकावेढ
णतुरिउ आलोइअदारणिन्तरक्खसलोओ ॥ रसिऊण पवअणिवहो खरपवणाइद्धवणदवोघं पचलिओ ॥ लं
कावेष्टनत्वरित आलोकितद्वारनिर्यद्राक्षसलोकः रसित्वा प्लवगनिवहः खरपवनाविद्धवनदव इव प्रचलि
तः ॥ लंकावेष्टनेत्वरितः प्लवगनिवहः आलोकितद्वारान्निर्यन्राक्षसलोको येन तथाभूतः सन् रसित्वा सिंहना
दं कृत्वा प्रचलितः क इव वनदव इव यथा खरपवनेना विद्धः क्षिप्तः प्रसारित इति यावत्तादृशो वनदवः प्राच
लति तथा राक्षसान्दृष्ट्वा कपयः प्रचेलुरित्यर्थः ॥ वनदवकपिसैन्ययोः कपिशत्वेनोद्धतत्वेन परेषां दाहकत्वेन
च साम्यं ॥ ९५ ॥ अथ राक्षसबलसंचारक्रममाह ॥ पहररज्जुअपाइक्कपरिवड्ढइ यक्खपसरिअआसारोहं मुक्कं
कुसमाअंगसिढिलिअरहपहं णिसाअरसेणं प्रहाररिजुकपदातिपरिवर्द्धतेपक्षप्रसृताश्वारोहं मुक्तां
कुशमातंगशिथिलतरथप्रपहं निशाचरसैन्यं ततः निशाचरसैन्यं परिवर्द्धते उत्तरोत्तरं भटानामागमनादि
तिभावः किंभूतं प्रहाररिजुकावेध्यसमुखीकृतकुंताः पदातयो यत्र एवं पक्षयोः पार्श्वयोः प्रसृता अश्वारोहा २१५

अश्ववारा यत्र ॥ एवं मुक्तांकुशास्यक्तांकुशावरोधा मातंगा यत्र तथाभूतमिति युद्धरीतिरुक्ता ॥ ९६ ॥ अथैतदुपरि
कपिसैन्यसंचारक्रममाह ॥ तो एक्काअअवअएक्कक्कमदिण्णमहिअलब्भहिअपअं ॥ ठाइ अणोहीणभडं तह परि
मंडलपहाविअं कइसेण्णं ॥ तत एकागतवेगं एकैकक्रमदत्तमहीतलाभ्यधिकपदं ॥ तिष्ठत्यनवहीनभटं तथाप
रिमंडलप्रधावितं कपिसैन्यं ॥ ततो रक्षोबलागमनोत्तरं कपिसैन्यं तथा तेन प्रकारेण तिष्ठति प्राकारतलमव
लंब्येत्यर्थात् किंभूतं एकागत एकक्रमागतो वेगो यस्य तत्प्रथमं मेतान्दृष्ट्वा एकरूपेण धावतमित्यर्थः अथ क्रिय
द्दूरमागत्य एकैकक्रमेण परस्परमपेक्ष्य दत्तं महीतलाभ्यधिकं उत्तरोत्तरभूम्यतिक्रामकं पदं येन प्रतिपक्षचेष्टा
निरूप्य लघुलघुकृतान्निमान्निमभूमिग्रहणमित्यर्थः अथ अनवहीना अनपगतधैर्या भटा यत्र तथा सत्परिमंडले
न मंडलीमुपक्रम्य प्रधावितं पुनः कृतवेगमित्यर्थः ॥ ९७ ॥ अथोभयसैन्यसंघट्टमाह ॥ पत्थंतिजाअरोसा पत्थिज्ज
न्ति अ महग्घरणसोंडीरा णिहणन्ति णिहम्मन्ति अ अणुराएण ण वरं ण भज्जन्ति भडा ॥ प्रार्थयन्ते जातरोषाः प्रार्थ्यंते च
महार्घरणशौटीर्याः ॥ निघ्नन्ति निहन्यंते च अनुरागेण केवलं न भज्यंते भटाः ॥ जातरोषा भटाः प्रार्थयंते परानुप
रुधंति युद्धायाकारयंति वा न केवलं प्रार्थयंते किंतु परैः प्रार्थ्यंते उपरुध्यंते च योद्धुमाह्वयंते वा एवं महार्घमुत्कृष्टं
रणे शौटीर्यं महं कारो दर्पो वा येषां तथाभूतास्संतो निघ्नंति परानित्यर्थात्तं केवलं निघ्नंति किंतु निहन्यंते च परैरि
त्यर्थादेव व्यतिरेक सति अनुरागेण युद्धोत्साहेन केवलं न भज्यत इति शौर्यमुक्तं प्रार्थितः शत्रुसंरुद्धे याचिते भिहि
ते पि च ॥ ९८ ॥ सैन्यसंघट्टदशयारागदासप्रकाशिता ॥ रामसेतुप्रदीपस्य पूर्णीभूत द्वादशी शिखा ॥ १२ ॥
अथ पूरस्मशाणोद्वंद्वयुद्धमाह ॥ अह णिग्गअमिलिएहिं अल्लीणसमागएहिं अविमुक्करवं ॥ रअणिअरवानरे
हिं दिण्णं सहिअं च गरुअरणपत्थाणं ॥ अथ निर्गममिलिताभ्यां आलीनसमागताभ्यां च विमुक्तरवं ॥ रजनिच
रवानराभ्यां दत्तं सोढं च गुरुकरणप्रस्थानं ॥ अथ मिथः सैन्यसमागमानंतरं रजनीचरेण च द्वाभ्यां गुरुकं रण
प्रस्थानं रणयत्रोचितं कर्म एकेन प्रदारादिना दत्तमन्येन अन्येन सोढं च देहस्यापि समर्पणादिना प्रतीष्टं चेत्य
र्थः किंभूताभ्यां एकः स्वव्यूहान्निर्गतः परः पुरो गत्वा मध्ये मिलितस्सन्निहितस्तथाभूताभ्यां एवं च विमुक्तरवं

सिंहनादं यथास्यादेवंआलीनावाश्लेषादेकीभूतौ सन्तौ समागतौ समं तुल्यं संगतौ ताभ्यामित्यर्थः यद्वा रजनीचरवा
नरैरितिसंस्कृत्य लंकातः एवं कृतश्च निर्गतैरन्तरामिलितैरितिक्रमेण सर्वपूर्ववद्व्याख्येयं विमुक्तरवमितिपूर्व
क्रियाविशेषणं वा ॥ १ ॥ अथ पश्चागतानां व्यापारमाह ॥ तहअपुरिहुणिवाइअदेहा वरिणिमिअचलणपृथ
णातुरिआ एककमंअहिगआथोअंजह पहरलालसाउ सरिआ तथा च पुरोगनिपातितदेहा परिनिवेशित
चरणप्रस्थानात्वरिताः एकैकअभिगतास्तोकं यथा प्रहारलालसा अपसृताः ते योधाः एकैकं परस्परं तथाभिग
ताः संगता यथा प्रहारलालसाः प्रहारसस्पृहाः संतः स्तोकमीषदपसृत पश्चादागताश्च मिश्रणे सति खड्गादि
प्रहारो न घटत इति किंचिद्व्यवहिता इत्यर्थः किंभूताः पुरोगाणां निपातितं परैः प्रहृत्य यथा तु यद्देहं तदुपरिनिव
शिताभ्यां चरणाभ्यां यत्प्रस्थानं पुराभिमुखगमनं तत्र त्वरिताः स्थानाभावान्मृतकोपरि चरणौ दत्वेत्यर्थः स्तनम्वी
यानां मरणं दृष्ट्वाप्यपगता इति शौर्यमुक्तं पुरोगैर्निपातितयद्देह परस्येत्यर्थे परव्यूहमतिक्रम्य संगता इति दर्ष्यो
धत्वमुक्तमिति वा ॥ २ ॥ अथ भटानां शीघ्रकारितामाह ॥ जह्नहिअएहिंवचसिअं रअंअकलुसेहिं णअणेहिं जह
सच्चविअं रअणिअरेहिं रणमुहे तह पडिवक्खम्मि पहरणं हरिअं ॥ यथा हृदये व्यवसितं रजः कलुषाभ्यां न
यनाभ्यां यथा सत्यापितं रजनीचरैः रणमुखे तथा प्रतिपक्षे प्रहरणमवपीतितं ॥ रणमुखे रजनीचरैर्यथा हृदये
व्यवसितं इदमस्माभिरित्थं व्यापारयितव्यमिति चिंतितं तदनु पदमेव रजोभिः कलुषाभ्यामीषन्मुकुलिताभ्यां नयना
भ्यां यथा सत्यापितं अयमत्र प्रहर्तव्य इति निर्द्धारितं तथा तत्समकालमेव रजोमुद्रितदृष्टिनापि प्रतिपक्षे प्रहर
णं खड्गाद्यवपातितं प्रक्षिप्तमिति कायव्यापारस्य हृदयादिव्यापारतुल्यतया सत्वोत्कर्ष उक्तः ॥ भटानां सजः प्रक
र्षमाह ॥ पञ्चलुग्गग्गहिअजवा मुट्ठिपरिट्ठविअणिच्चअंपरखग्गा सच्चविअलद्धकलक्खा पढमपहारविस
आण भज्जन्ति भडा पदेलंभाभ्यदिजवा मुष्टिपरिस्थापितनिश्चकंपखड्गाः सत्यापितलब्धलक्ष्याः प्रथमप्रहारवि
षयान भज्यन्ते भटाः पदेलंबेन परव्यूहरूपस्थानप्राप्त्या अधिकवेगास्तथा मुष्टौ परिसर्वतोभावेन स्थापितत्वेन
स्थिरखड्गास्तथा सत्यापिता निजव्यूहादेव हंतव्यत्वेन स्थिरीकृतः पश्चादागत्य लब्धो लक्ष्यः शत्रुर्यैस्तथाभूता भटारा

क्षसा प्रथमप्रहारस्य विषया अपि यावदमीभिः प्रहारः क्रियते तावत्स्थापिभिरेव लक्ष्यैः कपिभिर्वृक्षादिना प्रहृता अपि
न भज्यंते नापसरंति किंतु प्रहारं प्रयच्छंति राक्षसेन प्रथमं निजसैन्यादरिः सत्यापितस्तदनु मंदं मंदमागच्छता सन्निधी
कृतवेगेन लब्धो यावत्प्रक्रियते तावदेव कृत प्रहारोपि कपिखड्गादिना ताडित इत्यर्थः यद्वा प्रथमं निजव्यूहादेव कपि
भिः शिलादिना ताडिता राक्षसास्तदनु अनेनाहं ताडित इति क्रुधा सत्यापितं लक्ष्यं कपिवेगेनागत्य लब्धा न भज्यंते न
पराजयन्ते किंतु तमभिहत्य जयंतीत्यर्थः विसमआ इत्यत्र विषदाः स्पष्टा इति वा भडा इत्यत्र भुवा इति क्वचित्पाठः ॥ ४ ॥ प्रह
तगजानां वैकल्यमाह ॥ विहुणन्तिवलिअविडवं मुहमंडलघोलणुप्पुसिअसिन्दूरे पवअमहेत्थाइद्धे कुंभअडक्खु
त्तया अवेमा अंगा विधुन्वन्ति वलितविटपान् एवं मण्डलघूर्णनोत्प्रोंछितसिंदूरान् प्लवगस्वहस्ताविद्धान् कुंभ
तटभग्नपादपान् मातंगाः प्लवगैः स्वहस्तेनाविद्धान् क्षिप्तानथ कुंभतटे भग्नान्यदपान्मातंगाः विधन्वंति पा
तनाय चालयंति न तु पातयितुं पारयंतीति कपीनां प्रहारदार्ढ्यमुक्तं विधुन्वंति अवधूय पातयंतीति गजप्रकर्ष एवेति
केचित् किंभूतान् शिरोविधूननेन चलितविटपान् तएव विटपैरेव मुखमंडले उत्प्रोंछितमग्नासितमलंकारीभूतं
सिंदूरं यैस्तान् ॥ ५ ॥ रावणप्रोत्साहनस्य दुरंततामाह ॥ रोसस्स दासरहिणो मअणस्स अ दूसहस्स रक्खसवइणो ॥ म
संअं चिअ आढत्ता दोण्ह वि अणुरूअदारुणो परिणामो ॥ रोषस्य दाशरथेर्मदनस्य च दुःसहस्य राक्षसपतेः सममेवा
रब्धो द्वयोरप्यनुरूपदारुणः परिणामः ॥ दाशरथे रोषस्य राक्षसपतेर्मदनस्य च द्वयोरप्यनुरूपो योग्यो दारुणो दुरंतः
परिणामः पर्यवसानं सममेकदैवारब्धो दैवेनेत्यर्थात् युद्धेन वा जगन्मातुः सीताया अभिलाषुकस्य रावणस्य यः का
मस्तस्य तदाहरणहेतुकस्य रघुपतेरवंध्यस्य च कोपस्य राक्षसवंशनाश एव योग्यो विपाक इति भावः दुःसहस्ये
ति मदनरोषयोरपि विशेषणं ॥ ६ ॥ परिणामस्य दारुणतामेवाह ॥ निहणन्ति गएहिं गए तुरएहिं तुरंगमे रहेहिं
अरहिणो ॥ जाअं पवंगमाणं पडिवक्खे पहरणं च रक्खससेणं ॥ निघ्नंति गजैर्गजान् तुरगैस्तुरंगमान् रथैश्च रथि
नः ॥ जातं प्लवंगमानां प्रतियक्षः प्रहरणं च राक्षससैन्यं प्लवंगमानां प्रतिपक्षो हननकर्म प्रहरणं च तत्करणमायुध
द्वयमपि राक्षससैन्यमेव जातं यतो गजादिभिः सजातीयैरेव गजादीन्निघ्नतीति रामरोषप्रभाव एवायमिति भावः ॥

से॰ को॰ टी॰ २३० ॥७॥ अथ रक्षसां पीरुषमाह ॥ सरविक्किण महिहर सरविहडि असेस मुग्गराहअसेला ॥ पहरण मग्गाइ विअभु
अचुणिअपव्वआभमन्ति णिसिअरा ॥ शरविकीर्णमहीधरा शरविघटितशेषमुद्गराहतशैलाः ॥ प्रहरणमार्गाचि
तभुजचूर्णितपर्वताभ्रमंति निशीचराः ॥ शरैर्विकीर्णाः कणशः कृत्वा विक्षिप्ताः महीधराः कपीनामस्त्राणि यैस्ते
निशाचरा भ्रमंति किंभूताः शरैर्विघटितानामसमर्थानां पर्वतानां शेषा अवशिष्टाः शरैरपि भेत्तुमशक्या यैस्ते मुद्गरै
राहताः खंडिताः शैला यैस्ते मुद्गराहतशरभिन्नावशिष्टकपिशैला इत्यर्थः ॥ यद्वा रामादिशरविघटितानामर्थानां
मुद्गराणां ये शेषा मुद्गरास्तैराहतशैला इत्यर्थः ॥ यद्वा शरैर्विघटिताः शेषेपश्चा मुद्गरैराहताः शैला यैरित्यर्थः ॥ एवं
प्रहरणमार्गप्रहरणस्थाने अंचिता अभिषिक्ताः प्रहरणीकृता इत्यर्थः ॥ ये भुजास्तैश्चूर्णिताः पर्वता यैः ॥ यद्वा प्रहर
णमार्गात् शत्रूणमस्त्रपातस्थानादंचिता अतिक्रान्ता ये भुजास्तैश्चूर्णिताः पर्वता यैरित्यर्थः ॥ मग्गाइछिअइति पाठे
प्ययमेवार्थः ॥ यद्वा प्रहारमार्गामतिक्रान्तास्तद्विषया भुजैश्चूर्णिता इत्यादि ये अस्त्रैन्नरुध्यास्तैर्भुजैरेव चूर्णिता इत्य
र्थस्तथा च दूरतरे शरैर्दूरे मुद्गरैः सन्निधौ भुजैः सर्वत्रैव शैला विदारिताः किंतु भुजैश्चूर्णित इति शरादिकरणोत्क
र्षक्रमेण विघटनादि क्रियोत्कर्षक्रमादितरापेक्षया भुजानामाधिक्यमायाति ॥ ८ ॥ कपीनामाकारस्थौल्यमाह ॥
भाअपडि ३० विवित्थअगिरिपरिणाह विअड पवंगक्खंधा ॥ अपहुत्तन्तावेढा उच्छलदूगअस्सथूलकरपब्भारो
भागपतितोपि विस्तृत गिरिपरिणाह विकटप्लवंगस्कंधा ॥ अभवदावेष्ट उच्छलति गजस्य स्थूलकरप्राग्भारः ॥ गजस्य
स्थूलः करः करः शुंडा तस्य प्राग्भारो ऽग्रभागः प्लवगानां स्कंधभागे योग्यस्थाने एकदेशे वा पतितोपि भागेनैकदेश
न पतितोपि वा अप्रभवन्माक्तुः समर्थमावेष्टमंडलीभावो यस्य यद्वा अप्रभवदसंपद्यमानमावेष्टनमाक्रमणं येनेति
स्कंधस्य बृहत्वादावेष्ट्य धनुर्भयाद्यसन्नुच्छलति चंचलीभवतीत्यर्थः ॥ हेतुमाह किंभूतं विस्तृतो यो गिरिस्तस्येव
यः परिणाहो विस्तारस्तेन विकटे दुर्गाह्यो गिरिपरिणाहवद्विकटे विस्तीर्ण इति वा ॥ ९ ॥ रक्षसां वक्षोनिश्चलतामाह ॥
रअणिअरोरत्थलचुणिअस्स कइरोसपेसिअस्स सिहरिणो ॥ उद्धं उद्धाइ र३० ३० सरइ अहोमुहो सिलासंघा २३०
३० रजनिचरोरस्थलचूर्णितस्य कपिरोषप्रेषितस्य शिखरिणः ॥ ऊर्ध्वं उद्धावितरजोऽपसरत्यधोमुखः शिला

संघातः ॥ रजनीचराणां उरस्थले चूर्णितस्य कपिना रोषेण प्रेषितस्य ॥ शिखरिणो रजो धूलिरूर्ध्वमाकाशं उद्धाव
ति ऊर्ध्वमुत्पतति चूर्णितशिलासंघातोधोमुखः सन्नपसरति गुरुत्वात्पततीत्यर्थः नक्रुद्धकपिक्षिप्तपर्वतैरपि निशा
चराः न पातितास्तथा सति चूर्णनं न स्यात्प्रत्युत स्थिरीभूतानां तेषां वक्षोभिस्त एव चूर्णिता इति कपीनां प्रहारे र
क्षसां तु वक्षसि दाढ्यमुक्तं ॥ १० ॥ बलयोः साधारणमुत्कर्षमाह ॥ रिउवलमज्झणिराआणिहअणिरन्तरणिवड्ड
णज्जन्तभडा ॥ विक्कमणोसामण्णा दठुंपि भडाण दुक्कराग्गइमग्गा ॥ रिपुबलमध्यनिरायतानिहतनिरंतरनिपा
तितज्ञायमानभटाः विक्रमणिस्सामान्या द्रष्टुमपि भटानां दुष्करा गतिमार्गाः भटानां गतिमार्गाः संचारवर्त्मा
नि द्रष्टुमपि दुष्करा अशक्याः किंभूता रिपुणां बलस्य मध्ये निरायता दीर्घा एवं निहता अतएव निरंतरं निपा
तिताः संतो ज्ञायमाना दृश्यमाना भटा यत्र चक्षुतस्तु पूर्वपाता नियमात् भटज्ञायमानाः ॥ तथा च निपातितैर्भ
टैर्ज्ञायमाना लक्ष्यमाणाः रिपुबलमध्ये येन पथा वीरा गच्छंति तत्र शतशो रिपवः पतंतीति निरायतभटनिपा
तनाकारेण ज्ञायते ॥ नैनैवीरा गता इत्यर्थः ॥ अतएव विक्रमेण निःसामान्या असाधारणाः ॥ ११ ॥ पुनस्तदेवा
ह ॥ णिव्वुब्भइ सोडीरं अप्पडिहत्थलहु ३० हसिज्जइ पहारो ॥ वड्डइ वेराबंधो अइसंधिज्जन्ति साहसेक्कसमत्था
निर्वाह्यते शौटीर्यं अप्रतिहस्तलघुको हस्यते प्रहारः ॥ वध्यते वैराबंधो ऽतिसंदध्यति साहसेषु समर्थान शौटी
र्यं युद्धचातुर्यं गर्हकारो वा निर्वाह्यते तदनुरूपव्यापारेण निर्वाह्यते स्म भटैरिति शेषस्तया अप्रतिहस्तत्वाद
शहशत्वाल्लघुकोऽनादरणीयः प्रहारो हस्यते उपहासविषयीक्रियते अथ प्रहारे सति वैरस्य आबंधो वर्द्ध
ते वैरमधिकं वध्यत इत्यर्थः ॥ हेतुमाह ॥ समर्थात्साहसेषु प्राणानापेक्ष्य कर्मसु अतिसंदधति अतिनिविष्टा
भवंतीत्यर्थः ॥ अतिसंधीयंते वा समर्थैः सहाभियुध्यत इत्यर्थः ॥ १२ ॥ पुनस्तदेवाह ॥ णपडइ पडिए विसिरे सूल
विह्लिणं पिणेअभज्जइ हिअअं ॥ दुःपरिइअं णलग्गइ लाविज्जन्तम्मि पडिभडाण रणभअं ॥ न पतति पतितेपि
पि शिरसि शूलविभिन्नमपि नैव भिद्यते हृदयं ॥ दुःपरिचितं न लगति लाग्यमानमपि प्रतिभटानां रणभयात्प्र
तिभटानां शिरसि पतितेपि न पतति कबंध इति शेषः युद्धसंस्कारसत्वादिति केचित वस्तुतस्तु शिरस्यपि पतिते

पिहृदयंनपततिनाधोगच्छतिनकातरतामवलंबतइत्यर्थः एवंहृदयएवछलातवक्षोरूपंहृदयंशूलेनवि
भिन्नंविदीर्णमपितथापिमनोरूपंतन्नभिद्यतेकिंतुयुयुत्सायामेवतिष्ठतीत्यर्थः॥ तथालाग्यमानमपिशत्रुभि
राधीयमानमपिरणभयंनलगतिनसंबध्यतेदुःपरिचितंयतःशूराणांरणभयेनसंबंधानघटतेकदाप्यपरि
चितात्वादित्यर्थः॥१३॥पुनस्तदेवाह॥सहइपहरेरूदर्थोदप्पट्ठाणेरूसहइपुरिसासंचोणिद्दोसेरूभडाणं॥
३०सारेरूविण ३० सरइरोसरसोसहते प्रहारेषुदर्पादर्पस्थानेषुसहतेपुरुषाध्यवसायःनिर्दोषेषुभटानाम
पसारेष्वपिनापसरतिरोषःरसः॥प्रहारेष्वागतेष्वित्यर्थात्भटानांदर्प्पःसहतेशौर्यादेवप्रहारःसह्यतइत्यर्थः॥ एवं
दर्प्पस्थानेष्वभिमुखागमनादिव्यापारेषुपुरुषाध्यवसायःक्षमतेतेनैवतत्क्रियतइत्यर्थः॥१४॥अथकपीनांपतन
वस्थामाह॥रिउगअभिण्णखित्तारासंविहुव्वत्तचडुलकेसरणिवहा॥दठदट्ठदंत्तमूलारसिऊणसमच्छंरणि
मिलंत्तिकई॥रियुगजभिन्नोक्षिप्तारोषविधूयमानचटुलकेसरनिवहाः॥दृढदृष्टदंतमूलारसित्वासमसरंनि
मीलितंकपयः॥रिपुणांगजेगंदाभिर्वाभिन्नाअथउत्क्षिप्ताःकपयोरसित्वाशब्दंकृत्वासमसरंनिमीलितमात्स
र्यसहितारवमूर्छंतिम्रियंतेवामात्सर्यज्ञापकमाहकिंभूतारोषेणविधूयमानोऽतएवचटुलःकेसरनिवहोयेषां
तेएवंदृढंऊर्ध्वंदंतेर्दृष्टमधादंतमूलंयैरितिकेसरकंपदंतमूलदंशरूपक्रोधलक्षणमुक्तं॥१५॥पुनःशूराणां
प्रकर्षमाह॥अवहीरणाणकिज्जइरूमरिज्जइसंसएविसामिअरूकअं॥णगणिज्जइविणिवा ३० दिट्ठिविभ
अम्मिसंभरिज्जइलज्जा॥अवधीरणानक्रियतेस्मर्यतेसंशयेपिस्वामिसत्कृतंनगण्यतेविनिपातोदृष्टेपिभयेस्म
र्यतेलज्जा॥भटैरवधीरणानास्थानक्रियतेजयेयशसिवातथाप्राणसंशयेपिस्वामिनःसत्कृतमुपकारः॥सत्का
रोवास्मर्यतेतथाविनिपातोमरणमपिनगण्यते॥नविचार्यतएवंभयेदृष्टेपिलज्जास्मर्यतेतथाचकीर्तिसत्कृत
लज्जादिरक्षानिमित्तप्राणानुपेक्ष्ययुध्यतेनतुभयंक्रियताइतिभावः॥१६॥अथशूरनिशाचराणांमृत्युमाह॥पढ
माणिआहिंरूडरंजेजीविअसंसअम्मिविपरिरक्खिआ॥तेच्चिअअहिमुहणिहआरूरवन्दीहिंअहिसारिआर २३८
अणिअरा॥प्रथमानीताभिःसुचिरंयेजीवितसंशयेपिपरिरक्षिताः॥तएवाभिमुखेनिहताःसुरवंदीभिरभिसारिता

रजनीचराः॥प्रथमंपूर्ववदीकृत्यानीताभिरूरसुंदरीभिःरूचिरंव्याप्यविभीषिकाकृतेजीवितसंशयेपियेरजनी
चराःपरिरक्षिताजात्यपकर्षेणत्यक्तास्तएवसंग्रामाभिमुखनिहताःसंतःपुनरभिसारितास्तदानींशौर्यमृत्य
नाप्राप्तदेवत्वास्ताभिर्वृताइत्यर्थः॥१७॥कपीनांतेजःप्रकर्षमाह॥रअणिअरवद्धलक्खाअबद्धरुहिरपंडुरंग
च्छे३०॥अगणिअवणसंतावोउण्हपहारसरसोसमल्लिअइकई॥रजनिचरबद्धलक्ष्याबद्धरुधिरपरिपांडु
रांगच्छेदः॥अगणितव्रणसंतापउष्णप्रहारसरसःसमालीयतेकपिः रजनीचरकृतप्रहारइत्यर्थात्॥बद्ध
लक्ष्यंयेनेतिप्रहर्त्तुरिदंतद्दृष्टिःकपिःसमालीयतेप्रथमंयेनहतस्तत्रैवप्रतिप्रहर्तुंमिलतीत्यर्थः कीदृकउष्णा
तात्कालिकेशत्रुकृतप्रहारेसरसःक्रोधवशात्प्रतिहंतुंसानुरागसक्रोधरसोवाएवंअबद्धेनप्रवहतारुधि
रेणपरिपांडुरोंऽगच्छेदःक्षतंयस्यसतथातथाचव्रणसंतापविचारशून्यइतिजिगीषुत्वमुक्तं॥१८॥पुनःशूरा
णांस्वभावमाह॥णपडिक्खंत्तिअवसरंओच्छुन्दन्तिजणिअपरेणपआवं॥बोलेंतिजहाभणिअंसाहुक्कारपुर
३०अइन्तिसमत्था॥नप्रतीक्ष्यंतेवसरंआक्रामन्तिजनितपरेणप्रतापं॥व्यतिक्रामन्तियथाभणितंसाधुका
रपुरतआयांतिसमर्थाः॥समर्थाअवसरंनप्रतीक्ष्यंतेस्वसामर्थ्यान्यूनतयाअदेशेप्यकालेपिमिलन्तिप्रहर
न्तिचदर्पोन्नतत्वादितिभावः॥एवंपरेणजनितंप्रतापंआक्रामन्तिस्वप्रतापोत्कर्षजननात् एवंताडयिष्यामीत्या
दियथाभणितंव्यतिक्रामन्तिनिर्वाहयन्तितदेवताडनादिव्यापारान्तथासाधुकारपुरतःप्रतिपक्षप्रहारादिकंदृ
ष्ट्वासाधुसाध्वितिकृत्वाआयान्तितमेवप्रतिप्रहर्तुमित्यर्थात् एतद्व्यापारोत्कर्षेणविपक्षकृतसाधुकारस्यपुरतः
संमुखेआयांतीतिवाचयंतुसाधुकारस्यपुरतोऽग्रतःस्थानएवप्रथमंस्वेनैवकृतःसाधुशब्दाभिलापोयावदा
यातिविपक्षबलंतावत्स्वयमेवागच्छंतीतिशब्दापेक्षयाप्यधिकवेगवत्तयासत्वोत्कर्षउक्तइतिब्रूमः॥१९॥अथ
द्वादशभिःकुलकेनशूराणांयुद्धमाह॥इअताणतंविअंभइरूरगणारूरअलंभसंकेअहरं॥भग्गजमलो॥
अवंथंमहेंदभवणुज्जुआइअवहंजुभ्भुं इतितेषांतयोर्वातद्विजृंभतेसुरांगनासुरतलंभसंकेतगृहं॥भग्न
यमलोकपथंमहेंद्रभवनऋजुकापितपथंयुद्धं॥इतिवक्ष्यमाणप्रकारेणतेषांवानराणांराक्षसानांचतयोःकपि

से॰ का॰टी॰ राक्षससैन्य यो र्वा तद्युद्धं विजृंभते वर्द्धते कीदृक् स्फरांगनास्फरतस्य प्राप्तो संकेतगृहं भटानामिति शेषः अंत्रै
२३९ वताभिस्तेषां वरणान्तद्दृत्पन्नेगिति भाव इति शौर्येण मरणमुक्तं अत एव महेंद्रभवनस्य कृते ऋजुकायितः संमु
खीकृतः पंथा येन सर्वेपि वृत्वा ताभिस्तत्रैव नीयंत इति भावः अत एव भग्नो प्रहतीकृता यमलोकस्य पंथा येन
कातराणामसत्वादित्याशयः॥ २०॥ कइवक्कत्थलपरिणअणिभअमुहत्थमिअदन्तिदत्तप्फलिहं णिहअभड
महिअणिवडिअस्फरबद्धुबलवलअमुहलपवअगइ वहं ॥ कपिवक्षःस्थलपरिणतनिजकमुखास्तमितदंतिदं
तपरिघं ॥ निहतभटमहितलैनिपतितस्फरवधूचलवलयमुखरप्लवगगतिपथं ॥ युद्धं कीदृक् कपीनां वक्षःस्थ
लेषु परिणतानां पश्चादागत्य दन्तदत्तप्रहाराणां पूर्वपातानियमादत्राकर्षणाद्दन्तिनां निजकमुख एवास्तमिता
बक्षसां दृढत्वेन स्फोटनाभावान्मूलेनैव स्कंधपर्यंतं गतत्वाददृश्या दन्तपरिघा यत्र तदिति गिरिवत्स्थितत्वेनापतना
दक्षाभनत्वं वलवत्वमाकारमहत्वं च कपीनां गजानां तु प्रहारदार्घ्यं तेजस्वित्वं वक्षो निर्भेदनादेव सन्निधिर्भवतीति
जानतां क्रोधमूर्छितत्वं च सूचितं केचित्तु यथा यथा गजो दंतौ नियंत्रयति तथा तथा कपिरपि वक्षः पुरः करोतीत्यु
भयोरपि सत्वोत्कर्ष इति वदन्ति परिणताः कृतप्रहारा इति दन्तपरिघस्यैव विशेषणमिति वा भावे क्तेन परिणतेन प्र
हारेणास्तमिता इति वा एवं निहतभटानां महितेन समीहया नियतितानां स्वर्गादागतानां स्फरवधूनां चलवलयैर्मु
खरा प्लवगानां गतिपथा यत्रेति परव्यूहे प्लवगा येन पथा संचरन्ति तत्र बहवो म्रियंत इति बद्धीनामागमनादरणव्या
पाराय नानाकरचमत्कारेण वलयानां डुणडुणडुणत्कारात्छद्धायमानत्वमिति भावः वस्तुतस्त्वेकमेव वीरं करेण
धारयंतीनां परस्परं कलहेन करप्रतिक्षेपाय करव्यापारतो वलयडुणत्कारोपचयेन मौखर्यमिति वयं ॥ २१ ॥ उ
वणाअम्मव्वगद्धदुप्पअणोछिन्न विहडमाणगइन्दं गहिअप्फिडिअतुरंगं अणुधाविअपवअणिहअरक्खसजो
हं अवपतनावपातितथं उत्पतनोक्षिप्तविघटमानगजेंद्रं गृहीतस्फटितनतुरंगं अनुधावितप्लवगनिहतराक्षस
योधं एवं अवपतनेन उत्प्लवनादाकाशतः पतनेनावपातिता अंतरिक्षस्यायैवनिजकभरेण महीमानीय चूर्णी
तारथा यत्र कपिभिरित्यर्थादेव उत्पतनेनोत्फलिनउक्षिप्ताः स्वशरीरेण प्रेर्याकाशंनीता अत एव विघटमानाः स्फुटि २३९

तदेहसंधयो गजेंद्रा यत्र एवं गृहीताः संतः स्फेटिताश्चंचलत्वाद्बहिर्गतास्तुरंगा यत्र अत एवानुधाविती स्तदश्व
पश्चाल्लुनायि प्लवगास्तैर्निहता राक्षसयोधास्तदश्ववारीभूता यत्रेत्स्फत्फालावफालवेगबलप्रकर्ष उक्तः ॥ २२ ॥
रसणिव्वाअत्थलस्फहविसहिज्जन्तचन्दणद्दुमप्पहरं कलअलकलोद्दुग्धाडिअमुहवोलीणसरमग्गाणिन्तणि
णाअं ॥ रसनिर्वृत्तोरस्थलस्फखविषह्यमानचंदनद्रुमप्रहारं कलकलरोद्घाटितमुखव्यातिक्रांतशरमार्गनि
र्यन्निनादं ॥ एवं सैरेनुचंदनस्यैवेत्यर्थात ॥ निर्वृते उरस्थलस्फखेन विषह्यमानश्चंदनद्रुमप्रहारो यत्र प्रियाविर
हान्तप्तत्वेपि रसेन रशेस्य जनना प्रहारस्यापि स्फखदत्वमिति भावः रसेन वीरेण निर्वृत्त इति वा वीररसात्प्रहारोपि स्फ
खद इत्यर्थः तथा कलकलस्य लोभेन चिकीर्षया उद्घाटिताद्व्यात्तान्मुखाद्व्युतिक्रांतस्य वहिर्भूतस्य शरस्य मार्गेणारं
ध्रेण निर्यन् बहिर्गच्छन्निनादो यत्र क्षतदशायामप्यन्यकलकलश्रुत्यात च्चिकीर्षया वीररसोत्कर्षः सूचितः ॥ २३ ॥
भिणवद्दिज्जन्तवड्डपडिरुद्धोसरिअचक्कलिअपाइक्कं ॥ तुहिरोहिणरहवहं मुहसक्कवप्फणणिहुअहेसिअतुरअं
भिन्नवधमानघटं प्रतिरुद्धापसृतचक्रितपदाति रुधिरापभिन्नरथपथं स्फखशुष्कफेननिभृतहेषिततुरगं
किंभूतं प्रथमकपीनां संचारेण भिन्ना द्विधा भूता यह हस्तिपके वध्यमाना पूर्ववत्स्थाप्यमाना गजघटा यत्र एवं अग्रतः
प्रतिरुद्धा अत एवापसृताः पश्चाद्धतास्ततश्चक्रिताश्चक्रवत् घूर्णंतः प्रतिरोधमावेष्टयितुं मंडलीमाचरंतो वा
पदातयो यत्र एवं रुधिरेणापभिन्नः प्रतिहतो रथानां पंथा यत्र पलबहुलेन रथसंचाराभावात् तथा मुखेशुष्कः पंकेनस्त
ननिर्भृतं मंदं हेषितं येषां ते तुरगा यत्र मुखशोषस्फुटशब्दानिष्पत्तेरिति भावः ॥ २४ ॥ रिपुपहरणपरितो॰ सिंहसा
हुक्काररवगब्भिणपडन्तसिरं ॥ णिब्भिण्णपहरमुच्छिअवअणब्भंतरविसट्टभडचुक्कारं ॥ रिपुप्रहरणपरितोषितसाधु
काररवगर्भितपतच्छिरः ॥ निर्भिन्नप्रहारमूर्छितवदनाभ्यंतरशीर्णभटचुक्कारं ॥ एवं रिपूणां प्रहारेण परितोषि
तानां वीराणां मस्तकच्छेदस्पर्शसमकालीनः साधुकाररवो गर्भितो गर्भस्थो यत्र तथाभूतं मस्यतच्छिरो यत्रेति प्रहारश्ला
घा च मुक्तं एवं निर्भिन्नेन हृष्टेन प्रहारेण मूर्छितानां प्राकृतत्वात् यत्राकर्षणाद्भटानां वदनाभ्यंतरे विशीर्णो मूर्छया
मुखमुद्रणादस्फुटितश्चुक्कारोर्थात्सिंहनादो यत्र मूर्छितेन मूर्छया विशीर्णभटानां चुक्कारो यत्रेति वा ॥ चुक्कार

Dr. BHAU DAJI MEMORIAL

शब्दो देश्यां शब्दवाची ॥ २५ ॥ शेलपहतुच्छिआइअद्दु कलवव्वविअहत्थि पथिअ जोहं ॥ भगाधअविण्हविसंठहि
अपरद्धिणिअअ भडदुःक्खणज्जन्तरहं ॥ शैलप्रहारोद्दित:दुःखव्यवस्थापितहस्तिप्रार्थितयोधं ॥ भग्नध्वज
चिह्नविमुषित प्रनष्टनिजकभटदुःखज्ञायमानरथं ॥ एवं शैलप्रहारोद्दितैरत एव दुःखेन व्यवस्थापितैर्हस्ति
भिः प्रार्थिता रुध्यमाना योधा यत्र एवं भग्नैर्ध्वजचिह्नैर्यताकाभिर्विमुषितवञ्चितवन्तथा अदृश्या अलक्ष्याः स
तो निजभटानां दुःखेन ज्ञायमाना रथा यत्र तादृशं ॥ २६ ॥ गिरिपेल्लिअरह कड्ढणविहलवसारिअमुहत्थणंत
तुरंगं ॥ महिअलपल्लट्टमहिहरअअरसामलिअभिण्णपंडुररुहिरं ॥ गिरिप्रेरितरथकर्षणविह्वलप्रसारित
मुखस्तनतुरंगं ॥ महीतलप्रलुठितमहीधररजतरसावमृदितभिन्नपांडररुधिरं ॥ एवं गिरिभिः प्रेरिता यंत्रिता
ये रथास्तेषां कर्षणेन विह्वला अत एव प्रसारितमुखा व्यात्तमुखाः संतस्तनंतः खेदाद्विफ्कारं कुर्वंतस्तुरंगा यत्र
तथा महीतले प्रलुठितानां पतितानां वानरायुधीभूतानां महीधराणां रजतरसेन रूथक्षोदेनावमृदितानि घृष्टा
नि अत एव भिन्नान्यर्कीभूतानि संति पांडुराणि श्वेतरक्तानि रुधिराणि यत्र तत्तथा ॥ २७ ॥ कइमुक्कचुण्णिअट्ठिअसे
लमुणिज्जन्तसरससरिआमग्गं ॥ उज्झरिअवंचिआसिमग्गावडन्तवाणरजोहं ॥ कपिमुक्तचूर्णितस्थितशैल
ज्ञायमानसरससरिन्मार्गं अवयातितवंचितासिमार्गावपतद्वानरयोधं ॥ एवं कपिमुक्तत्वात्प्रहारदार्ढ्याद्यत्र
पतितास्तत्र चूर्णिता स्थिता ये शैलास्तैर्ज्ञायमानाः सरसाः परिन्मार्गाः श्रोतांसि यत्र जलमिश्रणाच्चूर्णानां सरसत्वेन
ज्ञायते ऽत्र सरित्स्रोतः स्थितमित्यर्थः ॥ एवं रक्षोभिरवपातितान् मथश्च कपिभिर्निःसृत्य वंचितानामसीनां मार्गे पतनय
थेऽवयतंतो वानरयोधा यत्र तथाभूतां तथा च यत्र ये स्थितास्ते वहिर्गता अन्ये पुनस्तत्र पततः खंडिता इति कपिबाहु
ल्यमुक्तं ॥ २८ ॥ अहिधावन्तपवंगममुक्कसणिराअकेसरसडुग्घाअं ॥ मज्झुत्तिण्णविवडिअदण्डाउहभिण्ण
महिअलोविद्धभडं ॥ अभिधावत्प्लवगममुक्तासनिरायतकेसरसटोद्घातं ॥ मध्यात्तभागनिपतितदंडायुधभिन्नम
हीतलापविद्धभटं ॥ एवं अभिधावतां प्लवंगमानां मुक्तो विकीर्णः सन्नसंसेषु निरापतो दीर्घः केसरघटानामद्धा
तो यत्र यवजन्यसंस्कारादेवमध्यस्यात्तभागेन निपतितं यद्दंडरूपमायुधं तेन भिन्नाः सन्तो महीतले ऽपविद्धाः पा २२०

तिता भटा यत्र तत्त ॥ २९ ॥ गहिअसिरदट्ठवानरनिसाअरोरत्थलुद्धरोविअदाढं ॥ णहधरिअपव्वओज्झरसीभ
रतणाअगरुइओसणरअं ॥ गृहीतशिरोदष्टवानरनिशाचरोरस्थलार्द्धरोपितदंष्ट्रं ॥ नभोधृतपर्वतनिर्झरशी
करार्द्रगुरुकितावसन्नरजः ॥ एवं गृहीत्वाक्रम्य धृते सिरसि दृष्टा ये वानरास्तैर्निशाचराणामुरस्थले ऽर्द्धरोपि
ता दंष्ट्रा यत्र रक्षोभिः कपीनां शिरः कवलितं कपिभिस्तेषां वक्षसि दंष्ट्राति खातेत्यर्थस्तत्र शिरसः कवलितत्वेन दं
ष्ट्राणामत्यंतप्रेरणाभावादर्द्धनिमग्नत्वमिति भावः एवं नभसि धृतानां पर्वतानां निर्झरशीकरैरार्द्रत्वाद्गुरूणि सं
त्यवसन्नानि पतितानि रजांसि यत्रेति युद्धसौकर्यमुक्तं ॥ ३० ॥ सारहिहत्थप्पहअमुह पडिउट्ठिअतुरंगणिव्वू
ढरहं ॥ सरघाअचुण्णिओवडिअपव्वआवीअरुहिरसरिआसोत्तं ॥ सारथिहस्ततलाहतमुखपतितोत्थिततुरंग
निर्व्यूढरथं ॥ शरघातचूर्णितावपतितपर्वतापीतरुधिरसरित्स्रोतः ॥ किंभूतं प्रथमं संभ्रमेण पतितास्तदनु सा
रथिना हस्ततलेनाहतमुखत्वादुत्थिता ये तुरंगास्तैर्निर्व्यूढाः संचारिता रथा यत्र एवं रक्षःशरघातेन चूर्णिताः संतः
क्षिता अवपतिता ये कपीनां पर्वतास्तैश्चूर्णद्वारा पीतानि शोषितानि रुधिरसरितां श्रोतांसि यत्र तत्त ॥ आदिकुल
कं ॥ ३१ ॥ अथ बलयोरागमनमाह ॥ अइन्तिअसण्णाइंखण्डिज्जंतपडिसारिअद्धन्ताइ वोच्छिज्जंतमुहाइं भिज्जं
तो सरिअपडिभडाइ बलाइं ॥ आवर्त्तन्ते असहनानि खंड्यमानप्रतिसारितार्द्धांतानि ॥ व्यवछिद्यमानमुखानि
भिद्यमानाप्रसृतप्रतिपदानि बलानि बलान्यावर्त्तंते परस्परमुपर्युपरि पततीत्यर्थः किंभूतानि परेषां प्रहारमुत्कर्ष
वाऽसहमानानि तथा खंड्यमानाः संतः प्रतिसारिताः पराङ्मुखीकृता अर्द्धांताः कतिपये यत्र ॥ अत एव व्यवछिद्य
मानस्कन्धानि मानभंगप्रसंगात्पुनः स्वीयैः कैश्चिदागत्य भिद्यमानाः संतोपसृताः पश्चाद्द्रुताः प्रतिभटाः प्रहर्त्ता
रो येषां तानि तथा च कैश्चित्कैश्चित्प्रथमं निहत्यापसारितास्तदृष्ट्वा तत्पक्षपूरणाय तदीयैरन्यैरागत्याभिपुनर्नि
हत्य निवर्त्यंते तद्दृष्ट्वा पुनरेतदीयैरेते पराभूयंते पलायितास्तु स्वपक्षपूरकपक्षपूरणाय पुनः परावर्त्तंत इति
क्रमेणान्तरेन्तरमप्युन्मत्तकेलिरिव युद्धमभूदिति भावः ॥ ३२ ॥ सखलांजिगीषामाह ॥ वाणरपहतुकवुडिओअ
णिरुविअलक्खपासिआसिपहरणा ॥ मुच्छाणिमीलिअच्छाओहीरन्ता विअलिअन्तिणिसिअरा वानरप्रहारोत्खं

से॰बं॰टी॰ २२१
डिताअनिरूपितलक्ष्यप्रेषितासिप्रहरणाः॥ मूर्छानिर्मीलिताक्षाअपत्रियमाणास्थ्यालीयन्ते निशिचराः वानरा
णांप्रहारेणोत्खंडितव्रणिता अतएवअपत्रियमाणाःस्वीयैःपश्चान्नीयमानाअपिनिशिचरामूर्छयानिर्मीलिता
क्षाअतएवनिरूपितमदृष्टंयल्लक्ष्यंचात्यंततत्रप्रेषितंप्रेरितमसिरूपंप्रहरणंशस्त्रंयैस्तथाभूताःसंतस्तेनैवल
क्ष्येणशत्रुणाआलीयन्तेमिलन्तिप्रथमंयेहतास्तानात्मीयजनकृतप्रतिबंधमुपेक्ष्यमूर्छितत्वेनादृष्ट्वापिसंगम्यप्र
हरंतीतिरक्षसांतेजस्वित्वमुक्तं॥ ३३॥ अथकपीनांपतनप्रकारमाह॥ चुणिअगरुअपरिभडोफुरइअणाल्ली
णरक्खसाहअविहलो॥ खंडिज्जन्तपअट्टो ॰लिछिण्णपडिअ॰ पवंगमजोहो॥ चूर्णितगुरुकप्रतिभटःस्फुरत्य
नालीनराक्षसाहतविह्वलःखंड्यमानप्रवृत्तःपंक्तिछिन्नपतितःप्लवंगमयोधः प्रथमंचूर्णितोगुरुकःप्रतिभ
टोयेनतदनुयेनसहप्रवृत्तयुद्धस्तदन्येनकेनचिदनालीनेनदूरवर्त्तिनाराक्षसेनपश्चादलक्षितमागत्याहतः
सन्विह्वलोमूर्छितःअथमूर्छादशायांखड्गादिनाखंड्यमानापिततएवलब्धचैतन्यःपुनःप्रवृत्तोयोद्धुमि
त्यर्थादनंतरं॥ ॰लिरितिपंक्तौदेशीतैरेवपंक्तिक्रमेणछिन्नःसन्पतितःप्लवंगमयोधःस्फुरतिकंपतेमरणा
त्तरमपिक्रोधसंस्कारसत्वादितिभावः॥ ३४॥ उभयत्रशूराणांशरीरनिरपेक्षतामाह॥ सोडीरिणपअवोछाआप
हरेहिंविक्कमेहिंपरिअणो॥ जीएणअअहिमाणोरक्खिज्जइअगरुअ॰शरीरेणजसो॥ शौटीर्येणप्रतापच्छा
याप्रहारैर्विक्रमैः॥ परिजनःजीवेनवाभिमानोरक्ष्यतेनचगुरुकशरीरेणयशः स्फुभटैःशौटीर्येणाहंकारेणयुद्ध
चातुर्येणवाप्रतापोरक्ष्यतेसंकटेसतितथाशौटीर्यमाचरंतियथासर्वेषामप्यलब्धत्वेनप्रतिभासंतइतिप्रतापरक्षा
भवतीत्यर्थःप्रहारैश्छायारक्ष्यतेतत्रैवतथाप्रहरंतियथाकांतिरक्षाभवतीत्यर्थः॥ विक्रमैःपरिजनःसंकटपति
तस्सेवकादिःपराक्रम्यरक्ष्यतइत्यर्थः॥ जीवेनचअभिमानोगर्वःअतिसंकटेजीवनमप्युपेक्षंतेनतुपरावृत्यग
र्वंनाशयतीत्यर्थः॥ शरीरेणचयुःपरप्रहारोपस्थिताशूरचिन्हमभिमुखक्षतादिकमप्यंगीकृत्ययशोगृह्णंतिनतुश
रीरेलावण्यव्ययभियादस्याकुर्वंतीतिसत्वाद्रेकःसूचितोरक्ष्यतइतिसर्वत्रान्वितमतःक्रियादीपकं॥ ३५॥ रक्षसांग २२१
णाभिलक्षमाह॥ भिज्जइउरोणहिअअगिरिणाभज्जइरहोणउणउछाहो छिजन्तिसिरणिहाआतुंगाणउणर

णादोहलाफहडार्णं॥ भिद्यतेउरोनहृदयंगिरिणाभज्यतेरथोनपुनरुत्साहः छिद्यंतेशिरोनिघातास्तुंगानपुना
रणदोहदाःसुभटानामुरोवक्षःस्थलंशस्त्रैर्भिद्यतेनतुहृदयंचित्तंभिद्यतेक्षतादपिमनोरणोत्सुकमेवतिष्ठतीत्यर्थः
एवंकपीनामस्त्रेणगिरिणारथोभज्यतेनपुनःसमरोत्साहोभज्यते किंतुरथभंगेसतिदीप्यतइत्यर्थः॥ एवंशिरोनिघा
ताश्छिद्यंतेनिघातःसमूहःनपुनारणदोहदारणाभिलाषास्तेतुमरणोत्तरममरशरीरेप्यनुवर्त्ततइतिजिगीषुत्वमु
क्तं॥ ३७॥ अथप्रथमंस्थितरजःप्रशममाह॥ सेलोभरेहिंगअणेधुअलोहिअसीभरेहिंधारामग्गे॥ मअसलिलेहिं
घडाफअव्वोछिज्जइपसरिअमहीरउग्घाणं॥ शैलनिर्झरैर्गगनेधुतलोहितशीकरैर्धारामार्गे॥ मदसलिलैर्घटा
स्फुचव्यवछिद्यतेप्रसृतंमहीरजउत्थानं॥ प्रसृतमूर्ध्वंधाव्यापिमहीरजसामुत्थानमुद्गमोगगनेकपिभिरुत्तोलिता
नांशैलानांनिर्झरैर्व्यवछिद्यतेप्रशाम्यते॥ एवंधारामार्गेरणस्थानेधुतैरितस्ततोगतैर्लोहितानांशीकरैरेवंगजानांघ
टास्फुचमदजलैर्व्यवछिद्यतइत्यनुषज्यते॥ ३८॥ अथकपीनांभुजभंगमाह॥ विसहिअखग्गप्पहरागइन्ददन्त
लिहिअग्गलापडिरूआ॥ सेलाइछणवलिआविसमंभज्जंतिपवअबाहुप्फुडिआ॥ विसोढखड्गप्रहारागजेंद्रदन्तलि
खितार्गलाप्रतिरूपाःशैलातिक्रमवलिताविषमंभज्यंतेप्लवंगबाहुपरिघाः॥ प्लवगानांबाहुपरिघाभज्यंतेत्रुद्यंतिविष
मंविसदृशंयथास्यात्किंभूताविसोढःखड्गप्रहारायैरतएवगजेंद्रदन्ताभ्यांलिखितायार्गलातत्प्रतिरूपास्तत्तुल्याःख
ड्गव्रणानांदंतोल्लेखचिन्हरर्गलाभिश्चबाहूनामुपमायद्वागजेंद्रदन्तोल्लिखिताश्चअर्गलाप्रतिरूपाश्चेतिकर्मधार
यःभिन्नत्वेहेतुमाह॥ शैलानामतिक्रमेणदत्तोत्पत्याधारणासामर्थ्यादधःपतनेनवलिताःयंत्रणमासाद्यवक्रीभूता
अतएवद्विधाभवंतीत्यर्थः॥ ३९॥ अथपक्षिणांरुधिरमाह॥ तेण्हाइअ॰विरूफइरंसणाहछेगब्भिणम्मिवणमुहे त्याग
निव्वलिअलोहविरसंणपिअइआमुअइवक्खिरूणविहंगो॥ तृषितोपिस्फचिरंसन्नाहंछेदगर्भितेव्रणमुखेनिर्व
लितलोहविरसंनपिबत्यामुंचत्यास्वाद्यविहंगः॥ विहंगोगृध्रादिस्फचिरंतृषायुक्तोपिसन्नसन्नाहस्यछेदेनखंडेन
गर्भितेगर्भस्थितछेदव्रणस्यमुखरुधिरनिर्गमस्थानेरुधिरंआस्वाद्यइषत्जिह्वयालिह्यनपिबतिकिंत्वामुंचति
त्यजतिअत्रहेतुमाह॥ किंभूतंनिर्वलितेनपृथक्भूतेनसन्नाहस्यलोहेनतत्कणेनविरसंलोहेनतत्कणेनविरसंला

हेनतत्कणेनविरसंलोह फणिकासंपर्कादिस्वाद मित्यर्थः॥४०॥अथकबंधानांवेगमाह॥ वेवइपडिउ०विभुउं३०
शऊध्वम्मिच अणम्मिधरइअमरिसो॥ रुअसीसंपिकबंधं धावइ उक्खित्तकंठलोहिअधारं॥ वेपतंपतितोपिभुजो
वपातितेवदनेध्रियतमर्षः॥ रूनशीर्षोपिवबंधोधावति उक्षिप्तकंठलोहितधारः॥ छिन्नःसन्पतितोपिभुजोवप
तेभटानामित्यर्थात् अस्थायमनादिरूपकर्म्मसंस्कारसत्वादितिभावः एवंछिन्वाऽवपातितेपिमुखेऽमर्षोभ्रुकुट्या
रण्यादितच्चिन्हंध्रियतेतदवस्थायांकर्तनलाघवात् एवंगतशीर्षोपिछिन्नमौलिरपिकबंधःउक्षिप्ताऊर्ध्वंगता
कंठस्यलोहितधारायत्रतथाभूतःसन्धावतिपूर्ववेगोत्कर्षादितिभावः॥४१॥वीराणांरणसवत्तामाह॥ देइरसं
रिउपहारोवहइधुरंविक्कमस्सवेराबंधो॥ अश्रन्निअरणरहसोदप्पंवड्ढइआअउ०अइभारो॥ ददातिरसंरिपुप्रहा
रोवहतिधुरंविक्रमस्यवैराबंधः आकृष्टरणरभसोदर्पंवर्द्धयत्यागतोतिभारः॥ वीराणांरिपुकृतःप्रहारोरसमु
त्साहंददातिनत्वनुत्साहंमद्धयोरिवप्रतिप्रहारचिकीर्षोत्कर्षकत्वात्तथावैराबंधोवैरासंजनंविक्रमस्यधुरांवहति
तस्माद्विक्रमोवर्द्धतइत्यर्थः॥ एवंआगतउपरिपतितोऽतिभाराकठिनकार्यगौरवंदर्पबलंबर्द्धयतिकीदृक्आकृष्टः
आनीतोरणेरसउत्कंठायेनमत्कृत्यमेवेतदित्यभिसंधानादितिभावः॥४२॥भटानांरणेकालक्षेपासहिष्णुतामाह
॥साहेइरिउवजसंणसहइआआरिअबकालक्खेवं॥ लहइफहम्मिवणासंजीअंमुअइसमुहंपहरणंवभडो॥ साध
यतिरिपुमिवयशोनसहतेआकारितमिवकालक्षेपं॥ लभतमुखमिवनाशंजीवंमुञ्चतिसमुखंप्रहरणमिवभटः॥
भटोयशःसाधयतिरिपुमिवयथारिपुंविजित्यात्मसात्करोतितथाततएवतथायशोपीत्यर्थः एवंयथाश्राकारितं युद्धाय
परेषामाक्षेपवचनंनसहतेतथाकालक्षेपमपितस्मिन्सतितत्कालमेवयुध्यतीत्यर्थः किंचयथापरप्रहारादिनासुखंलभते
तथातेनैवनाशमपिपश्चादनागमनादितिभावः॥ एवंसंमुखंयथाप्रहरणमस्त्रंमुंचतितथास्वयमेवमपिशूराणांसंमु
खमरणस्यकमनीयत्वादितिसर्वत्रसहोपमानासजीवत्यागयोरन्यथासिद्धत्वस्वकृतत्वभेदादुक्तिवैचित्र्यमित्यव
धेयं॥४३॥कपीनांमूर्छावस्थामाह॥ विसहिअखगाघ्घहराविअलिअलोहिअकिलिन्तणीसारभुआ॥ मुच्छिज्जंता
अद्धाअक्कन्ताणिअअमहिहरेहिंपवंगा॥ विसोढखड्गप्रहाराविगलितलोहितक्लान्यनिस्सारभुजाःमूर्छायमानाव २२२

मीलन्तःआक्रांतानिजकमहीधरैःप्लवंगाः॥ विसोढःखड्गप्रहारोयैर्वोढाविव्यर्थादतएवविगलितशोणितत्वात्क्ला
म्यतोविक्लवानिस्साराबलशून्याभुजायेषांते प्लवंगाअस्वीकृतैर्निजकमहीधरैरेवाक्रान्तायन्त्रिताःसव्रणस्यवा
होरबलत्वेनधर्तुमक्षमतयागिरीणांपतनादितिभावः॥ अतएवपर्वतभराभ्मूर्छायमानाःसंतोवमीलंतोनिमीलभय
नाः॥४४॥ पंचभिरुभयत्रशूराणांजीवनिरपेक्षतादिरूपमुत्कर्षमाह॥ दअइकुसुमंवमाणंवद्धन्तम्मिअणहंण
पुन्तिअइजसं॥ णकरेइलोअगरुएजीअम्मिअणवरआअरंभडसत्थो॥ दयतेकुसुममिवमानंवर्द्धमानमप्यन
वतप्रत्येतियशःनकरोतिलोकगुरुकेजीवएवकेवलमादरंभटसार्थः॥ भटानांसार्थःकुसुममिवमानमहंकारंदय
तेरक्षतियथाकुसुमंकोमलबुद्ध्याविमर्दविरहेणभंगुरत्वमम्लानत्वंचमृग्यतेतथामानेपीत्यर्थः॥ संमुखमरणा
दिनावर्द्धमानमप्यनूनंनिष्कलुषंपशोनप्रत्येतिममयशःप्रौढंजातमितिनजानातितथाचापरिपूर्णत्वभ्रमेणो
त्तरोत्तरमपितस्यबुद्धकालुष्याभावायत्नप्राणव्ययेनयततइत्यर्थः॥ केवललोकेषुगुरुकेश्लाघनीयेजीवएवद
रमुपेयबुद्धिनकरोतिकिंतुतृणायमन्यतइतिजीवमपिदत्वामानंयशश्चवर्द्धयतीत्यर्थः॥४५॥णिहआरुक्खिअ
अजोहेजागरुहु अम्मिणिअअधारामग्गोपरिवड्ढन्ताइभरंगतुअंपरसंकुलंअइत्तिसमत्था॥ निहताक्षितयोधे
जातेलघोनिजकधारामार्गे॥ परिवर्द्धमानाजिभरंगुरुकंपरसंकुलमायान्तिसमर्थाः॥ अलक्षितंक्षिप्रकारितया
कुतःकोमारयतीत्यनाकलितंयथास्यादेवंनिहताःपरयोधायत्रतथाभूतेनिजकधारामार्गेस्वारब्धसंग्रामेलघो
जातेनिर्वाहितेसतिसमर्थाःपरसंकुलंपरचक्रमायान्तिपुनरप्यतिक्रामन्तिकीदृशाःपरिवर्द्धमानश्चाजिभरायेनस्वप
क्षक्षयंदृष्ट्वाएतत्पक्षमतिक्रामदित्यर्थः॥ अतएवगुरुकमनभिभाव्यंतथाचबहुशःकृतयुद्धाअपिशत्रोरुपस्थि
तौपरिश्रममगणयित्वापुनर्युध्यंतीत्यर्थः॥४६॥धारेन्तिजसस्सधुरंणसहंतिविक्कमस्सपरिहवं॥ रोषस्सक
रेंतिधिइंमाणं॥ वड्ढेंतिसाहसस्ससमत्था॥ धारयंतियशसोधुरामायांतेनसहन्तेविक्रमस्यपरिभवं॥ रोषस्यकुर्व
ति धृतिमानंवर्द्धयन्तिसाहसस्यसमर्थाः॥ समर्थायसशोधुरांधारयन्तिपरानतिक्रम्ययशोनिर्वाहयन्तीत्यर्थः औया
न्तंसंभाव्यमानंविक्रमस्यपरिभवंनसहन्तेदुष्करयुद्धेनापिविक्रमंरक्षन्तीत्यर्थः॥ एवंरोषस्यधृतिंधारणंकुर्वन्तिअ

त एव साहसस्य प्राणानपेक्ष्य कर्म्मणो मानं परिमाणं वर्द्धयंति यशोविक्रमयो रक्षार्थे रुष्वा साहसमपि कुर्वंतीत्यर्थः
॥ ४७ ॥ प्रहरामाइ अह ॥ संखण मुच्छागलिअ रण मणोरह सोक्ख ॥ जीअविद्दत्तुच्छर ससिर परिवत्तिअजस
विअंभइ समरं ॥ प्रहारासादितहर्षः क्षणमूर्छागलितरणमनोरथसौख्यं ॥ जीवार्जिता पसराः शिरःपरिवृर्तित
यशो विजृंभते समरः ॥ प्रहारेण प्रहारं दत्वा आसादितो हर्षो यत्र परप्रहारेण वा एवं क्षणं परप्रहारात् मूर्छया ग
लितं रणाभिलाषसौख्यं यत्र केवलं मूर्छासमयं संग्रामसौख्यं न जायत इत्यर्थः ॥ एवं जीवेनार्जिता जीवं दत्वा लब्धा अ
प्सरसो यत्र शौर्यात् तथा शिरसा परिवर्त्तितानि शिरो दत्वा गृहीतानि यशांसि यत्र एवंभूतः समरो विजृंभते वर्द्धते
सर्वे क्रियाविशेषणं वा ॥ ४८ ॥ संदेहेसु हसन्ज्जइ रज्जिज्जइ साहसे रमिज्जइ वसणे ॥ मुच्छासु वीसमिज्जइ णिव्वूढ
न्तिणावरं गणिज्जइ मरणे ॥ संदेहेषु हस्यते रज्यते साहसे रम्यते व्यसने ॥ मूर्छासु विश्रम्यते निर्व्यूढमिति केवलं गं
ण्यते मरणे ॥ भटैः प्राणसंदेहेषु जीवने लक्ष्म्या मरणे देवस्त्रीणां कीर्त्तेनु भय यत्र लाभ इत्यानंदतो हास्यं क्रियते परंथा
मनध्यवसितत्वबुद्धिपरीहाराय वा संदेहादेव प्राणानपेक्ष कर्मरूप साहसेऽनुरज्यते युद्धे नेत्यर्थादथ तत्र व्यस
ने प्राणसंकटे सति रम्यते जीवनादपीदानीं मरणमतिश्रेयः स्वर्गहेतुत्वादित्युत्साहः क्रियते तत्रैव प्रहारे सति मू
र्छासु परं विश्रामो लभ्यते ॥ परया युध्यत एव तदुत्तरं मरणे सति निर्व्यूढं स्वकृत्यं निर्वाहितमिति गण्यते शत्रुवि
नाशरूपं स्वामिनः सुरस्त्रीलाभस्वर्गवासरूपं चात्मनः प्रयोजनं सिद्धमिति बुध्यत इत्यतिशूरत्वमुक्तं ॥ ४९ ॥ अथ
कादशभिः स्कंधकरणरणस्थानमाह ॥ चलिओअ चरणदिन्न॰ पहउ॰ अउव्वदिणरइ मंडलगहासंको ॥ अथेक्क
कट्ठिअणिसाअभाअभग्गादिअसो महिरउग्घाउ॰ ॥ चलितश्च वरणप्रहतो पूर्वदत्तरविमंडलग्रहाशंकः अक
स्मात्कृष्टनिशाग्रभागभग्नदिवसो महीरज उद्घातः ॥ कपिहस्त्यश्वादीनां चरणैः प्रहतः प्रेरितो महीरजसामुद्घा
तो घनीभूतः समूहश्चलितः उत्थितश्चेत्यर्थः ॥ कीदृक् अपूर्वाद्भुतो रविमंडले ग्रहस्य राहो राशंका वितर्को येन स त
था रजश्छन्नरवौ सर्वग्रासो राहुणा कृत इति वितर्को अमावास्यां विनैव जायत इत्यद्भुतत्वं ॥ अत एवाकस्मात् दिवा २२३
पि कृष्ट आनीता निशा येन तयाऽभागस्थाने प्रहरद्वयेपि भग्नो विनाशितो दिवसो येन सूर्यस्यास्तमितत्वादित्यंधा

कारमयत्वमुक्तं ॥ ५० ॥ अथैषां प्रसरणक्रममाह ॥ मूले बहलुग्घाउ॰ मज्झो आसे पसारिअत्तणतडिणो ॥ णहपुंजि
विसरि ३॰ पडइ दिसासु गुरुअत्तणेण महिरउ॰ ॥ मूले बहलोद्घातं मध्यावकाशे प्रसारितत्वतनडिणं ॥ नभःपुंजित
विसृतं पतति दिक्षु गुरुत्वेन महीरजः ॥ मूले उद्गमस्थाने बहलो निविड उद्घातो यस्य अथ मध्यावकाशे किंचिदूर्द्ध
प्रदेशे करिकर्णतालादिना प्रसारितत्वेन तडिन विरलं तदुक्तं तडिनं विरले तु छे अनंतरं नभसि सर्वतः समंतस्युं
जितं सद्विस्तृतं प्रसृतं महीरजः कर्तृ पश्चाद्दिक्षु पतति प्रसारि भवतीत्यर्थः केन गुरुत्वेन तथा च लघुत्वादुत्थितं वि
युति सर्वतो घनीभूय लब्धगुरुत्वसत्पततीत्यर्थः ॥ ५१ ॥ अथैषां मर्कोभावमाह ॥ मुच्चइ भरेइ णु वसुहं णीइ दिसा
हित्था एइ णु दिसा अक्कं ॥ अदिट्ठणिग्गमवहो पडइ णहाहि गअणविलग्गाइ णु र॰ ॥ मुञ्चति बिभर्ति नु वसुधां निरेति
दिश्यः स्थगयति नु दिक्चक्रं ॥ अदृष्टनिर्गमपथं पतति नभसो गगनं विलगति नु रजः ॥ रजो वसुधां मुंचति नु अन्य
त्र गमनादथवा बिभर्ति पूरयति नु वसुधायामेव घनीभूय स्थितत्वादथ दिश्यो निरेति निर्गच्छति नु अत्रैव ततः समा
नुसर्वत्र हेतुमाह ॥ कीदृक् अदृष्टा निर्गमस्य प्रादुर्भावस्य पंथा यस्य तत्तथा च सर्वत्र स्थानीभूतत्वेन कुतो निर्गच्छतीत्ये
कृतरनिश्चयाभावादधस्तिर्यगूर्ध्वं प्रसरणवितर्केण सकलव्यापकत्वमुक्तं ॥ ५२ ॥ अथैषां सर्वदेहव्यापकत्वमाह ॥
दीसइ रअणिअरबलं पवंगजोहेहिं मंसलरअंतरिअं ॥ ३॰ सा अह अस्सठिअं पुर ३॰ मणिपव्वअस्स वहुअच्छा
अं ॥ दृश्यते रजनीचरबलं प्लवंगयोधैर्मांसलरजोन्तरितं ॥ अवश्यायहतस्य स्थितं पुरतो मणिपर्वतस्येव हतच्छा
अं ॥ प्लवंगयोधैः स्महमांसलैर्घनैरभिरन्तरितं छन्नं अत एव हतच्छायं हतप्रभं रजनीचरबलं दृश्यते किंभूतमिव
अवश्यायेन तुषारेण हतस्य छन्नस्य मणिप्रधानपर्वतस्य पुरतः स्थितमिव तथा च स्वभावेन क्रोधेन वा रुणवर्णाः
प्लवगा अपि रजश्छन्ना इत्यवशाय छन्नमणिपर्वतत्वेनोपमिता इति सर्वेषां धूलिछन्नत्वमुक्तं ॥ ५३ ॥ अथैषां भ्रमि
भ्रमरणमाह ॥ ३॰ धूसरिअधअवडो पसरइ मइलिअतुरंगममुहप्फेणो ॥ कसणम्मिहिअ वतणु ३॰ एहम्मिसा
मलइआअवारणिअवहो ॥ अवधूसरितध्वजपटः प्रसरति मलिनिततुरंगममुखफेनः ॥ कृष्णमोधिकेव तनुको

नभसिश्यामलितातपोरजोनिवहः॥ तनुकः स्वल्प एवरजोनिवहोनभसिप्रसरतिव्यापकेभवतिकृष्णमेघिकेच
नभसिश्यामलिता यथाकृष्णः स्वल्पोमेघोनभसिप्रसरतिकिंभूतः श्याम्लिनः श्यामीकृत आतपोयेन सतथामेघा
येवं एवंमलिनितस्तुरंगममुखफेलोयेनतथावधूसरिताध्वजपटायेनेतिभूमेरुत्थापतुरंगमुखेगलित्वापताका
स्वमिलित्वाक्रमेणगगनंव्याप्तवानित्युक्तं॥५४॥अथैषांनवविधमाह॥ वाणररहसविरज्जिअणहंगणोवइअ
सेरुमग्गाणिराउ॰॥ रइणोकलुसच्छाउ॰पडइपणालोज्जुरोघकिरणुज्जोउ॰॥ वानररभसविसज्जितनभोगणा
च पतितशैलमार्गनिरायतः॥ रवेः कलुषच्छायः पतति प्रणालनिर्झरइवकिरणोद्योतः॥ रवेः किरणोद्योतः किरण
प्रकाशः पतति प्रणालनिर्झरइव प्रणालस्य सौधादिस्थितजलनिर्गमरंध्रस्य निर्झरोजलधारायथापतति तथैव
त्यर्थः साम्यबीजमाह कीदृक् वानररभसेनोत्साहेन विसर्जितास्त्यक्ताअतएव नभोंगणादव पतितायेशैलास्तेषांमार्गेण
पतनवर्त्मनानिरायतोदीर्घस्तथाच गिरिभिः श्वशरीरेणावष्टभ्य निजवर्त्म धूलिनामधोनयनादप्रतिबंधेनतरणित्ते
जसामधः पतनादन्यत्रतुधूलिभिः प्रतिरोधान्नतथेतिभावः पुनः कीदृक् कलुषच्छायः परतः समागतरजः संपर्का
दितिकलुषत्वेनवर्तुलत्वेनदीर्घत्वेनचततोल्पादुपमा॥५५॥अथैषां[illegible]भावमाह॥ कुवि॰ हरिआणिसा
अरपव अद्दकवंधपूरिअच्छतास॥ मंसलमहुकोसनिहोवज्झइबद्धरुहिरासिधारासार॰॥ कुपितावहतनि
शाचरप्लवगदृढस्कंधपूरिताच्छान्तासमांसलमधुकोषनिभोबध्यतेबद्धरुधिरासिधारासुरजः॥ बद्धंस्त्यानीभू
तरुधिरंयासुतासु असिधारासुरजोबध्यतेसंबध्यतेदृढीभवतीत्ति यावत्किंभूतासु कुपितेनिशाचरेरवहताः
वपातितोअतएव प्लवगानांदृढेपिस्कंधपूरितोव्याप्तामग्नइत्तियावत्॥ अग्रभागोयासांतासुअतएवोत्थापनानं
तरंतत्रैवरुधिरसंपर्कोदार्यालिनसंदानितान्मांसलस्थूलोयोमधुकोषच्छत्राकृतिमधूत्पत्तिस्थानंतत्तुल्यंवर्तु
लत्वादितिभावः॥५६॥अथैषांगजमुखपंकीभावमाह॥ रणपरिसक्कणविहलरइकिरणाहअकिलिंतमउ
लिअणअणाणिघाअंतिगइंदासीभरसंवलिअरेणुकद्दमिअमुहा रणपरिसर्पणविह्वलारविकिरणाहत २२४
क्लाम्यन्मुकुलितनयनाः निर्घान्तिगजेंद्राः शीकरसंवलितरेणुकर्दमितमुखाः॥ रणपरिसर्पनेनभ्रमरण

विह्वलाअतएवरविकिरणैराहताः स्पृष्टाः सन्तः क्लाम्यन्तोऽथच मुकुलितनयना मुद्रिताक्षा गजेंद्रा निर्घान्तिसुखि
ताभवंति अत्रबीजमाह शीकरसंवलितैरेणुभिः कर्दमित मुखाः संतापेसति निजोदरजलावसेकादाननलग्न
रेणुपंकेनशैत्योत्पत्तेरित्तिभावः॥५७॥अथैषांमूलविरलत्वमाह॥ मूलाहोअकरालासोणिअसोत्तणिवहन्त
रालपसरिआ॥ एक्कक्कमेणसमअंसंवज्झन्तिउअरिंमहिलउप्पीडा॥ मूलाभोगकरालाः शोणितस्रोतोनिवहान्त
रालप्रसृताः॥ एकैकक्रमेणसमंसंबध्यंते उपरि महीरजउत्पीडाः॥ महीरजसामुत्पीडाउपरि एकैकक्रमेणप
रस्परेणसममेकदेवसंबध्यंत मिलंतिकिंभूताः शोणितनिवहस्य अन्तरालेषुप्रसृताउत्थिताः॥ अतएव मूलाभो
गमूलस्थानेकरालाविरलायमर्थः यत्रयत्रनशोणितप्रवाहस्तत्रतत्रोत्थितात्रन्यत्रशोणितसत्वान्नोत्थिताइतिमू
लेविरलाअपिनभसिगत्वामिथोमिश्रिताः॥५८॥अथैषांनभसि[illegible]भावमाह॥ णिषालेरुणणहंगअसो
कारिवलंतधअवडत्तनुईं॥ पवनोकड्डइविसमंछाआवहपट्टधूसरंरअलेहं॥ निर्वाल्यनभसिगजसूत्कृतबलध्व
जपटतनुकां॥ पवनः कर्षतिविषमंछायापथपृष्ठधूसरांरजोलेखां॥ पवनोरजोलेखांनभसिनिर्वाल्यपृथक्कृत्यवि
षमंयथास्यादेवंकर्षतिधाराक्रमेणस्थानेस्थानेप्रापयतीत्यर्थः किंभूतांगजानांसूत्कृतेरूर्ध्वश्वसितैर्बलन्तस्तिर्य
क्प्रजन्तोयेध्वजपटास्तत्समीपेतइत्तनुकांकृशांतदुपरिछायापथोनभस्थितंस्फुरगजवर्त्मतत्पृष्ठवद्धूसरांतथात्वो
परिस्थितत्वेन धूसरत्वेनकृशदीर्घत्वेनचपताकापटछायापथाभ्यामुपमा॥५९॥अथैषांगजदृष्टिरोधकत्वमाह॥
संतुंभइदिठ्ठिवहंगआणअहिमुहपहाविआणरणमुहे॥ मारुअकंपिज्जंतोवअणज्झासंमिमुहवडोघमहिरउ॰
संरुणाद्धिदृष्टिपथंगजानामभिमुखप्रधावितानांरणमुखे॥ मारुतकंप्यमानोवदनाभ्यासेमुखपटइवमहीरजः म
हीरजःकर्तृरणमुखेप्रधाविता गजानांदृष्टिपथंसंरुणाद्धिपुरोद्रष्टुंनददातीत्यर्थः अतएवकियंतः शत्रवोजीवंती
तिभावः किंभूतः मारुतेनकंप्यमानः प्रसार्यमाणोतएववदनस्याभ्यासेनिकटेमुखपटइवमुखाछादकपटइवसोपिकु
द्धगजस्यमुखेदीयमानस्तद्दृष्टिपथंरुणाद्धीत्युत्प्रेक्षा॥६०॥अथद्वाभ्यामेषांक्रमेणप्रशांतिमाह॥ णवरिअभड
वच्छत्थलवणमग्गाणिराअपव्भिउच्छलिआए॥ रुहिरणइअमहिरउ॰तुम्मूलिअकुलयाअवावणिसुद्धो॥ अन

से॰ बं॰ टी॰ २२५ न्तरंचभटवृक्षःस्थलव्रणमार्गनिरायत प्रस्थितोच्छलितयारुधिरमहीरज उन्मीलितकूलपादपइवनिपातितं
रजोवल्ध्यनन्तरंचभटानांवक्षस्थलेषुव्रणमार्गेभ्योव्रणस्थानेभ्योनिरायतंदीर्घंयथास्यादेवंप्रस्थितोच्छलितयारु
धिरनद्यामहीरजोनिपातितंमूलविच्छेदान्नाशितमित्यर्थः किंभूतमिवउन्मूलितस्यकूलस्यपादपइवयथान्ययाप्यु
च्छलितयानद्याकूलमुन्मूलवृक्षः पात्यतइत्यनेनवक्षःक्षतेनसौर्यमुक्तं॥ ६२॥ अथैषांक्रमेणानिवाशर्यमाह॥
पलहुअणीहारणिहसंघाइअकमलनालतंतुच्छाअं॥ घोलइदरवोच्छिण्णंमारुअभिण्णतभिणाहिअं रअसेसं
प्रलघुकनीहारनिभंसंघटितकमलनालतन्तुच्छायं॥ घूर्णतेदरव्यवच्छिन्नंमारुतभिन्नंतडिनस्थितंरजःशेषं
रजःशेषंरुधिरैरेवशोषितंरजःप्रथमंदरव्यवच्छिन्नंरुधिरसंपर्केणमूलविच्छेदादीषत्पृथक्पृथग्भूतंदनुमारु
तेनभिन्नंखंडखंडीकृतमतःतडिनस्थितंविरलस्थितंसत्घूर्णतेदिशिदिशिगच्छतीत्यर्थः॥ कीदृशंखंडखंडीभा
वेपिप्रलघुकाबिंदुरूपायेनीहारास्तन्निभंवर्त्तुलाकारत्वात्पश्चात्संघटितानालभंगादुत्पादितायेकमलनाल
नांततवस्तेषामिवछायायस्यतथाभूतंवर्तुलाकारस्यैवखंडस्यमारुतेनपुनःशतसोविच्छिकिंचिव्यवहितस्थि
तदीर्घनानासूत्रसदृशीकृतत्वादितिप्रथमंकिंचिद्व्यवच्छिन्नस्थितंतदनुहिमबिंदुवत्खंडखंडीभूतंपश्चाद
नेकविसततुवदूर्ध्वाधस्तिर्यक्क्रमेणकृशीभूयप्रसृतमित्यर्थः पांडरत्वेनहिमतंतुभ्यानोसं॥ ६२॥ अथगजानांप
तनमाह॥ रुंभंतुज्जुअमग्गाधराहरंतरवलंतणइसोत्तणिहं॥ वलइवलन्तधअवडंपडिअगइंदणिवहन्तरालेस्
कबलं॥ रुध्यमानऋजुकमार्गधराधरांतरवलन्नदीश्रोतोनिभं॥ वलतिवलद्ध्वजपटंपतितगजेंद्रनिवहान्तराले
षुवलं॥ पतितस्यगजेंद्रनिवहस्यअंतरालेषुशून्यावकाशेषुघूर्णतध्वजपटंसद्बलंवलतिघूर्णतेकिंभूतंरुध्य
मानऋजुमार्गायस्यतत्तथाचपतितगजावरुद्धसंमुखमार्गत्वादवकाशेनगंतुंबलस्यभ्रमणंतजएवपताका
नामपीत्यर्थः अतएवधराधराणामन्तरेवलद्वक्रीभवद्यन्नदीश्रोतस्तन्निभंयथापर्वतावरुद्धपथतयासंमुखमप
हायपर्वतयोरन्तरेणचलितुंनदीप्रवाहावक्रीभवतितथेदमपीतिपर्वतैर्गजानांश्रोतसाबलस्यतोत्माद्युपमा॥ ६३॥ २२५
अथकपीनांपतनमाह॥ दूसहसहिअप्पहरादुव्वोज्झविलग्गासमरणिव्वूढभरा॥ आच्छुणदुग्गमपहाकअदु

क्करपेसणापडन्तिपवंगा॥ दुस्सहसोढप्रहारादुर्वहविलग्नसमरनिर्व्यूढभराः॥ अक्षुण्णदुर्गमपथाःकृतदुष्करप्रे
षणाःपतंतिप्लवंगाः दुःसहासंतःसोढाःप्रहारायैरेवंदुर्वहस्यदुःखनिर्वाहनीयस्यविलग्नस्योपगतस्यसमरस्य
निर्व्यूढोनिर्वाहिताभरोयैःशत्रूणांजयादेवंअक्षुण्णआक्रान्तोदुर्गमःपरागम्यःपंथायैस्तथाचकृतंनिष्पादितंदुष्क
रमःसाध्यंप्रेषणंराजाज्ञायैरेवंभूताअपिप्लवंगाःपतंतिम्रियंतइतिरणस्यघोरत्वमुक्तं॥ ६४॥ अथयुद्धसमृद्धि
माह॥ बंधुवहबद्धवेरंसहस्सपूरणकबंधजणिआमोअं॥ वड्डइभडदिण्णरसंभुजपव्वलपहुत्तवीरपडणंजुज्झं
बंधुवधबद्धवैरंसहस्रपूरणकबंधजनितामोदं॥ वर्द्धतेभटदत्तरसंभुजप्रवलप्रभूतवीरपतनंयुद्धं बंधूनां
पितृभ्रातृपितृव्यादीनांवधेनबद्धंवैरंयत्रएवंसहस्रस्यपूरणंयस्मात्तेनचरमेणकबंधनजनितश्चामोदोनर्तनं
यत्रसहस्रशूरपतनेएकःकबंधोनृत्यतीतिप्रसिद्धेः॥ एवंभटेभ्योदत्तोरसःप्रीतिर्येनएवंभुजाभ्यांप्रबलानांप्रभूता
नाःमसंख्यानांवीराणांपतनंयत्रतादृशंयुद्धंवर्द्धतेप्रकर्षंगच्छतीत्यर्थः॥ ६५॥ अथशिवानांसंभारमाह॥ मणि
बंधागअपुंजिअसन्नाहच्छेअवलआदिण्णावेढं॥ णेउंणसक्कइसिआमूलुच्छिण्णगरुअंणिसिअरस्सभुअं॥ मणिबंधा
गतपुंजितसन्नाहच्छेदवलयदत्तावेष्टं॥ नेतुंनशक्नोतिशिवामूलोच्छिन्नगुरुकंनिशिचरस्यभुजं॥ शिवाश्रृगाली
मूलात्स्कंधादुच्छिन्नंकृत्तमतएवगुरुकंनिशिचरस्यभुजंनेतुमन्यत्रप्रापयितुंनशक्नोतिकिंभूतंमणिबंधेकरमूलेआ
गतःसम्पुंजितोयःसन्नाहछेदवलयोवलयाकृतिःसन्नाहछेदस्तेनदत्तआवेष्टंचतुर्दिशिवर्त्तनंयत्रस्कंधेखड्गेणा
हेनातिगुरुत्वादुन्नोलयितुंनपारयतीत्यर्थः॥ ६६॥ अथरुधिरसरित्प्रवाहमाह॥ आवत्तंतरवलिआरुहिरणिहा
एसुपासवद्धफेणा॥ उम्मुहुन्तपंडगरुआअत्थाअंतिपडिरूणचामरुप्पीडा॥ आवर्त्तांतरवलिता रुधिरनिघातेषु
पार्श्वबद्धफेणाः॥ आर्द्रीयमानपक्ष्मगुरुकाअस्तायंतेपतित्वाचामरोत्पीडाः चामराणामुत्पीडाःरुधिरनिघातेषुपति
त्वाआवर्त्तान्तरंरुधिरभ्रममध्येवलिताभ्रमिताःसंतोःस्तायंतेमज्जन्तिअत्रहेतुमाह॥ किंभूताइत्थंरुधिरसंपर्का
दार्द्रीयमानैःपक्ष्मभिःकेशैर्गुरुकायतःएवंपार्श्वेप्रांतेबद्धालग्नाःफेणायत्रचमरश्चामरोपिचेतिशब्दः।भेदः॥ ६७॥

Dr. BHAU DAJI MEMORIAL
डाक्तर भाऊदाजी स्मारकसंग्रहालय

अथगजानांवैक्लव्यमाह ॥ उद्धमुहमुक्कणापुथद्दमरोसि अंतपच्छिमभाआकुंभेपवअसिलाहअखुप्पलुद्धंकुसे
धुणत्ति गइंदा ऊर्ध्वमुखमुक्तनादाः पूर्वार्द्धभारावसीदत्पश्चिमभागाः ॥ कुंभान्प्लवगशिलाहतनिषायमाणोर्ध्वांकुशा
न्धुन्वंति गजेंद्राः ॥ गजेंद्राः प्लवगैः शिलाभिराहतस्ताडितस्तत् निखाय माणान्तः प्रवेशितऊर्ध्वउपरिवर्ती ऊर्ध्वदंडा
याअंकुशायत्रतान्कुंभान् धुन्वन्तिचालयंति कुंभे पूर्वारोपितएवांकुशः शिलाभिघातेन मग्नः तदुद्धारार्थमितिभावः
पीडावशेनवा अतएव किंभूता ऊर्ध्वमुखाः संतो मुक्तनादाः कृतचीत्काराः अथचपूर्वार्द्धस्याताडितस्कंधभागस्यभ
रेणावसीदन् यंत्रितः पश्चिमभागोधः स्थितनितंबप्रदेशोयेषामितिजातिरलंकारः ॥ ६८ ॥ अथराक्षसानामपयान
माह ॥ अहपवअभरुझंता पहरुज्जअति असभंगदाणसमुडआ ॥ जाआरक्खसजोहापढमुग्गअदुक्करं पडिवहा
हिमुहा ॥ अथप्लवगभरोद्भ्रान्ताः प्रहारऋजुकत्रिदशभंगदानसमुचिताः ॥ याताराक्षसयोधाः प्रथमोद्गतदुष्करंप्र
तिपथाभिमुखाः ॥ अथगजवैक्लव्यानंतरं राक्षसयोधाः प्रतिपथाभिमुखाः ॥ प्रतीपगमनोन्मुखाजाताः प्रथममुद्गत
मुपस्थितमतएवदुःकरं पथास्यात् राक्षसानांयुधि पलायनमिदं प्रथममेवोपस्थितमिति लज्जावशादितिभावः एवंप्रहारेषु
किंभूताः प्लवगानांभरेणाधिक्येनोद्भ्रान्ताः दिशिदिशि गच्छन्तः प्लवगानाक्रांतदेशालाभादितिभावः एवंप्रहारेषु
ऋजुका निष्कपटा अकपटयोधिनो येत्रिदशास्तेषांभंगदानेसमुचितायोग्यास्तज्जेतारइत्यर्थः ॥ ६९ ॥ अथपरा
वृत्तिमाह ॥ भग्गाणि अन्ति आगअभमिअंह्लाणपरिवत्तिअभगारहं ॥ एक्कपअवलिअजोहंमंडलिदिण्णतुरअं
णिसाअरसेण्णं ॥ भग्नाःपनिवृत्तितगजंभ्रमितस्थानपरिवर्तिताताव भग्नरथं एकपदवलितयोधमंडलीदत्ततुर
गंनिशाचरसैन्यं ॥ निशाचरसैन्यंभ्रमितं युद्धायपुनः परावृत्तमित्यर्थः कीदृशंभग्नाः पलायिताः सन्तोपुनिवर्त्तिता
युद्धसंमुखीकृता गजायत्र एवस्थाने परिवर्तिता युद्धायभ्रामिता अभग्नाविमुखारथायत्र एवंएकपदेनैकोपक्रमे
णवलितावक्रीभूतायोधाः पत्तयोयत्र तथा मंडल्यांगतिविशेषे दत्ताः प्रेरितास्तुरगायत्र मंडलीगत्यैव परावर्त्तिता
श्चमित्यर्थः तेन हस्त्यश्वरथपादातरूपचतुरंगबलपरावृत्तिरुक्ताकेचित्तुभ्रमितपश्चाद्गतमितिव्याख्यायपला २२९
यनपरतयैव स्कंधकमिदंव्याचक्षतेएतदनुसारेणग्रिमाग्रिममपितथैतिस्फुटत्वान्नव्याख्यातं ॥ ७० ॥ अथपुनः

लायनमाह ॥ अमरिसविस्थिघन्ता विवलाभमिऊण गलिआमरिसा ॥ इसिविअंतच्छूढाणिज्झीअह्लीणवाण
रारअणिअरा ॥ अमर्षविनिष्टमानाविपलाय्यभ्रमित्वागलितमर्षाः ॥ ईषद्विवृत्तक्षिप्तानिर्भीतालीनवानरार
जनीचराः ॥ निर्भीताश्चतएवालीनाः संगतावानरायेषांतेरजनीचरायुद्धायईषद्विवृत्ताः परावृत्ताअथक्षिप्ताःप्रे
रिताःसंतः कपिभिरित्यर्थात्पुनरपिभ्रमित्वापरावृत्य पलायंते किंभूताः प्रथमं अमर्षेण विनिष्टमाना विलंबिताअ
नंतरं गलितामर्षाईर्षाशून्याः प्राणकातरत्वादितिभावः ॥ ७१ ॥ अथपलायनावस्थामाह ॥ रहसंदाणिअतुरअं
तुरंगमोरत्थलक्खलिअपाइक्कं ॥ पाइक्कावलिअगअंगअभज्जंतरहसंकुलंबलइवलं ॥ रथसंदानिततुरगंतुरंग
तुगमोरस्थलास्खलितपदाति ॥ पदात्यावलितगजंगजभज्यमानरथसंकुलंवलतिबलं ॥ निशाचराणांवलंब
लतिघूर्णतिकिंभूतंरथैस्संदानितामिलितास्तुरगायत्र एवंतुरंगमाणामुरस्थलात्स्खलिताघट्टिताः पदातयोयत्र
पदातिभिरावलिताः पृष्ठेतुरंगमातिक्रमादुपरुद्धागजायत्र तद्गजैर्भज्यमानायेरथास्तैः संकुलमेकीभूतंगजैरथा
रथैरथारथैरश्ववारास्तैः पत्तयः पत्तिभिश्चगजाउपर्युपरिपतित्वातिक्रांताइतिचतुरंगबलविपर्यासउक्ता ॥
७२ ॥ अथकपीनांविश्राममाह ॥ ससइविसमुद्धकंपंगरुआअन्तभुअलंविअंभग्गदुमं ॥ विहलोसरिअपडि
भडंसण्णावाहिअणिसाअरं पवअवलं ॥ श्वसितिविषमोर्ध्वकंपंगुरुकायमानभुजलंबितावभग्नद्रुमं ॥ विह्वल
यसृतप्रतिभटंसन्नापवाहितनिशाचरंप्लवगबलंविषमः तिर्यस्कादूर्ध्वः कंपोयस्य तत्प्लवगवलंश्वसितिमारणो
यापयानेन विश्राम श्वासंत्यजतितत एवशिरः प्रभृत्यंगकंपइत्यर्थः किंभूतं विपक्षापयानेसतिश्रमज्ञानाज्जडी
भावेन गुरुकायमानाप्यांलंबिताअधः संसृताश्चवभग्नाविपक्षाभिघातेनविशीर्णशाखापत्राद्रुमायस्य एवंविह्वलः
संतोपसृताः पलायिताः प्रतिभटायस्य एवंसन्नाअवसन्नाश्चअपवाहिताः पातितानिशाचरायेनतत्तथाकियंतोमारि
ताः कियन्तः पलायिताइत्यर्थः ॥ ७३ ॥ अथरक्षसांपुनः परावृत्तोद्योगमाह ॥ आखंडिअसोडीरापव आणिअपढम
माणभंगावसरा ॥ भग्गाविभमन्ति पुणोणीसेसंकरक्खसाणगेण्हंतिभअं ॥ अखंडितशौटीर्याः प्लवगानीतप्रथम
मानभंगावसराः ॥ भग्नाअपिभ्रमन्तिपुनर्निःशेषंराक्षसानगृह्णन्तिभयं ॥ यतोऽखंडितशौटीर्याअखंडिताहंका

॥रा अतोभग्ना अपि राक्षसाः पुनर्भ्रमन्ति युद्धाय निवर्त्तितुमित्यर्थात् किंभूताः प्लवंगैरानीत उपस्थापितः प्रथमस्य
मानभंगस्यावसरः समयो येषां ते प्रथमोऽवसरो वा अन्यदा कदापि येषां मानभंगो न जात इत्यर्थः॥ अतएवासह्य
तया निवर्तनमिति भावः॥ यतो भ्रमंति तत एव ज्ञायते तेनिःशेषं भयं न गण्हंति अन्यथा पलायनमेव कुर्युरिति भावः॥ ७४
॥अथ चतुर्भिः कुलकेन पलायनमेवेषामाह॥ तह विअ दर परिवत्तिअ चक्काअ इज्जुन्त गरुअ चक्क रहवहं॥ विअ
क्कंतपहाविअ समत्थ संठावणाविढं तरण जसं तथापि च दरपरिवर्तितचक्रायमान गुरुकचक्ररथपथं॥ वितिष्ठमा
न प्रधावित समर्थ संस्थापनार्जित रणयशः॥ यद्यपि युद्धाय साकांक्षं तथापि निशाचरसैन्यं भग्नमित्यग्निमचतुर्थे
नान्वयः कपीनामुग्र पलात्तया पलायितमित्यर्थः दरपरिवर्तितः किंचिद्भ्रामितो ऽत एव चक्रायमाणश्चक्राकृतिगुरुक
चक्रस्य रथस्य पंथा यत्र परावृत्त्यै रथभ्रामणे तिर्यक्चलितत्वचक्राद्युल्लिखितः पंथा अपि चक्राकृतिरभूदित्यर्थः अ
त एव वर्षण संपादकत्वेन गुरुकेति चक्र विशेषणमिति वयं प्राञ्चस्तु परिवर्तितान्यत एव चक्रायमाणानि गुरुणि
चक्राणि येषां तादृशानां रथानां पंथा यत्रेत्याहुः एवं वितिष्ठमाने युद्धार्थमवस्थिते रथच पलायितानां परावर्तनाय प्र
धावितैरितस्ततो गच्छद्भिः समर्थैः संस्थापनाया माभैरित्यादि समाश्वासनवाक्यै नार्जितं रणे यशो यत्र य एवं र
णाय परानाश्वासयामासतेनैव यशो लब्धमित्यर्थः॥ यद्वा वितिष्ठमानैः प्रधावितानां समस्तानां संस्थापनं येत्य
न्वयः॥ ७५॥ वाणर परंमुहोणामिअद्ध मोडिअ णिलाडवट्टणिसिअरं॥ परसेणकलअलाहिअ पडिणिअत्त
गअविउलारोहं॥ वानरपराङ्मुखावनामितार्द्ध मोठित ललाटपट्ट निशिचरं॥ परसैन्यकलकलोद्विग्न प्रतिनि
वर्त्तमानगजविलोलारोहं॥ किंभूत सैन्यं वानरैः पराङ्मुखीकृत्यावनामिता अत एवार्द्धमोटितं ललाटपट्टं येषां
तथाभूता निशिचरा यत्र तत्पलायनादन्यतो मुखानां निशाचराणां पृष्ठतो गत्वा कपिभिर्धृतस्य शिरसः स्वाभिमुखी
करणाय यदावर्तनं तत्प्रतिबंधादेव ललाटस्यार्द्धमोटितत्वमित्यर्थः एवं जयोत्साहजनितेन वानरसैन्यकल
कलेनोद्विग्नेभ्यः त्रस्तेभ्यस्तत एव प्रतिनिवर्तमानेभ्यो पलायमानेभ्यो गजेभ्यो विलोला श्वंचलाः पतिता इति या २२७
वत् आरोहा हस्तिपका यत्र गजानामुद्वृत्त गत्या हस्तिपकानां पतनमित्यर्थः॥ ७६॥ चलवाणराणुधाविअ वोलधि

ज्जन्तणिच्चलट्ठिअ तुरअं॥ णिहअभड पडिअ सारहिपवंगभेसिअ तुरंगहीरंतरहं॥ चलवानरानुधावितवालधि
यमाननिश्चलस्थिततुरगं॥ निहतभटपतितसारथिप्लवंगभीषिततुरगह्रियमाणरथं॥ एवं चलैर्वानरैरनुधावि
ताः पृष्ठतोऽनुगता अत एव वाले पुच्छे केसरे वा ध्रियमाणाः सन्तो निश्चलस्थितास्तुरगा यत्र कपिभिर्धृतत्वेन प्रति
रुद्धगतित्वादेवं निहतो भटो रथी यस्य पतितः सारथिर्यस्य तादृश एव प्लवंगेन भीषितैः कोलाहलादिना त्रासितैः तुरं
गैर्ह्रियमाणा रथा यत्र पलायिताश्व पृष्ठलग्नाः शून्या एव रथा गच्छंतीत्यर्थः॥ ७७॥ धारामग्गणिवाडिअ वलपडिहअ वि
रलवाणरुणिअमग्गा॥ भग्गंगलंत पहरण सुण्णइअ हअ भुअणिसाअरसेण्णं॥ धारामार्गनिपातितबलप्रतिह
तविरलवानरोन्नीतमार्गं॥ भग्नं गलत्प्रहरणं शून्यीकृतोभयभुजं निशाचरसैन्यं॥ धारामार्गे संग्रामे निपातितं
यद्बलं करितुरगादि तेन हेतुना प्रतिहता विच्छिन्ना अत एव विरलाः स्थाने स्थाने प्रवृत्ताः सन्तो वानरैरुन्नीता जहिता
जहिता मार्गा यस्य गंहणाहतत्वेन धाराकारत्वाभावाद्दर्शनो विरलत्वमत एवात्र संचारचिह्नमनेन गता इत्यादि
कवितर्क प्रसक्त इत्यर्थः एवं गलद्भिः प्रहरणैरस्त्रैः शून्यीकृता उभयोर्भुजा यस्य तादृशं भयेन मपि स्खलितं त्यक्तं चे
त्यर्थः॥ ७८॥ अथैषां परावृत्तिमाह॥ अहहिअ मच्छरलहुआ एक्कक्कमचक्खुरक्खणाहिअहिअआ॥ ह्रिआ
वडिअ दहमुहावलिआ पडिमुक्क रणभआ रअणिअरा॥ अथ हृतमत्सरलघुका एकैकक्रमचक्षूरक्षणाहितहृ
दयाः॥ ह्रदयापतित दशमुखावलीताः प्रतिमुक्तरणभया रजनीचराः॥ अथ पलायनानन्तरं रजनीचरा हृदये आपति
तो दशमुखो येषां तथाभूता अत एव प्रतिमुक्तरणभयाः सन्तो वलिता घूर्णितायुद्धस्थलागंतव्यं तदा दशमुखो मार
यिष्यतीति युद्धमेव वरमिति भीतिमुत्सृज्य पुनर्युद्धाय परावृत्ता इत्यर्थः किंभूता हृतमत्सरत्वेन मात्सर्यशून्यत्वेन
लघुका निःसारा मात्सर्ये सति पलायनमेव न स्यादिति भावः॥ एकैकक्रमेण परस्परं चक्षुषां रक्षणे आहिता
न्यर्पितानि हृदयानि यैस्ते चक्षुः संमुखे लज्जया परस्परं त्यक्तुमपारयन्त इति स्नेहेव परावृत्ता इति भावः॥ ७८॥
अथैषां पुनः पौरुषमाह॥ वोच्छिणसंधिअ जसा होन्ति णिअत्त समुहट्ठ विअ सोडीरा॥ कइवलदुप्परिअत्ता
सिढिलिअ पडिवण रणधुरा रअणिअरा॥ व्यवच्छिन्नसंहितयशसो भवन्ति निवृत्त संमुखस्थापि शौटीर्याः॥

४९

कपिबलदुष्परिकलनीयाःशिथिलितप्रतिपन्नरणधुरारजनीचराः॥ शिथिलितात्यक्ताअथप्रतिपन्नास्वीकृता
से०बं०टी० रणधुरायैस्तेरजनीचराभवंतिकीदृशाःप्रथमंव्यवच्छिन्नंत्रुटितमनंतरंसंहितंसूत्रवद्धायोजितंयशोयैस्तैत
२२८ थाएवंनिवृत्तमपगतंपश्चात्संमुखस्थापितंसौटीर्यमहंकारोयैरेवंकपिबलैर्दुष्परिकलनीयादुराधर्षाःतथा
चयशःसौटीर्यंदुर्द्धर्षत्वंचभंगादपगतंयुद्धायपरावृत्त्यापुनरागतमित्यर्थः॥ ८०॥अथपुनर्युद्धमाह॥तोभंग
लज्जिआणंपरिवड्ढिअपसरहरिसिआणअगरुअं॥रअणिअरवाणराणंवरिआआरिअभडंपवड्ढइजुज्झं॥
ततोभंगलज्जितानांपरिवर्द्धितप्रसरहर्षितानांचगुरुकंरजनीचरवानराणां वृत्ताकारितभटंप्रवर्त्ततेयुद्धं त
तस्तदनंतरंभंगेनलज्जितानांरजनीचराणांपरिवर्द्धितेनप्रसरेणहर्षितानांचवानराणांगुरुकंयुद्धंप्रवर्त्तते
किंभूतंवृत्तोऽमुकेनसमंमयायोद्धव्यमितिस्वीकृतःसन्नाकारितआहूतोभटोयत्रतदितिसंप्रदायोवस्तुतस्तु
भंगेनहेतुनामयापराजितमितिरक्षसांकातरंरणसंभ्रमयुद्धमभूदितिकपीनांलज्जेत्यर्थःपरावृत्तिलक्षणेनचपरिव
र्द्धितप्रसरेणोभयेषामपिहर्षइत्युभयमप्युभयविशेषणमितिनद्वंद्वादनुपपत्तिरितिवयं॥ ८१॥अथसुग्रीवप्रजं
घयोर्द्वंद्वयुद्धमाह॥सुग्गावेणपअंघोसत्तच्छअपाअवेणदिण्णरणसुहो॥वणगअदाणसुरहिणावच्छुच्छलिअ
कुसुमहहासंणहद॥ सुग्रीवेणप्रजंघःसप्तच्छदपादपेनदत्तरणसुखः॥वनगजदानसुरभिणावच्छउच्छलितकुसु
कुसुमहहासंनहत॥ सुग्रीवेणप्रजंघःसप्तच्छदपादपेनदत्तरणसुखः॥वनगजदानसुरभिणावच्छउच्छलितकुसु
माद्दहासंनहतःसुग्रीवेणसेनामुखपतितत्वाच्चिरंकृतयुद्धत्वाच्चदत्तरणसुखःप्रजंघोनामराक्षसःसप्तच्छदपादप
नकरणीभूतेनहतस्ताडितःपादपेनकिंभूतेनवनगजानांदानेनसुरभिणाएतेनमत्तगजगंडकंडूयनसहत्वेन
महत्वमुक्तं दानवद्याएववक्षसःप्रजंघस्येत्यर्थात्उच्छलितानिकुसुमान्येवाट्टहासोयस्यतेनसाधुताडितोयंमत्त
हारसहोनभवतीतिवृक्षोपहासविषयोभूदित्युत्प्रेक्षा॥ ८२॥हिविदाशनिप्रभयोस्तदाह॥दिविआहअसमसम
रेसुरहिंउरपडिअसरसचंदणगंधं॥असणिप्पहस्सजीअंअग्घाअंतसुहिअणिमिल्लसगअं॥द्विविदाहतस्यसम
रेसुरभिंउरःपतितसरसचंदनगंधं॥अशनिप्रभस्यजीवंआजिघ्रत्सुखितावनिमीलितोगतः॥समरेद्विविदेनाहत
स्यचंदनेनत्यर्थादशनिप्रभस्यरक्षसोजीवोगतःकिंभूतस्यसुरभिउरसिपतितस्यसरसचंदनस्यगंधंआजिघ्रत:

सुतःसुखितस्यातएवावनिमीलितोमुद्रितनयनस्यतथाचमूर्छापूर्वकमरणजन्यदृष्टिमुद्रणंचंदनगंधाघ्राण
सुखहेतुकत्वेनोत्प्रेक्षितं॥ ८३॥मैंदवज्रमुष्ट्योस्तदाह॥हन्तूणवज्जमुट्ठिंहसइमइंदोविमुट्ठिवाअणिसुद्धं॥आ
हित्थदिट्ठिणिग्गअज्जलणसिहाअंबफुडिअलोअणजुअलं॥हत्वावज्रमुष्टिंहसतिमैंदोपिमुष्टिघातनिपातितं
उद्विग्नदृष्टिनिर्गतज्वलनशिखाताम्रस्फुटितलोचनयुगलं॥वज्रमुष्टिंराक्षसंहत्वामैंदोपिद्विविदभ्राताहसतिह
ठादेवमृतइत्याशयात्किंभूतंमुष्टिघातेननिपातितंएवंउद्विग्नाभ्यांदृष्टिभ्यांनिर्गतायाज्वलनशिखास्तोधान्तयाआ
ताम्रंसत्स्फुटितंमुष्टिघातादेवबहिर्भूतस्फुरितंदीप्तंवालोचनयुगलंयस्यतं॥ ८४॥सुखेनविद्युन्मालिनोस्तदाह
॥कुविएणविज्जुमालीचिरजुज्झिअहरिसिअसुसेणेणकअ॥चलणजुअलावलंबिअणक्खुक्खित्तखुडि
हअभुअप्फडिओ॥कुपितेनविद्युन्मालीचिरयुद्धहर्षितःसुषेणेनकृतः॥चरणयुगलावलंबितनखोत्क्षिप्त
खंडिताभयभुजपरिघःसुग्रीवश्वसुरेनवानरेंद्रेणसुखेणेनकुपितेनसताविद्युन्मालीनामराक्षसश्चरणयुगले
नावलंबितोभूमावष्टब्धावथपूर्वपातानियमात्करद्वयनखैःखंडितावुत्पाटितावथाक्षिप्तौक्वचित्प्रेरिताबु
भयभुजपरिघौयस्यतादृक्कृतःभूमौपश्चादवष्टभ्यनखैरुत्कृत्यभुजद्वयमन्यतःक्षिप्तमित्यर्थः॥ ८५॥नलतपन
योस्तदाह॥सहिअपहरंनलेणवितपणस्सतलाहिघाअमोडिअकंठं॥णिहिअंदेहम्मिसिरंदेहोअदणिमि
हिअलंमिक॥सोढप्रहारंनलेणापितपनस्यतलाभिघातमोटितकंठं॥निहितंदेहेशिरोदेहोऽपिनिवेशितोमही
तलेकृतः॥नलेनापितपनस्यरक्षसःशिरःकर्मतलाभिघातेनचपेटप्रहारेणमोटितकंठंसद्देहेनिहितंस्थापि
तंतथाचपेटाप्रहारकृतोयथातदीयंशिरस्तदीयकबंधएवप्रविष्टमित्यर्थः॥सोढप्रहारंयथास्यात्तथाकृतप्र
हारंसोढेत्यर्थःनकेवलंशिरएवतथाकृतमपितुतदीयदेहोतोपिमहीतलेऽर्द्धंनिवेशितःकृतस्तथाचैकेनैवप्र
हारेणशिरःकबंधेप्रविष्टंकबंधोप्यर्द्धेनभूमौप्रविष्टइत्यर्थः॥ ८६॥हनूमज्जंबुमालिनोस्तदाह॥हन्तूणजंबु
मालिंगन्तिविहिणाअइंचिओपवणसुअ॥सअलतलग्गाहताडणभिन्नुच्छलिअशिरमेअसित्तदसदिसं॥हत्वा
जंबूमालिनंझटितिविभिन्नोतिक्रान्तःपवनसुतः॥सकलतलगाढताडनभिन्नोच्छलितशिरोमेदःसिक्तदशदिक

पवनसुतो जंबूमालिनं हत्वा झटिति विभिन्नस्तस्माद्देवराक्षसात्पृथग्भूतः सन्निति क्रांतो दूरं गतः कीदृक् सकलतले
न संपूर्णेन चपेटेन गाढताडनाद्भिन्नैः स्फुटितैः रथोच्छलितैः शिरोमेदोभिः सिक्ता दशदिशा येन स तथा चंद्रिकायां
तलताडनेन यावत् शिरोमेदः समुच्छलति तावद्देवतत्संपर्कभियाविदूरमुत्प्लुत्य गत इति वेगोत्कर्ष उक्तः ॥ ८७ ॥
द अथ मेघनादांगदयोर्द्वंद्वमाह ॥ अह गेण्हइ अइभूमिं इंददइवालित्तणआण रणसोंडीरं ॥ णिहएक्कमेक्कप
रिअण सहत्थपडिवण्णसंसअतुलारोहं ॥ अथ गृह्णात्यतिभूमिमिंद्रजिद्वालितनययो रणसौटीर्यं ॥ निहितैकैकप
रिजनस्वहस्तप्रतिपन्नशंशयतुलारोहं ॥ अथ जंबूमालिवधानंतरमिंद्रजिदंगदयो रणशौटीर्यमहंकारश्चातुर्यं वा
ऽतिभूमिमुत्कर्षकाष्ठां गृह्णाति द्वयोरपि तुल्यबलत्वात्तुल्यं वर्द्धत इत्यर्थः कीदृशं निहता एकैकस्य परस्य एकैके वा
तयोरेव ये परिजनास्तैर्हेतुभूतैः स्वहस्तेन स्वकृत्या प्रतिपन्नः स्वीकृतः संशयरूपतुलायामारोहः आरोहणं यस्मा
त्ताभ्यामेवत्यर्थात्तादृशं परस्परं परिजनक्षयं दृष्ट्वा अनयोः को जयेदेवं रूपः संशयो रनसौटीर्यादिति भावः कस्य सौ
टीर्यं महदिति संशयविषयत्वं सौटीर्यस्यैवेति केचित् ॥ निहता एकैकपरिजना यस्मात्तथाभूतं च तत्स्वहस्तेत्यादिक्र
मेण कर्मधारयो वा ॥ ८८ ॥ बाणंधारिअदिसंधणुमंडलपरिगअंविसेसइपरं ॥ आलोइउक्खआणिअमुक्कपड
न्तेहिगिरिसहस्सेहिं कई ॥ बाणांधकारितदिशं धनुर्मंडलपरिगतं विशेषयति परं ॥ आलोकितोत्खातानीतमुक्त
पतद्भिर्गिरिसहस्रैः कपिः कपिरंगदः ॥ परमिंद्रजितं प्रथममालोकितैरुत्खातैरानीतैर्मुक्तैर्पतद्भिर्गिरिस
हस्रैर्विशेषयत्यतिक्रामति स्वापेक्षयान्यूनं करोतीति वा ॥ यद्वा आलोकितादिक्रियाणां युगपदुक्त्या क्षिप्रकारित्वमुक्तं
परं किंभूतं बाणैराच्छादितत्वेनांधकारिता दिशा येन तं तेनत्वंगदाच्छादकमित्याशयः ॥ एवं धनुर्मंडलेन परिगतं मंड
लाकारेण धनुषा संगतमित्यर्थः ॥ ८९ ॥ निवडंतिकुसुमणिब्भरमिलिअवलन्तविडवोवरूढमहुराअ ॥ विवइण्णफ
लरुक्खुआधुअमज्झक्खुडिअपल्लवा दुमणिवहा ॥ निपतंति कुसुमनिर्भरमिलितबलद्विटपायगूढमधुकराः
विप्रकीर्णफललघवो धुतमध्योत्खंडितपल्लवा द्रुमनिवहाः ॥ द्रुमाणां निवहाः पतंति मेघनादो परि यथा कीदृशाः २२९
कुसुमैर्निर्भरा व्याप्ता अथ च मिलिता मूलभागमग्रे कृत्वाक्षेपणात्परस्परं संबद्धा अत एव वलन्तो वक्रीभवन्तो ये विट

पास्तेषु पगूढाः पृथक्पतनभिया मिश्रीभूय स्थिता मधुकरा येषु ते एवं विप्रकीर्णैरितस्ततः पतितैः फलैर्लघवो वि
प्रकीर्णफलाः सन्तो लघवः वा इति एवं धुताः सन्तो मध्ये अन्तरादेशे उत्खंडिताः पल्लवा येषां ते इंद्रजित्पर्यंतं सफल
पल्लवा न गच्छन्तीत्यर्थः ॥ ९० ॥ वालिवणअंण पावइ गअणे गुप्पइ दुमेहिं सरसंघाओ ॥ छिज्जन्ति अद्धवहे एन्ता दहमु
हसुअणलंघन्ति दुमा ॥ वालितनयं न प्राप्नोति गगने काप्यते द्रुमैः शरसंघातः ॥ छिद्यंतेर्द्धपथे आयान्तो दशमुखसुतं न
लंघंते द्रुमाः ॥ मेघनादस्य शरघातो वालितनयं न प्राप्नोति तावद्दूरं न गच्छतीत्यर्थः किंतु गगनेऽन्तर इव अंगदक्षिप्तैः द्रु
मैर्गोप्यते तिरोधीयते व्याकुलीभवति वा ॥ त एव तेपि द्रुमा दशमुखसुतं न लंघन्ते तावत्पर्यंतं न गच्छन्ति किंतु आयान्तः
सन्तोर्द्धपथ एव छिद्यंते तैरेव शरैरित्यर्थात् ॥ तथा च द्वयोरपि तुल्यक्रियत्वमुक्तं ॥ ९१ ॥ विकिण्णलोद्धकुसुमं मंसरद
लिउद्धाअमाणगंधं ॥ उद्धुअमंदाररअं सरससुवगदेलगांध्निणं होइ णहं ॥ विक्षिप्तलोध्रकुसुमं शरदलितोर्ध्वी
यमानचंदनगंधं ॥ उद्धूतमंदाररजः सरसलवंगदलशुद्धितं भवति नभः ॥ नभो भवति कीदृशं विक्षिप्तानि लोध्रस्य कुसु
मानि यस्य एवं इंद्रजितः शरेण दलितानां चंदनानां मूर्छायमान ऊर्ध्वप्रसारी उद्धावमानो वा गंधो यत्र दलनेसति सौ
ता रभाद्रूमात् ॥ तथा उद्धूतानि मंदारस्य देवतरोः रजांसि यत्र पुष्पाणामित्यर्थात् एवं सरसैः लवंगस्य दलैर्गर्भितं व्याप्तं अंगद
क्षिप्तान्यस्त्राणीति भावः ॥ ९२ ॥ इअ तं समपडिहत्थं वारंवलदिण्णसाहुक्कारं ॥ इंददइवालिसुआण परप्पमाणं गअंपि
वड्ढइ जुज्झं ॥ इति तत्समप्रतिहस्तं वारंवारबलदत्तसाधुकारं ॥ इंद्रजिद्वालिसुतयोः परप्रमाणं गतमपि वर्द्धते युद्धं इति
वक्ष्यमाणप्रकारेणेंद्रजिद्वालिसुतयोस्तत्युद्धं परं प्रमाणमुत्कर्षकाष्ठां गतमपि वर्द्धते युद्धम् ॥ इति वक्ष्यमाणप्रका
रेणेंद्रजिद्वालिसुतयोस्तद्युद्धं परप्रमाणमुत्कर्षकाष्ठां गतमपि वर्द्धते ॥ पूर्वपूर्वतोप्युत्कृष्टं भवतीत्यर्थः ॥ किंभूतम्
समः प्रतिहस्तः परप्रहारनिवारणादिरूपा प्रतिक्रिया प्रतिपक्षो वा यत्र एवं वारं वारं बलाभ्यां दत्तः साधुकारो यत्र स्व
स्वपक्षव्यापारोत्कर्षादित्यनेनेह सम्प्रभिरादिकुलकम् ॥ ९३ ॥ दुमकुसुममज्झणिग्गअसरपुंखवाणगणिज्जमा
णमहुअरम् ॥ णिच्छावारासरिअट्ठिआह आविग्गसेण विम्हअदिट्ठंम् ॥ द्रुमकुसुममध्यनिर्गतशरपुंखालग्ननी
यमानमधुकरम् ॥ निर्व्यापारापसृतस्थितोभयाविग्नसैन्यविस्मयदृष्टं ॥ किंभूतं युद्धम् ॥ अस्त्रीकृतवृक्षस्य कुसुमा

नां मध्येन निर्गतैः इन्द्रजितः शरैः पुङ्खबालग्नाः सन्तोभीयमाना मधुकरा यत्र मधुसम्बन्धेन मधुपा अपि पुङ्खेलग्ना
गच्छन्तीत्यर्थः॥ एवं अपूर्वयुद्धदर्शनाय निर्व्यापाराभ्यां युद्धभूम्यस्त्वगतागत मार्गयोस्या गाय चापस्तत्स्थिताभ्यां पा
र्श्वयोः पश्चाद्वर्त्तिभ्यां उभयोरविग्नाभ्यां स्वस्व प्रभुमरणशङ्क्याहिग्न सैन्याभ्यां विस्मयेन दृष्टं भयमिति सैन्यविशेष
णंवा॥ राज्जमाण इति पाठे शराणां पुंखालग्नाः सन्तोज्ञायमाना मधुकरा यत्रेत्यर्थः॥ ९४॥ दहमुहतणअविसज्जिअ
सरभरिअणहुंगणोप्पइअवालिसुअम्॥ वालिसुअरोसपेसिअसालसिलासेलरुद्धदहमुहतणअम्॥ दशमु
खतनयविसृष्टशरभृतनभोङ्गणोत्पतितवालिसुतम्॥ वालिसुतरोषप्रेषितशालशिलाशैलरुद्धदशमुखतनय
म्॥ एवं दशमुखतनयेन विसृष्टैः शरैर्भृतात्पूरितान्नभोङ्गणादुत्पतितः प्रहारवारणायोर्द्धंगतो वालिसुतो यत्र॥
एवं वालिसुतेन रोषतः प्रेषितैः शालो वृक्षः शिलाः शैलाश्च तै रुद्धा न तु प्रतिहतः प्रतिक्रियासत्वात्तद्दशमुखतनयो य
त्र तत्॥ ९५॥ णिसिअरसरणिव्वाविअवाणरदेहरुहिरारुणदिसाहोअम्॥ वाणरपहरपअन्तिअरक्खसदेहरुहिरोह
कद्दमिअभूमिअलम्॥ निशिचरशरनिर्वापितवानरदेहरुधिरारुणदिगाभोगम्॥ वानरप्रहारप्रवर्तितराक्षसदेहरु
धिरौघकर्दमितभूमितलं॥ एवं निशिचरस्येन्द्रजितः शरैर्निर्द्दारितो वानरस्याङ्गदस्य देहो यः तस्य रुधिरैरुरुणस्ता
श्चादशानां दिशामाभोगा विस्तारा यस्मादेवं वानरस्य ~~[illegible]~~ ङ्गदस्य प्रहारैः प्रवर्तितेनोत्पादितेन राक्षसस्ये
न्द्रजितो देहस्य रुधिरौघेन कर्दमितं भूमितलं यत्र तत्॥ ९६॥ रिउसूलदूमिअ ओहीरमाणवालिसुदिणवानरसोअ
सेलाहिघाअमुच्छिअदहमुहतणअभअभिण्णरअणिअरवलं रिपुशूलदुःखितावह्नियमाणवालिसुतदत्तवा
नरशोक शैलाभिघातमूर्च्छितदशमुखतनयभिन्नरजनीचरबलं॥ एवं रिपोरिंद्रजितः शूलेन दुःखितः सन्नवह्निय
माणोऽवपात्यमानो यो वालिसुतस्तेन दत्तो वानरेभ्यः शोको यत्र तन्मरणसंदेहादेवं शैलाभिघातान्मूर्छितेन दशमुख
तनयेन हेतुना भयेन भिन्नं पृथग्भूतं पलायितं रजनीचरबलं यस्मात्तत् एवं मूर्छया वानरप्रशरशंकावशादितिभावः
॥ ९७॥ तारातणअविसेसिअरअणिअरपअत्तपवअसेणकलअलं॥ मंदोदरिसुअदूमिअवाणपरिओसमुहलर २३०
क्खसलोअं॥ तारातणअविशेषितरजनीचरप्रवृत्तप्लवगसैन्यकलकलं॥ मंदोदरीसुतदुःखितवानरपरितोष

मुखरराक्षसलोकं॥ एवं तारातनयेनांगदेन विशेषितो अतिक्रान्तो यो रजनीचराः शक्रजित्तेन हेतुना जातानंदत्वात् प्रवृ
त्त उत्पन्नः प्लवगसैन्यकलकलो यत्र तत एवं मंदोदरीसुतेन दुःखिता व्याकुला यो वानरोंगदस्तेन हेतुना परितोषान्मुख
राः कृतकोलाहला राक्षसलोका यत्र अंगदेन यदा मेघनादः परिभूयते तदा प्लवगानां यदा च मेघनादेनांगदस्तदानि
शाचराणां मुहुर्मुहुरानंदकोलाहलोभूदित्यर्थः॥ ९८॥ भुअपडिअणिप्फलप्फलिहभंगहेलाहसन्तवाणरजोहं॥ उर
भिणसिलाअलमेहणाअमुक्कट्टहासपंडुरिअणहं॥ भुजपतितनिष्फलपरिघभंगहेलाहसद्वानरयोधं उरोभिन्न
शिलातलमेघनादमुक्ताट्टहासपाण्डुरितनभः॥ एवं भुजयोरर्थादङ्गदस्य पतितस्सन् निष्फलोऽनभिभावकत्वाद्यः परिघो मे
घनादस्य तद्भंगेन द्विधाभावेन सानंदत्वाद्धेलया सहन्तो वानरयोधा यत्र भुजयोः किमपि नाभूत् प्रत्युत परिघ एव भग्न
इत्याशयः॥ एवं उरसि भिन्नं स्फुटितं शिलातलमंगदमुक्तं यस्य तेन मेघनादेन गर्वितया मुक्तो योऽट्टहासस्तेन पाण्डुरि
तं नभो यस्मात्तत् कुलकं॥ ९९॥ अथेंद्रजित्पराजयेन आसकं विच्छिन्नन्ति अह दद्दइ म्मि वालितणएण समराणुरा
अभग्गुच्छाहे॥ णिहओत्तिहसन्ति कइमा अइति अत्तिहरिसिआरअणिअरा॥ अथेंद्रजिति वालितनयेन समरानु
रागभग्नोत्साहे॥ निहत इति हसन्ति कपयो मायया स्थित इति हर्षिता रजनीचराः॥ अथ दृढयुद्धानंतरं वालितनयेनेंद्र
जिति समरानुरागे भग्न उत्साहो यस्य तथाभूते कृते सति तिरोभवन्निंद्रजिन्निहतो मृत इति कृत्वा कपयो हसंति मायया
स्थित इति कृत्वा रजनीचरा हर्षितास्तत्वज्ञत्वादितिभावः॥ १००॥ इह सेतुबन्धे महाकाव्ये दशमुखवधे रामदासभूपतिविरचितायां रामसेतुप्रदीपस्य
शिखा पूर्णत्रयोदशी॥ १३॥ अथ रामस्यापरमाह॥ अहणिप्फलगअदिअसो जहिच्छिआसंपडन्तदहमुहलंभो॥ भूरइलं
काहिमुहो अलसाअन्तह अरक्खसो रहुणाहो॥ अथ निष्फलगतदिवसो यदृच्छयासंपद्यमानदशमुखलंभः खिद्यते
लंकाभिमुखोऽलसायमानहतराक्षसो रघुनाथः॥ अथेंद्रजित्तिरोधानान्तरं रघुनाथः खिद्यते अत्र हेतुमाह कीदृक् निष्फलो
गतो दिवसो यस्य स तथाकृतरावणवधत्वात्तदेवाह यदृच्छया संपद्यमानो दशमुखस्य लंभः प्राप्तिर्यस्य अत एव लंकाभि
मुखो रावणागमनसाकांक्षत्वादेवं अलसायमानो मंदमंदमस्त्रव्यापारयन् सन्नहता राक्षसा येन तथाभूतः अप्रतिपक्ष
बुध्यानास्थावशादितिभावः॥ १॥ अथ रामस्य पुनः शरनिक्षेपमाह॥ एएसु अहणिसण्णाणणींद्रसमरंदसाननोत्तिग

९२

से॰बं॰टी॰ २३१ णंतो॥इछइदिणाआसेरअणिअरेस्रूपडिमुंचिउंसरणिवहो॥एतेषुस्रुखनिषण्णोननिरेतिसमरंदशाननइति
गणयन्॥इछतिदत्तायासान्रजनिचरेषुप्रतिमोक्तुंशरनिवहान्॥एतेषुरजनीचरेषुस्रुखनिषणःकृताध्यवसा
योदशाननःसमरंप्रतिननिरेतिननिर्गछतीतिविचारयन्सन्रजनीचरेषुशरनिवहान्प्रतिमोक्तुमिछतिरघु
नाथइत्यर्थात्किंभूतान्दत्तआयासोयैस्तान्परैरित्यर्थान्तथाचएतावत्कालपर्यन्तमनास्थयाशरानोजुदभा
स्थयेतिभावः॥२॥अथशराणांल्याघमाह॥दिठ्ठम्मिपथिअम्मिअआवडिअम्मिअपरेसरणिस्रुन्नन्ते॥समर
म्मिविसूरन्तामोहुक्करिसिअदुमाभमन्तिपवंगा॥दृष्टेप्रस्थितेचापतितेचपरेशरनिपात्यमाने॥समरेखिद्यमाना
मोघोत्कृष्टद्रुमाभ्रमन्तिप्लवंगाः॥निजव्यूहस्थएवदृष्टेपरेशत्रौरणाभिमुखंप्रस्थितेचपलायितेवापरेआपतितेनि
कटमागतेचपरेरामस्यशरेनिपात्यमानेसतिप्रतिभटाभावात्खिद्यमानाअथचमारणीयाभावान्मोघनिःफलमा
घावाउत्कृष्टाउत्तालितादुमायैस्ताहृशाःप्लवंगाःसमरेतद्भ्रमांभ्रमन्तिघूर्णन्तेरामेणैवसर्वस्मिन्हतेहंतव्यगवेष
णयेतिभावः॥३॥अथपादशर्माणिर्वगोत्कर्षमाह॥भेत्तूणतुरिअमुक्केअणुलोमपहाविएसिलासंघाए॥पठमंसा
हेन्तिपरंविहडिअवाणरमणोरहारामसरा॥भित्वात्वरितमुक्ताननुलोमप्रधावितान्शिलासंघातान्प्रथमंसा
धयन्तिपरंविघटितवानरमनोरथारामशराः॥रामशराःप्रथमंपरंशत्रुंसाधयन्तिनाशयन्तिकिंकृत्वात्वरितंयथा
स्यात्तथामुक्तानअथानुलोमंशरगंतव्यदिगभिमुखंप्रधावितान्शिलासंघातान्भित्वा॥विदायकपिभिर्यद्यपित्व
रयामुक्ताशिलास्तथापिपश्चान्मुक्ताअपिशराअन्तरेवतानिर्भिद्यपरान्विदारयन्तीत्यर्थः॥अतएवपश्चाद्वि
घटितावानराणांमनोरथाममशिलाभिरेतेहन्यन्तामित्यभिलाषोयैस्तेतथाचशिलाविदारणशत्रुमारणानं
तरमेवकपयोजानन्तिरामेणशरामुक्ताइतितदानींमनोरथोभज्यतइतिरामस्यक्षिप्रकारित्वमुक्तं॥प्रथमंत्वरितंमुक्ता
नितिकेचित्॥४॥पुनस्तमेवाह॥छिज्जइकरेणसमअंपवगणछिअइरक्खसाणपहरणं॥पावइतुरिअविमुक्कं
अणहंणअरक्खसंपवंगपहरणं॥छिद्यतेकरेणसमंप्लवगेनालीयतेराक्षसानांप्रहरणं॥प्राप्नोतित्वरितविमुक्तं २३२
अनघंनचराक्षसंप्लवगप्रहरणं॥राक्षसानांप्रहरणंशरादिकरेणसमंछिद्यतेरामशरैरित्यर्थात्प्लवगएवप्लवगे

नालीयतेनसंबध्यतेस्वयमेवनष्टत्वात्तथाचराक्षसानामितिबहुत्वेनस्थानेरक्षोभिःप्रथमंसंहितमपिशरादि
यावत्क्षिप्यतेतावदेवतत्तद्दृष्ट्वारामेणसंधायमुच्यमानैःशरैःछिन्नमितितत्संधानोत्तरसंभावितप्रेरणापूर्वं
सूक्ष्मक्षणएवरामेणसंधायमुक्ताःशरास्तावत्दूरंगत्वाकृतकृत्याबभूवुरथचप्लवगइत्येकवचनेनएकएव
रामोयावत्तेषुनानाशरान्व्यापारयतिस्मतावत्तेषामेकेनापिशरोनव्यापारयितुंपारितइतिभावःएवंचरामापेक्ष
यात्वरितंप्रथमंतोविमुक्तंप्लवगानांप्रहरणंशिलादिअनघमविध्दंराक्षसंनप्राप्नोतीतिपश्चान्मुक्तरामशरनि
कृन्तराक्षसादौप्रथममुक्तंशिलादिपतितमित्यभयथापिरामस्यलघुहस्तत्वमुक्तंकरेणेत्यत्रशिलाहिंइतिपाठे
शिलाभिःसमंतुल्यंछिद्यतइत्यर्थःतथाचयथाकपिभिःप्रथममुक्तापिशिलापश्चान्मुक्तरामशरेणसंनिधावेव
छिन्नातथाशिलामुक्तिसमकालमुक्तमपिराक्षसानामस्त्रमितोव्यवधानएवततःसन्निधौछिन्नमित्यतोलघु
हस्तत्वमुक्तं॥५॥तमेवाह॥भिन्नेवछम्मिशिलागिरिसिहरंछिणपाडिअसिर णेणिवडइसराहिसंधिअप
रक्कमेहिंपवएहिंरोसविमुक्कं॥भिन्नेवक्षसिसिलागिरिशिखरंछिन्नपातितशिरःस्थानेनिपततिशराभिसंहि
तपराक्रमैःप्लवंगैःरोषविमुक्तं॥कपिभिःप्रथमंमुक्ताशिलापश्चान्मुक्तरामशरैर्भिन्नेराक्षसानांवक्षसिपतत्येिए
वंरामशरैरेवछिन्नस्यसतः॥पातितस्यशिरसःस्थानेराक्षसानामेवगलेप्लवगेरोषेणविमुक्तमपिगिरिशिख
रंपतितितथातत्तत्स्थानएवलक्ष्येशिलादीनांपतनाद्वक्षोभेदेनशिरःछेदनादपिवीरोनपतितइतिलघुहस्तत्व
मेवोक्तंकिंभूतेरामस्यशरेणाभिसंहितोवंचितःपराक्रमोयेषांतैःशत्रुमारणस्यततएवसिध्दत्वादतएवोक्तंपतति
नतुकिंचिदपिकरोतीतिभावः॥६॥तमेवाह॥सइसंधिउव्विअसरोरहुणाहस्ससइवक्कलइअंचधणुं॥अछि
ज्जइअसराहअसइपल्हत्थत्तरंकवससिरेहिंमही॥सदासंहितएवशरोरघुनाथस्यसदाचक्रीकृतंचधनुः॥
आछाद्यतेवशराहतपर्यस्यद्राक्षसशिरोभिर्मही॥रघुनाथस्यशरःसदासंहितएवपतंजिकारोपितएवधनुश्च
सदावक्रीकृतंचकारमेवशराणामादानसंधानविमोक्षणानांसैघ्र्यादित्थंभूतमेवदृश्यतइत्यर्थःएवंशरैराह
तानिस्पृष्टानिसंतिपर्वस्यन्तिइतस्ततःपततियानिराक्षसशिरांसितैर्महीआछाद्यतेव्याप्यतइत्यर्थ॥७॥ ॥

DR. BHAU DAJI MEMORIAL डाक्टर भाऊदाजी स्मारक

तमेवाह ॥ विसमालग्गहुअवहाविसहररेइ्अविलमुपहपडिछंदा ॥ दीसंतिबाणमग्गारक्खसदेहेसु सेणदीस
न्तिसरा ॥ विषमालग्नहुतवहा विषधररेचितविलमुख प्रतिछंदाः ॥ दृश्यंतेबाणमार्गाराक्षसदेहेघस्यनदृश्यं
तेशरा ॥ राक्षसदेहेषुबाणानांमार्गानिर्गमपथाःपरंदृश्यन्तेनपुनरस्यरामस्य शराइत्यन्वयः क्षिप्रगतित्वादिति
भावः किंभूताः विषमस्थानेस्थानेआलग्नोहुतवहोयेषुतेएतेनशराणामार्गेयत्वमुक्तंएवंविषधरैःसंपरिचिता
नांशून्यीकृतानांविलमुखानांविवराणांप्रतिछंदाप्रतिरूपास्तान्यपिदीर्घानिकविलकविहग्नविषाणलानी
तिशराणांमपिसर्पसमानशीलत्वेनघातकत्वमुक्तं ॥ ८ ॥ पुनस्तदेवाह ॥ उक्करिसन्तस्सकरेपत्थंतस्सहिअपर
संतस्समुहे दीसन्तिणवरपडिआणिवद्धसिरपडनसूइआरामसरा ॥ उत्कर्षतःकरेप्रार्थयमानस्यहृदयेर
सतोमुखे ॥ दृश्यंतेकेवलंपतितानिवद्धशिरःपतनसूचितारामशराः रामशराउत्कर्षतःशरानाकर्षतःपरस्य
करएवप्रार्थयमानस्यकपिरयमित्थंमारणीयइतिप्रतिसंदधानस्यहृदयएवरसतःछिंधिताडयेत्यादिशब्दंकु
र्वाणस्यमुखएवकेवलंपतितादृश्यंतेनतुगृह्यमाणागच्छंतोवातथाचरक्षोभिःकपिव्यापादनायकायिकोमा
नसोवाचिकोपद्वायएवव्यापारःकृतःतदातमेवप्रतिरुद्धवंतइतिरामशराणांमंत्रमयदेवताधिष्ठानमुक्तं किंभू
ताःनिबद्धानांव्यूहसंयोजितानांवीराणांशिरःपतनेनसूचिताःप्रकाशितास्तथाचव्यूहवर्त्तिवीरशिरःपतनेनने
नयथारामशरोगतइतिकेवलमनुमीयतेदृश्यतेपुनर्लक्ष्यकरादिस्थानस्थानलग्नएवेतिरामस्यकृतहस्तत्व
मुक्तंयद्वानिबद्धंशिरस्त्राणादिसंबद्धयच्छिरस्तत्पतनेनसूचितास्फुटयोग्याइतिस्वरूपनिर्वचनमितिवयंसंप्रदा
यस्तुनिबद्धकबंधसंगतंयच्छिरस्तत्पतनेनसूचिताइतिव्याचष्टे ॥ ९ ॥ तमेवाह ॥ जोजत्थच्चिअदिठ्ठोसक॰जहिं
जस्सविअलिअ॰विणिणाचलिअ॰अजोजहिंचिअंतस्सतहिंचिआणिअवडिआरामसरा ॥ योयत्रैवदृष्टःस्कंदो
यत्रस्यविगलितोपिनिनादः ॥ चलितश्चयोयत्रैवतस्यतत्रैवनिपतितारामशराः योवीरोयत्रैवदृष्टस्तथायस्यवी
रस्ययत्रैवविगलितोप्युत्थितोपिनिनादःश्रुतस्तथायत्रवीरोयत्रैवचलितस्तस्यकृतेतत्रैवरामशराणिपतिताइ २३२
तिक्रमेणदृष्टवेधित्वंशब्दवेधित्वमश्रुतादृष्टवेधित्वंशराणांसूचितं ॥ १० ॥ तमेवाह ॥ हअहत्थिमडतुरंगादीहा

दीसंतिमिरक्खससेणेअग्गक्खंधपअत्ताकूलंभेत्तूणणिग्गाआरामसराः ॥ हतहस्तिघटतुरंगादीर्घादृश्यंते
तस्मिन्राक्षससैन्येअग्रस्कंधप्रवृत्ताःकूलंभित्वानिर्गतारामशराः ॥ तत्रराक्षससैन्येअग्रस्कंधेनसेनामुखे
नप्रवृत्ताःप्रवृष्टाःकूलंपश्चाद्भागंभित्वानिर्गतारामशराहताहस्तिनोभयस्तुरंगाश्चयैस्तथाभूताःसंतोदीर्घा
धाराकारादृश्यंतेएकैकपृष्ठलग्नाःपरेपरेगच्छंतीत्यर्थः यद्वादीर्घाकारेणहतंहस्त्यादिपतितंदृष्ट्वासेनाया ॥
मुखेप्रविश्यान्निर्गताधारावहिनोरामशराइत्यनुमित्याविषयीकुर्यन्तइत्यर्थः दृशेनुपलब्धिपरत्वादित्याशयः
॥ ११ ॥ तमेवाह ॥ जंचिअउअलद्धभअंकाहिसमअंपलाइअज्यारंभंतंरामसराहिहअंदिठ्ठंव्वावरपडिअंणि
साअरसेणं यदेवोपलब्धभयंकरिष्यतिसमंपलायितव्यारंभं ॥ तद्रामशराभिहतंदृष्टंकेवलंपतितंनिशाचरसै
न्यं ॥ तन्निशाचरसैन्यंरामशरैरभिहतंसत्केवलंपतितंदृष्टं तत्किंयदेवउपलब्धभयंसत्समंमेकदैवपलायित
व्यंपालायनभावंतव्याःआरोममुद्यमंकरिष्यतितथाचशूराःपलायितान्ननिघ्नंतीतिपुराणश्रुत्यापलायितोद्यमपूर्व
कालएवरामेणहतनेतिभावः ॥ १२ ॥ पुनस्तमेवाह ॥ इअतंवाणुक्खित्तंपडन्तसमकालदिठ्ठसिरसंघाअं ॥ सुअसा
रणासेसंखणेणारक्खसबलंकअंरहुवइणा ॥ इतितद्बाणोत्क्षिप्तंपतत्समकालदृष्टशिरःसंघातं ॥ शुकसारणाव
शेषंक्षणेनराक्षसबलंकृतंरघुपतिना ॥ इत्यनेनप्रकारेणबाणैरुत्क्षिप्तंतद्राक्षसबलंरघुपतिनाशुकसारणावशे
षायत्रतथाभूतंक्षणेनकृतंपूर्वपरिचितत्वात्कृपयाशुकसारणावेवरक्षितौपरेसर्वएवहताइत्यर्थः किंभूतं
पतत्समकालमेकदैवदृष्टःशिरःसंघातोयत्रेतिरामस्यलघुहस्तत्वमुक्तमतएवक्षणेनेत्युक्तं ॥ १३ ॥ अथसं
ध्यामाह ॥ तावअसलोहिआरुणरक्खसवलणिधिसेसंजात्तिमिरो ॥ परमत्थअ॰चिरस्सवणिव्वाअ॰गलिअरक्ख
सभअ॰दिअहो ॥ तावच्चसलोहितारुणराक्षसबलनिर्विशेषसंध्यातिमिरः ॥ परमार्थश्चिरस्येवनिर्वाणो गलितरा
क्षसभयोदिवसः तावदेवगलितंराक्षसानांभयंयत्रनिशितेषांबलवत्त्वान्तथाभूतःसन्दिवसोनिर्वाणोऽयगतः
किंभूतइवचिरस्यचिरकालस्यपरमार्थस्तत्वस्वरूपमिवतथाचदिवसोनगतःकिंतुच्चिरकालोगतइत्येकएवदि
वसोनिकटवर्त्तिसीतावियोगदुःखातिशयहेतुत्वादलब्धरावणत्वाच्चहेतुत्वाच्चरारामस्यचिरकालेनोत्प्रेक्षितःपु

नः कीदृक् सलोहितं क्षतजन्यशोणितसहितं अत एवारुणं यद्राक्षसबलं तन्निर्विशेषं तत्तुल्यं संध्याकालीनतिमि
रं यत्र तदिति लौहित्येन संध्यारागशोणितयोः श्यामत्वेन मिति राक्षसबलयोः साम्यं ॥ १४ ॥ अथ पुनर्मेघनादागम
नमाह ॥ अह उग्गहिअचाओ एक्कोवालिक्खअमोडिअरहुप्पइओ ॥ संचरइ मेहणाओ णिअअछविमेलिअंधआ
रम्मि णहे ॥ अथोद्गृहीतचाप एको वालिकृतमोटितरथोत्पतितः ॥ संचरति मेघनादो निजकछविमेलितांधकारेण
भसि ॥ अथ संध्यागमानन्तरं एको मेघनादो नभसि संचरति कीदृशे निजकान्त्या मिलितं श्यामत्वादेकीकृतमंधका
रं मायाकल्पितं यत्र तत्र स कीदृक् उद्गृहित उत्तोलितश्चापो येन तादृक् एवं वालिकृतेन मोटिताभग्नाइथाद् उत्पतितः
कृतोत्फाल इत्यर्थः ॥ १५ ॥ अथ रामस्य लक्ष्मणयोर्बंधनोपक्रममाह ॥ तो णिठ्ठविअणिसिअराइंदइणा गरुअवेर
मूलाहारा ॥ समअं चिअ सच्चविआ अदिठ्ठेणविहिणा व दहरहतणआ ॥ ततो निष्ठापितनिशिचराविंद्रजिता गुरुवै
रमूलाधारौ ॥ सममेव सत्यापिताव दृष्टेन विधिनेव दशरथतनयौ ॥ तत आगमनानंतरमदृष्टेनालक्षितेनेंद्रजिता
दशरथतनयौ सममेकदैव सत्यापितौ नागपाशलक्ष्यत्वेन व्यवस्थापितौ किंभूतेन व विधिनेव विधिरदृष्टं विधाता वा
तेनेव तदायत्तत्वात् सुप्रेक्षा तावप्यदृष्टावस्मदाद्यप्रत्यक्षौ भवतः दशरथतनयौ किंभूतौ निष्ठापिता नाशिता नाशि
ता निशिचरा याभ्यां तौ अत एव खरादिनाशकत्वाद्गुरुकस्य वैरस्य मूलाधारौ ॥ १६ ॥ अथ नागपाशस्यागममाह ॥ मुअइ
अ सअंभुदिण्णे ताणभुअंगमुहणिग्गअणलजीहे ॥ णीसेसणिहअरक्खसविसत्थपलंबिअभुआण सरे ॥ मुंच
ति च स्वयंभूदत्तान् तयोर्भुजंगमुखनिर्गतानलजिह्वान् ॥ निःशेषनिहतः राक्षसविश्वस्तप्रलंबितोभयभुजयो
ः शरान् स मेघनादस्तयो राम लक्ष्मणयोः कृते स्वयंभुवा ब्रह्मणा दत्तान् शरान् मुंचति च लिच किंभूतान् भुजंगानां मु
खेभ्यो निर्गता विषानल विशिष्टा जिह्वा येषु तान् वस्तुतस्तु भुजंगरूपेभ्यो मुखेभ्यो निर्गता विषानला एव जिह्वा य
ें तानित्यर्थः ॥ तयोः किंभूतयोः निःशेषनिहतराक्षसत्वाद्विश्वस्तं यथास्यादेवं प्रलंबितावुभयभुजौ जयोर्मारणीया
भावेन शरादिव्यापारकरणाभावादिति लंबमानत्वेन नागपाशबंधनसौकर्यमुक्तं ॥ १७ ॥ अथ बंधनमाह ॥ तो भि
ण्णंगअदेसाणिद्दारिअवीअबाहुपाअडिअमुहा ॥ राहवदेहम्मि ठिआ तिअसंदाणिअभुआ भुअंगमवाणा ॥ ॥

ततो भिन्नांगददेशा निर्दारितद्वितीयबाहुप्रकटितमुखाः ॥ राघवदेहे स्थितास्त्रिकसंदानितभुजाः भुजंगमबाण
ाः ॥ ततस्त्यागानान्तरं भुजंगमा एव बाणाः ॥ त्रिके तयोरेवेत्यर्थः संदानितौ बद्धौ भुजौ यैस्तथाभूताः सन्तो राघ
वयोर्देहे स्थिताः किंभूताः एकस्य भुजस्य भिन्नो विद्धोंगददेशः कफोणिपरिदेशो यैस्तैः पुनर्निर्दारितद्वितीयबाहो
प्रकटितमुखा एवं बाहुमध्येन प्रविश्यास्य क्तत्न्मिश्रितद्वितीयबाहो बहिर्भूतमुखा इत्यर्थः ॥ १८ ॥ गत्यपूर्वकस्याप
रशराणां निर्गममाह ॥ णिद्धोअसणीला णिन्ति विसाणलफुलिंगपज्जलिअमुहा ॥ धणुसंघाणविमुक्का अउव्व
णारा अविब्भमा भुअइंदा ॥ निर्धौतायसनीला निर्यान्ति विषानलस्फुलिंगप्रज्वलितमुखाः ॥ धनुःसंधानविमु
क्ता अपूर्वनाराचविभ्रमा भुजगेंद्राः ॥ इंद्रजिता धनुःसंधाने सति विमुक्ता भुजगेंद्रा निर्यान्ति किंभूता निर्धौतदाहान्त
रं जलेक्षिप्तं यदायसं हृतं तद्वन्नीला एवं विषानलस्फुलिंगैः प्रज्वलितं दीप्तं मुखं येषां ते आज एवा पूर्वनाराचानामा
ग्नेयादीनामिव विभ्रमा विलासो येषां यद्वा तेषां विशिष्टभ्रमो येभ्यस्ते सर्पः परमार्थशरो न भवतीति भावः ॥ १९ ॥ अ
थैषां पतनमाह ॥ णिवडन्ति विज्जुमुहला तारसमब्भहिअलोहलठ्ठिच्छाआ ॥ कसणजलउअराहि व रक्खसमाअं
धआरिअणहाहि सरा ॥ निपतन्ति विद्युन्मुखरास्तालसमाभ्यधिकलोहयष्टिच्छायाः ॥ कृष्णजलदोदरादिव राक्षस
मायांधकारितनभसः शराः ॥ राक्षसमायया ऽंधकारितान्नभसो विद्युत इव मुखराः शब्दायमानाः शरा भुजंगरूपा नि
पतंति राघवयोर्देह इत्यर्थात् कृष्णा जलदा उदरे येषां तस्मादिवेति नभो विशेषणं तमसो जलदेनौपम्यात्तत एव विषा
ग्निकपिशत्वेन शराणां विद्युद्भिः साम्यं विद्युन्मेघान्निपततीति प्रकृतोर्थः नीलमेघानामुदरादिवेति समुख एवोपमा
तमोविशिष्टनभसो मेघेन तुल्यत्वदितिवा शराः किंभूतास्ताल वृक्षात् समभ्यधिका महत्यो या लोहयष्टयस्तद्वच्छाया
कान्तिर्येषां ते अग्निमुखत्वेन श्यामत्वाद्दीर्घत्वाच्चेति भावः ॥ २० ॥ अथैषां नानारूपतामाह ॥ पढमं रविबिंबणिहा पल
आसणिहा णहद्धपडन्ता ॥ भिन्दंता होंति सरा दरणिज्झिणमभिआ भुआ भुअंगा ॥ प्रथमं रविबिंबनिभाः प्रलयोल्का
सन्निभा नभोर्द्धपतंतः ॥ भिंदंतो भवंति शरा दरनिर्झिन्नभ्रमणशीला भुजास्त भुजंगाः ॥ ते शराः प्रथमं नभः शिखरं दृश्य

मानाः सन्तो रविबिंबतुल्या भवन्ति विषाग्निमयत्वे सति गगनमूलवर्तित्वादयनभसो ऽध्वास्यतंतः संतः प्रलयोल्काभि
ः सन्निभामुखेनाग्निमयत्वे सति भोगेन दंडायमानत्वात् अथ भुजा वित्यर्थाद्विदंतो दशनाः सन्तः शरामुखस्य भुज
निविष्टत्वेनाग्नेरप्रकाशे सति ऋजूकृतदेहत्वादथ तयोर्भुजास्कंदरे इषुनिर्भिन्नं दृष्टं ये स्तथाभूता कृत किंचिद्दंशाः अथ
चभ्रणशीलाभोगेन बलयाकाराः सन्तो भुजंगा भवन्तीति सर्वत्र संबंध्यंते तथा च वस्तुतस्ते भुजंगा एव किंतु सान्निध्यक्र
मेणावयवप्रकाशक्रमेण माययावा तथा तथा प्रतिभासन्त इत्यर्थः ॥ २१ ॥ अथ वानरादि चेष्टामाह ॥ वज्जन्ति दहरहस्स
आदरभगा मणोरहा किलिम्मन्ति सरा ॥ अदिट्ठमेहणाआणामि अपघआ भवंति पवंगा ॥ वध्येते दशरथसुतौ दहल
ग्नमनोरथाः क्लाम्यंति शराः अदृष्टमेघनादाऽन्नामितपर्वताभ्रमन्ति प्लवंगाः ॥ दशरथसुतौ वध्येते नागपाशैरित्य
र्थात् तयोर्नारायणरूपत्वेनाभग्नो रावणवधरूपो मनोरथो ययोस्तथाभूतः संतः शराः क्लाम्यन्ति किमकस्माज्जात
मिति सच्छिन्नत्वादेवं न दृष्टो मेघनादो यैस्तादृशाः प्लवंगा उत्थापितपर्वताः सन्तो भ्रमंति दिशि दिशि गच्छंति केनेदं कृत
मिति जिज्ञासयेत्यर्थः ॥ २२ ॥ अथैषामवस्थामाह ॥ रसइ णहम्मि णिसिअरो भिन्नम भिणाहिअअं दिसा सकइवलं
भिज्जो ना विण भिज्जइ रिउदंसण दिण्णलोअणो दासरही रसति नभसि निशिचरो भिन्नमभिन्नहृदयं दिक्षु क
पिबलं विद्यमानोऽपि न भिद्यते रिपुदर्शन दत्तलोचनो दाशरथिः ॥ नभसि निशिचरो मेघनादो रसति शब्दायते तथा
च घनादास्फोटनमाचरतीत्यर्थः अभिन्नहृदयमपराङ्मुखचित्तं कपिबलं दिक्षु भिन्नं तदनुसंधानाय घूर्णितं दाश
रथी रामो भिद्यमानोऽपि नागपाशैः स्वध्य मानोऽपि न भिद्यते न पराङ्मुखचित्तो भवति सौर्यसत्वाल्कीदृक् रिपोरिंद्रजि
तो दर्शने दत्ते लोचने येन स तथा दाशरथिरिति लक्ष्मणसाधारण्याय जातिपरमिति केचित् ॥ २३ ॥ अथ सर्पाणाम
ंगेषु प्रसरणमाह ॥ रोसाणलपज्जलिअं जलंतवडवामुहानलपडिच्छंदं अंगेसु लद्धपसरा दिअअं सेण वर
परिहरंति भुअंगा ॥ रोषानलप्रज्वलितं ज्वलद्वडवामुखानलप्रतिछंदं अंगेषु लब्धप्रसरा हृदयमस्य केवलं परि
हरंति भुजंगाः ॥ अस्य रामस्यांगेषु लब्धप्रसरा व्याप्ता भुजंगा रोषानलेन प्रज्वलितं यतस्ततएव केवलं हृदयं परिहरं

ति तापभीत्या तत्र परं न गच्छंतीत्यर्थः किंभूतं ज्वलतो वडवानलस्य प्रतिछंदं समं ॥ २४ ॥ अथ तद्भुजानामवस्थामाह
॥ ताण भुअंगपरिगआ दुक्खपरूढ घत्तविअडभोगावेढा ॥ जाआ थिरणिक्कम्पा मलअ इंद्र्यणचंदणदुमघ भुआ ॥ तयो
भुजंगपरिगता दुःखप्रभवद्विकटभोगावेष्टाः ॥ जाताः स्थिरनिष्कम्पा मलयतटोत्पन्नचंदनद्रुमा इव भुजाः ॥ तयोर्भुजा भुजं
गैः परिगताः सन्तः स्थिरनिष्कंपा जाताः के इव मलयतटोत्पन्नचंदनवृक्षा इव तेऽपि सर्पवेष्टितास्थिरनिष्कंपा एवेत्याशयः
किंभूता दुःखेन धाभवद्विकटभोगाभोगैरावेष्टनं येषां ते महत्वाज्जुटिति वेष्टयितुं न पारयंतीत्यर्थः चंदनमय्येवमेवेति
भावः ॥ २५ ॥ अथ तयोरवस्थामाह ॥ तह पडिवण्णधणुसरा सरणिव्भिज्जंतणिच्चलभुअफलिहा ॥ दट्ठोट्ठमेत्तलक्खिअ
फलरोसलहुआ कआ रहुतणआ ॥ तथा प्रतिपन्नधनुःशरैः शरनिर्भिद्यमान निश्चलभुजपरिघौ ॥ दष्टोष्ठमात्रल
क्षित निष्फलरोषलघुकौ कृतौ रघुतनयौ ॥ रघुतनयौ शरैर्निर्भिद्यमानत्वान्निश्चलौ भुजपरिघौ ययोस्तथाभूतौ कृता
विंद्रजितेत्यर्थात् किंभूतौ तथा पूर्ववदेव प्रतिपन्नधृतधनुःशरं याभ्यां तौ करस्थितधनुःशरावित्यर्थः एवं उत्तरोष्ठेन
दष्टो योऽधरोष्ठस्तन्मात्रेण तनुव्यवसायेन लक्षितो ऽज्ञातोऽथ च निष्फलः प्रतिक्रिया विरहाद्योरोषस्तेन हेतुना लघुअ
क्षमत्वेन ज्ञायमानावित्यर्थः ॥ २६ ॥ अथ शोणितनिर्गमनमाह ॥ सरणिब्भिण्णसरीरा जाआ आलोअमग्गिअव्वावअवा
दरदिट्ठपत्तनत्तरं तणिहिं तसंखा अलोहिआ रहुतणआ ॥ शरनिर्भिन्नशरीरौ जातावालोकमार्गितव्यावयवौ ॥
दरदृष्टपत्रणान्तरनिहित संस्त्यानलोहितौ रघुतनयौ ॥ शरैर्निर्भिन्नशरीरौ रघुतनयौ आलोकाय दर्शनाय मार्गितव्या
अन्वेषणीया अवयवा ययोस्तौ जातौ सर्पावृत्तत्वात् आलोकेन दीपादिना तमः ॥ प्रागभ्यादिति केचित् एवं किंचिद्दृष्ट
पत्रणा पुंखतदन्तरे तन्मध्ये निहितं स्थितं स्त्यानं घनीभूतं लोहितं ययोस्तौ अक्षतादीपदव काशे शरेणागत्य पुंखे स्वक्षत
या पतनाभावेन रुधिरं घनीभूतमित्यर्थः ॥ २७ ॥ अथ तयोर्जडीभावमाह ॥ सरसीवि उण्णरज्जुअलसंकीलिअविहल
णिघलट्ठिअवलणं ॥ णिअलिअदेहावअवं संचरिअव्वंपि रहुसआण अवहरिअं सरस्यूतोरुलगलसंकीलितविह्व
लनिश्चलस्थितचरणं ॥ निगलितदेहावयवं संचरितव्यमपि रघुसुतयोरपहृतं ॥ रघुसुतयोः संचरितव्यं सच

सेo बंo काo २३९

रणमप्यपहतं सर्प्याक्रांतत्वात्स्पंदोपिनाभूदित्यर्थः॥ शरैः स्यूतमूरुयुगलं यत्र संकीलितत्वेन विह्वलावप्यचनिश्च
लस्थितौ चरणौ यत्र एवं निगलितादेहावयवा यत्र तद्यथा स्यादिति सर्वक्रियाविशेषणं॥ २८॥ अथ धनुःपतनमाह॥
तो करहिसमंपडिअंविहलुन्तपढमसंठिअवाणं। अदिट्ठरिउविसज्जिअसरपहरंकुसिअवामहत्थाहि धणुं॥
ततः करहृदयैः समं पतितं विघटमानप्रथमसंस्थितबाणं अदृष्टरिपुविसृष्टशरप्रहारांकुशितवामहस्ताद्धनुः
ततो जडीभावानंतरं अदृष्टेन रिपुणा विसृष्टो यः शरस्तत्प्रहारेणांकुशितादंकुशाकारत्वेन वक्रीकृताद्वामहस्ताद्ध
नुः पतितं रामलक्ष्मणयोरित्यर्थात्कराणां हृदयैः समं कराणामपि हृदयं पतितं तेप्यचेतना जाता इत्यर्थः सुहो
क्तिरलंकारः धनुः कीदृशं विघटमानः प्रथमसंस्थितो बाणो यत्र ततः शरोपि पतित इत्यर्थः॥ २९॥ अथ दिविदेव
स्त्रीणामाक्रंदमाह॥ उड्डाइ ३० असहसाविवलाअविमाणतडिमपच्छिमदेसे। करवहुविसमक्कंदो एक्कमुहाह
अरसन्ततं। छा ३०॥ उद्धावितश्च सहसा विपलायितविमानतडिमपश्चिमदेशे। करवधूविषमाक्रंद एकमुखा
हतरसन्तंत्री छायः॥ करवधूनां विषम आक्रंद उद्धावित उत्थितश्च कुत्र विपलायितानां विमानानां तडिमस्य पश्चिम
देशे पश्चाद्भागे रामावरुद्धदर्शनार्थं विमानप्रवेशद्वारदेशादधः पश्यंतीनां युद्धदिदृक्षया दिवि स्थितानां देवस्त्रीणां
रामधनुःपाते सत्याक्रंदो भवदित्यर्थः॥ आक्रंदः कीदृक् एकमुखमेकदेवाहतानां मत एव रसन्तीनां तंत्रीणामि
व छाया यस्य तितंत्रीध्वनितुल्यमाधुर्य इत्यर्थः॥ ३०॥ अथ रामपतनमाह॥ तो पडिओ रहुणाहो भज्जंतो तिहुवण
स्स आसाबंध सीहणहंकुसपहउ ३० तुंगं॥ आसणपाअवं घवणगउ ३०॥ ततः पतितो रघुनाथो भंजन्त्रिभुवनस्या
शाबंध॥ सिंहनखांकुशप्रहरतस्तुंगमासन्नपादपमिव वनगजः॥ ततस्तदाक्रंदानंतरं रघुनाथः पतितो भूमावित्य
र्थात् त्रिभुवनस्य आशाबंधं रामेण रावणो हन्तव्य एवंरूपं भंजन् खंडयन् रामे पतिते आशाबंधोपि गत इत्यर्थः
वनगज इव यथा सिंहनखांकुशेन प्रहतो विद्धो वनगजस्तुंगमासन्नं पार्श्वस्थं पादपं भंजयन्पततीत्यर्थः॥ अत्र व २३९
नगजेन रामस्य पादपेनाशाबंधस्य नखांकुशेन शरस्य च तुल्यत्वादुपमा॥ ३१॥ अथ लक्ष्मणपतनमाह॥ ॥

पडिअस्स अरहुवइणो पडि ३० अणुमग्गं अंसमित्ताणं ३०॥ उद्धट्ठिअस्स पणउ ३० पल्हत्थस्स व दुमस्स छाआणिवहो
पतितस्य रघुपतेः पतितोनुमार्गं सौमित्रानयनः॥ उर्ध्वस्थितस्य प्रणतः पर्यस्तस्येव द्रुमस्य छायानिवहः॥ पतितस्य तुं
गस्य द्रुमस्य पर्यस्तस्य पतितस्य सतोनुमार्गं पश्चात्प्रणतो नम्रः छायानिवहः पतितस्येवेत्यर्थात् यथा वृक्षे पतति त
च्छाया पततीत्यर्थेन रामस्य वृक्षेण लक्ष्मणस्य तच्छायया तौल्येन लक्ष्मणयोवनस्य रामजीवनाधीनत्वमुक्तं॥
३२॥ अथ कराणां तयोर्दर्शनमाह॥ धरणिपडिएसु एसु अणिघसान्तसमुहीण अभरुघन्ता॥ उत्ताणिएक्कचक्का करा
णं तं सतडिमा चिरं असि रहा॥ धरणीपतितयोस्तयोश्च निर्वर्ण्यमानश्च संमुखावनतभरोद्वृत्ताः॥ उत्ताणितैकचक्राः
कराणां तिर्यक्कृततडिमाश्चिरमासन् यैथाः तयो रामलक्ष्मणयोर्धरणिपतितयोश्च सतोः कराणां रथा निर्वर्ण्यमाने राम
२ लक्ष्मणौ जीवतो न वेति निरूप्यमाने सति संमुखीभूयावनतानामधोमुखानामर्थात्कराणां भरेण उद्वृत्ता नतोन्नता
श्चिरं आसन् यद्दिश्य माश्रित्य रामलक्ष्मणदर्शनं चक्रुस्तद्दिशि गौरवेन णता अत एवापरदिशि समुन्नता वभूवुरि
त्यर्थः॥ अतस्तत्रैवोत्तानितमूर्ध्वगतमेकं चक्रं येषां ते अत एव तिर्यक्कृततडिमास्तिर्यग्गतपार्श्वभिन्नय इत्यर्थः॥ ३३॥
अथ त्रैलोक्यशोकमाह॥ हिअअपडणे घ मूढं रइपडणे घ सहसा तमम्मि वडिअं॥ रामपडणम्मि जाअं सिरपडणे घ ग
अजीविअं तेल्लोक्कं॥ हृदयपतन इव मूढं रविपतन इव सहसा तमसि निपतितं॥ रामपतने जातं शिरःपतन इव गत
जीवितं त्रैलोक्यं॥ रामपतने सति त्रैलोक्यं जातं कीदृशं यथा हृदयमनः तत्पतने तदपगमे सति मूढं भवति तथैव मूढ
तव्यं किं कर्त्तव्यम्मिति ज्ञानविरहादेवं रविपतने रवेरस्तमने यथा सहसा तमसि निपतति तथैव तमसि मूर्छायां निपति
तं गुरुतरशोकादेवं यथा शिरःपतने सति गतजीवितं प्रमाणशून्यं भवति तथैव गतजीवितं मृतमिवेत्यर्थो रामरूप
रक्षकाभावादिति भावः॥ ३४॥ अथ कपीनां राघवपरत्नमाह॥ अह रामपरित्ताणं कण दिसामुह पलोअण निरुच्छाहं
भअणिघलपुंजइअं णमुअइ पडिअं विराहवं कइसेणं॥ अथ रामपरित्राणशून्या दिङ्मुखप्रलोकन निरुत्साहं॥
भयनिश्चलपुंञ्जितं न मुंचति पतितमपि राघवं कपिसैन्यं॥ कपिसैन्यं कर्तृ पतितमपि राघवं न मुंचति शूरत्वात्स्वामिभ

कृत्वा च किंभूतं सैन्यं रामात् परित्राणं यस्य तत् ॥ एवं रामेण विना शून्यानां दिङ्मुखानां प्रलोकनेन निरुत्साहं एवं भयेन
समविपत्तिजनुषा शत्रुतो वा निश्चलं सत्पुंजितं वर्तुलीभूतं अन्यत्रापि प्रतिकर्तव्यापस्थितौ सर्वे संभूय विचारयंतीति ध्व
निः ॥ ३५ ॥ अथ कपीनां निश्चेष्टतामाह ॥ दीणं भग्गुच्छाहं उव्विग्गमणं विसाअपेल्लिअहिअअं ॥ राहवविइण्णणअणं
आलेक्खगअं घसंठिअं कइसेण्णं ॥ दीनं भग्नोत्साहं उद्विग्नमनो विषादप्रेरितहृदयं ॥ राघववितीर्णनयनं आलेख्यग
तमिव संस्थितं कपिसैन्यं ॥ कपिसैन्यं आलेख्य चित्रं तद्गतमिव संस्थितं यथा चित्रलिखितं निश्चलमचेतनं च भवति त
थेत्यर्थः ॥ तदेवाह कीदृशं विषादेन प्रेरितं नानाशंकाया मारोपितं हृदयं यस्य एवं राघवयोर्वितीर्णं अर्पितं नयनं येन तत्
दित्यपरं निगदव्याख्यातं ॥ ३६ ॥ अथ रामस्य मुखप्रसादमाह ॥ पडिअस्स वि रहुवइणा दीसंतो देइ पवअवइसंला
वं ॥ अविसाअमग्घविअ सासअधीरधरिअ मुहस्स पसाओ ॥ पतितस्यापि रघुपतेर्दृश्यमानो ददाति प्लवगपतिसं
लापं ॥ अविषादमहार्घितशाश्वतधैर्यधृतो मुखस्य प्रसादः ॥ पतितस्यापि रघुपतेर्मुखस्य प्रसादो दृश्यमानः सन्नर्थात्सु
ग्रीवेण प्लवगपतये सुग्रीवायैव संलपमाश्वासवाक्यं ददाति कीदृक् अविषादेनानुद्वेगेन महार्घितो दुर्लभः ॥ एवं शा
श्वतेन सार्वदिकेन धैर्येण धृतस्तथा च तस्यानुद्वेगधैर्यमुखप्रसादैर्जीवच्छुरचिन्हैः सर्व एवाश्वस्तचित्ता बभूवुरित्यर्थः
॥ ३७ ॥ अथ पुनः सुग्रीवेंद्रजिद्दर्शनमाह ॥ णावरि अ विहीसणजलाहअच्छिणा वाणराहिवेण णहअरो ॥ पासम्मि धनुस
हाओ दिट्ठो कअपेसणो दसाणणतणओ ॥ अनंतरं च विभीषणजलाहताक्षेण वानराधिपेन नभश्चरः ॥ पार्श्वे धनुः
सहायो दृष्टः कृतप्रेषणो दशानन तनयः ॥ अथ समाश्वासानंतरं वानराधिपेन दशाननस्य तनयः पार्श्वे निकटे नभश्च
रो गगनचारी दृष्टः कीदृक् धनुःसहायो धनुर्धरः ॥ एवं कृतप्रेषणा रावणाज्ञा येन तादृक् सुग्रीवेन कीदृशेन विभीषण
स्य राक्षसमायाहरमंत्रेणाभिमंत्रितं यज्जलं तेनाहते स्पृष्टे क्षालिते अक्षिणी यस्य तेन तथा च तत एव मायाहरणाद्दि २३६
व्यदृष्टिना दृष्ट इति भावः ॥ ३८ ॥ अथ सुग्रीवपौरुषमाह ॥ तो रोसतुलिअपव्वअसहसुद्धाइअ पहाविअ सुग्गीअ
लंकं भअविवल्लाअं अहिलेज्जणणवरं द्विअ रअणिअरं ॥ ततो रोषतुलितपर्वत सहसोद्धावित प्रधावितः सुग्रीवः ।

लंकां भयविपलायितं अभिलीय केवलं स्थितो रजनीचरं ॥ ततस्तद्दर्शनानंतरं सुग्रीवो रजनीचरमिंद्रजितं लंकाम
भिलीय प्राप्य केवलं स्थितः किंभूतः रोषेणातुलितपर्वत उत्तोलितगिरः सन् सहसाऽद्धावितः कृतोत्फालस्तदनुप्र
धावितः कृतवेगः तं किंभूतं भयेन पलायितं तथा च तं दृष्ट्वा उत्प्लुत्य तथा विद्रावयामास यथेंद्रजित्प्रमुखाः सर्वेपि लं
कां प्रविष्टा इत्यर्थः ॥ ३९ ॥ अथ रावणोत्साहमाह ॥ इंदइणा विणिवेइअ राहववणिहणसुहिओ णिसाअरणाहो ॥
आसाइअजणअसुआसमागमोवाअणिग्घुरूससिओ ॥ इंद्रजिता विनिवेदितराघवनिधनसुखितो निशाचरनाथ
: ॥ आसादितजनकसुतासमागमोपायनिर्वृतउच्छ्वसितः ॥ इंद्रजिता विनिवेदितेन रामलक्ष्मणौ हत्वा गतोस्मीत्येवं क
थितेन राघवयोर्निधनेन सुखितो निशाचरनाथः ॥ आसादितजनकसुतासमागमोपायनिर्वृतउच्छ्वसितः ॥ इंद्रजिता
विनिवेदितेन रामलक्ष्मणौ हत्वा गतोस्मीत्येवं कथितेन राघवयोर्निधनेन सुखितो निशाचरनाथो रावणः आसादिते
न लब्धेन जनकसुतासमागमोपायेन निर्वृतः सुखितः सन्नुच्छ्वसितो दीर्घश्वासं कृतवान् रामनिधनमेव तदुपाय इ
ति भावः ॥ ४० ॥ अथ सीताया मूर्छितरामदर्शनमाह ॥ अह णिसिअरीहिं दहमुहवअणाणिअदिट्ठसरसक्खणवेहव्वा
॥ मुक्कक्कंदविसंठुलदरविलविअमुच्छिआ कआ जणअसुआ ॥ अथ निशिचरीभिर्दशमुखवचनानीतदृष्ट
सरसक्षणवैधव्या ॥ मुक्ताक्रंदविसंष्ठुलदरविलपितमूर्छिता कृता जनकसुता ॥ अथ रावणोत्साहानंतरं निशिच
रीभिर्जनकसुता मुक्त आक्रंदो यया सा मुक्ताक्रंदा अत एव विसंष्ठुला विह्वला अत एव दरविलपिता किंचिद्विलापव
ती मूर्छिता कृता ॥ अत्र हेतुमाह ॥ कीदृशी दशमुखवचनेनानीतया सत्या दृष्टं ज्ञातं सरसं तात्कालिकं क्षणं व्याप्य
वैधव्यं यथा सा ॥ सर्वत्र कर्मधारयः तथा च रावणवाचा ताभिरानीय रामपतनं दर्शितासती तां तामवस्थां प्रापदित्य
र्थः ॥ मुक्ताक्रंदं विसंष्ठुलेन दरविलपितेन मूर्छितेति केचित् ॥ तात्त्विकमपि रामपतनं मायामस्तकवत्छद्ममात्रे
ण न प्रत्येष्यतीति रणशिरसि तद्दर्शयितुं सीता समानायिता रावणेनेति रामायणवार्तागरुडागमनेन तदैव प्रती
कारो वृत्त इति क्षणं वैधव्यमुक्तं ॥ ४१ ॥ अथ रामस्य प्रलापमाह ॥ तो गअमोहुम्मिल्लो पेच्छन्तो राहवो सुमित्तातणअं ।

परिदेविउं पउत्तो तक्खणपब्भट्टसअलसीआदुक्खो॥ नतोगतमोहोन्मीलः प्रेक्ष्यमाणो राघवः स्रुमित्रातनयं॥
परिदेवितुं प्रवृत्तस्तत्क्षणप्रभ्रष्टसकलसीतादुःखः॥ ततः सीतादर्शनानंतरं राघवः परिदेवं प्रलापं कर्तुं प्रवृत्तः
॥किंभूतः गतेन मोहेन मूर्छया उन्मीला नयनोन्मीलनं यस्य तथाभूतः सन् स्रुमित्रातनयं प्रेक्ष्यमाणः॥ ज्ञानानं
तरं तस्मिन्नेव दृष्टिः पतितेति स्नेहातिशय उक्तः॥ अत एव तत्क्षणे प्रभ्रष्टं विस्मृतं सकलं सीतादुःखं येनेतित
तोप्यधिकः पक्षपात उक्तः॥ ४२॥ अथ लक्ष्मणोत्कर्षपरं प्रलापवाक्यमाह॥ जस्स सअलं तिहुअणं आरुहइ ध
णुम्मि संसअं आरूढे॥ सोवि हओ सोमित्ती णत्थि जए जण एइ विहिपरिणामो॥ यस्य सकलं त्रिभुवनं आरोहति ध
नुषि संशयं आरूढे॥ सोपि हतः सौमित्रिर्नास्ति जगति यन्नैति विधिपरिणामः॥ ---- सोपि सौमित्रिर्लक्ष्मणो
हतः॥ यस्य धनुषि आरूढे सज्जे सति सकलं त्रिभुवनं संशयमारोहति स्थास्यति न वेति संदेहविषयीभवतीत्य
र्थः॥ अर्थांतरं न्यस्यति जगति स नास्ति यं विधेरदृष्टस्य परिणामो नैति नागच्छति॥ तथा च सर्वमप्यदृष्टवश्यमत
एव परैरपरिभाव्योप्ययं हत इति भावः॥ ४३॥ अथात्मगर्हणापरं तद्वाक्यमाह॥ जस्स सअलं तिहुअणं आरुहइ ध
णुम्मि संसअं आरूढे॥ सोवि हओ सोमित्ती णत्थि जए जं ण एइ विहिपरिणामो॥ यस्य सकलं त्रिभुवनं आरोहति
धनुषि संशयं आरूढे॥ सोपि हतः सौमित्रिर्नास्ति जगति यन्नैति विधिपरिणामः॥ सोपि सौमित्रिर्लक्ष्मणो हतः॥ यस्य
धनुषि आरूढे सज्जे सति सकलं त्रिभुवनं संशयमारोहति स्थास्यति न वेति संदेहविषयीभवतीत्यर्थः॥ अर्थांतर
न्यस्यति जगति स नास्ति यं विधेरदृष्टस्य परिणामो नैति नागच्छति॥ तथा च सर्वमप्यदृष्टवश्यमत एव परैरपरि
भाव्योप्ययं हत इति भावः॥ ४३॥ अथात्मगर्हणापरं तद्वाक्यमाह॥ अहवा अंकअकज्जो मज्झकए मुक्कजीविओ सो
मित्ती णिप्फलव्वूढभुअभरो णवरं मए च्चिअ लहुइओ अप्पाणे॥ अथवायं कृतकार्यो मम कृते मुक्तजीवितः सौमित्रिः
॥ निःफलव्यूढभुजभरः केवलं मयैव लघूकृत आत्मा अथवायं सौमित्रिर्मम कृते सन्निमित्तं मुक्तजीवितोय
तस्तत्कृतकार्यः॥ एवंविधकीर्तिरेव महत्कार्यं तथा सति मरणेपि न क्षतिरितिभावः॥ केवलं मयैवात्मा लघूकृ २३०

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्मारकम्

तः॥ कुत इत्यत आह॥ आत्मा कीदृक् निःफलं यथा भवति तथा व्यूढौ धृतौ भुजावेव भरो भारो येन स तथा॥ तथा च ल
क्ष्मणरक्षावंध्यत्वाद्भारत्वमेव भुजयोर्न तु सफलत्वमिति भावः॥ ४४॥ अथ स्रुग्रीवप्रतिशमस्य वचनमाह॥ अहजं
पइ स्रुग्गीवं महुरं उच्छाहदाविअपरिच्छेअं॥ वअणं सहसोवट्ठिअमरणावत्थावट्ठविअगंभीरं॥ अथ जल्पति
स्रुग्रीवं मधुरं उत्साहदर्शितपरिच्छेदं॥ वचनं सहसोपस्थितमरणावस्थाव्यवस्थापितगांभीर्यं॥ अथ परिदेवनोत्तरं
स रामः स्रुग्रीवं प्रतिवचनं जल्पति॥ कीदृक् मधुरं मिष्टं उत्साहेन दर्शितः परिच्छेदो लक्ष्मणेन सहानुमरणे निश्चयो
यत्र॥ वक्तव्यभागस्य परिच्छेद इति वा॥ एवं सहसोपस्थितायां मरणावस्थायां व्यवस्थापितं स्थिरीकृतं गांभीर्यमकात
रत्वं यत्र तत्॥ मधुरत्वादि क्रियाविशेषणं वा॥ ४५॥ स्रुग्रीवादिप्रशंसापरं तद्वाक्यस्वरूपमाह॥ णिव्वूढं धीर तुमे इमो
विउअकुत्तभुअवलो कइलोओ॥ कम्मं इमेण विकअं जअणिघडिअजसदुक्करं मारुइणा॥ निर्व्यूढं धीर त्वया अय
मप्युपभुक्तभुजबलः कपिलोकः॥ कर्मानेनापि कृतं जगन्निर्वलितयशो दुष्करं मारुतिना॥ हे धीर त्वया निर्व्यूढं प्रस्त
प्रकारः कृतः अयमपि लोकउपभुक्तभुजबलः सेतुबंधादिना व्यापारितबाहुबलः अनेनापि मारुतिना कर्म कृतं॥
कीदृक्॥ जगतो निर्वलितं पृथग्भूतं यशो यत्र तदितरविलक्षणयशोनिधानं॥ अथ च दुष्करं समुद्रलंघनादिरूपत्वा
दथवा जगद्विलक्षणयशोभिर्महत्तरैरपि दुष्करमित्यर्थस्तथा च भवतां श्रमो मया ज्ञात इति भावः॥ ४६॥ विभीषणं प्रत्य
नुशयपरं तदाह॥ आबद्धवंधुवेरं जं मेणाणि आविभीसणआराअसिरी॥ दुक्खेण एण अमहं अविहाविअब्बाण
वेअणरसं हिअअं॥ आबंधबंधुवैरं यन्मया न नीता बिभीषणं राजश्रीः॥ दुःखेनैतेन च मम अविभावितबाणवेदना
रसं हृदयं॥ आबद्धं बंधुना रावणेन समं वैरं येन मदर्थमित्यर्थः तादृशं बिभीषणं प्रति मया राज्ञो रावणस्य लं
काप्रभुतायन्न नीता न प्रापिता यं राजानं कृत इत्यर्थः॥ एतेन दुःखेन मम हृदयं अविभावितो परिज्ञातो॥
बाणवेदनारसो येन तत्तथाभूतमस्तीत्यध्याहारः॥ तथा च रावणभयादनेन लंकां न गंतव्यमन्यत्र स्थानमस्य
नास्त्येवेति मरणदुःखादपि महद्दुःखमिति भावः॥ ४७॥ अथ स्रुग्रीवविसर्जनपरं तदाह॥ ता वच्च स्रुमामु

ज्जुस्फतुरिअंतणेअसेउवंधेणतुमं॥ पेछस्फवंधववगंदुक्खंकारुस्सजाणिउं परिणामं॥ तावद्धजमामुझत्वरितं
तेनैवसेतुबंधेनत्वं॥ प्रेक्षस्वबांधववर्गदुःखंकारुस्यज्ञात्वापरिणामं॥ तावदितिवाक्योपसंहारेहेस्फग्गीवयावद्ध
यंतोपिनाभिभूतास्तावत्त्वंतेनैवसेतुबंधेनत्वरितंव्रजगृहायगछमामुह्यमोहंमाकुरुचेत्यर्थः॥ अथबांधववर्गंप्रे
क्षस्व॥ कुतइत्यतआह॥ किं।कृत्वाकारुस्यपरिणामंदुःखंदुःखहेतुंज्ञात्वातथाचपत्रममैवेयमवस्थातत्रभवतां
कागतिरितिभावः॥ ४८॥ अथसमभिःस्फग्गीवोक्तिमाह॥ तोतिव्वरोसलंघिअविहुणाणणदुक्खधरिअवाह्रुप्पीडो
रहुवइणोपडिवअणंभणइअदाजणवाणरेपवअवई॥ ततस्तीव्ररोषलंघितविधुज्ञाननंदुःखधृतवाष्पोत्पीडः
रघुपतेःप्रतिवचनंभणत्यदत्वावानरान्प्लवगपतिः॥ ततोरामवचनादुत्तरंप्लवगपतिर्वानरान्भणतिकिंकृत्वार
घुपतेःकृतेप्रतिवचनंप्रत्युत्तरमदत्वाऽयुक्तत्वादत एवातिरोषाद्वा किंभूतः॥ तीव्ररोषेणलंघितंअतिक्रांतंअतए
वविधुतंकंपितंयदाननंतेनदुःखेनधृतोवाष्पोत्पीडोयेनसतथारामदुःखादुदश्रुरित्यर्थः॥ ४९॥ वच्चह्रलक्खण
सहिअंणवपल्लवरइअवीरअसअणत्थरणं॥ पावेहवाणरउरिंअविहाविअवाणवेअणंरहुणाहं॥ व्रजतल
क्ष्मणसहितनवपल्लवरचितवीरशयनास्तरणं॥ प्रापयतवानरपुरीमविभावितवाणवेदनंरघुनाथं॥ हेवानराः
यूयंव्रजतलक्ष्मणसहितंरघुनाथंवानरपुरींकिष्किंधांप्रापयत॥ किंभूतंनवपल्लवैरचितंवीरस्यायनेआस्तरणंयस्य
तं॥ अत एवअविभाविताऽपरिज्ञाताबाणवेदनायत्रतद्यथास्यादितिक्रियाविशेषणंनवपल्लवादिकोमलोपचारेण
बाणवेदनापरिहर्तव्येतिभावः॥ ५०॥ अहअंप्पिविज्जुपडणाइरित्तसंपाअगहिअघ्यविद्धधणुं॥ अद्धोहरिआसा
इअवलिअभुअक्खित्तमोडिअगआविहलं॥ अहमपिविद्युत्पतनातिरिक्तसंपातगृहीतप्रवृद्धधनुषं॥ अर्द्धीवहृता
सादितवलितभुजाक्षिप्तमोटितगदाविह्वलं॥ अहमपिदशमुखमीदृशंकरोमीतिचतुर्थस्कंधकेनान्वयादंत्यकु
लकं॥ कीदृशं॥ विद्युत्पतनादप्यतिरिक्तेनअलक्ष्यत्वादिनोत्कटेनसंपातेनोत्फालेनगृहीतमाच्छिन्नंप्रवृद्धंमह
द्धनुर्यस्यतंप्रथमंमुत्प्लुत्यतद्धनुर्ग्रहिष्यामीत्यर्थः॥ अथरावणेनेत्यर्थात्॥ अर्द्धेनार्द्धभागेनावहृतयामदुपर्यवि २३८

पातितयाऽथनदामयैवासादितयाकरेणधृतयातदनुवलितादामोघवक्रीकृताद्रावणस्यभुजादाक्षिप्तयाऽति
क्रम्यगृहीतयापश्चान्मोटितयाभग्नयाविह्वलंधनुर्ग्रहणानंतरंतेनमदुपरिगदाक्षिप्तव्यासापिभयांतरिक्ष एवातिक्रम्य
ग्रहीतव्यानतोस्त्राभावाद्व्याकुलएवस्यादित्यर्थः॥ ५१॥ खंधद्धंतोवाहिअकरजुअलोलुग्गाचंदहासक्खग्गं॥ अक्कंत
चलणताडिअदलिअरहाहोमुहोसरंतपहरणं॥ स्कंधार्द्धांतापवाहितकरयुगलावरुग्णचंद्रहासखड्गं॥ आक्रांतचर
णताडितदलितरथाधोमुखापसरत्प्रहरणं॥ पुनःकिंभूतं॥ अथअर्थान्ममैवस्कंधस्यार्द्धांतेऽपवाहितःपातितःसन्मये
वकरयुगलेनावरुग्णोगृहीत्वाभग्नश्चंद्रहासनामाखड्गोयस्यतंगदाभंगानंतरंतेनमयिखड्गःपातनीयःसोपिमाया
भंजनीयइत्यर्थः॥ एवंअर्थान्ममैवाक्रांतादधिष्ठितादथचरणेनताडितादत एवदलितात्स्फुटितात्तस्यैवरथादधोमुखं
सदपसरद्दूमोपलप्रहरणंमस्त्रसमुदायोपस्यतंतस्यखड्गादिशून्यतायांसत्यामुत्प्लुत्यमयापदाहत्यातद्रथोभंजनी
यस्तदनुतत्तोप्यस्त्राणिपतिष्यंतीत्यर्थः॥ ५२॥ भग्गपुरोहग्गविसंठुलभुअजुअलुक्खुडिअसेसणिप्फलवाहुं॥ वज्ज
णिहहत्थणिवडंतदिण्णदढमुट्ठिभिण्णवच्छद्धंतं॥ भग्नपुरोगविसंष्ठुलभुजयुगलोत्खंडितशेषनिःफलबाहुं॥ वज्रनिभ
हस्तनिपतद्दत्तदृढमुष्टिभिन्नवक्षोर्द्धांतं॥ एवंमयैवतस्येत्यर्थात्भग्नाःपुरोगामिनःपुरोवर्त्तिनोऽथोदृशयेवाहवस्ते
विसंष्ठुलोविकलःसन्ममैवभुजयुगलेनोत्खंडिताःशेषाःपश्चाद्वर्त्तिनोनिःफलाःकार्याजनकत्वाद्दशबाहवोयस्यतंअ
थविरथस्यतस्यपुरःपुरोवर्त्तिनःदशपश्चात्पश्चात्वर्तिनश्चदशैवंविंशतिरपिबाहवोमयाभुजाभ्यांउत्पाटनीयाइत्य
र्थः॥ यद्वामयैवप्रथमंभग्नंअत एवपुरोवर्तिसत्विसंष्ठुलंयद्भुजयुगलंतेनैवहेतुनाततप्रतिबद्धत्वेनउत्खंडिताःशे
षाःनिष्फलाबाहवोयस्यतंमुख्यबाहुद्वयभंजनात्तदन्विताःपरेप्यष्टादशभंजिताःस्युरित्यर्थः॥ एवंवज्रनिभस्यहस्त
स्यनिपतन्सन्दत्तोऽर्पितोयोदृढोमुष्टिस्तेनभिन्नोवक्षसोऽर्द्धांतोयस्यतथाचबाहुभंगानंतरंमुष्ट्यातस्यवक्षोवि
दारयिष्यामीत्यर्थः॥ ५३॥ भुअणिद्दालिअकड्डिअखुडिअक्केक्कविसरंतपव्विद्धसिरं॥ ५ णिप्फलसीआसंधिअण
क्खुक्खुडिअहिअअंकरेमिदहमुहं॥ भुजनिर्घालितकृष्टखंडितैकैकविसरत्प्रवृद्धशिरसं॥ निःफलसीतासंहितनखो

खंडितहृदयंकरोमिदशमुखं॥एवंभुजाभ्यांनिर्द्दालितानिधृत्वाधृत्वापृथक्कृतानितदनुकृष्टन्याकृष्टानिपश्चात्खंडिता
निसंतिएकैकंप्रत्येकंविसरंतिभूमौपतंतिप्रबद्धान्युपचितानिशिरांसियस्यतंवक्षोविदारणानंतरंप्रत्येकंतस्यमस्त
कानिविच्छिद्यभूमौपातयिष्यामीत्यर्थः॥अथकार्यानिष्पत्त्यानिष्फलंयथास्यादेवंसीताविषयसंहितमासंजितंअतएवन
खेरुत्खंडितमभ्यंतरादप्युत्खातंहृदयंयस्यतथाभूतं॥शिरःखंडनानंतरंसीतायामासक्त्यपराधात्तदंतःस्थितमपि
तन्मनोनखैरुत्खायबहिःकरिष्यामीत्यर्थः॥अंत्यकुलकं॥४॥५४॥इ॥अअज्जंचेअमरणिहअम्मिदसाणणेणिआ
किक्किंधं॥अणुमरिहिइवमरत्तंदच्छिहिइवजीअंतराहवंजणअसुआ॥इत्यद्यैवमयानिहतेदशाननेनीताकिष्किं
धां॥अनुमरिष्यतिवाम्रियमाणंद्रक्ष्यतीतिवाजीवद्राघवंजनकसुता॥इत्यनेनप्रकारेणाद्यैवमयादशाननेनिहतेस
तिकिष्किंधांनीतासतीजनकसुताजीवंतंराघवंद्रक्ष्यतिवा॥अप्यतथाभूतमेवम्रियमाणंअनुमरिष्यतिवातथाच
इतःसीतायानयनेरामस्यजीवनेमरणेवापक्षद्वयेपिसीतालाभइत्युभयथापिममप्रत्युपकारसिद्धिःस्यादथनय
नंनवेत्तदाकस्यामपिदशायांतस्यतल्लाभोनस्यादितिमहदनिष्टमितिभावः॥५५॥अथरामस्यगरुडाह्वानमाह॥
विसहरवाणत्तिइमेविहीसणेणविणिवारिएसुग्गीए॥अढत्तोचिंतेउंमंतंहिअएणगारुडंरहुणाहो॥विषधरवा
णाइतीमेबिभीषणेनविनिवारितेसुग्रीवे॥आरब्धश्चिंतयितुंमंत्रंहृदयेनगारुडंरघुनाथः॥इमेविषधरःसर्पास्तद्रू
पावाणास्तथाचकिंकरिष्यतीतिकृत्वाविभीषणेनसुग्रीवेविनिवारितेसतिराघवयोःकिष्किंधाप्रेषणादित्यर्थात्रघुना
थोरामस्तत्प्रतीकारायगारुडंमंत्रंहृदयेनचिंतयितुमाह॥५६॥अथगरुडागमनमाह॥णवरिअसहसुक्खिप्प
त्तसाअरद्धंतधुव्वमाणसुवेलं॥जाअंखरवाआहअकिरंतरक्खसकलेवरंधरणिअलं॥अनंतरंचसहसोक्षिप्यमा
णसागरार्द्धांतधूयमानसुवेलं॥जातंखरवाताहतकीर्यमाणराक्षसकलेवरंधरणीतलं॥मंत्रचिंतनानंतरंचध
रणीतलंचमहीतलंजातं॥कीदृशं॥सहसाउत्क्षिप्यमाणेनपक्षघातैरित्यर्थात्सागरस्यार्द्धांतेनसुवेलसन्निहित
भागेनधूयमानःकंप्यमानोधाव्यमानःक्षाल्यमानोवासुवेलोयत्रतादृशं॥एवंखरेणतीक्ष्णेनपक्षयोरेववातेनकी

र्यमाणमितस्ततःप्रेर्यमाणंराक्षसानांकलेवरंयत्रद्विरोधित्वादित्याशयः॥५७॥अथगरुडदर्शनमाह॥पेच्छइअ
कणअपेहुणवहलुज्जोअपडिसारिअमहातिमिरं॥णवपिंछमउअपम्हंथिरपिट्ठिणिहित्तमहुमहासणमग्गं॥
प्रेक्ष्यतेच्चकनकपिच्छबहलोद्योतप्रसारितमहातिमिरं॥नवपिच्छमृदुकपक्ष्माणंस्थिरपृष्ठनिहितमधुमथनासन
मार्गं॥रामोगरुडंप्रेक्ष्यतेच्चेत्युत्तरस्कंधकेनसंदानितकं॥कीदृशंकनकमयानांपिच्छानांबहलोद्योतेनप्रतिसारितं
महातिमिरंयेनतं॥सुवर्णमयगरुडतेजसातमोनाशयंतमित्यर्थः॥एवंनवपिच्छत्वान्नूतनपक्षत्वान्मृदुकपक्ष्माणं
मृदुलोमानं॥एवंस्थिरेपृष्ठेनिहितोमधुमथनासनस्यमार्गःस्थानंपत्रतंतद्वाहनत्वादितिभावः॥५८॥दुव्वारवास
वाउहघाअविमुक्केक्कपिंछपाअडवच्छं॥रामोपाआलंछिअकंठवलंतहिउअरअधरं॥गरुडंदुर्वारवासवायुध
घातविमुक्तैकपक्षप्रकटवक्षसं॥रामःपातालांचितकंठवलस्थितोरगधरंगरुडं॥किंभूतंदुर्वारस्यवासवायुध
स्यवज्रस्यघातेनविमुक्तस्त्रुटितोयएकःपक्षस्तेनप्रकटंवक्षोयस्यतंपक्षभावेनाचरणाभावादितिभावः॥एवंपा
तालादंचितआकृष्टःसन्कंठेवलन्वक्रीभूयस्थितोयउरगस्तद्धारकंपातालादेवतदानीमागमनात्वद्धाकृष्ट
सर्प्येणवेष्टितकंठमित्यर्थः॥५९॥अथनागपाशत्यागमाह॥तोकअरामपणामेगरुडेउववइअसमुहसंठिअदि
ट्ठे॥दोण्हविमुक्कसरीराणविणज्जइतेकहिंगआसरणिवहा॥ततःकृतरामप्रणामेगरुडेऽवपतितसंमुखसंस्थित
दृष्टे॥द्वयोरपिमुक्तशरीरानविज्ञायतेतेकुत्रगताःशरनिवहाः॥ततोरामस्यतद्दर्शनानंतरंदूरादेवकृतप्रणामे
गरुडेऽवपतितेनाकाशादवतरणेनसंमुखसंस्थितेदृष्टेसतिद्वयोरपिरामलक्ष्मणयोर्मुक्तंत्यक्तंशरीरंयैस्तथाभू
ताःसंतःशरनिवहाःकुत्रगताइतिनविज्ञायतेरामसंमुखगतंगरुडंदृष्ट्वाहाठादेवसर्प्याःपलायिताइतिभावः॥
६०॥अथगरुडालिंगनमाह॥अहसरबंधविमुक्कोविणआतणउववूहणक्खअरहिओ॥अप्पाहिअसमंत्तो
जाओगअगरुडदारुणोरहुणाहो॥अथशरबंधविमुक्तोविनतातनयोपगूहनक्षतरहितः॥अध्यापितास्त्रमंत्रो
जातोगतगरुडदारुणोरघुनाथः॥अथगरुडसान्निध्यानंतरंशरबंधाद्विमुक्तोरघुनाथः॥गतेनगरुडेनहेतुना

दारुणोदुःसहोजातस्तस्मिन्सतितदासक्तत्वादितिभावः॥ कीदृक् विनतातनयस्योपगूहनादालिंगतात्क्षरैरहि
तःशून्यः॥ एवंगरुडेनाध्यापितउपदिष्टोऽस्यमंत्रोगारुडोयस्मैसःगरुडेनालिंग्यसर्पभयाभावाद्योपदिष्टनिजमं
त्रःप्रबलोभूदित्यर्थः॥ ६१॥ अथधूम्राक्षस्ययुद्धोद्योगमाह॥ अहसरबंधविमुक्केसोऊणणिसाअराहिवोरहुणाहे
आअग्गअगरुडासंकोधुम्मक्खम्मिसअलंणिमेइरणभरं॥ अथशरबंधविमुक्तौश्रुत्वानिशाचराधिपोरघुनाथौ॥ आग
तगरुडाशंकोधूम्राक्षेसकलंनियोजयतिरणभरं॥ अथगरुडगमनोत्तरंशरबंधविमुक्तौरघुनाथौश्रुत्वानिशाचराधि
पःसकलंरणभरंधूम्राक्षेनियोजयतिकीदृक्आगतागरुडादाशंकायस्यगरुडएवास्मान्हंतुमागतइत्येवंरूपतदा
शंकावानित्यर्थः॥ आगतात्गरुडादितिवा॥ ६२॥ अथधूम्राक्षस्यप्रयाणमाह॥ सरोसेणरहेणवउच्छाहेणवणिसा
अरवलेणसमं॥ णीइभुअंबपहरिसंवरहमाणोविक्कमंबवेराबंधं॥ सरोषेणरथेनेवउत्साहेनेवनिशाचरबलेन
समं निरेतिभुजमिवप्रहर्षंवहमानोविक्रममिववैराबंधंसधूम्राक्षोरणायनिरेतिरथेनेवरोषेणसमंयथारथेन
सहनिर्गच्छतितथारोषेणापिसहेत्यर्थः॥ एवंउत्साहेनसहयथातथानिशाचरबलेनापिसहेत्यर्थः॥ किंभूतोयथाभु
जंतथाप्रहर्षमानंदमपि॥ एवंयथाविक्रमंतथावैराबंधमपिवहमानइतिसर्वत्रसहोपमा॥ ६३॥ अथहनूमद्धूम्रा
क्षसैन्ययोःसामुख्यमाह॥ तोसोरक्खसणिवहोसहधूम्मक्खेणसाअरद्धंतणिहो॥ वडवामुहाणलस्सवसंचरण
रा पहम्मिमारुअस्सअसण्ठिओ॥ ततःसराक्षसनिवहःसहधूम्राक्षेणसागरार्द्धांतनिभः॥ वडवामुखानलस्येवसंचर
णपथेमारुतस्कतस्यस्थितः॥ ततोधूम्राक्षनिर्गमानंतरंसागरस्यार्द्धांतएकदेशस्तन्निभोबहुलत्वान्नीलत्वाच्चत
त्तुल्योराक्षसनिवहोधूम्राक्षेणसमंतेजस्वित्वात्कपिशत्वाच्चवडवामुखानलस्येवमारुतस्कतस्यसंचरणपथेसंमुख
स्थितस्तथाचसागरार्द्धांतुल्यत्वेनराक्षसनिवहस्यभक्ष्यत्वंवडवानलत्वेनोत्प्रेक्षयाहनूमतोभक्षकत्वंप्रतीयत्ते॥ ६४॥
अथैतयोर्युद्धमाह॥ अहदारुणावसाणेकपिरक्खससेण्णवइअरम्मिपअत्ते॥ संभा २४७॥
रिअक्खणिहणोओत्थरइसरेहिंमारुइंधुम्मक्खो॥ अथदारुणावसानेकपिराक्षससैन्यव्यतिकरेप्रवृत्ते॥ संस्मृता

क्षनिधनोऽवस्तृणातिशरैर्मारुतिंधूम्राक्षः॥ अथसांमुख्यानंतरंक्षयहेतुत्वाद्दारुणमवसानंयस्यतादृशकपिराक्षस
सैन्ययोर्व्यतिकरेयुद्धरूपेप्रवृत्तेसतिधूम्राक्षःशरैर्मारुतिंअवस्तृणातिआच्छादयति॥ किंभूतः संस्मृतमक्षस्यभ्रातुर्नि
धनंमरणंयेनतादृक्॥ लंकादाहसयेऽक्षोऽतेनैवहतइतिक्रोधादितिभावः॥ ६५॥ अथधूम्राक्षरथभंगमाह॥ तोतस्स
स्यशरनिघातामोमांतरं तोतस्ससरणिग्घाएरोमंतरलग्गणिप्फलेधुअमाणो॥ अक्कमणमोडिअरहोहिअधुम्मक्खधणु
संठिओहसइकई॥ ततस्तस्यशरनिघातान्रोमांतरलग्ननिःफलान्धुन्वानः॥ आक्रमणमोटितरथोहृतधूम्राक्षधनुः
संस्थितोहसतिकपिः॥ ततःशरवृष्ट्यनंतरंआक्रमणेनोत्प्लुत्यारोहणेनमोटितोभग्नोरथोयेनधूम्राक्षस्येत्यर्थात्॥ सकपि
हनूमानहृतमाछिद्यगृहीतंयद्धूम्राक्षधनुस्तत्रसंस्थितःहसतिधूम्राक्षंलक्ष्मीकृत्येत्यर्थात्॥ मर्कटस्वभावोयमितिभावः
॥ किंकुर्वन्तस्यधूम्राक्षस्यशरनिघातान्रोमांतरेषुलग्नान्सतोनिष्फलानकिंचित्करत्वात्धुनानोदेहोत्क्षेपणादिना
दिक्षुक्षिपन्॥ ६६॥ अथहनूमद्देहदार्ढ्यमाह॥ भग्गोभुजेपरिग्घोवच्छुच्छलिअंगोभुअम्मिफलिहोवच्छुच्छलिअदलि
अंणादिट्ठंमुसलं॥ धुम्मक्खरोसमुक्कंपवअस्सज्जहितहिंविराइपहरणं॥ भग्नोभुजेपरिघोवक्षसउच्छलितदलितंन
दृष्टंमुशलं॥ धूम्राक्षरोषमुक्तंप्लवगस्ययत्रतत्रविशीर्यतिप्रहरणं॥ हनूमत्तोभुजेपरेषांपरिघोभग्नोद्विधाभूतःवक्ष
सउच्छलितंसद्दलितंद्विधाभूतंमुशलमपिनदृष्टंकुत्रगतमित्यर्थः॥ एवंधूम्राक्षेणापिरोषेणमुक्तंप्रहरणंपरिघादिप्ल
वगस्ययत्रैवतत्रैवदेहेविशीर्यतिखंडखंडीभवतिपतितंसदित्यर्थादेतेनवज्रदेहत्वमुक्तं॥ ६७॥ अथयुग्मकेनधूम्रा
क्षमरणमाह॥ तोदीहवामकरअलपडिवणावेढणोणअगलुद्देसं॥ रुइअंतजीवणिग्गमवच्छब्भन्तरभमंतसीहणिणा
अं॥ ततोदीर्घवामकरतलप्रतिपन्नावेष्टनावनतगलोद्देशं॥ रुच्यमानजीवनिर्गमवक्षोभ्यंतरभ्रमत्सिंहनिनादं॥ ततः
परिघादिप्रहारानंतरंप्रभंजनतनयोहनूमान्धूम्राक्षंऊर्ध्वमुष्टितंगतंसन्मुक्तंत्यक्तंजीवितंयेनतादृशंकरोतीत्युत्तर
स्कंधकेनान्वयः॥ किंभूतं॥ दीर्घेनवामकरतलेनप्रतिपन्नमंगीकृतंयदावेष्टनमामोद्यग्रहणंतेनावनतोगलोद्देशोयस्य
तंवामबाहुनावेष्ट्यामोद्यगलेधृतमित्यर्थः॥ अथकंठस्यमोटितत्वाद्रुध्यमाणोयोजीवनिर्गमस्तेनहेतुनावक्षोभ्यंतरेभ्रमन्

६२

से॰बं॰टी॰ २४१ सिंहनादोयस्यतंप्राणावस्थित्यासिंहनादोघूर्णतीत्यर्थः॥ ६८॥खणवावारिविसंठुलंगलं तपहरण पलंघि उ॰ हत्थ
हत्थं॥कुणइपभंजणतण उ॰ड्ढुन्ठिअमुक्कजीविअंधुम्मक्खं॥क्षणव्यापारिविसंष्टुलगलप्रहरणप्रलंबितोभय
हस्तं॥करोतिप्रभंजनतनयऊर्ध्वोत्थितमुक्तजीवितंधूम्राक्षं॥पुनःकिंभूतंगलामोटनेसतिक्षणंव्यापारिणोप्रतिक्रिया
निमित्तंहनूमत्करादिनिर्मोचनायकृतप्रयत्नौसंतौविसंष्ठुलौविह्वलौअतएवगलप्रहरणोपतदस्त्रौसंतौप्रलंबिता
वुभयहस्तौयस्यतंनिर्यंत्रणपीडयाकरयोरवशीभावेनपतदस्त्रत्वंलंबमानत्वंचेत्यर्थः॥युग्मकं॥ ६९॥अथाकंपन
माह॥अहपडिएधुम्मक्खेहअसेससम्मिअगएणिसाअरसेण्णे॥दहमुहसमुहाणत्तंणिंतंपेछइअकंपणपवणसु उ॰
अथपतितेधूम्राक्षेहतशेषेचगतेनिशाचरसैन्ये॥दशमुखसंमुखाज्ञप्तं निर्यंतंप्रेक्षतेअकंपनंपवनसुतः अथपूर्वो
क्तप्रकारानंतरंधूम्राक्षेपतितेनिशाचरसैन्येचहतशेषेहतावशिष्टेस्वल्पेसतिदशमुखेनसमुखंआज्ञप्तंयुद्धायेत्यर्थो
तनिर्यंतंलंकातोबहिर्भवंतंअकंपनंनामरावणपुत्रंपवनसुतःप्रेक्षतेनतुप्रसह्यातिक्रामतितथासतिनिकटवर्ति
नीलंकामेवप्रविशेदित्याशयः॥ ७०॥अथाऽकंपनपतनमाह॥तंपिविइण्णारत्थलवीसत्थाहरिअणिट्ठिआउहणिवहं
उ॰सोमइहणुमन्तोएक्केक्कखुडिअविप्पइणावअवं॥तमपिवितीर्णोरस्थलविश्वस्तावहतनिष्ठितायुधनिवहं॥
अवपातयतिहनूमानेकैकखंडितविप्रकीर्णावयवं॥तमपिनिकटागतमित्यर्थात्हनूमानवपातयतिअकंपनंमारया
मासेत्यर्थः॥किंभूतं॥वितीर्णप्रहारायाग्रेकृत्वादत्तंयदुरस्थलंहनूमतेत्यर्थात् तत्रविश्वस्तमक्षोभंयथास्यादेवंत्र
वहतःपातितोऽकंपनेनेत्यर्थादतएवनिष्ठितःशतखंडीभूयविनष्टश्चायुधनिवहोयस्यतं॥हनूमताप्रहारेऽकृत्वापुरः
कृतेवक्षसिवज्रमयत्वादकंपनप्रहितान्यस्त्राणिखंडखंडीभूतानीत्यर्थः॥अथैकैकंप्रत्येकंखंडिताःसंतोविप्रकीर्णा
हनूमतैवदिशिदिशिक्षिप्ताअवयवाःकरचरणादयोयस्यतं॥ ७१॥अथनीलप्रहस्तयोर्युद्धमाह॥अहदहमुहसं
दिट्ठोहणुमंताघाअसमतुलग्गप्फिडि उ॰॥पडि उ॰णीलस्समुहेअलद्धसमरसुहदूमिअस्स पहत्थो॥अथदशमुख २४१
संदिष्टोहनूमदाघातसमतुलाग्नस्फेटितः॥पतितोनीलस्यमुखे॥लब्धसमरसुखदुःखितस्यप्रहस्तः॥अथाकंपन

वधानंतरयुद्धायदशमुखेनसंदिष्टोहनूमत्कृतादाघातात्समतुलाग्नेणकाकतालीयसंवादसाम्येनदैवात्स्फेटितो
बहिर्भूतःप्रहस्तोनामराक्षसोऽप्राप्तसमरसुखत्वात्दुःखितस्यनीलस्यमुखेसंमुखेपतितःहनूमताहंतुमारब्धोपिदै
वादपक्रांतोनीलस्याग्रंप्राप्तवानित्यर्थः॥ ७२॥अथनीलोरसिप्रहारमाह॥णवरिअपत्थाणेच्चिअचाणोकालाअ
सोपहत्थविमुक्को॥पडि उ॰णीलस्सउरेवणपडिभिणरुहिरुग्गमेणपिसुणि उ॰॥अनंतरंचप्रस्थानएववाणःका
लायसःप्रहस्तविमुक्तः॥पतितोनीलस्योरसिव्रणप्रतिभिन्नरुधिरोद्गमेनपिशुनितः॥सांमुख्यानंतरंचप्रस्थानएव
प्रहस्तंप्रतिनीलस्यप्रयाणसमयएवप्रहस्तेनविमुक्तःकालायसोद्रवीकृतत्वेनश्यामलोहघटितोवाणोनीलस्योरसि
पतितःयदैवनीलस्तदतिक्रमायप्रस्थितस्तदैवप्रहस्तमुक्तोवाणस्तदुरसिपतितइत्यर्थः॥अथसवाणोव्रणात्प्रतिभिन्न
स्यरुधिरस्योद्गमेनोछलनेनपिशुनितःक्षिप्रगमनत्वान्नीलरुधिरोद्गमेनसूचितोनुमापितइतियावत्॥ ७३॥अथनील
स्यकल्पद्रुमक्षेपमाह॥वे उ॰वत्तिअविडवंमुअइकईविसरहत्थिपरिमलसरहिं॥गइमग्गलग्गभमलंपडिसोत्तपसा
रिअंसुअंकप्पदुमं॥वेगापवर्तितविटपमुंचतिकपिरपिसुरहस्तिपरिमलसुरभिं॥गतिमार्गलग्नभ्रमरंप्रतिस्रोतः
प्रसारितांशुकंकल्पद्रुमं॥कपिरपिकल्पद्रुमंमुंचतिप्रहस्तंप्रतीत्यर्थात्॥किंभूतं॥वेगेनापवर्तितानिपश्चादभिमुखीकृ
तानिविटपानियस्यतंवेगोत्कर्षणप्रतिकूलीकृतवायूत्कर्षादितिभावः॥एवंसुरहस्तिनामैरावतादीनांपरिमलेनकट
कंडूयमानादिविमर्दरूपसंबंधेनसुरभिंमदसंबंधादितितदुपमर्दसहत्वेनमहत्वंदृढत्वमप्युक्तंएवंगतिमार्गल
ग्नाअनुगामिनोभ्रमरायस्येतिविश्लिष्टभ्रमरैरप्यलभ्यत्वेनाप्युत्कृष्टजवत्वंएवंप्रतिस्रोतसापश्चाद्वर्त्मनाप्रसारि
तमंशुकंवस्त्रंयस्यवेगमारुतेनेत्यर्थादनेनापितदेवोक्तं॥ ७४॥अथैतद्वृक्षस्यमुक्तावर्षणमाह॥वोलंतजलहरस्स
वतोसेआसारजललवस्सवअणिहे॥आगममग्गम्मिठि उ॰धुअविडवक्खलिअमोत्तिआफलणिवहो॥व्यतिक्रा
मज्जलधरस्येवततोऽस्यआसारजललवस्तबकनिभः॥आगममार्गेस्थितोधुतविटपस्खलितमुक्ताफलनिवहःस्थि
तः॥अस्यकिंभूतस्यव्यतिक्रामतोनभसिगछतोजलधरस्येव॥फलनिवहःकीदृक्॥आसारोवृष्टिःतज्जलस्यलवोबिंदु

स्तरसमूहनिभः॥ तथाचजलधरप्रायस्यकल्पद्रुमस्यवृष्टिजलबिंदुप्राया मुक्ताःपतिताइत्यर्थः॥ ७५॥ अथप्रहस्तोर
सिनद्रुक्षभंगमाह॥ तोतस्सभुअविमुक्कोभग्गोवणभरिअ्ग्रमोत्तिअफलवअरो॥ भज्जंतविडवविअलिअसिअ्ग्रं
सुआवीअपहररुहिरम्मिउरे॥ ततस्तस्यभुजविमुक्तोभग्नोव्रणभृतमौक्तिकफलप्रकरः॥ भज्यमानविटपविगलित
सितांशुकापीतप्रहाररुधिरे उरसि॥ ततस्तदनंतरंनीलभुजेनविमुक्तःक्षिप्तःकल्पद्रुमइत्यर्थात्तस्य प्रहस्तस्योरसि
भग्नोविशीर्णइत्करसःप्रहारस्यचदार्ढ्यमुक्तं किंभूतः॥ व्रणेषुतज्जनितक्षतेषुभृतोव्याप्तोमौक्तिकफलप्रकरोय
स्यसतथा॥ उरसिकीदृशे॥ भज्यमानेभ्योविटपेभ्योविगलितानियानिसितांशुकानितस्थितवस्त्राणि तैरापीतानिसं
सृज्यशोषितानिप्रहारजन्यरुधिराणियत्रेति विशेषणाभ्यांक्षतमुक्तापतनवस्त्रभ्रंशनैरपिप्रहारोत्कर्षउक्तः॥ ७६॥
अथनीलस्यशीघ्रक्रियत्नामाह॥ समअ्ग्रंवंचेइसरेप्पएइसमअ्ग्रंकईदुमेहिणहअलं॥ समअंतेणविमुक्कोचउद्दिसंपा
अडोसिलासंघाओ॥ समंवंचयतिशरान्स्थगयतिसमंकपिर्द्रुमैर्नभस्तलं॥ समकंतेनविमुक्तश्चतुर्दिशंप्रकटः
शिलासंघातः॥ कपिर्नीलःसममेकदैवतप्रेषितान्शरान्वंचयत्युत्प्लवनावपतनादिनावारयतीत्यर्थः॥ एवंएक
देवद्रुमैर्नभस्तलंस्थगयत्याच्छादयति एवंएकदैवतेनकपिनाविमुक्तःशिलासमूहश्चतुर्दिशंप्रकटःसर्वत्रपततीत्य
त्यर्थस्तथाचशरान्वंचयन्नेवद्रुमान्क्षिप्तवान्स्तदैवचशिलाइतिकृतहस्तत्वमुक्तं॥ ७७॥ अथनभसिनीलास्त्र
खंडनमाह॥ विअलंतदुमच्छेआसरघाअदलंतविअलिअसिलाणिवहा॥ दीसंतिदलिअपव्वअवोच्छिज्जंतोज्झ
रणहअलुद्देसा॥ विगलंतद्रुमछेदाःशरघातदलद्विगलितशिलानिवहाः॥ दृश्यंतेदलितपर्वतव्यवच्छिद्यमाननि
र्झरानभस्तलोद्देशाः॥ नभस्तलप्रदेशादृश्यंतेकीदृशाविगलंतोद्रुमाणांछेदाःप्रहस्तशरप्रहारकृताःखंडायस्मादेवं
तस्यैवशरघातेनदलंतःसंतोविगलिताःपतितानीलक्षिप्तशिलानिवहायस्मादेवंतस्यैवशरेणदलितानांपर्वता
नांव्यवच्छिद्यमानानिर्झरायत्रतेपर्वतेषुद्विधाभूतेषुनिर्झराअपिद्विखंडीभूताइत्यर्थः पर्वतेषुशरातखंडेषुपृथक्कृ २४२
ताइतिवा॥ ७८॥ नीलस्यावस्थामाह॥ गिरिधाउरअकलुसोअंसविपल्हत्थबहलकेसरणिवहो॥ संझाअवविच्छु

ओसजलोव्वघणोणहम्मिदीसइणीलो॥ गिरिधातुरजःकलुषःअंसविपर्यस्तबहलकेसरनिवहः॥ संध्यातपविच्छुरितः
सजलइवघनोनभसिदृश्यतेनीलः॥ नभसिनीलोदृश्यतेरवेरित्यर्थात्॥ कीदृशःक्षिप्यमाणगिरीणांगैरिकरजोभिः
कलुषःकर्बुरितःस्वतोनीलत्वादेवंअंसेस्कंधमूलेविपर्यस्तोनिस्यंनमनोन्नमनादिनाविसंष्ठुलःकेसराणांस्कं
धवालानांनिवहोयस्यसतथा॥ कइव॥ संध्यातपेनसंध्याकालीनरविकिरणेनविच्छुरितःसंबद्धोरुणीकृतइ
तियावत् एवंभूतःसजलोघनइव॥ तथाचजलसंबंधेनश्यामतयामेघेननीलस्यरक्ततयासंध्यारागेणगैरिकर
जसातौल्यमाह॥ ७९॥ अथनीलेनप्रहस्तधनुर्ग्रहणमाह॥ णवरिअ्ग्रगअ्ग्रणद्धन्ते ओवडणकिवन्तधणुणिअ्ग्रत्तत्थि
मिओ॥ तहधरिओविअदीसइपढमविमुक्केहिंसरसमुहेहिंकई॥ अनंतरंचगगनार्द्धांतेअवपतनाक्षिप्तधनुर्नि
वृत्तस्तिमितः॥ तथाधृतइवदृश्यतेप्रथमविमुक्तैःशरसमूहैःकपिः कपिर्नीलः॥ प्रहस्तेनप्रथमंविमुक्तैःशरसमूहै
स्तथाधृतइवदृश्यतेकिंभूतःगगनस्यार्द्धांतेउपर्येकदेशेऽवपतनेनोर्द्ध्वादधोगमनेनआक्षिप्तमतिक्रम्यगृहीतंध
नुर्येनतथाभूतःसन्निवृत्तोयतएवावपतितस्तत्रैवगतःसन्स्तिमितःस्थिरीभूतस्तथाचप्रथमंप्रहस्तेनशराविमु
क्तास्तदुत्तरमवपत्यप्रहस्तधनुर्गृहीत्वानिवृत्यपूर्वस्थानस्थितोनीलस्तिमितोपिशरैःपृष्ठगामिभिर्धृतइवलक्षितो
नतुधृतइत्यवपातोत्पातयोःक्षिप्रतासूचिता॥ ८०॥ अथप्रहस्तस्यमुशलक्षेपमाह॥ अहणिसिअरेणमुसलंणी
लस्सणिडालवट्टपज्जुप्फलिअं॥ मज्झम्मिधरेंतरवंसमुहागअतुरिअ्ग्रवंचिअंपडिवण्णं॥ अथनिशिचरेणमुशलंनी
लस्यललाटपट्टप्रत्युत्फलितं॥ मध्येध्रियमाणरवंसंमुखागतत्वरितवंचितंप्रतिपन्नं॥ अथधनुःशून्यतानंतरंनिशिच
रेणस्वेनैवक्षिप्तंमुशलंनीलस्यललाटपृष्ठात्प्रत्युत्फलितंयतएवगतंतत्रैवागतंसन्मध्येप्रतिपन्नंहस्तेनोत्प्लुत्यगृहीत
मित्यर्थः॥ ध्रियमाणरवंससिंहनादंयथास्यात्॥ कीदृशंसंमुखागतंत्वरित्तमेववंचितंललाटभेदनाभावात्तथाचप्रत्यु
त्फलनोत्कर्षेण प्रहारललाटयोर्दार्ढ्यप्रकर्षः॥ यद्वामध्येस्वयमुत्प्लुत्यपुरोगत्वामध्यवर्त्मनिधृतमितिप्रथमजात
मुशलोच्छलनादपिप्रहस्तोत्पातस्यशीघ्रत्वमित्याशयः॥ ८१॥ अथनीलेनशिलाग्रहणमाह॥ गेण्हइअजलणतण

३० फवेलसिहरब्द्लग्गमेहछाअं॥ विअडपहत्थोरत्थलसमवित्थारकढिणत्तणंकसणसिलं॥ गह्णातिवज्वलनतनयः फवेलशिखरार्द्धलग्नमेघच्छायांनिकटप्रहस्तोरस्थलसमविस्तारकठिनत्वांकृष्णशिलां॥ चेपुनर्ज्वलनतनयोनीलः कृष्णशिलांगृह्णाति॥ किंभूतांविकटंविस्तीर्णंयत्प्रहस्तस्योरस्थलंतत्समेविस्तरकठिनत्वेयस्यास्तामितियथा फवेलशिखरोपरिभागेमेघस्तिष्ठतितथानीलहस्तोपरिशिलापीतिफवेलेननीलस्यशिखरेणभुजस्यतदूर्ध्वभागेनकरस्यमेघेनशिलायाःतुल्यत्वं॥ ८२॥ अथनीलोत्पालमाह॥ दूरसमुप्पइएण अणीलेणसिलाअलोत्थ अभ्भिदिणअरे॥ जाअणहम्मिदिअसोत्तक्खणवद्धतिमिरामहिअलम्मिणिसा॥ दूरसमुत्पतितेनचनीलेनशिलातलावस्तृतेदिनकरे॥ जातोनभसिदिवसस्तत्क्षणवर्द्धतिमिरामहीतलेनिशा॥ दूरसमुत्पतितेनकृतोत्फालेनचनीलेनदिनकरेशिलातलेणावस्तृतेछन्नेसतिनभसिदिवसोजातस्तत्क्षणेबद्धंसंबद्धंतिमिरंययासानिशामहीतलेजातेत्यर्थात्॥ शिलयारविरश्मीनांव्यवहितत्वादधःप्रसरणाभावादतएवोर्द्ध्वप्रसरणाद्दिवसइतिभावः॥ ८३॥ अथप्रहस्तवधेनाश्वासकंविच्छिनत्ति॥ अहणीलस्सपहत्थोरणाणुराएणसहिअगाढप्पहरो॥ घाअब्भंतरभिण्णोगलंतजीअरुहिरोगओधरणिअलं॥ अथनीलस्यप्रहस्तोरणानुरागेणसोढगाढप्रहारः॥ घाताभ्यंतरभिन्नोगलज्जीवरुधिरोगतोधरणीतलं॥ अथशिलोत्थापनानंतरंप्रहस्तोधरणीतलंगतःपतितइत्यर्थः॥ कीदृक्रणानुरागेणसंग्रामप्रीत्यानीलस्यसोढःप्रतीष्टोगाढःप्रहारोयेनशिलाकृतइत्यर्थात्तथाभूतः अतएवघातेनशिलाभिघातेनाभ्यंतरेभिन्नःचूर्णोबहिःक्षताभावादततएवचगलद्रहिर्भवज्जीवःप्राणस्तद्रूपंरुधिरंयस्यतादृक्अभिघातेसतिरुधिरनिर्गमस्यौचित्याज्जीवएवरुधिरत्वेनरूपितःयतोजीवएवरुधिरमतोयागादावशस्त्रहतस्यछागादेरुत्तरकालंखंडनेपिरुधिरनिर्गमाभावःसजीवस्यैवतन्निर्गमादितिभावः॥ ८४॥ रक्षोविक्षोभदर्शयारामदासप्रकाशितारामसेतुप्रदीपस्यशिखापूर्णाचतुर्दशी॥ १४॥ ॥अथरावणस्यप्रयाणमाह॥ अहणिहअम्मिपहत्थेवंधुवहामरिसणिंतवाहुप्पीडो॥ चलिअसिहिपच्चुगअहुंकारभेरंतदसदिसोदहवअणो॥ अथनिहतेप्रहस्तेबंधु २४२

वधामर्षनिर्यद्वाष्पोत्पीडः॥ चलितःशिखिप्रत्युद्गतहुंकारभ्रियमाणदशदिग्दशवदनः॥ अथशिलापतनानंतरं॥ प्रहस्तेनिहतेसतिदशवदनश्चलितोरणायेत्यर्थात्॥ कीदृक्बंधूनांवधेनामर्षान्नियन्बहिर्गच्छन्बाष्पोत्पीडोयस्यसइतियात्रासमयेरोदनादमंगलमुक्तं॥ पुनःकीदृक्शिखिनावह्निनाप्रत्युद्गतःसंगतःक्रोधशोकहेतुकत्वाद्योहुंकारस्तेनगंभीरतयाभ्रियमाणाःपूर्यमाणादशदिशोयेनसतथा॥ १॥ अथैतस्यहास्यमाह॥ तहकुविएणपहसिअंकरालमुहकंदराभरिअदसदिसं॥ जहसेभअतुण्हिक्कोभवणक्खंभेसुपरिअणोविणिलुक्को॥ तथाकुपितेनप्रहसितंकरालमुखकंदराभ्रियमाणदशदिक्॥ यथास्यभयतूष्णीकोभवनस्तंभेषुपरिजनोपिनिलुकितः॥ करालानिव्यात्तत्वात्सच्छिद्राणिमुखान्येवकंदरास्ताभिर्भ्रियमाणाःपूर्यमाणादशदिशोयत्रतद्व्यात्तदशमुखव्यात्तदशदिग्यथास्यादेवंकुपितेनरावणेनतथाप्रहसितंहास्यकृतंयथाभयेनतूष्णीकोमौनीअस्यरावणस्यपरिजनोपिभवनस्तंभेषुनिलुकितोनिलीनइत्यर्थः॥ क्रुद्धस्यदृष्टिपथोवर्जनीयइत्याशयादितिभावः॥ २॥ अथैतस्यरथारोहणमाह॥ तोरक्खसपरिवारंणिअपाअभरोणमंतपच्छिमतडिमं॥ सारहिणारुब्भंतंचडुलतुरंगमधअंरहंआरूढो॥ ततोराक्षसपरिवारंनिजपादभरावनमत्पश्चिमतडिमं॥ सारथिनारुध्यमानंचटुलतुरंगमध्वजंरथंआरूढः॥ ततोहास्यानंतरंसरथंआरूढःकिंभूतंराक्षसाःपरिवाराःपरिचारकायत्रतंतैःपरिवृतमितिवाएवंनिजपादयोर्भरेणावनमदधोगच्छत्पश्चिमंतडिमंभित्तिर्यस्यतंपश्चाद्भागेनैवारोहणसंप्रदायात्तद्रथिगौरवेणतेजस्वितयावाचटुलाश्चंचलास्तुरगमाअतएवध्वजश्चयत्रतंअतएवसारथिनारुध्यमानंक्वचिदप्युड्डीयमागच्छेदितितुरगवल्गाकर्षणादिनास्थाप्यमानं॥ ३॥ अथकपीनांरावणज्ञानमाह॥ हुंकारेणसहाणवुहिअमहाकलअलेणलंकामज्झे॥ पुरसेणकलअलेणअणओचलिओत्तिवाणरेहिंदहमुहो॥ हुंकारेणसभायांक्षुभितमहाकलकलेनलंकामध्ये॥ पूर्णसैन्यकलकलेनवज्ञातश्चलितइतिवानरैर्दशमुखः दशमुखःसभायांतिष्ठतीतिवानरैःक्रोधजन्यहुंकारेणज्ञातस्तथाक्षुभितानांनगरीयाणामित्यर्थान्महाकोलाहलेनलंकामध्येआगतइतिज्ञातःपश्चात्पूर्णस्यचतुरंगतापन्नस्यसैन्य

DR. BHAU DAJI डाक्टर भाऊदाजीइत्यस्यपुस्तकसंग्रहः

स्यकलकलेनरणरणकसमुत्थेणलंकातोयुद्धायचलितइतिज्ञातः॥ ४ ॥अथैतस्यनगरान्निर्गममाह॥णवरिअ
मुहणिवहोवरिदुक्खपब्भट्ठधवलाअवत्तच्छाओ॥णिग्गन्तूणपुरीओभंजइरणमच्छरंकइसेणं॥अनंतरंचमु
खनिवहोपरिदुःखप्रभ्रष्टधवलातपत्रच्छायः॥निर्गम्यपुरीतोभनक्तिभग्नरणमत्सरंकपिसैन्यं॥अथप्रस्थाना
नंतरंसरावणःपुरीतोनिर्गम्यबहिर्गत्वाकपिसैन्यंभनक्तिभंजयतिपराङ्मुखीकरोतिकिंभूतःमुखनिवहस्यो
परिदुःखेनप्रभ्रष्टासंमिताधवलातपत्रस्यछायायस्यसतथाक्रोधेनमुखानामुत्फुल्लतयामहत्वोत्कर्षात्सैन्यंकिं
भूतंभग्नोरणायमत्सरोऽभ्युत्थायस्यतं॥ ५ ॥अथकपीनांपलायनमाह॥तोमुहमेत्तवलंतापच्छिमकेसरसडा
हअग्गकबंधा॥भग्गाणुमग्गलग्गापेच्छंतिदसाणणंपवंगमणिवहा॥ततोमुखमात्रवलमानाःपश्चिमकेसर
सटाहताग्रस्कंधाः॥भग्नानुमार्गलग्नाःप्रेक्षंतेदशाननंप्लवंगमनिवहाः॥ततोरावणागमानंतरंभग्नानांपलायि
तानामनुमार्गलग्नाःपश्चाद्गच्छंतःप्लवंगमनिवहादशाननंप्रेक्षंतेपुरोगताव्यवहिताएवपश्चाद्गतानांतुरावण
कृतोपरिपातशंकित्वादितिभावः॥किंभूताःमुखमात्रेणवलमानाःपश्चादभिमुखानतुचरणैरतएवपश्चिमाःपश्चा
दभिमुख्यःस्कंधसन्निहितपश्चाद्भागवृत्तयोवायाःकेसरसटास्ताभिराहतास्पृष्टाअग्रस्कंधास्कंधाग्रप्रदेशायेषां
तेसिंहावलोकितन्यायेनप्रेक्षणान्मुखस्यपरिवृत्तत्वेनसयनामपिपरिवृत्तत्वादित्याशयः॥ ६ ॥अथनीलस्तान्परा
वर्तयतीत्याह॥तोतेभिणपअट्टेदहवअणक्कंतदिसाविद्दविअपए॥पज्झट्ठजहाभणिएभमइसमुप्पण्णरणभए
जलणसओ॥ततस्तानभिन्नप्रवृत्तान्दशवदनाक्रांतदत्तविद्रावितपदान्॥प्रभ्रष्टयथाभणितान्भणतिसमुत्पन्नर
णभयान्ज्वलनसुतः॥ततस्तेषांपलायनोत्तरंतान्समुत्पन्नसमरभयान्कपीन्ज्वलनसुतोनीलोभणतिकिं
भूतान्प्रथमंभिन्नान्पलायितानथप्रवृत्तानपकीर्तिभियापरावृत्यसंभूयस्थितान्एवंदशवदनाक्रांततयादत्तभू
मावर्पितंविद्रावितंशीघ्रंविसंष्ठुलंवापदंयैस्तान्एवंप्रभ्रष्टंप्रस्मृतंयथाभणितंयैस्तान्विस्मृतयुद्धप्रतिज्ञावचना २४४
त्॥ ७ ॥अथनीलस्यपरावर्तनवाक्यमाह॥मामुंचहसमरधुरंएससमुक्खित्तमलअसिहरद्धंतो॥जस्सकाएण

पडाअहतंविअवोहरइजीविअंपवअवइ॥मामुंचतसमरधुरामेषसमुत्क्षिप्तमलयशिखराद्धांतः॥यस्यकृतेनप
लायध्वंतदेववोहरतिजीवितंप्लवगपतिः॥हेकपयःसमरस्यधुरांभारंमामुंचतकुतइत्यत्रआह।एषप्लवगप
तिःसमुत्क्षापितमलयशिखरैकदेशःसन्युष्मान्हंतुमित्यर्थात्यस्यजीवितस्यकृतेननिमित्तेनपलायध्वंतदे
ववोयुष्माकंजीवितंहरतिहरिष्यतीत्यर्थः॥वर्तमानसामीप्येलट्तथाचपयालायनेमरणापकीर्तीयुद्धेनुमरणे
कीर्तिस्वर्गावितरथातुकीर्तिर्लक्ष्मीश्चेतियुद्धमेवसम्यगितिभावः॥ ८ ॥अथरावणस्यरामदर्शनमाह॥सीआहि
अहिअएणअअहसोत्तिदसाणणेणसारहिसिट्ठो॥णवितहरामोत्तिचिरंजहतीअपिओत्तिसबहुमाणंदिट्ठो॥सीता
हितहृदयेनचअथसइतिदशाननेनसारथिशिष्टः॥नापितथारामइतिचिरंयथातस्याःप्रियइतिसबहुमानंदृष्टः॥अ
थनीलवचनोत्तरंदशाननेनसोयंरामइतिसारथिनाशिष्टःकथितोरामस्तथामत्प्रतिपक्षःकृतसमुद्रबंधनादि
पुरुषार्थइतिकृत्वापितथानदृष्टोयथातस्याःसीतायाःप्रियःस्वामीप्रेमपात्रंचतदुपभोगभाजनंचेतिकृत्वासबहु
मानंसादरंसश्लाघमितिनिर्यावत्चिरंदृष्टःकीदृगस्यलावण्यंकिंवापौरुषमितिजिज्ञासावशादितिभावः॥अ
त्रबीजमाह॥किंभूतेनसीतायामाहितचित्तेनतथाचअहमियतापिश्रमेणसीतांनलभेऽयंत्वनायासेनैवलब्ध
वानितिधन्योयमितितात्पर्यं॥ ९ ॥अथरावणापयानमाह॥अहरामसराहिहओपवएहिंपरम्मुहोहसिज्जंतरहो
छिणपडिआअवत्तोलंकाहिमुहोगओणिसाअरणाहो॥अथरामशराभिहतःप्लवगैःपराङ्मुखोपहस्यमानरथः
छिन्नपतितातपत्रोलंकाभिमुखोगतोनिशाचरनाथः॥अथरामदर्शनानंतरंरामशरेणाभिहतोनिशाचरनाथो
लंकाभिमुखःसनूगतोलंकांप्रविष्टइत्यर्थः॥किंभूतःप्लवगैःपराङ्मुखत्वात्पश्चादुपगम्यकरतालादिभिरुपहस्य
मानोरथोयस्यएवंछिन्नंसत्पतितमातपत्रंयस्यसतथा॥ १० ॥अथकुंभकर्णप्रबोधनमाह॥तोतेणलहुइअजसं
पत्तविणासेणमुक्कसोडीरपअं॥पडिवोहणंअआलेसहोवसत्तस्सकुंभअण्णस्सकअं॥ततस्तेनलघूकृतयशः
प्राप्तविनाशेनमुक्तशौटीर्यपदं॥प्रतिबोधंअकालेसुखोपसुप्तस्यकुंभकर्णस्यकृतं॥ततोलंकाप्रवेशानंतरंप्रा

त्तविनाशेनरावणेन अकालेव्यवस्थितजागरणसमयंविनैवसंक्षोपसक्तस्यकुंभकर्णस्यप्रतिबोधनंकृतंकिंभू
तंलघूकृतं यशोयेनस्वाक्षमताप्रकाशनात्तथामुक्तंशौटीर्येणाहंकारेण पदंस्थानं यतः परसापेक्षत्वात्तत्क्रिया
विशेषणंवा ॥ ११ ॥ अथकुंभकर्णप्रयाणमाह ॥ सोविअजंभाअन्तोअआलुपडिबोहगरुइअसिरद्धंतो ॥ णीइह
सिऊणसकइरंलहुअंसोऊणरामवहसंदेसं ॥ सोपिचजृंभायमाणोऽकालप्रतिबोधगुरूकृतशिरोर्द्धांतः ॥ नि
रैतिहसित्वासकचिरंलघुकंश्रुत्वारामवधसंदेशं ॥ अकालेप्रतिबोधेनजागरेण गुरूकृतस्तंभितःशिरोर्द्धांतो
मस्तकरूपैकदेशोयस्यतथाभूतःसन्जृंभायमाणःसकुंभकर्णोपिरामवधरूपंसंदेशमभीष्टवचनंश्रुत्वा
यतोलघुकमीषत्करमतःसकचिरंहसित्वानिरैतिनिर्गच्छतीत्यर्थः ॥ १२ ॥ अथैतस्यदेहमहत्वमाह ॥ उच्छुणरइरह
वहोजाऊ॰देहस्ससेकणअपाआरो ॥ जरुपणसारैंलग्गोदरखलिऊ॰वतवणिज्जराअपरिअरो ॥ आक्रांतर
विरथपथोजातोदेहस्यास्यकनकप्राकारः ॥ जनुप्रदेशालग्नोदरस्खलितइवतपनीयरागपरिकरः ॥ अस्यकुं
भकर्णस्यदेहस्यऊरुप्रदेशालग्नःकनकप्राकारोदरस्खलितःत्रिकरूपस्वस्थानात्किंचिदधोपसृतः ॥ ऊरु
लग्नत्वात्तपनीयस्यसुवर्णस्यरागोरंजनयत्रसस्वर्णघटितःपरिकरइवजातःपरिकरोमेखलावल्लिकेनिब
ध्यतइतिसमाचाराः ॥ सतुसक्षोभितस्यशिथिलीभवत्येवेतिध्वनिः ॥ कीदृक्प्राकारःआक्रांतोरविरथस्यपंथा
येनसतावदुच्चइत्युत्प्रेक्षा ॥ १३ ॥ अथास्यप्राकारलंघनमाह ॥ लंघिअपाअरस्सअतोसेविवलाअमाणमकर
पक्कग्गाहा ॥ जाणुप्पमाणसलिलाजाआफडिहागआसमुद्दद्धंता ॥ लंघितप्राकारस्यचततोऽस्यद्विपलायमा
नमकरप्रग्राहाः ॥ जानुप्रमाणसलिलाजाताःपरिखागताःसमुद्रार्द्धांताः ॥ ततःसान्निध्यानंतरंलंघितप्राका
रस्यास्यकुंभकर्णस्यजानुदघ्नसलिलाःसंतःसमुद्रैकदेशाःपरिखागताःपरिखाप्रविष्टाजाताःप्राकारसन्नि
हितभूमेःकुंभकर्णचरणयंत्रितत्वेनावनमनात्समुद्रस्योन्नमनंततएवतज्जलस्यनीचगामितयापरिखायांसं
क्रमइतिभावः ॥ तथापिपरिखाजलस्यजानुप्रमाणत्वमित्यस्यमहत्वमुक्तंकिंभूताविपलायमानाःक्षोभादित २४५

स्ततोगामिनोमकरप्रग्राहायत्रते ॥ प्रग्रहोजलसिंहः ॥ १४ ॥ अथकपीनांपलायनमाह ॥ तोतंपेच्छंतच्चिअपच्छाहु
त्ताणिअन्तरणवावारा ॥ हत्थपडंतधराहरविसमक्कंतापडाइआकइणिवहा ॥ ततस्तंपश्यंतएवपश्चादभिमुखा
निवृत्तरणव्यापाराः ॥ हस्तपतद्धराधरविषमाक्रांताःपलायिताःकपिनिवहाः ॥ ततःप्राकारलंघनानंतरंकुंभ
कर्णंपश्यंतएवपश्चादभिमुखाःसंतःकपिनिवहाःपलायिताःकिंभूताःनिवृत्तयुद्धव्यापाराएवंहस्तात्पतताध
राधरेणविषमंआक्रांताभीत्यासम्यग्धर्तुमसामर्थ्येनयंत्रिताः ॥ १५ ॥ अथामुष्ययुद्धमाह ॥ अहसेलेहिंतरूहिं
अफलिहेहिंअमोग्गरेहिंहतूणदढम् ॥ दढदंडाउहमग्गणमुसलेहिंखणेणवाणरवलंसअलं ॥ अथशैलैस्तरुभि
श्चपरिघैश्चमुद्गरैर्हत्वादृढं ॥ दृढदंडायुधमार्गणमुशलैःक्षणेनवानरबलंसकलं ॥ अथकपिभंगोत्तरंशैलादि
भिर्दृढंदंडरूपमायुधंमार्गणोबाणोमुशलश्चएतत्पर्यंतैरस्त्रैःक्षणेनसकलंवानरबलंदृढंयथास्यात्तथाहत्वेति
परस्कंधकेनसंदानितं ॥ १६ ॥ तोपव आ इगआइतुरआइअरकवसाइलोहिअमन्तो ॥ रामसराघाअधुओणि
अअवलेपअन्तोखत्तुं ॥ ततःप्लवगान्गजान्तुरगांश्चराक्षसान्लोहितमत्तः ॥ रामशराघातधुतोनिजकबलेप
रबलेप्रवृत्तःखादितुं ॥ कुंभकर्णोरामशराघातेनधुतःकंपितःसन्क्रोधात्निजकबलेपरबलेचप्लवगादीन्खा
दितुंभोक्तुंप्रवृत्तःएषामेवलोहितेरुधिरैर्मत्तोयतः ॥ युग्मकं ॥ १७ ॥ अथकुंभकर्णभुजच्छेदमाह ॥ चिरजुज्झिअस्सतो
सेदोण्हविरामधणुणिग्गअसराहिअआ ॥ पढमंधरणीअभुआपच्छाछेअरुहिरोज्झरापल्हत्था ॥ चिरयोधितस्य
ततोऽस्यद्वावपिरामधनुर्निर्निगतशराभिहतौ ॥ प्रथमंधरण्यांभुजौपश्चाच्छेदरुधिरनिर्झराःपर्यस्ताः ॥ ततःसे
न्यक्षयानंतरंचिरंयोधितस्यकपिभिरित्यर्थात् अस्यकुंभकर्णस्यरामधनुर्निर्गतेनशरेणाभिहतौछिन्नौद्वावपिभु
जौधरण्यांप्रथमंपर्यस्तौपतितौपश्चाच्छेदरुधिराणांनिर्झराःपर्यस्ताविकीर्णाइतिरुधिराणांप्रतिरोधव्यागेन
प्रथमंभुविपतनार्हत्वेपिभुजयोःप्राथमिकंपतनंप्रहारस्यातिशयंतयोर्गौरवंवासूचयति ॥ १८ ॥ अथानयोःपत
नस्थानमाह ॥ एक्कोरुद्धणइमुहोअणुवेलंणिवडिओसकवेलोबभु॰ साअरलद्दत्थामोवी॰वीअसेउवधब्भ

वि२०॥ एकोरुद्धनदीमुखोऽनुवेलंनिपतितःसुवेलइवभुजः॥ सागरलब्धस्थामाद्वितीयोद्वितीयसेतुबंधइवस्थि
तः॥ एकोभुजःसमुद्रस्यवेलामनुसुवेलइवस्थितःयथावेलायांसुवेलस्तिष्ठतितथेत्यर्थस्तत्समानरूपत्वात्
कीदृक्युद्धंनदीनांमुखंसमुद्रप्रवेशस्थानंयेनसतथासुवेलोपिरुद्धपरदिग्वर्त्तिनदीमुखइतिसाम्यं॥ एवंसा
गरेलब्धंस्थामस्थैर्यंयेनतथाभूतःसन्द्वितीयोबाहुर्द्वितीयसेतुबंधइवस्थितस्तत्समानाकारत्वात्प्रथमोविद्य
तएवेतिभावः॥१९॥ अथकुंभकर्णशिरःछेदमाह॥ आअणकड्ढिएणअतोसेवक्कलिअसिहिसिहेणरणमुहे
रहुवइसरेणतुंगंचक्केणवराहुणोसिरंउक्खुडिअं॥ आकर्णकृष्टेनचततोस्यचक्रियतुशिखिशिखेनरणमु
खे॥ रघुपतिशरेणतुंगंचक्रेणवराहोःशिरउत्खडित॥ ततोभुजपतनानंतरंआकर्णकृष्टेनरघुपतिशरेण
अस्यतुंगमुच्चंशिरोमस्तकमुत्खडितं॥ कीदृशेनचक्रिताचक्राकाराशिखिनःशिखायत्रतेनआग्नेयत्वात्त
द्रूपतेजोमयत्वाद्वा॥ राहोरिवयथाराहोस्तुंगंशिरश्चक्रितशिखिशिखेनचक्रेणोत्खंडितमित्यर्थः॥२०॥ अ
थशिरःपतनमाह॥ गअणाणएणतेणअपवणभरेतमुहकंधदरामहरेण॥ छिण्णपडिवेणविकओबउत्थतुं
गसिहरुग्गामोव्वतिजडो॥ गगनान्नतेनतेनचपवनाभ्रियमाणमुखकंदरामुखरेण॥ छिन्नपतितेनापिकृत
श्चतुर्थतुंगशिखरोद्गमइवत्रिकूटः॥ चपुनर्गगनव्याप्योन्नतेनछिन्नपतितेनापितेनशिरसात्रिकूटःसुवेलश्चतु
र्थस्यतुंगस्यशिखरस्योद्गमउत्पतिर्यत्रतथाभूतइवकृतःत्रयाणांविद्यमानत्वाच्चतुर्थंतदेवशिरोजातमित्युत्प्रे
क्षा॥ किंभूतेनपवनेनभ्रियमाणापूर्यमाणायामुखमेवकंदरातयामुखरेणशब्दायमानेनेत्यवकाशातिशयाद
स्यमहत्त्वमुक्तंशिखरमपितादृशकंदरामुखरमितिसाम्यं॥२१॥ अथकबंधपतनमाह॥ पडिएअकुंभअणेदूर
पलाअदरभग्गपक्कग्गाहो देहभरंतुच्छंगेपव्वालेइवडवामुहंमअरहरो॥ पतितेचकुंभकर्णेदूरपलायितदरभग्न
प्रग्राहः देहभ्रियमाणोत्संगःप्लावयतेवडवामुखंमकरगृहः॥ चपुनःकुंभकर्णेपतितेसतिमकराणांगृ
हंयत्रससमुद्रोवडवामुखंवडवाग्निंप्लावयतिव्याप्नोतिकीदृश दूरपलायितःसन्भग्नःक्षोणिक्षोभसंभूत २४६

परस्परसंघट्टाद्देहाभिघाताद्वाऽन्यथासंस्थितावयवःप्रग्राहोजलसिंहोयत्रसतथापक्कग्गाहोदेशीवा॥ अत्र
हेतुमाह॥ दत्तेनकबंधेनभ्रियमाणःपूर्यमाणउत्संगोयस्यतस्यतत्रैवपतितत्वादितिचडवानलप्लावनेनतदा
धस्यापिजलस्यादाहादाधिक्यंतेनचसमुद्रक्षोभादिधिक्यात्कबंधस्यमहत्त्वमुक्तं॥२२॥ अथरावणस्यरोषमा
ह॥ तोकुंभअणणिहणंसोजणदसाणणोपहत्थअब्भहिअं॥ रोसाअवरज्जंतंपुणोविहसिऊणधुणइमुहसंघा
अम्॥ ततःकुंभकर्णनिधनंश्रुत्वादशाननःप्रहस्ताभ्यधिकंरोषातपरज्यमानंपुनरपिहसित्वाधुनोतिमुखसं
घातं ततस्तत्पतनानंतरंप्रहस्तादपिप्रहस्तनिधनाद्दत्यधिकंदुःखदत्वात्कुंभकर्णस्यनिधनंश्रुत्वादशाननः
पुनरपिमुखसंघातंधुनोतिविषादेनचालयतीत्यर्थः॥ किंभूतंरोषरूपेणातपेनतीक्ष्णत्वात्रज्यमाणमरुणी
क्रियमाण॥२३॥ अथपुनरपिरावणप्रयाणमाह॥ णितस्सअतंवेलंअमरिसपरिवड्डिअस्सभवणुच्छंगे खंभं
तरविच्छारातेच्चिअवच्छत्थलस्ससेणपहुत्तानिर्यतश्चतद्वेलायाममर्षपरिवर्द्धितस्यभवनोत्संगे॥ स्तंभांतरवि
स्तारास्तएववक्षःस्थलस्यास्यनप्रभूताः॥ भवनस्योत्संगेयैरेवपूर्वंगतागतंकृतंतएवस्तंभयोरंतरस्यमध्यस्यवि
स्ताराअवकाशास्तस्यांवेलायांनिर्यतोयुद्धायप्रस्थितस्यचास्यरावणस्यवक्षःस्थलस्यनप्रभूतानपरिमिताः किंस्
तस्वल्पपरिमाणाबभूवुरित्यर्थः॥ अत्रहेतुमाहकिंभूतस्यअमर्षेणपरिवर्द्धितस्योत्फुल्लस्यतथाचवक्षःस्थलोत्फुल्ल
तयास्तंभांतरेणहगन्निर्गमनाभावादमंगलंसूचितं॥२४॥ अथेंद्रजिद्विज्ञप्तिमाह॥ दरणिग्गअस्सणवरिअउग्घा
डिअवच्छभरिअभवणुच्छंगो॥ जाणुपडिउट्ठिओसिजम्हम्यइहसिऊणमेहणाओत्तिसुओ॥ दरनिर्गतस्यानंतरंच
उद्घाटितवक्षोभृतभवनोत्संगःजानुपतितोत्थितोस्यजल्पतिहसित्वामेघनादइतिसुतः॥ गृहांतःस्तंभद्वयमध्यग
मनानंतरंदरनिर्गतस्यततःकिंचिद्बहिर्भूतस्यास्यरावणस्यमेघनादःसुतोजानुभ्यांपतितःसन्नुत्थितःपूर्वकाये
वेत्यर्थात्हसित्वाक्रोधादितिवक्ष्यमाणंजल्पतिकिंभूतःउद्घाटितत्वेनोत्थितत्वात्प्रकाशितेनवक्षसाभृतोव्याप्तोभ
वनोत्संगोयेनसतथायुद्धरसोत्फुल्लत्वादतएवहृदयोत्साहव्यंजनायतदुद्घाटनमितिभावः॥२५॥ चतुर्भिर्विज्ञ

पितावाक्यस्वरूपमाह॥णिम्माविअम्मिकज्जे साहेसगरुएविअप्पसाह्विअगुरुणा॥पुत्तेणपुत्तसरिसंपुत्तप्फरि
संणपाविऊहोइपिआ॥निर्म्मितेकार्येसाहसगुरुकेपिआत्मनैवगुरुणा॥पुत्रेणपुत्रसदृशपुत्रस्पर्शनप्रापि
तोभवतिपिता॥साहसविषयत्वेनगुरुकेलौकैरादृतेसाहसेनापिगुरुकेऽसाध्यइतिवाताद्दृशेपिकार्येगुरुणा
पित्राआत्मनैवनिर्मितेनिर्वाहितेसतिपुत्रेणपितापुत्रसदृशंपुत्रस्पर्शंपुत्रजन्यस्कखलुत्वंपुत्रस्पर्शस्कखंप्रा
पितोनभवतितादृशपुत्रस्यपुत्रत्वाभावात्तत्स्पर्शेनस्कखानुत्पत्तेरितिभावः॥२६॥स्वोत्कर्षपरंतदेवाह॥कीस
ममेम्मिधरेंतेमाणुसमेत्तस्सदहरहस्कअस्सदहरस्कअस्सकर॥इअणीसिअप्पणच्चिअलहुअंतोरम्हस्कव
सउलस्सजसं॥किमितिमयिध्रियमाणेमानुषमात्रस्यदशरथस्कतस्यकृते॥इतिनिरैषिआत्मनैवलघूकुर्व
न्ममराक्षसकुलस्ययशः॥हेतातमयिध्रियमाणेजीवतिसतिमानुषमात्रस्यनतुदेवादेर्दशरथस्कतस्यकृते
इत्यनेनप्रकारेणआत्मनैवकिमितिनिरैषियुद्धायनिर्गच्छसीत्यर्थः॥मामेवादिशेतिभावः किंकुर्वन्मम किम
परंराक्षसकुलस्यचयशोलघूकुर्वन्नेतेऽयोग्याएवेतिरावणःस्वयमेवप्रस्थितोभूदितिलोकप्रसिद्धिःस्या
दितिभावः॥२७॥रावणोत्कर्षपरंतदाह॥उक्खअभुअंगरअणंणिस्कदिअणंदणवणंपलोट्टिअसेलं॥अप्पा
णंवणअणासिसमंसमत्थस्सतिहुअणस्सभरसहं॥उत्खातभुजंगरत्नंनिपातितनंदनवनंप्रलोटितशैलं॥
आत्मानंवानजानासिसमंसमस्तस्यत्रिभुवनस्यभरसहं॥हेतातत्वमात्मानंवानजानासिखत्र परिविनापियद
प्रतियोगिनामानुषेणसमंयुयुत्सरसीतिभावः किंभूतंसमंएकंदेवसमस्तस्यत्रिभुवनस्यभरसहंत्रैलोक्य
मप्येकत्रभावतितथापित्वयासमंनपारयतीत्यर्थस्तदेवोपपादयतिपुनःकिंभूतंउत्खातमुत्पाटितंभुजंगस्य
शेषादेःफणारत्नंयेनेतिपातालस्यविच्छिद्यनिपातितंनंदनवनंयेनेतिस्वर्गस्यप्रलोठितःपरिवर्तितःकैलासः
शैलोयेनेतिमर्त्यस्यपरिभावकत्वमुक्तं॥२८॥रामेणसमुद्रोबद्धइतिमहत्वमाशंक्यतत्प्रतिक्षेपपरंतदाह॥किं २४७
णिहणेमिरणमुहेसरेक्कसोसविअसाअरंरहुणाहं॥ओसत्तविअज्जंचिअवलंतवडवामुहेमलेमिसमुद्दे॥

किंनिहन्मिरणमुखेशरैकशोषितसागरंरघुनाथं॥उतसप्ताप्यद्यैववलद्वडवामुखान्मृद्नामिसमुद्रान्॥शरैरेकः
शोषितःसागरोयेनतंरघुनाथंकिंरणमुखेनिहन्मिमारयामिउतपक्षांतरेअद्यैवसप्तापिसमुद्रान्मृन्द्रानिव्याकु
लयामिकिंभूतान्इलद्दिशिदिशिगच्छद्वडवामुखमौर्वानलोयेषुतानितिक्षोभाधिक्यमुक्तंएकसमुद्राभिभाव
काद्रामादुभयपक्षेणाप्यहमधिकःस्यामितिभावः शरैकेनशोषितइतिवा॥२९॥अथयुग्मकेनेन्द्रजितोरथारो
हणमाह॥इअविणविअदहमुहोपच्छिमसारहिकरट्ठविअसीसक्को॥आबद्धकवअमंथरपअविक्कमभर
णमंतविरच्छअतडिमं इतिविज्ञापितदशमुखःपश्चिमसारथिकरस्थापितशीर्षकः॥आबद्धकवचमंथरपद
विक्रमभरनद्दिस्तृततडिमं॥इत्यनेनप्रकारेणविज्ञापितोदशमुखोयेनसमेघनादःसमरत्वरितःसन्रथंवि
गलत्यारोहतीत्यर्थइत्यग्निमस्कंधकेनसमन्वयःकिंभूतःपश्चिमेनपश्चाद्वर्तिनासारथिनाकरेस्थापितंशी
र्षकंशिरस्त्राणंयस्यसतथा॥रथंकिंभूतंआइषद्बद्धोयःकवचस्तेनमंथरयोर्यत्रणात्गुरुकृतयोःपदयोर्वि
क्रमादुद्वृत्तारोहणाद्भरेणागौरवेणनमदधोगच्छद्विस्तृतंततडिमंपश्चाद्वर्तिभिन्नभागोयस्यतंतथाचकवचं
यथातथापरिधायापिशीर्षकंनगृहीतवानितित्वरातिशयउक्तः॥३०॥धअसिहरट्ठिअजलहरमुच्चत्तासणि
पडिप्फलिअसूरकरम्॥समरतुरिओविलग्गइरहंस्कआसणरामधणुणिग्घोसो॥ध्वजशिखरस्थितजलध
रमुच्यमानाशनिप्रतिफलितसूरकरं॥समरत्वरितोविलगतिरथंश्रुतासन्नरामधनुर्निर्घोषः॥पुनःकिंभूतं
ध्वजानांशिखरेषुस्थितैर्जलधरैर्मुच्यमानेष्वशनिषुप्रतिफलिताःसंक्रांताःसूरस्यकरायत्रतंइतिवज्रेषुरवि
करसंघट्टाद्युद्योतप्रकर्षेणतडित्कल्पमेतत्सर्वमायाकल्पितमितिभावः॥समरत्वराहेतुमाह॥किंभूतःश्रु
तआसन्नस्यनिकटवर्तिनोरामस्यधनुर्निर्घोषोयेनेतिरणोत्साहउक्तः॥युग्मकं॥३१॥अथामुष्यप्रस्थानमाह
॥इअवारिअदहवअणोदहवअणाणत्तिविलइउक्खित्तभरो॥णीइरहंआरूढोरक्खसपरिवारिओदसा
णणतणओ॥इतिवारितदशवदनोदशवदनाज्ञप्तिविलगितोक्षिप्तभर॥निरैतिरथमारूढोराक्षसपरिवा

रितोदशाननपरितनयः॥ इत्यनेन प्रकारेण वारितदशवदनो राक्षसैः परिवारितो वेष्टितश्च दशाननतनयोर
थमारूढः सन्निरैतिरणाय निर्गछतीत्यर्थः॥ किंभूतः दशवदनस्याज्ञया विलगितो योजितः सन्नुक्षिप्त उत्थापितो
भारः संग्रामरूपो येन स तथा अन्यत्रापि समर्थेन केनचिदर्पितं भारादि समुत्थाप्यत इति ध्वनिः॥ ३२॥ अथरथ
वेगमाह॥ जो दहमुहणगरदारे तुरिअपहाविअरहस्स जो णअरि मुहे॥ खोहेंतस्स कइवलं सो च्चिअ वेउ० असेप
अभहलहलो॥ यो दशमुखनगरद्वारे त्वरितप्रधावितरथस्य यो नगरीमुखे॥ क्षोभयतः कपिबलं स एव वेगश्च प्र
वृत्तहलहलः॥ त्वरितं प्रधावितो रथो यस्य तथाभूतस्यास्य मेघनादस्य यो वेगो रथकृत एव दशमुखस्य नगरवर्त्ति
नि द्वारे मूलस्थान इत्यर्थः॥ यश्च नगरीमुखे लंकायां गोपुरे मध्य इत्यर्थः॥ कपिबलं क्षोभयतो विमर्दयतश्च त
स्य स एव वेगो जात इत्यर्थात्तथा च परेषां यथा यथा पुरः समागमनं तथा तथा शत्रुसांनिध्येन वेगशैथिल्यं भव
ति मेघनादस्य तु पितुरुत्साहनायत दग्रे चरमकाष्ठापन्न एव जवोत्कर्ष आसीदथ स्पर्यते संग्राम शिरसि तथैव
स्थित इति रणोत्साहसूचितः वेगः कीदृक् प्रवृत्तो हलहलाः क्षोभविशेषो यस्माद्विपक्षाणामित्यर्थात्॥ शब्दोयं देशी
॥ ३३॥ अथ नीलादिभिरस्य प्रतिक्षेपमाह॥ अह रामबद्धलक्खो पढमुद्धाइअपवगमकवलिअवलो॥ वाणरजो
हेहि समज्जलणक्कएण वरिउ० दसाणणतणउ०॥ अथ रामबद्धलक्ष्यः प्रथमोद्धावितप्लवंगमक्षपितबलः॥ वान
रयोधैः समज्वलनकृतेन वृत्तो दशाननतनयः॥ अथ समरभूमिगमनोत्तरं रामे बद्धलक्षः शरलक्ष्यता येन तथा
भूतो दशाननतनयस्तत एव वानरयोधैर्हनूमदादिभिः समज्वलनकृतेन सैतेन नीलेन वृत्तः पुरो गत्वा प्रतीष्ट
इत्यर्थः॥ कीदृक् प्रथमोद्धावितमग्रेकृतवेगमत एव पूर्वं गमैः क्षपितं नाशितं बलं यस्य स तथा ये पुरः समागतास्ते
कपिभिर्हता इत्यर्थः॥ ३४॥ अथ सर्वैरेकदा युद्धमाह॥ णीलेण गंडसेलं दिविएण दुमं सिलाअलं मारुइणा॥ दारे
इ सरेहि समं णलेण मुक्कं च मलअसिहरक्खंडम्॥ नीलेन गण्डशैलं द्विविदेन द्रुमं शिलातलं मारुतिना॥ दारयति २४९
शरैः समं नलेन मुक्तं च मलयशिखरखण्डं॥ नीलादिभिर्मुक्तं गण्डशैलादिकं सममेकदैव शरैर्दारयति मेघनाद इत्यर्थादि

निगदव्याख्यातं॥ गंडशैलो गिरेः स्थूलोपलः॥ ३५॥ अथ विभीषणमंत्रणमाह॥ तो भग्गपवअसेण्णं णिउंभिलाहुत्तसच्च
विअपत्थाणं॥ वारेइ मेहणाअं विभीसणेण भणि उ० सोमित्तातणउ०॥ ततो भग्नप्लवगसैन्यं निकुंभिलाभिमुख
सत्यापितप्रस्थानं॥ वारयति मेघनादं विभीषणेन सौमित्रातनयः॥ ततो युद्धानंतरं भग्नं प्लवगानां सैन्यं येन। ग
वं निकुंभिला नाम यज्ञस्थानं तदभिमुखं सत्यापितं स्थिरीकृतं प्रस्थानं। येन यष्टुमित्यर्थात्तं मेघनादं वारयति यथा
तत्र न याति तथा चरतीति विभीषणेन सौमित्रातनयो लक्ष्मणो भणितस्तत्र गत्वा तृतीयवेलायामस्यां ब्रह्मणो वरं लब्ध्वा
दुर्जयः स्यादिति भावः॥ ३६॥ अथ मेघनादपतनमाह॥ तो माआहिं सरेहिं असेलेहिं अ जुज्झिअस्स रक्खससरि
सं॥ सोमित्तिणा णिरुद्धं पिआमहत्थेण मेहणाअस्स सिरं॥ ततो मायाभिः शरैश्च शैलैश्च युद्धस्य राक्षससदृशं
सौमित्रिणा निपातितं पितामहास्त्रेण मेघनादस्य शिरः॥ ततो विभीषणमंत्रणानंतरं मायाभिर्मेघच्छन्नवज्रपा
तादिभिः शरैः शैलैश्च राक्षससदृशं तद्योग्यं यथा स्यात् दलकल्कटमित्यर्थः॥ तथा युद्धस्य कर्तरि क्तः मेघनादस्य शिरः
सौमित्रिणा ब्रह्मास्त्रेण निपातितं॥ ३७॥ अथ रावणरोदनमाह॥ सो रूणइं दइवहस्स अइ सरोसं दसाणणो वा
हजलं॥ अब्भुत्तिअ दीवाणं णिव्वलइ घअम्व तक्खणं सहुआसं॥ श्रुत्वा इंद्रजिद्वधं मुंचति सरोषं दशाननो बाष्पज
लं॥ अभ्युत्तेजितदीपानां निर्वलति घृतमिव तत्क्षणं सहुताशं॥ इंद्रजितो वधं श्रुत्वा दशाननः सरोषं बाष्पजल
मश्रु मुंचति तच्च निर्वलति पृथग्भूय पततीत्यर्थः॥ किंविच घृतमिव यथा अभ्युत्तेजितानां दीपानां घृतं सहुताशं
दीपरश्मिसंपर्कि सन्निर्वलति द्रवीभवतीति दीपदशाननयो रश्मिरोषयोर्घृतबाष्पयोस्तौल्यादुपमा तथा च तदा
नीमुत्तेजितदीपवद्दशाननो भूदिति भावः॥ ३८॥ अथ रावणस्य रोषविषादावाह॥ णिहए अ मेहणाए परिअत्तं
तेण तक्खणं चिअ विहिणा॥ रोसविसाएहि समं हत्थेहिं व दोहि आह उ० दहवअणो॥ निहते च मेघनादे परिवर्त
मानेन तत्क्षणमेव विधिना॥ रोषविषादाभ्यां समं हस्ताभ्यामिव द्वाभ्यामाहतो दशवदनः॥ च पुनर्मेघनादे निह
ते सति तत्क्षणमेव परिवर्तमानेन विरुद्धवृत्तिना विधिना दृष्टेन विधात्रा वा द्वाभ्यां हस्ताभ्यामिव रोषविषादाभ्या

दशवदन आहतस्ताडितस्तथा च विधेरपींद्रजितोभीतिस्थिताह तेच तस्मिन्रावण वधेपि साध्यवसायत्वात्प्रति
कूलत्वं जातमिति रावणरोषविषादौ विधिहस्तत्वेनोत्प्रेक्ष्यते तत्ताडनमुक्तं तेन विधिताडितो न जीवतीति ध्वनि
तं प्रकृते रोषविषादयोरेव युद्धहेतुत्वेन मृत्युहेतुत्वमित्याशयः॥ अन्येनापि रिपुर्हस्ताभ्यां ताड्यत इति ध्वनि
तयद्वा विधेरपि मेघनादजीवनपर्यंतमेवानुकूल्यमस्थितहतेच तस्मिन्नप्रातिकूल्यं जातमतस्तथाकृतवानिति
भावः॥३९॥ अथ पुनरपि रावणप्रयाणमाह॥ णीसेसणिहअबंधू तो सोएक्को विबहुभुआदुप्पेच्छो॥ भीसणमु
हसंघाओ रक्खसलोओ व्व णिग्गओ दहवअणो॥ निःशेषनिहतबंधुस्ततः स एकोपि बहुभुजाद्दुःप्रेक्षः॥ भीष
णमुखसंघातो राक्षसलोक इव निर्गतो दशवदनः॥ ततो रोषविषादानंतरं निःशेषनिहतो बंधुर्यस्य सहृत
सकलराक्षसतया एकोप्यसहायोपि दशवदनो राक्षसलोक इव राक्षसपुंज इव निर्गतो रणाय यस्यर्थात् पुंजत्वह
माह कीदृक् बह्वीभिर्भुजाभिर्दुःप्रेक्षः एवं भीषणो भयानको मुखानां समूहो यस्य स तथा॥ तथाच हि भुजैक
मुखत्वेन प्रसिद्धलोकवैलक्षण्याद्रोषाद्दुःप्रेक्ष्यतया विशतावपि बाहुषु दशस्वपि मुखेषु कोटिकोटिबुद्धिभव
तीत्युपक्षामर्त्यलोकादिवद्वा राक्षसलोकः॥४०॥ अथामुष्य रथारोहणमाह॥ णवरि अ पवणपणोल्लिअक
सणपडाआदरंधआरिअसूरं॥ परिणअमत्तो रावणमअपक्खालिअतुरंगकेसरभारं॥ अनंतरंच पवनप्र
णोदितकृष्णपताकादरांधकारितसूरं॥ परिणतमतो रावणमदस्नापिततुरगकेसरभारं॥ निर्गमानंतरंच
स रथं आरूढ इत्युत्तरस्कंधकेन संदानितकं किंभूतं पवनेन प्रणोदिताश्चालितायाः कृष्णपताकास्ताभिरं
धकारितोंधकारविशिष्ट इव कृतः सूरो येन तं पवनोत्थापितत्वेन पताका एव सूर्यबिंबलग्नाः श्यामतया सू
र्योप्यंधकारालिंगित इति बुद्धिं जनयंतीति भावः॥ अत एवोत्पातादयात्रा सूचिता नीलपताकानां बाहुल्येन सू
र्यस्य छत्रतया रविरथं धकारछन्न इति बुद्धिर्वा एवं परिणतः परिवृत्य कृता या तोयो मत्तो रावणस्तस्य मदैः प्ला २४९
वितस्तुरंगाणां केसरभारो यत्रेति पूर्वमपि बहुयुद्धसहत्वमुक्तं॥४१॥ चक्कमलमइलिअरधअवडपु

सिअससिबिंबपच्छिमभाअं॥ धणअगआभंगुग्गअसिहिज्जालाकलुसिअं रहं आरूढो॥ चक्रमलमलिनितो
दरध्वजपटप्रोंछितशशिबिंबपश्चिमभागं॥ धनदगदाभंगोद्गतशिखिज्वालाकलुषितरथं आरूढः॥ पुनः
किंभूतं पूर्वं चक्राणां मलेन मलिनितं घर्षणे सति संक्रांतेन श्यामीकृतमुदरं यस्य तथाभूतः सन् तदानीं ध्वज
पटेन प्रोंछितः शशिबिंबस्य पश्चिमस्तलवर्ती भागो येन तथाभूतं चंद्रे चक्रमलसंबंधादुत्पन्ना श्यामिका पताक
या प्रोंछ्या प्रसार्यत येनेति गगनचारित्वमुच्चत्वंच सूचितं एवं धनदस्य गदाया भंगादुद्गताभिः शिखिज्वालाभिः
कलुषितं ईषद्दाहाद्धूम्रीकृतं पूर्वं युद्धे सति कुबेरस्य गदा तत्र प्रहारेण लग्ना ततोग्निरुत्थितस्तेन कलुषमिति
बहुयुद्धसहत्वमुक्तं॥ युग्मकं॥४२॥ अथ निशिचरीणाममंगलप्रकाशमाह॥ दट्ठूण अ तं णित्तं पीआ मंगल
मणाहि रअणिअरीहिं॥ जन्तो च्चिअ उप्पण्णा तेहिं चिअ लोअणेहिं वाहत्थवआ॥ दृष्ट्वाच तं निर्यतं पीता मंगलम
नोभी रजनीचरीभिः॥ यत एवोत्पन्नास्ताभ्यामेव लोचनाभ्यां बाष्पस्तबकाः॥ च पुनस्तं निर्यतं दृष्ट्वा मंगलचित्त
भिर्निशाचरीभिर्याभ्यामेव लोचनाभ्यामुत्पन्ना बाष्पस्तबकास्ताभ्यामेव पीता निहतसकलबंधुत्वेन रावणः
स्वयमेव रणाय गच्छतीति शोच्यबुध्या निर्गता अप्यश्रुबिंदवो यात्रायाममंगलानि माभवंत्विति पुनरंतर्नीता
इत्यर्थः॥४३॥ अथ रावणस्य कपिसैन्यदर्शनमाह॥ तो तेण करअलट्ठिअसेलोज्झुरसलिलणिव्वविअवच्छअ
ड दिट्ठीहि अ वाणेहि अतुलिअं जाइ लहुअं पवंगमसेण्णं॥ ततस्तेन करतलस्थितशैलनिर्झरसलिलनिर्वृ
तवक्षस्तलं दृष्टिभिश्च बाणैश्च तुलितं याति लघुतां प्लवगमसैन्यं॥ ततो युद्धक्षेत्रागमानंतरं तेन रावणेन दृष्टि
भिश्च बाणैश्च तुलितं प्लवंगमसैन्यं लघुतां याति प्रथमं दर्शनेनैव ज्ञातं कपिबलमिदं मदुपमर्दं न सहिष्यते च
रमं शरत्यागेन निर्धारितमिति तुलितपदार्थः साम्मुख्ये सति क्षुब्धं शरत्यागे च सति क्षुब्धतरमभूदिति लघुता
पदार्थः किंभूतं करतलस्थितस्य निर्झरसलिलेन निर्वृतं शीतलितं वक्षस्तलं यस्य तत्तथा च रावणदर्शनादु
त्तेजितहृदि क्षोभोद्गतकरकंपेन पर्वतपरिच्युत्या निर्झरपातेन शैत्यमभूदत एव दृष्ट्या तुलितमिति भावः अन्य

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यास्य स्मारकम्
DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यास्य स्मारकम्

दपितुलायामारोपितं सत्वशून्यतयालघुतामेव गच्छतीति ध्वनिः॥ वाणेहिवंपाठे बाणैरिव यथा बाणैस्तुलितं लघु
तांयातितथा दृष्टिभिरपीति सहोपमा॥ ४४॥ अथ बिभीषणदर्शनमाह॥ पासावडिअम्मिविसेविहीसणेपवअसे
णकअपरिवारे॥ दीणोत्तिसोअरोत्तिअअमरिसरससंधि ३० विडछुलुलइसरो॥ पार्श्वापतितेप्यस्यबिभीषणे
प्लवगसैन्यकृतपरिवारे॥ दीनइतिसोदरइत्यर्थ॥ रससंहितोप्युच्छुलतिशरः॥ अस्यरावणस्य पार्श्वापतितेपा
र्श्ववर्तिन्यपिबिभीषणे अमर्षरसेनसंहितेपिशरः दीनइति सोदरोयमितिहेतोरुच्छुलतिचेच्छंनस्थिरीभवतीत्य
र्थइतिरोषकरुणाभावयोः संधिरित्ययंनकृपयानविद्धइतिभावः किंभूते प्लवगसैन्येनकृतः परिवारोवेष्टनयस्य
यद्वाप्लवगसैन्यकृतः परिवारः परिजनोयेनतस्मिन्नित्यर्थः॥ ४५॥ अथलक्ष्मणस्यशक्तिवेधमाह॥ विसहिअ
पढमप्पहरोणवरिअरोसेणसंधिउद्धडबाणो॥ इंदासणीअवदुमोसत्तीअउरम्मिलक्खणोणिब्भिण्णो॥ विसोढ
प्रथमप्रहारोऽनंतरंचरोषेणसंहितोद्भटबाणः॥ इंद्राशन्येवद्रुमः शक्त्योरसिलक्ष्मणोनिर्भिन्नः॥ विसोढः प्रथ
मः शक्त्योरसिलक्ष्मणोनिर्भिन्नः प्रहारोयेनरिपोरित्यर्थात॥ अनंतरंचरोषेणसंहितउद्भटोबाणोयेन तथाभूतोल
क्ष्मणः शक्त्याउरसिनिर्भिन्नस्ताडितोरावणेनेत्यर्थादेकंरावणप्रहारंसोढ्वायावद्बाणंलक्ष्मणः संदधातिता
वदेवशक्त्यानिर्भिन्नइत्यर्थः॥ द्रुमइवयथाइंद्राशन्यावज्रेणद्रुमोनिर्भिद्यतेतथेत्यर्थः॥ ४६॥ अथलक्ष्मणस्यवि
शल्यकरणमाह॥ सोविअपवणसुआणिअधराहरोसहिविइणजीअब्भहि ३०॥ तहसंधिअंवावसरोणिसाअरे
हिंसहजुज्झिउंआढत्तो॥ सोपिचयवनसुतानीतधराधरौषधिवितीर्णजीवाभ्यधिकः॥ तथासहितचापसरोनिशा
चरैः सहयोद्धुमारब्धः॥ सोपिचलक्ष्मणः पवनसुतेनानीतस्यधराधरस्य ओषध्यावितीर्णेनप्रत्यानीयदत्तेन
जीवेनप्राणपंचकेनाभ्यधिकोनूतनसत्वात्ममराहित्येनपरमतेजस्वीसन्निशाचरैः सहयोद्धुमारब्धः॥ कीदृ
कृतयापूर्ववदेवसहितंचापशरंयेनसतथेतिक्षणजन्यधातुवैषम्याभावउक्तः॥ ४७॥ अथत्रिभुरादिकुलके २९०
नेंद्ररथागमनमाह॥ अहरामोविणिअच्छइतुरअखुरप्पहरविहलजलहरवदं॥ ठिअवज्जहरालंबिअकण

अधअकवंभणिम्महंतपरिमलं॥ अथरामोपिनिर्ध्यायतितुरगखुरप्रहारविह्वलजलधरपृष्ठं॥ स्थितवज्रध
रालंबितकनकध्वजस्तंभनिर्यत्परिमलं॥ अथलक्ष्मणविशल्यतानंतरंरामोपिस्वर्गान्निपततंरथंनिर्ध्यापति
पश्यतीतितृतीयस्कंधकेनसहान्वयः किंभूतं तुरगाणांखुरप्रहारेणविह्वलानिस्थानेस्थानेखंडितानिजलधरा
णांपृष्ठानियस्मात्तं एवंस्थितेनवज्रधरेणालंबितात्पृष्ठेनावष्टब्धात्कनकध्वजस्तंभान्निर्यन्परितः प्रसर्यन्प
रिमलः सौरभंयत्रइद्रंदेहस्थितपारिजातादिसंबंधात॥ ४८॥ वामभुअगहिअपग्गहमाअलिभरणमिअदी
हरधुरादंडं॥ भिज्जंतमेहसीहरतणाउणअणिसण्णचामरमहं॥ वामभुजगृहीतप्रग्रहमातलिभरनमित
दीर्घधुरादंडं॥ भिद्यमानमेघशीकरार्द्रावनतनिषण्णचामरपक्ष्माणं॥ किंभूतंवामभुजेनगृहीतः प्रग्रहोबल्गा
येनतस्यमातलेरिंद्रसूतस्यभरेणनमितादीर्घाधुरादंडईशादंडोयत्रतं अधः पतनेनमातलेरपितदुपरिन
मनादितिभावः एवंभिद्यमानस्यद्विधाभूतस्यवर्त्मवर्त्तिनोमेघस्यशीकरैरंबुकणैरार्द्रान्यार्द्रितएवावनतानिसं
तिनिषण्णानिमिथोमिलितानिचामराणांपक्ष्माणियत्रेत्यलंकृतत्वमुक्तं॥ ४९॥ ससिणिहसतुसारोल्लिअरविअ
रवसुआअधअवडसिहग्गं॥ उण्णअपच्छिमतडिमंनिवडत्तंखअवइम्वसग्गाहिरहं॥ शशिनिघर्षतुषारार्दित
रविकरशुष्कध्वजपटशिखाग्रंतं॥ उन्नतपश्चिमतडिमंनिपततंखगपतिमिवस्वर्गादिरथं॥ किंभूतंप्रथमंशशि
नोनिघर्षेसतितदीयतुषारैरार्द्रीकृतः पश्चात्तदधोवर्त्तिनोरवेः करैः शुष्कोध्वजपटस्यशिखाग्रंतदग्रंतो
यत्रतमितितावद्दूरादागमनमुक्तंएवंउन्नतंपश्चिमतडिमंयस्यअग्रभागेणाधःपतनेपश्चाद्भागस्योच्छ्रितत्वा
दितिभावः॥ खगपतिमिवयथागरुडः स्वर्गादागच्छतीत्यर्थः॥ आदिकुलकं॥ ३॥ ५०॥ अथरामस्यमातलिमिल
नमाह॥ तोरामोमाअडिणापढमदराभासणम्मुहपसण्णमुहो॥ तिअसवहुमाणगरुअंदूरअरोणामिआण
णोणपणमि ३०॥ अथरामोमातलिनाप्रथमदराभाषणोन्मुखप्रसन्नमुखः॥ त्रिदशबहुमानगुरुकंदूरतरावनामि
ताननेप्रणतः॥ अथागमनानंतरंदूरतरमतिदूरंततएवावनमीकृतंमुखंयेनेत्यादरउक्तस्ताहशेनमातलिनारामः

७२

से॰बं॰टी॰ २५३ प्रणतोनमस्कृतस्त्रिदशानामिंद्रादीनांबहुमानेनसत्कारेणगुरुकमतिशयितंयथास्यात्तथारामः कीदृक्प्राथमिके
कुशलप्रश्नादिरूपेकिंचिदाभाषणेउन्मुखंसप्रसन्नमुखंयस्यसइतिप्रीतत्वमुक्तं॥ ९१॥अथकवचदानमाह॥
देइअरहपुंजइअंउहअकरक्खिवणपाअडिअविस्थारं॥ कवअंतिहुअणवइणोअब्भंतरलग्गणिम्महंतपरि
मलं॥ददातिचरथपुंजितंउभयकरक्षेपणप्रकटितविस्तारं॥कवचंत्रिभुवनपतेरभ्यंतरलग्ननिर्यत्परिमलं॥त्रि
भुवनपतेरिंद्रस्यत्रिभुवनपतयेरामायेतिवाचतुर्थ्यर्थेषष्ठीकवचंददातिचमातलिरित्यर्थात्किंभूतंरथेपुंजितं
तत्रैवस्थापितत्वादितिमहत्वमुक्तंअथोत्थापनेसतिउभयकराभ्यांक्षेपणनपार्श्वयोर्बाहुद्वयस्थानोत्थापनेनप्रक
टितोविस्तारोयस्यहृदयोरुस्थानाभिव्यंजनादुभयकरस्थानयोःक्षेपणेनवा॥एवअभ्यंतरेलग्नःसन्निर्यंस्तित
स्ततःप्रसर्पन्परिमलःश्रीखंडादेर्यत्रतमितितत्कालोत्तारितत्वमुक्तं॥ ९२॥अथकवचपरिधानमाह॥तंवक
वअंसुराहिवसव्वंगपहुत्तलोअणसुहप्फारिसं॥सीआविरहोलुग्गेजाअंथोअसिढिलंरहुवइस्सउरे॥तच्च
कवचंसुराधिपसर्वांगप्रभूतलोचनसुखस्पर्शं॥सीताविरहावरुग्णेजातंस्तोकशिथिलंरघुपतेरुरसि॥तच्च
कवचंसीतायाविरहेणावरुग्णेदुर्बलेरघुपतेरुरसिस्तोकमीषत्शिथिलंजातंदौर्बल्यादेवकिंचिदवकाशा
दितिरामस्येंद्रतुल्यदेहत्वमुक्तं॥किंभूतंसुराधिपस्यसहस्राक्षस्यसर्वांगेषुप्रभूतानांव्याधानांलोचनानांसुख
स्पर्शंनयनस्यकठिनस्पर्शासहत्वेनतत्तत्स्थानेषुकोमलीकृतत्वादितिभावः॥ ९३॥अथकवचबंधनमाह॥महि
अलमोइण्णेणअसुरवइहत्थपरिमाससइदुद्दुलिअं॥आरूढस्सरहंसेकवअंसव्वंगिअंकअंमाअडिणा॥म
हीतलमवतीर्णेनचसुरपतिहस्तपरिमर्षसदादुर्द्दुलितं॥आरूढस्यरथमस्यकवचंसर्वांगिकंकृतंमातलि
ना॥महीतलमवतीर्णेनसमागतेनचमातलिनाकवचंरथमारूढस्यास्यरामस्यसर्वांगिकंसर्वांगव्यापिकृतं
चप्रथमंरथारोहणमनंतरंकवचपरिधानमितिक्रमार्थः॥किंभूतंसुरपतेर्हस्ताभ्यांपरिमर्षेणरजोमार्जनादिव्या २५३
पारेणदुर्द्दुलितंस्नेहपात्रीकृतमुल्लुलीकरणादितिरामेतत्पक्षपातउक्तः॥ ९४॥अथरामेलक्ष्मणविज्ञप्तिप्रस्तो
ति॥

तोणीलरविसुएहिंसमहिअंराहवंसुमित्तातणओ॥भणइधरणीअतुक्खणविलइअधणुगब्भिणंमेऊणकरं
ततोनीलरविसुताभ्यांसमन्वितंराघवंसुमित्रातनयः॥भणतिधरण्यांतत्क्षणविलगितधनुर्गर्भितंनिवेश्य
करं॥ततोरामस्यकवचपरिधानोत्तरंनीलसुग्रीवाभ्यांसमन्वितःसुमित्रातनयोधरण्यांकरंनिवेश्यराघवंभण
ति॥किंभूतंकरंतत्क्षणेविलगितेनगृहीतेनधनुषागर्भितंपूर्णाभ्यंतरमित्यर्थः॥मुष्टिनाधृतत्वादितिभावः॥
९५॥रामस्यत्रिभिर्विज्ञप्तिवाक्यमाह॥वीसमउतुम्हचापंअडणिमुहप्फिडिअजीआबंधं अइरापेच्छविरा
अंममम्मिणीलेव्वरविसुएव्वदहमुहं॥विश्राम्यतुतवचापअटनिमुखस्फेटितशिथिलज्याबंधं अचिरात्प
श्यविशीर्णंमयिनीलेवारविसुतेवादशमुखं॥हेरामतवचापंअटनिमुखास्फेटितउत्तारितःसन्शिथिलो
स्तब्धोज्याबंधोयत्रतथासत्विश्राम्यतुसुखीभवतुप्रांतादवतार्यधनुष्येवज्यानिवेश्यतइतिसप्रदायःतर्हि
रावणस्यकावार्तेत्यतआह॥मयिनीलेवारविसुतेवासतिविशीर्णंविशकलितप्रत्येकावयवंदशमुखं
पश्यसमर्थेसेवकेसतिप्रभुणानयुध्यतइतिभावः॥ ९६॥तवयोग्योपिनायमित्याह॥गरुअम्मिकुणसुको
वंलुहुएदहम्मिमुअसुअमरिसं॥तुंगंतडंणिसुंभइणअणवइप्पंसमत्थलिबवणगओ॥गुरौकुरुथकोपं
लघौदशमुखवधमुंचामर्षं॥तुंगंतडंनिपातयतिनचनदीवप्रंसमस्थलीवावनगजः॥हेरामगुरावस्मदाद्य
साध्येकोपंस्वव्यापारायकुरुध्वलघौसुकरत्वादस्मदादिसाध्येदशमुखवधेऽमर्षंहेतुत्वादन्यथासिद्धत्वाच्चे
तिभावः॥अर्थांतरंन्यस्यतिवनगजस्तुंगमुच्चंतटंपर्वतादेर्निपातयतिनवनदीवप्रंवेलादिरूपंसमस्थलींस
मभूमिंवानिपातयतीत्यर्थस्तेषामनुच्चत्वेनबुध्यनारोहादितिभावः॥ ९७॥स्वयंसामर्थ्येपिप्रभुणापरिजन
एवभारोनिधीयतइतिदृष्टांतयन्नाह॥पज्जंतस्ससमत्थंदहिउंअद्धच्छिपेच्छिएणतिउरं॥रहुवइकिंवणसुव्व
सिआणत्तीतिणअणस्सतिअसेहिंकआ॥पर्याप्तस्यसमस्तंदग्धुंअर्द्धाक्षिप्रेक्षितेनापित्रिपुरं॥रघुपतेकिंवान
शृणोषिआज्ञप्तिस्त्रिनयनस्यत्रिदशैःकृता॥हेरघुपतेकिंवानशृणोषिनश्रुतवानसित्रिनयनस्याज्ञप्तिराज्ञा
त्रिदशैःकृतात्रिपुरवधइत्यर्थात्किंभूतस्यअर्द्धाक्षिः प्रेक्षितेनापिकटाक्षमात्रेणसमस्तंत्रिपुरंदग्धुंपर्या

त्तस्यसमर्थस्यतथाचेतरासाध्यमेवप्रभुणासाध्यतइतिभावः॥ अथरामस्यप्रत्युत्तरमाह॥तोदहवअणालोअणरो
सगाअसेअलंघिअणिडाडअडो॥ पुलइअणीलरविसअ॰पणअंपडिभणइलक्खणंरहुणाहो॥ ततोद
शवदनालोकनरोषोद्गतस्वेदलंघितललाटतटः॥ प्रलोकितनीलरविसुतःप्रणतंप्रतिभणतिलक्ष्मणंर
घुनाथः॥ततोलक्ष्मणावचनोत्तरंअवलोकितनीलसुग्रीवःसन्प्रणतंलक्ष्मणंरघुनाथःप्रतिभणतिकिंभूतः
दशवदनालोकनाद्रोषेणोद्गतैःस्वेदैर्लंघितमतिक्रांतललाटतटंयस्येतीर्थोक्ता॥ ५९॥प्रत्युत्तरवाक्य
माह॥णिव्वूढजंपिआणंआसंयइतुम्हववसिअंमहहिअं॥किंउणभरोव्वहोहिइसअंअणिव्वविअदहमुहो
मजुभु॰॥निर्व्यूढजल्पितानामध्यवस्यतियुष्माकंव्यवसितंममहृदयं॥किंपुनर्भरइवभविष्यतिस्वयमनिष्ठा
पितदशमुखोममभुजः॥ ममहृदयकर्तृनिर्व्यूढजल्पितानांनिर्वाहितस्वप्रतिज्ञानांयुष्माकंव्यवसितंकर्मअ
ध्यवस्यतिसिद्धत्वेनजानातीत्यर्थः॥ किंपुनःकिंतुस्वयमात्मनाऽनिष्ठापितदशमुखोभवद्भिरेवनाशितत्वाद
विनाशितरावणःसन्नेषममभुजोभारइवभविष्यतिअकृतैवंविधकार्यत्वादुद्वहनेगुरुरेवस्यादितिमयेवहंत
व्यइतिभावः॥६०॥पुनस्तदेवाह॥कुंभसपहत्थस्सअहरसहणिहणेणइंदइस्सअसमरे॥दसकंठमुहवडिअं
केसरिणावणगअंबमाहरहमहं॥कुंभस्यप्रहस्तस्यचतुष्यतनिधनेनेंद्रजितश्चसमरे॥दशकंठमुखपतितंके
सरिणावनगजमिवमाहरत्तमृमाहिसुग्रीवनीललक्ष्मणयथासंख्यसमरेकुंभस्यप्रहस्तस्यचेंद्रजितश्चनिध
नेनयुयंतुष्यतकृतस्वस्वकार्यत्वात्ममकेसरिणोमुखपतितंसमुखगतंवनगजमिवदशकंठमाहरत्तमा
आच्छिद्यमांगृन्हीततथासत्यानंनाक्षिप्तगजःसिंहइवाहमकृतार्थएवस्यामित्यपेक्षयाव्यज्यतेकेसरिणावन
गजमिवेतिक्रमादुपमावा॥६१॥अथरावणस्यशरत्यागमाह॥ताणअकहंपअत्तंवोच्छिंदंतसदहमुहस्स
रणमुहे॥उम्मूलिउंपअत्तोअगाकंववधम्मिकइवलंसरणिवहो॥ तेषांचकथांप्रवृत्तांव्यवच्छिंदतोदशमुख
स्यरणमुखे॥उन्मूलयितुंप्रवृत्तोऽग्रस्कंधेकपिबलंशरनिवहः॥वपुनर्दशमुखस्यशरनिवहोरणमुखेऽग्रस्कं
धेसैन्याग्रेस्थितमित्यर्थात्कपिबलमुन्मूलयितुंप्रवृत्तोऽभवदित्यर्थादतएवतेषांरामादीनामित्थंप्रवृत्तांकथांव्य २५२

वच्छिंदतोविघटयतःआकस्मिकरावणशरत्यागेनसर्वेसंभ्रांताबभूवुरित्यर्थः॥६२॥अथरामरावणयोर्युद्धमा
ह॥तोदोण्हविसमसारंबाणवहप्फिडिअतिअसपेक्खिज्जंतं॥एक्कअरमरणगरुअंजाअंरामस्सदहमुहस्स
अज्जुज्झं॥ततोद्वयोरपिसमसारंबाणपथस्फेटितत्रिदशप्रेक्ष्यमाणं॥एकतरमरणगुरुकंजातंरामस्यदश
मुखस्यचयुद्धं॥ ततोरावणशरपातानंतरंरामस्यदशमुखस्यचद्वयोरपियुद्धंजातंरामेणरावणःप्रतीष्ट
इत्यर्थः॥किंभूतसमसारंसमबलएवबाणयथास्फेटिताबाणपातभियाबहिर्भूयस्थितायेत्रिदशास्तैःप्रेक्ष्य
माणमाकाशादित्यर्थादेवएकतरस्यमरणेनगुरुकंसातिशयं॥ ६३॥अथरामोरसिबाणप्रहारमाह॥तोक
ड्ढिऊणचावंकुण्डलमणिकिरणघडिअजीआबंधं॥मुक्कोरामस्सउरेपढमंहअबंधुणादहमुहेणसरो॥ततः
कृष्ट्वाचापंकुंडलमणिकिरणघटितज्याबंधं॥मुक्तोरामस्योरसिप्रथमंहतबंधुनादशमुखेनशरः॥ ततोयु
द्धारंभानंतरंयतोहतसकलपुत्रभ्रात्रादिबंधुनाऽतएवपीडितत्वात्प्रथमंदशमुखेनरामस्योरसिशरोमुक्तः
किं।कृत्वाकुंडलमणिकिरणैर्घटितःसंबद्धोज्याबंधोयत्रतद्यथास्यादेवंचापंकृष्ट्वाआकर्णमित्यर्थः॥चाप
विशेषणंवाकुंडलेत्यादि॥६४॥अथरामक्षोभमाह॥वेअपडिएणतेणअतहधीरोविपरिकंपिओरहुणा
हो॥अथाणणिव्विसेसंसअलंजहणेणकंपिअंतेल्लोक्कं॥ वेगपतितेनतेनचतथाधीरोपिपरिकंपितोरघुना
थः॥आत्मनिर्विशेषसकलंयथानेनकंपितंत्रैलोक्यं॥वेगात्पतितेनतेनवशेरणधीरोपिरघुनाथस्तथाकंपितो
यथानेनरघुनाथेनात्मनोनिर्विशेषंसदृशंयथास्यादेवंसकलंत्रैलोक्यंकंपितंरामविपत्तिशंकित्वादितिभावः॥व
स्तुतस्तुआत्मनोनिर्विशेषंअभिन्नमात्मस्वरूपंत्रैलोक्यंकंपितंरामस्यविष्णुरूपत्वेनसर्वस्यापितदात्मकत्वात्स्व
कंपेस्वाभिन्नकंपोयुज्यतएवविश्वंभारत्वेनवातत्कंपेत्रैलोक्यकंपइतिचवयं॥६५॥अथरामशरत्यागमा
ह॥रहुणाहस्सविबाणोअणुपरिवाडिघडिअप्फुडिअकेऊरं॥दहवअणभुअणिहाअंतालवणक्खंधपरिअए
णअइगअ॰॥ रघुनाथस्यापिबाणोऽनुपरिपाटिघटितस्फुटितकेयूरं॥दशवदनभुजनिघातंतालवनस्कंधपरिच
येनातिगतः॥रघुनाथस्यापिबाणस्तालवनस्कंधेषुयःपरिचयोऽभ्यासस्तेनदशवदनस्यभुजसमूहंअतिगतोऽ

त्तिक्रम्यगतःपुरासप्ततालानेकदैवाभिनत्तद्वीर्त्यैरावणस्यविंशतिमपिबाहूनभित्वागतइत्यर्थः॥किंभूतंअनु
परिपाट्याऽनुक्रमेणघटिताएकाभिमुख्येनस्थिताअथचस्फुटिताबाणेनैवविद्धाःकेयूरायेषुतमिस्यंगदस्थान
एवभुजानभिनदित्याशयः॥६६॥अथरावणस्यबाणत्यागलाघवमाह॥अणसंधिअबाणंरहसाअड्डिअणि
राअवद्धंअणं॥समअंरक्खसवइणोअणंसरलुहुइओअरहोइधणुं॥अन्यसंहितबाणंरभसाकृष्टनिराय
तपृष्टमन्यत्॥समंराक्षसपतेरन्यरलघुकितोदरंभवतिधनुः॥राक्षसपतेर्धनुःसममेकदैवभवतिकीदृशंसंहि
तबाणंसत्अन्यत्अन्यावस्थंसमकोटिद्वयत्वात्॥रभसेनाकृष्टत्वान्निरायतपृष्टमुत्थापितपृष्ठंसदन्यत्को
टिद्वयनमनात्शरैर्लघूकृतोदरंशरत्यागेनतुछोदरंसत्अन्यद्विकटोदरत्वादितिसंधानाकर्षणत्यागानामे
ककालिकत्वेनशिक्षाकौशलमुक्तं॥६७॥अथरामस्यापितदाह॥सइसंधिअणितसरअवंगदेससइलग्ग
जीआबंधं॥दीसइसइमुक्कसरंसइमंडलिअविअडोअरंरामधणुं॥सदासंहितनिर्यत्शरंअपांगदेशसदा
लग्नज्याबंधं॥दृश्यतेसदामुक्तशरंसदामंडलितविकटोदरंरामधनुः॥रामधनुर्दृश्यतेकीदृशंसदासंहिता
ःसंतोनिर्यांतःशरायस्मादितिसंधानसमकालमेवनिर्गमनकुमुक्तंयद्वासदासंहितशरंसदानियच्छरमित्य
वस्थाद्वयकथनंएवंअपांगदेशेसदालग्नज्याबंधसदैवाकर्णकृष्टमित्यर्थः॥एवंसदामुक्तशरंअसंधानदशा
यामेवशरशून्यमित्यर्थः॥एवंसदामंडलितंमंडलाकारंसद्विकटोदरतुछोदरत्यक्तशरत्वात्यद्वासदामंडलि
तोदरंसदाविकटोदरंचेत्यर्थः॥तथाचप्रेक्षकैःयेनधनुषोयाऽवस्थाप्रतिपन्नातदृष्टिस्तामेवाग्रहीदितिहस्त
लाघवमुक्तं॥६८॥अथोभयसाधारणंकौशलमाह॥वामोपसारिअच्चिअदाहिणहत्थोअवंगदेसणिवडिओ
॥चावेसुअतहणिमिआताणंदीसंतिअंतरालेसुसरा॥वामःप्रसारितएवदक्षिणहस्तोअपांगदेशनिपतितः॥
चापयोश्चतथानियोजितास्तयोर्दृश्यतेअंतरालेषुशराः॥तयोरामरावणयोरुभयोरपिवामोहस्तःप्रसारितएव
दंडाकारएवदृश्यतेऽथापिधनुष्टादक्षिस्तुअपांगदेशेनिपतित्एवकृष्टधनुष्टात्तथाचापयोश्चनियोजिताःसंहि २५३
ताःसंतःशराअंतरालेषुलक्ष्यलक्ष्यकयोस्तयोरेवमध्येषुदृश्यंतेधारावहित्वात्तथाचकदाग्रहीताःकदात्यक्ताइ

त्तिनज्ञायतइतिभावः॥६९॥अथरामस्यरावणशराभिघातमाह॥दहमुहविसज्जिएणअसरेणसीआविऊ
असइसंतत्तं॥हिअअंअमुक्कधीरंणिहाअभिणंपिराहवेणणाअम्॥दशमुखविसृष्टेनचशरेणसीतावि
योगसदासंतप्तं॥हृदयंअमुक्तधैर्यनिघातभिन्नमपिराघवेणनज्ञातं॥दशमुखस्यक्तेनचशरेणनिघातं
संघट्टविशेषस्तेनभिन्नमपिताडितमपिहृदयंराघवेणनज्ञातंसीतावियोगेनसदासंतप्तयतःसंतापेनैव
बधिरीकृतत्वादितिभावःनहिप्रौढविषमूर्छितमपिजनंविषांतरंमूर्छयतीत्याशयःअतएवअमुक्तधैर्यधैर्य
विशिष्टमित्यर्थः॥७०॥अथरावणस्यरामशराभिघातमाह॥रहणाहपेसिएणअसरेणसमुहागअस्सरक्ख
सवइणो॥भिण्णाणिडालवट्टेणअसेफुडभिउडिविरअणाविद्दविआ॥रघुनाथप्रेषितेनचशरेणसंमुखागत
स्यराक्षसपतेरावणस्यललाटपृष्टंभिन्नंदारितंनचास्यललाटपृष्टस्यपूर्वकालएवक्रोधादुत्पन्नास्फुटाभ्रुकु
टिविरचनाविद्राविताल्याजिताललाटस्यभेदेपिभ्रुकुटिसत्वेनवीररसोत्कर्षउक्तः॥७१॥अथरावणस्यमू
र्छामाह॥तोसेमुछाविहलोलोहिअणीसंदभरिअलोअणणिवहो॥वारंवारपअट्टोभमिउंबाहुसिह
रेसुमुहसंघाओ॥ततोस्यमूर्छाविह्वलोलोहितनिस्पंदभृतलोचननिवहः॥वारंवारप्रवृत्तोभ्रमितोबा
हुशिखरेषुमुखसंघातः॥ततःशराभिघातानंतरंअस्यरावणस्यमुखसंघातोबाहूनांशिखरेषुस्कंधेवारं
वारंप्रवृत्तउत्थायोत्थायनिपतितःसन्भ्रमितोघूर्णितःतथाचप्रहारदाढ्यमुक्तंकिंभूतोमूर्छयाविह्वलोऽसं
वृत्तःएवंलोहितस्यनिस्पंदेनव्याप्तलोचनसमूहस्तेषामधोवर्तित्वादितिभावः॥७२॥पुनरपिरावणशर
त्यागमाह॥तोगअमोहुम्मीलोणअणहुआसणपइत्तपत्तणपम्हं॥मुहँअइसरोसाअड्ढिअविइअमुहा
वंगमिलिअपुखबाणं॥ततोगतमोहोन्मीलितनयनहुताशनप्रदीप्तपत्रणापक्ष्माणं॥मुंचतिसरोषाकृष्टद्वि
तीयमुखापांगमिलितपुंखबाणं॥ततोमूर्छानंतरंगतमोहत्वादुन्मीलानयनोन्मीलनंयस्यसउन्मीलित
नयनोरावणोबाणंमुंचतिकिंभूतंराक्षसस्वाभाव्यादमर्षाद्भूतेननयनहुताशनेनप्रदीप्तानिकिंचिज्ज

लितानिपत्रणापुरवस्थःपक्षस्तस्यसपक्ष्माण्यग्राणियत्रतंएवंसरोषाकृष्टत्वात्॥द्वितीयमुखस्यपुरोवर्तिमुख
पृष्टवर्तिमुखस्यापांगेमिलितःपुंखायस्येत्याकर्षणोत्कर्षणक्रोधोत्कर्षःसूचितः॥७३॥पुनरपिरामशरस्या
गमाह॥तोसोखअणलणिहोकिरणसहस्सेहिंणिब्भरंतदसदिसो॥रहुवइसरराहुमुहेपवेसूरमंडलंव
णिउड्डो॥ततःसक्षयानलनिभःकिरणसहस्रैर्निर्भ्रियमाणदशदिक्॥रघुपतिशरराहुमुखेपथ्यर्द्धेसूरमं
डलमिवनिमग्नः॥ततस्यागानंतरंसरावणबाणःअर्द्धपथिरघुपतिक्षिप्तःशराएवराहुस्तन्मुखेसूर्यमंडल
मिवनिमग्नः॥राहुणाभानुरिवरामशरेणकवलीकृतइत्यर्थः॥सूर्यसाम्यमाह॥कीदृक्क्षयानलतुभ्यःआ
ग्नेयत्वादेवकिरणसहस्रैर्निर्भ्रियमाणाःपूर्यमाणादशदिशोयेनसतथारविरथैवमेवेत्यर्थः॥७४॥अथरा
मस्यचरमबाणसंधानमाह॥रहुणाँहोविसंधीरंउक्करिसेऊणअगाहत्थेणसरं॥असमणलाइअव्वंपेलइफु
ल्लकमलाअरंबदहमुहं॥रघुनाथोपिसधैर्यंउत्कृष्याग्रहस्तेनशरं॥आसन्नलवितव्यंप्रेक्षतेफुल्लकमला
करमिवदशमुखं॥रघुनाथोपिसधैर्ययथास्यादेवहस्ताग्रेणशरमुत्कृष्यतूणादाकृष्यआसन्ननिकटए
वलवितव्यंछेदनीयंफुल्लकमलानामाकरंसरइवदशमुखप्रेक्षतेअनेनानाकमलतुल्यनानामुखसत्वा
वदाकरत्वेनरावणस्याप्रेक्षामालिकोप्याकरेफुल्लपुष्पाणिप्रथमंपश्यतिपश्चाद्वचिनोतीतितन्मुखानां
पश्चाच्छेदनीयत्वंगम्यते॥७५॥अथशरसंधानमाह॥रामोसंधेइसरंबिभीसणंतेणवलइरक्खसल
च्छी॥दहमुहविणासपिसुणंफुरइअसीआइतक्खणंवामच्छं॥रामःसंदधातिशरंभीबिषणंतेनवलतिरा
क्षसलक्ष्मी॥दशमुखविनाशपिशुनंस्फुरतिचसीतायास्तत्क्षणंवामाक्षि॥रामःशरंधनुषिसंदधातितथा
सतिरावणवधनिर्णयाद्राक्षसानांलक्ष्मीरामपक्षीयत्वेनभयाभावापचितत्वाच्चबिभीषणस्यातेनपार्श्वेनव
लतिबक्रीभवतितमाश्रयितुमुपक्रमतइत्यर्थः॥अन्योपिभीताभयहेतुपक्षीयमाश्रयतइतिध्वनिः॥चपुन २५४
स्तत्क्षणमेवदशमुखविनाशसूचकंसत्सीतायावाममक्षिस्फुरतिवेपतेस्त्रीणांवामाक्षिस्पंदोऽभीष्टसूचकइ

तिभावः॥७५॥अथरावणस्यापशकुनमाह॥वामंणिसिअरणअणंरहुवइणोदाहिणंवफुंदइणअणं॥बंधु
वहरज्जपिसुणपप्फुरइत्तिविहीसणस्सलोअणजुअलं॥वामंनिशिचरनयनंरघुपतेर्दक्षिणंचस्पंदतेनय
नं॥बंधुवधराज्यपिशुनंप्रस्फुरतिबिभीषणस्यलोचनयुगलं॥निशिचरस्यरावणस्यवामंनयनंस्पंदते
मरणसूचकत्वात्॥रघुपतेश्चदक्षिणंनयनंस्पंदतेऽभीष्टभार्यालाभकथकत्वात्॥बिभीषणस्यलोचनयुगलं
प्रस्फुरतिवेपतेरावणरूपबंधुवधानिष्टसूचकत्वेनवामं॥निजराज्यलाभरूपाभीष्टसूचकत्वेनदक्षिण
मित्यर्थः॥७६॥अथरामस्यधनुराकर्षणमाह॥वच्छभरंतुच्छंगोसंधिअबाणेधणुम्मिकड्डिज्जंते॥रामसरप
त्तणेहिंवउत्थुसिआसुरवहूणवाहत्थवआ॥वक्षोभ्रियमाणोत्संगेसंहितबाणेधनुषिकृष्यमाणे॥रामशरप
त्रेणेरिवउत्प्रोंछिताःसुरवधूनांबाष्पस्तबकाः॥वक्षसाहृदयेनभ्रियमाणाःपूर्यमाणउत्संगोयस्येत्याकर्णाकृ
ष्टत्वंचापस्यहृदयस्यवोत्साहोत्फुल्लत्वंहृदयंपरिपूर्यप्रहारःकृतइतिलोकप्रसिद्धिरप्युक्तातादृशेसंहितबा
णेसतिरामेणेत्यर्थात्॥सुरवधूनांबाष्पस्तबकारामशरस्यपत्रेणपुंखवर्तिपक्षैस्तैरिवउत्प्रोंछितामार्जिताः
रामशराकर्षणसमकालमेवसुरवधूनामानंदादश्रुप्रमार्जनंजातमित्यस्यसंहितरामशरपक्षप्रोंछनहे
तुकत्वमुत्प्रेक्षितंअन्यत्राप्यश्रुवस्त्रादिश्लक्ष्णद्रव्येणप्रोंछ्यतइतिध्वनिः॥७७॥अथरावणशिरःछेदमा
ह॥अवरिअसोरहुवइणावारंवारेणचंदहासच्छिण्णो॥एक्केणसरेणलुओएक्कमुहोदहमुहस्समुहसंघाओ॥
रुचनंतरंचसरघुपतिनावारंवारंचंद्रहासच्छिन्न॥एकेनशरेणलून एकमुखोदशमुखस्यमुखसंघातः॥
धनुराकर्षणानंतरंचरघुपतिनादशमुखस्यमुखसमूह एकेनशरेणएकंमुखमुपक्रमोयस्यसएकोप
क्रमःसन्लूनएकदैवछिन्नइत्यर्थः कीदृक्वारंवारंशिवाराधनसमयेचंद्रहासेनरावणखड्गेनछिन्नोपि
तथाचयएवक्रमिकछेदनपुनःपुनरुत्तिष्ठतिसएवरामशरेणैकदाखंडितइतिपुनरनुत्थानंव्यज्यतेरामेणे
वपूर्वंभूयोभूयःचंद्रहासेनक्रमशःछिन्नत्वादुत्थितमितितदानीमेकदैवशरेणछिन्नत्वान्नोत्थितइतिके ३

चित्‌॥७८॥अथरावणपतनमाह॥अविहत्तकंठगरुउ०छिण्णोविदसाणणस्सहोइभअअरो॥धरणिअलु
त्तिणस्सवणिअअछेअपडिउट्ठिउ०मुहणिवहो॥अविभक्तकंठगुरुकःछिन्नोपिदशाननस्यभवतिभय
करः॥धरणितलोत्तीर्णस्यैवनिजकछेदप्रत्युत्थितोमुखनिवहः॥धरणीतलंउत्तीर्णस्यभूमिपतितस्यदशा
ननस्यछिन्नोपिमुखनिवहोभयंकरोभवतिकीदृकअविभक्तःकंठसन्नगुरुकःकंठविभागाभावेनादरस्था
नंजीवित्वभ्रमादित्यर्थः॥उत्प्रेक्षतेनिजकछेदेभ्यःप्रत्युत्थितइवपूर्ववत्पुनरुत्पन्नइवअतोप्यभिनवोत्पत्ति
भ्रमेणसर्वेषामाशंकाविषयइतिभावः छेदेपिकबंधलग्नस्यैवभूमौपतनमितिप्रहारघेलावमुक्त॥७८॥
अथरावणजीवतिःक्रमेणमाह॥तस्सअहअस्सरणमुहेरक्खसणाहस्सअहिमुहअप्पाणो॥दसहिंविमु
हेहिसमअंसिहाकरालोबहुअवहोणिक्कंतो॥तस्यचहतस्यरणमुखेराक्षसनाथस्याभिमुखमात्मा॥द
शभिरपिमुखैःसममशिखाकरालइवहुतवहोमिःक्रांतः॥रणमुखेहतस्यचतस्यराक्षसनाथस्यात्मादश
भिरपिमुखैःसममेकदैवअभिमुखंसमुखनिःक्रांतःशरीराद्बहिर्भूतइत्यर्थः।शिखाभिःकरालःसच्छिद्रो
दंतुरोबाहुतवहइवतेजोमयत्वाद्दशधाविभक्तस्यजीवस्यबहुशिखवह्नित्वेनोत्प्रेक्षा॥७९॥अथरामस्यय
द्धोपसंहारमाह॥अहणिहअम्मिदहमुहेऊससिअम्मिअसंमत्तउ०तेल्लोक्के॥वअणम्मिअउप्पुसिआभि
उडीउ०आरिअंचरामेणधणु॥अथनिहतेदशमुखेउच्छ्वसितेचसमंततस्त्रैलोक्य॥वदनेचोत्प्रोच्छिताभ्रु
कुटिरवतारितंचरामेणधनुः॥अथजीवोत्क्रमणानंतरंदशमुखेनिहतेमृतेत्रैलोक्येचसमंततःसर्वतउ
च्छ्वसितेसजीवेउर्ध्वश्वासविशिष्टेवायंत्रणाभावादुत्थितेआनंदादुत्फुल्लेवारामेणवदनेभ्रुकुटिरुत्प्रोच्छि
तानिवर्तिताधनुश्चअवतारितंसहितज्यंकृतमित्यर्थः॥कृतकार्यत्वादितिभावः॥८०॥अथरावणशोभामा
ह॥णिद्दअबंधुप्पिआजाणंतीविक्कमणिसाअरवइणो॥माअत्तिपरिगणेंतीणमुअइणिहअंपिरावणंरा
असिरी॥निर्दयबंधूद्विग्नाजानतीविक्रमंनिशाचरपतेः॥मायेतिपरिगणयंतीनमुंचतिनिहतमपिरावणंरा

जश्रीः॥निशाचरपतेर्विक्रमंजानतीसतीतन्मरणंमायाइतिपरिगणयंतीविचारयंतीराजलक्ष्मीर्निहतमपि
रावणनमुंचति॥मृतोपिरावणोराजशोभयानत्यक्तइतिभावः॥तत्रतत्पराक्रमाध्यवसायेनमायाबुद्धिहेतुकत्व
मुत्प्रेक्षितंराजश्रीःकिंभूताउपेक्ष्यगतत्वेनदयाशून्योबंधुदशमुखोयस्याःसानिर्दयबंधुरतएवोद्विग्नाव्याकु
लचित्तापिणिगअबंधुप्पिएतिसम्यक्पाठोनिर्गतबंधुत्वादुद्विग्नेत्यर्थः॥८१॥अथबिभीषणरोदनमाह॥
ताहेविभीसणस्सविअंतोहिअअम्मिबंधुणेहुप्पण्णो॥दासरहिणोविपुरउ०मुक्कोविअलोअणेहिंवाहत्थवउ०
तदाविभीषणस्याप्यंतरहृदयेबंधुस्नेहोत्पन्नः॥दाशरथेरपिपुरतोमुक्तएवलोचनाभ्यांबाष्पस्तबकः॥तदाशर
थेरपिपुरतोविभीषणस्यापिलोचनाभ्यांबाष्पस्तबकोमुक्तएवयद्यपिमोक्तुंनयुज्यतेतथापीत्येवकारार्थः॥तत्र
हेतुमाहकीदृकअंतर्हृदयेहृदयाभ्यंतरेरावणरूपबंधुस्नेहादुत्पन्नस्तथाचबाहुल्याद्धर्तुनपारितइतिभावः॥
८२॥अथबिभीषणप्रलापमाह॥णिहअम्मिअदहवअणेविहीसणोणिंदिआमरत्तणसद्दो॥परिदेवि
उंपउत्तोमरणसमब्भहिअदुःखदिण्णआसो॥नहतेचदशवदनेबिभीषणोनिंदितामरत्वशब्दः॥परिदेवितुं
प्रवृत्तोमरणसमभ्यधिकदुःखदत्तायासः॥बिभीषणःपरिदेवितुंपरिदेवनंकर्तुंप्रवृत्तश्चकीदृशवदनेनिह
तेसतिनिंदितोऽमरत्वशब्दोयेनसतथाअमरजेतुरपिरावणस्यचेन्मरणंतदाऽमरत्वेनापिकिंअमरत्वंकुत्र
वेत्याशयः॥एवंनिजमरणात्समभ्यधिकेनतत्दुःखादपिमहतारावणदुःखमरणेनदत्तआयासःक्लेशोय
स्मैसतथा॥८३॥त्रिभिःप्रलापवचनमाह॥उजौअअजेउणजमंदिट्ठोइच्छारूहतुमेजमलोउ०॥दीसिहिसिक
हणुपत्थिवइण्हितंचेअसेसजणसामण्णम्‌॥यएवजित्वायमंदृष्टइच्छारूपस्त्वयायमलोकः॥द्रक्ष्यसिकथंनुपा
र्थिवइदानींतमेवशेषजनसामान्यं॥हेपार्थिवरावरावणयमंजित्वायएवमयलोकस्त्वयाइच्छारूपस्वेच्छयादृ
ष्टःपरिभ्रमत्येत्यर्थः॥इदानींमृत्यौसतित्वमेवयमलोकंशेषजनैःप्राकृतजनैःसामान्यंसाधारण्यंयथास्यात्तथा
कथंनुद्रक्ष्यसियमशासनीयत्वेनेत्यर्थः॥८४॥एक्केणरक्खसाहिवपुव्वंअवहीरिउ०वोएसेणविते।समणिह

णेणरणमुहेपडिमुक्कंसावसैरकुंभअणेणतुहं॥एकेनराक्षसाधिपपूर्वमवधीरितोपदेशेनापिते॥समनिधनेनरण
मुखेप्रतिमुक्तकेवलंकुंभकर्णेनतव॥हेराक्षसाधिपएकेनकेवलंकुंभकर्णेनतवप्रतिमुक्तंभरणपोषणाद्युप
कारस्यप्रतिमोचनंकृतंप्रत्युपकारित्वादित्यर्थः॥भ्रातृत्वाविशेषेपिनमयेतिभावः॥किंभूतेनतेनतवअवधीरि
तउपदेशोयेनपूर्वंप्रतिक्षिप्तभवद्बिदाज्ञेनापिस्वतंत्रत्वात्॥प्रतिमोचनेहेतुमाहपुनःकिंभूतेनरणमुखेभवन्म
रणेनसमंनिधनंयस्यतेनसंप्रतिभवतासहभवदर्थेत्यक्तजीवितेनेत्यर्थः॥८५॥पत्थिवतुमंमुअन्तोसमरूह
दुक्खेहिबंधवेहिंअमुक्कं॥जइहधम्मपहाणोधम्मपहाणाणकोगणिज्जउपुरओ॥पार्थिवत्वांमुचन्समरूख
दुःखेर्बांधवैरमुक्तः॥यद्यहंधर्मप्रधानोःधर्मप्रधानानांकोगण्यतांपुरतः॥हेपार्थिवसमानरूखदुःखैर्बांधवैःकुंभ
कर्णादिभिरमुक्तंत्वांमुचन्त्वयासमंपरलोकमगच्छन्नहंयदिधर्मप्रधानेधार्मिकस्तदाधर्म्मप्रधानानांमध्ये
कःपुरतःप्रथमंगण्यतांनकोपीत्यर्थस्तथाचाहमेवाधार्मिकाणांप्रथमंगण्यइतिभावः॥८६॥अथदाभ्यांरा
मप्रतितद्वचनमाह॥आहासइअरहुवईमरणसमोभहिद्धबाहुथीडो॥बंधुवहागअदुक्खोगिम्हुम्हासूक्ख
णइमुहोव्वमहिहरो॥आभाषतेचरघुपतिंमरणसमभ्यधिकरुद्धबाष्पोत्पीडः॥बंधुवधागतदुःखोग्रीष्मोष्म
शुष्कनदीमुखइवमहीधरः॥सरघुपतिमाभाषतेचकिंभूतःरमणादपिसमभ्यधिकेयथास्यादेवंरुद्धोबाष्पोत्पी
डोयेनयस्यवासतथावचनेसोष्टवायकृतसंतापजनितमुखशोषेणवाजातमश्रुनिरोधंमरणादप्यधिकंम
न्यमानइत्यर्थः॥एवंभूतारावणादीनांवधेनगतदुःखःकइवग्रीष्मोष्मणाशुष्कंनदीमुखयस्यतादृशोमहीधर
इवतथाचप्रथमपक्षेनदीमुखशोषबाष्पनिरोधःबिभीषणयोर्द्वितीयपक्षेत्वधिकात्ग्रीष्मोष्मसंतापयोस्तो
ल्यादुपमा॥८७॥पहुवीसज्जेहिमहंतादहमुहकुंभअणवलणणिवडिओ॥पच्छापरलोअगअंछिवामिसी
सम्मिमेहणाअंचरूअं॥प्रभोविसृजमातावद्दशमुखकुंभकर्णचरणनिपतितः॥पश्चात्परलोकगतस्पृशामि
शीर्षेचमेघनादंचरूतं॥हेप्रभोराममाविसृजआज्ञापयतावत्तदाप्रथमंदशमुखकुंभकर्णयोःचरणेषुनिपति

तःसन्पश्चात्परलोकगतंमृतंमेघनादंचरूतंशीर्षेस्पृशामिपरामृशामीत्यर्थः॥तावद्विसृजयावदेतावत्करोमी
तिवा॥८८॥अथरावणादिसंस्कारमाह॥महिअलपडिअविसंठुलविहीसणविलावजाआणुअंपेण॥रामे
णाविपवणस्सुओआणत्तोरक्खसाहिवइसक्कारे॥महीतलपतितविसंष्ठुलविभीषणविलापजातानुकंपेन
रामेणापिपवनसुतआज्ञप्तोराक्षसाधिपतिसंस्कारे॥महीतलेपतितस्यविसंष्ठुलस्यविपर्यस्तकरचरणादेर्बि
भीषणस्यविलापाज्जातानुकंपेनरामेणापिराक्षसाधिपतेःसंस्कारेदेहादौपवनसुतोहनूमानानन्नोनियुक्तइ
त्यर्थः॥८९॥अथसुग्रीवसाहाय्योपसंहारमाह॥णिहअम्मिअदहवअणेआसंघत्तेणजणअतणआलंभ
॥सुग्गीवेणविदिट्ठोपवुवआरस्ससाअरस्सवअत्तो॥निहतेचदशवदनेअध्यवस्यताजनकतनयालंभं॥सु
ग्रीवेणापिदृष्टःप्रत्युपकारस्यसागरस्येवांतः॥चपुनर्दशवदनेनिहतेसतिजनकतनयायाःसीतालंभंप्राप्तमध्यव
स्यतास्थिरीकुर्वतासुग्रीवेणापिसागरस्येवप्रत्युपकारस्यअंतोदृष्टःयथासागरस्यपारोदृष्टस्तथासीतोद्धाररूप
प्रत्युपकारस्यनिर्वाहरूपःपर्यंतोदृष्टइतिसहोपमादुत्तरत्वेनसागरतुल्यस्यप्रत्युपकारस्यपारोदृष्टइतिसाध
र्म्योपभावा॥९०॥अथसरथमातलिविसर्जनमाह॥काऊणअसुरकज्जंरहुवइवीसज्जिएणकइअणपुरओ
जलहरगुप्पंतधओसग्गाहिमुहोरहोकओमाअलिणा॥कृत्वाचसुरकार्यंरघुपतिविसृष्टेनकपिजनपुरतः॥
जलधरव्याकुलायमानध्वजःस्वर्गाभिमुखोरथःकृतोमातलिना॥सुराणांरावणवधरूपकार्यंकृत्वाकपिजनानां
पुरतोरघुपतिनाविसृष्टेनाज्ञप्तेनमातलिनाचरथःस्वर्गाभिमुखःकृतऊर्ध्वंप्रेरितइत्यर्थः॥किंभूतःजलधरेषुव्या
कुलायमानोध्वजोयस्यसतथाऊर्ध्वतोयंत्रणात्तिर्यग्भावादितिभावः॥९१॥अथरामस्यायोध्यासमागमेनाश्वा
सकमुपसंहरति॥घेत्तूणजणअतणअंकंचणलट्ठिंबहुअवहम्मिविसुद्धं॥पत्तोपुरींरहुवईकाऊभरहस्ससप्फ
लंअणुराअं॥गृहीत्वाजनकतनयांकांचनयष्टिमिवहुतवहेविशुद्धं॥प्राप्तःपुरींरघुपतिःकर्तुंभरतस्यसफल
मनुरागं॥रघुपतिःपुरीमयोध्यांप्राप्तःकिंकृत्वाजनकतनयांगृहीत्वासीतयासहेत्यर्थः॥किंभूतांकांचनयष्टिमिव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

हुतवहेवन्हौविशुद्धामुत्तीर्णायथावन्हौप्रवेशिताकांचनयष्टिरधिकरोचिष्मतीभवतितथारक्षोगृहनिवासजन्य
परिवादमार्जनायवन्हौपरिक्षितासीताप्यधिकरोचिष्मतीवृत्तेतिनिर्दोषत्वमुक्तंकिमर्थंभरतस्यभक्तिरूपम
नुरागंसफलंकर्तुंरामसिंहासनानवरोहणादिरूपायास्तद्भक्तेरामसमागमएवफलमित्याशयः॥यद्वाभरत
स्यकृतेस्वीयस्नेहरूपमनुरागंसफलंकर्तुमित्यर्थः॥समासोसफलत्वोत्कीर्त्तनेनशुभसूचनरूपंमंगलमप्यु
क्तं॥९२॥अथग्रंथसमाप्तिमाह॥एत्थसमप्पइएअंसीआलंभेणजणिअरामब्भुदअं॥रावणवहत्तिकव्वं
अणुराअंकसमत्थजणणिद्देसं॥अत्रसमाप्यतेएतत्सीतालंभेनजनितरामाभ्युदयं॥रावणवधइतिकाव्यंअ
नुरागांकंसमस्तजननिर्द्वेषं॥एततरावणवधइतिनामकाव्यंअत्रसमाप्यतेकविनेत्यर्थात्कर्मकर्तरिवाणतदे
वस्कंधकंतत्समाप्तिस्थानमित्यर्थः॥किंभूतंसीतायालंभेनप्राप्त्यारामस्याभ्युदयोयत्रवर्णितस्तेनेत्यर्थः॥पुनः
कीदृशंकंसीतांप्रतिरामानुरागस्यसेतुबंधरावणवधादिरूपोंऽकःचिन्हंयत्रतत्तज्ज्ञापकत्वादथत्वंचअनुराग
पदरूपोंऽकःमत्याश्वासकांतेःसाधारणंचिन्हंयस्येत्यर्थः॥एवंसमस्तजनस्यद्वेषशून्यसीतारामसंबंधित्वेना
नुरक्तंसर्वजनमित्यर्थः॥९३॥सीतासंप्राप्तिर्दशयारामदासप्रकाशिता॥रामसेतुप्रदीपस्यपूर्णापंचदशीशि
खा॥१५॥ ॥सेतुग्रंथसमुद्रादर्थामणयोमयाकृष्टाः॥उपदेशसहकृतेंद्रियपटुभिःप्राज्ञैःपरीक्ष्यंतां॥चक्षु
र्भूतारिशीतांशुभि १६५२ रभिगणितेसाहसांकस्यवर्षेवर्षेजह्लालदीद्रक्षितिमुकुटमणेरप्यनंतागमाभ्यां॥
४०॥ ॥पंचम्यांशुक्लपक्षेनभसिगुरुदिनेरामदासेनराज्ञाविज्ञेनापूरितोयंतिथितुलितशिखोरामसेतुप्र
दीपः॥सूर्याचंद्रमसोरुदंचतिकथायावत्तथादीप्यतेयावत्कौस्तुभकांतिजालजटिलावैकुंठवक्षःस्थली
गंगावीचिभिरंचितोहरजटाजूटःसमुज्जृंभतेयावत्तावदकब्बरेणजगतीराजन्वतीवर्त्तताम्॥ ॥इतिश्रीश्री
मन्निखिलमहीमहेंद्रमुकुटमणिमयूखमंजरीपिंजरीकृतचरणकमलसकलसार्वभौमशिरोमणिश्री
मदकब्बरजलालदीद्रकृपाकटाक्षवीक्षितभानुभक्तिपरायणहृदयहर्म्यनिवासितनारायणमहाराजाधिरा

जश्रीश्रीरामदासविरचितोरामसेतुप्रदीपोनामग्रंथःपरिपूर्णः॥ ॥शुभमस्तु॥ ॥संवत् १६८७
समयेभाद्रपदशुक्लपक्षेअष्टम्यांलिखितोयंमहात्मना॥ ॥ ॥श्रीराम॥ ॥